B. 9.
No 26.

भगवानलालेन लेखितम् पातंजलभाष्य-
वार्त्तिकम् सं १९२९

श्रीगणेशाय नमः सद्गुरुकृष्णाभ्यां नमः यस्मिन्मात्ररसोपि नित्यविमलो यो ध्येयगौरीश्वरो हेयैः क्लेशमुखै
र्गुणैर्विरहितो मुक्तः सदा निर्गुणः सोस्मान् बुद्धिगुणैः स्वयं निगडितान् स्वान् कृपासागरो दीनान्मोचय
तु प्रभुर्गुणमयं पाशं दहन्निस्सदा १ श्रीपातंजलभाष्यदुग्धजलधिर्विज्ञानरत्नाकरो वेदव्यासमु
नीन्द्रबुद्धिखनितो योगीन्द्रपेयामृतः मद्दैवैरमृतं तदत्र मथितं विज्ञानभिक्षोरिह श्रीमद्वार्त्तिकमंदराग्र
हस्तेरोगं ध्यानदैर्गुण्यते २ सर्ववेदार्थसारोत्र वेदव्यासेन भाषितः योगभाष्यमिषेणातो मुमुक्षुगणाभि
वृंगतिः ३ गंगाद्याः सरितो यद्वदब्धेरंशेषु संस्थिताः सांख्यादिदर्शनान्येवमस्यैवांशेषु कृत्स्नशः ४ निर्वि
घ्नग्रंथसमाप्तये योगप्रवर्त्तकमनंतमीश्वरं स्मरन् शिष्याणां शास्त्रग्रहणानुष्ठानादावप्यप्रतिबंध
न्ततराव प्रार्थयते यस्त्यक्त्वेति यः स्वस्याद्यरूपं शेषाख्यं त्यक्त्वा स्वांशेन ततो विभक्तो भूत्वा लोकानुग्रहा प
र्थं बलरामादिरूपेण विर्भवति स वो युष्मान् शिष्यान् पालयेत् शास्त्रार्थग्रहणादिप्रतिबंधनिवार
णादित्यर्थः शेषं सुगमं १ अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति यतो निर्विषय
स्यास्य मनसो मुक्तिरिष्यते अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा तावदेव निरोद्धव्यं यावद्धृदि ग
तं क्षयं एतज्ज्ञानं च ध्यानं च शेषोन्यो ग्रंथविस्तर इत्यादिश्रुतिस्मृतिभ्यो मुक्तिर्योगात्तथा योगः सम्यक्ज्ञा १
नान्महीपते तपस्विभ्योधिको योगी ज्ञानिभ्योपि मतोधिक इत्यादिस्मृतिषु च योगो मोक्षहेतुतया

विहितः तत्र योगः किंस्वरूपः किमुपायः केन वा द्वारेण ज्ञानमोक्षयोः कारणमित्यादिकं मुमुक्षूणां वि
विज्ञासितं भवति न्यायमीमांसासांख्यादिषु च ज्ञानमेव विचारितं वाहुल्येन ज्ञानसाधनमात्रत्वेन योग
: संक्षेपतः ज्ञानजन्ययोगस्तु संक्षेपतोपि तेषु नोक्तः अतो ति विस्तरेण द्विविधं योगं प्रतिपिपादयिषु
र्भगवान् पतंजलिः शिष्यावधानाय आदौ योगानुशासनं शास्त्रमारभ्यतया प्रतिज्ञातवान् अथ यो
गानुशासनं तदिदं सूत्रमारभ्य समग्रं शास्त्रं सर्वलोकहिताय भगवान् वादरायणो व्याचष्टे अथेत्य
यमधिकारार्थ इत्यादिना अधिकारशब्दो योगस्तु तत्पात्रारंभणं एवमस्य इति शास्त्रस्याधिकार्यत्वं
मुख्यमेवास्ति यत्र चार्थस्याधिकार्यत्वं उच्यते यथान्त्र्येय ज्योतिरित्यादौ तत्राधिकार्ये शास्त्रविष
यतया गौणं न दिश्याशयः एतेन शास्त्रस्यानधिकार्यत्वमनिरूप्यत्वादित्ययास्तं प्रकृतभाष्यविरोधा
दिति प्रथमाध्यायकृतमथशब्दस्य किं कृत्रापि नास्त्रीमाशंकानिरासायोक्तमयमिति अधिकारार्थो
धिकारवाचक इत्यर्थः अथशब्दस्य चोच्चारणमात्रेण मांगलत्वमपि बोध्यं शिष्यस्य शासनमनुशा
सनमनुशासनं तेन शास्त्रस्य गुरुमुखलब्धतया सूत्रकारेण प्रामाण्यं दर्शितं हिरण्यगर्भो योगस्य वक्ता
नान्यः पुरातन इति योगियाज्ञवल्क्येन हिरण्यगर्भस्यादिगुरुत्ववचनादिति सूत्रवाक्यार्थमुपसंह
रति योगस्यानुशासनं शास्त्रमधिकृतं वेदितव्यमिति शिष्यैरिति शेषः वेदितव्यमिति परस्य न सूत्र

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

स्यशिष्यावधानार्थंकर्तव्यंसूचितंःयोगस्यचफलंसूत्रभाष्ययोःस्थानेस्थानेवक्ष्यमाणंमयोत्तरः
सूत्रावतारिकायामपिसंक्षेपाद्वक्ष्यते योगलक्षणपरतयाद्वितीयसूत्रमवतारयिष्यति त
त्रपुत्रसमाधावितियोगलक्षणस्यप्रसिद्धत्वाल्लक्षणांतराकांक्षेयनास्तीत्याशंकांतरस्यापिव्या
ख्यानेनाद्यावयाकरोति योगःसमाधिःसचसार्वभौमश्चित्तस्यधर्मइति पुत्रसमाधावित्यनुशा
सनतःप्रसिद्धोयोगःसमाधिःचित्तवृत्तिनिरोधःसचसार्वभौमःसर्वासुवक्ष्यमाणासुक्षिप्ताद्य
वस्थासुसाधारणश्चित्तस्यधर्मःस्वाभाविकःजलस्यद्रवत्ववत् क्षिप्ताद्यवस्थायामपिहिय
त्किंचिद्वृत्तिनिरोधोस्त्येवेतिःतथाचालक्ष्यावस्थासुलक्षणमतिव्याप्तमितिशेषःकास्ता
सर्वाश्चित्तभूमयइत्याकांक्षायामाह क्षिप्तमित्यादि।क्षिप्तंरजसाविषयेष्ववृत्तिमत् मूढंत
मसानिद्रादिवृत्तिमत् क्षिप्ताद्विशिष्टंविक्षिप्तंसत्वाधिक्येनसमाहितमपिचित्तंरजोमात्रयांतरां
तराविषयांतरवृत्तिमत् एकस्मिन्नेवविषयेऽग्रंशिखायस्यचित्तदीपस्यसएकाग्रंविशुद्धसत्व
तयैकस्मिन्नेवविषयेवक्ष्यमाणावधीकृतकालपर्यंतमचंचलंनिवातस्थदीपवत् तथाचक्षि
प्तादित्रयेपिकिंचिदैकाग्र्यसत्वेपितत्रनास्तिप्रसंगः।निरुद्धंचनिरुद्धसकलवृत्तिकंसंस्कारमात्र २
शेषमित्यर्थःरजोधर्मस्यरागादेःप्रतिघातादेवलोकानांतमोधर्मोविषादादिस्तदपतइतिक्षिप्ता

त्यर्थेन्नमूढस्योपन्यासःउक्तातिव्याप्तिंप्रतिपादयितुमुक्तभूमिषुलक्ष्यालक्ष्यविभागंकरोति तत्र
विक्षिप्तइत्यादिना तत्रतासुपंचसुमध्येविक्षिप्तेचेतसिवर्तमानःसमाधिरस्योवकुलविक्षेप
शेषीभूतत्वान्नयोगपक्षेयोगमध्येप्रविशतिक्लेशहान्यहेतुत्वात् सुतरांतुक्षिप्तमूढयोश्चित्तयो
र्वर्तमानोसमाध्याभासोविपर्ययःअतोनक्षिप्तमूढभूम्योर्लक्ष्यत्वाप्रतिपादनेनन्यूनते
ति विक्षिप्तमुखेनाद्यभूमित्रयस्यालक्ष्यत्वमुक्त्वान्त्यभूमिद्वयमेवलक्ष्यमित्याह यस्त्वेकाग्र
इति यस्तुसमाधिरेकाग्रेचेतसिवर्तमानोध्येयंवस्तुसद्भूतंपरमार्थभूतंप्रकर्षेणद्योतयति
साक्षात्कारयतितत्रक्लेशानविद्यादीन्प्रक्षिणोतिततोपिचकारणोच्छेदाद्बंधधर्मरूपाणि
बंधनानिबुद्धिपुरुषयोर्बंधकारणानिश्लथयति अदृष्टोत्पादनाक्षमाणिकरोतितथानिरो
धमसंप्रज्ञातयोगमभिमुखंप्रत्यासन्नंकरोतिपरवैराग्यजननेनेतिशेषःससमाधिःसंप्रज्ञातो
योगइतिकथ्यतइत्यर्थःसम्यक्प्रज्ञायतेसाक्षात्क्रियतेध्येयमस्मिन्निरोधविशेषरूपेयोग
इतिसंप्रज्ञातोयोगःयद्यपिसमाधिशब्देनैकाग्रतातिशयरूपोनिरोधद्वयरूपयोगद्वयस्यांग
मेवपरिभाषिष्यतेतथापियोगद्वयमंगांगिनोरभेदविवक्षयैवसमाधिशब्देनोक्तं एवमुत्तरो
त्तरसूत्रेपियोध्यं सचसंप्रज्ञातश्चतुर्विधइत्याह सचेति।नचवितर्कानुगतादिभिर्क्लेशसाक्षात्का

रजनकत्वादिकं साक्षान्नास्तिअविद्यालेशसंपर्कादितिवाच्यं सवितर्कादिक्रमेणैवसाक्षात्कारस्व
ध्याचरमभूमिकायामनंतरप्रज्ञोदयेनभूमिकाचतुष्टयएवसाक्षात्कारसंबंधादिति॥निरुद्ध
भूमेरपिलक्ष्यत्वमाह सर्ववृत्तीति॥संप्रज्ञातकालीनासाक्षात्काररूपिणीयावृत्तिः तस्याअ
पिवक्ष्यमाणपरवैराग्येणनिरोधेजायमानेत्वसंप्रज्ञातयोगइत्यर्थः वृत्तिनिरोधश्चचित्तस्य
वृत्तिसंस्कारशेषावस्थात्मभावस्याधिकरणावस्थाविशेषमात्ररूपत्वात् निरुध्यंतेऽस्यामव
स्थायामितिव्युत्पत्तेर्वा सावावस्था संस्कारमात्रैःपरिणामश्चोरानिरोधकालेसंस्कारजातस्य
रूपस्यैवचित्तपरिणामस्यसूत्रभाष्याभ्यांवक्ष्यमाणत्वादिति॥ननुवृत्तिनिरोधोवृत्त्यभावमा
त्रमेकाग्रताविशेषोवानिरोधस्याभावमात्रत्वेवक्ष्यमाणसंस्कारजनकत्वानुपपत्तेःएकाग्र
तामात्ररूपत्वेसमाधिरूपात्संप्रज्ञाताद्भेदानुपपत्तेः उल्काहस्तोयथाकश्चित् द्रव्यमालो
क्यतत्त्यजेत् बोधेनज्ञानमालोक्यततश्चाबोधंपरित्यजेदित्यादिस्मृतिषुयावद्बुद्धिगतक्षयमितिप
बोत्तरोक्तनौ वासंप्रज्ञातस्यासकलवृत्तिशून्यत्वश्रवणाच्च ननुसंप्रज्ञातासंप्रज्ञातयोर्योगयोर्निरो
धरूपयोःकिंप्रयोजनं योगांगानुष्ठानादशुद्धिक्षयेज्ञानदीप्तिराविवेकख्यातेरितिसूत्रेणयोगांगसे
वज्ञानहेतुतायावक्ष्यमाणत्वात् संप्रज्ञातयोगकालेज्ञानस्योत्पत्तेरवश्यंभावात् ननुतद्धेत ३

तुतायाःएकत्वेनहेतुहेतुत्वंसंप्रज्ञातयोगस्य॥क्षीणवृत्तेरभिजातस्येवमणेर्ग्रहीतृग्रहण
ग्राह्येषुतत्स्थतदंजनतासमापत्तिरित्यागामिसूत्रोक्तत्वात् असंप्रज्ञातयोगस्यापितस्यज्ञान
जन्यत्वात् नवज्ञानोत्पत्त्यनंतरंमोक्षप्राप्त्यातत्साधनमपेक्षणीयं तस्यतावदेवचिरंयावन्नवि
मोक्ष्येऽथसंपत्स्ये इत्यादिश्रुतिभिर्निरपेक्षज्ञानस्यमोक्षहेतुत्वसिद्धेः अविद्याकामकर्मादिनि
वृत्तेर्हेतुत्वाभावेनपुनःसंसारानुपपत्तेश्च॥अत्रोच्यते ज्ञानेजातेप्रारब्धकर्मणादेहधारणस्या
वश्यकत्वेनतदानीमपिवाह्याभ्यंतरवृत्तिभिर्यत् दुःखमनुज्ञायतेतदपनेतृत्वंयोगद्वयस्यफ
लमस्तितथाहिवक्ष्यतिभाष्यकारःसर्वाश्चैतावृत्तयःसुखदुःखमोहात्मिकाः अतरानाःस
र्वावृत्तयोनिरोद्धव्या इति किंचज्ञानस्यप्रारब्धकर्मक्षयहेतुत्वमस्तितथायोगस्यापि विनिष्प
न्नसमाधिस्तु मुक्तिंतत्रैवजन्मनि प्राप्नोतियोगीयोगाग्निदग्धकर्मचयोचिरात् इत्यादिवाक्य
शतेभ्यःतथाचकर्मक्षयद्वाराज्ञानस्येवासंप्रज्ञातयोगस्यापिमोक्षहेतुत्वंसिद्धं तत्रचासंप्रज्ञा
तयोगेनाखिलसंस्कारदाहकेनप्रारब्धकर्माप्यतिक्रम्यत इति ज्ञानाद्विशेषः ज्ञानस्यहिप्रारब्ध
नाशकत्वेबाधिकास्तितस्यतावदेवचिरमित्यादिश्रुतिर्जीवन्मुक्तिस्मृतयश्च योगस्य
तुप्रारब्धनाशकत्वेबाधकंनास्तियतःतदर्थकर्मचयोचिरादित्येवसमर्पतेऽतःयोगस्यफलं

प्रारब्धनाशकत्वेनाधिकं नास्तिमपि कर्म कर्मविपाकोक्तप्रायश्चित्तादिवदेवातिक्रम्यद्र
ष्टितिमोचनमेव योगस्य फलं अन्यथ योगद्वयेनाखिलसंस्कारक्षये भोगसंस्कारस्य सहका
र्यभावात् प्रारब्धकर्मापि यत्फलाक्षमं च भवति इदमपि योगफलं तदुक्तं मोक्षधर्मे नास्ति सां
ख्यसमं ज्ञानं नास्ति योगसमं बलमिति वस्तुतः प्रारब्धस्याप्यतिक्रमेणास्वैच्छ्याशीघ्रमोक्षहे
तुः अपि च वृत्तिनिरोधात्मको योग एव दुःखनिवृत्त्यात्मकमोक्षे साक्षाद्धेतुः पुरुषे दुःखस्य
चित्तवृत्त्यौपाधिकत्वात् उपाधिनिवृत्तिश्चौपाधिकनिवृत्तौ चरमकारणं अतो ज्ञानेन योग
स्यान्यथासिद्धिः ज्ञानवैराग्यकर्मक्षयादीनां वृत्तिनिरोधाख्यचरमकारणद्वारैव दुःखात्यन्तो
च्छेदहेतुत्वात् वृत्त्युत्पत्तिनिरोधस्तु चरमासंप्रज्ञाते भवति यत्तु संस्कारस्यात्यन्तक्षयेण चि
त्तस्य विलयाख्यो मोक्षो भवति तत्र यावद्द्वारद्वारिभावेनापि ज्ञानस्येवासंप्रज्ञातयोगस्यापि मो
क्षहेतुत्वं सिद्धं असंप्रज्ञातयोगस्य च साक्षान्मोक्षहेतुत्वं तदा द्रष्टुः स्वरूपेऽवस्थानमिति सू
त्रकारः स्वयं वक्ष्यति मुक्तिर्हित्वान्यथाभावं स्वरूपेण व्यवस्थितिरित्यादिवाक्येभ्यश्च स्वस्व
रूपावस्थानस्यैव मोक्षत्वादिति दिक् तदेवं चित्तभूमिषु लक्ष्यालक्ष्यविवेकपूर्वकं प्रसिद्धस्य ४
योगलक्षणस्यातिव्याप्तिं मदर्थं योगलक्षणाकांक्षा उत्पादिता अतः परं लक्षणपरतयो

त्तरसूत्रमवतारयति तस्य लक्षणाभिधित्सयेति तस्य द्विविधस्य योगस्य उक्तातिव्याप्तिनि
राकरणान्यथानुपपत्त्या सूत्रद्वयेनैव लक्षणसमाप्तिर्भविष्यतीति सूचयितुमभिधित्सयेत्यु
क्तं अन्यथा हि तस्य लक्षणसूत्रं प्रवदन्ते इत्येतावन्मात्रमवक्ष्येत योगश्चित्तवृत्तिनिरोधः चित्त
मन्तःकरणसामान्यं एकस्यैवान्तःकरणस्य वृत्तिभेदमात्रेण चतुर्धा त्वदर्शने विभागात् तस्य प्र
वक्ष्यमाणा वृत्तयस्तासां निरोधः तासां लयाख्यो धिकरणस्यैवावस्थाविशेषः अभावस्या
स्यन्तेऽधिकरणावस्थाविशेषरूपत्वात् स योग इत्यर्थः नन्विदं लक्षणं संप्रज्ञातस्याव्या
पकं तत्र ध्येयाकारवृत्तिसत्त्वात् इत्याशंक्य भाष्यकार आह सर्वशब्देति सर्ववृत्तिनिरोध
इत्यवचनादित्यर्थः नन्वेवं पूर्वोक्तातिव्याप्तिः क्षिप्तादिष्वपि यत्किंचिद्वृत्तिनिरोधादिति
चेन्न तदा द्रष्टुः स्वरूपेऽवस्थानमिति वक्ष्यमाणसूत्रसाहित्येनैवास्य लक्षणत्वात् तथा
च द्रष्टुः स्वरूपावस्थितिहेतुश्चित्तवृत्तिनिरोधः क्षिप्ताद्यवस्थासु नास्तीति नातिव्याप्तिः सं
प्रज्ञातस्य च स्वरूपावस्थितिहेतुत्वं असंप्रज्ञातद्वारस्यैवेति परे तु क्लिश्नातीति च क्लेशानिति
पूर्वभाष्यानुसारेण क्लेशकर्मादिपरिपन्थित्वं योगनिरोधविशेषणं परे यथा च क्लेशक
र्मादिपरिपन्थित्वे सति चित्तवृत्तिनिरोधत्वं योगलक्षणमित्याहुः अस्य च ल

क्षणस्य क्षिप्तादिभूमिरूपेति व्याप्तिर्नोक्तीत्यस्य हेतुं क्रमेण प्रतिपादयति। चित्तं हीत्यादिना
प्रख्या तत्त्वज्ञानं अनेन सर्वे सात्त्विका गुणप्रतिपादयति। चित्तं हीत्यादिना प्रख्या तत्त्वज्ञानं अ
नेन सर्वे सात्त्विका गुणा उपलक्षिताः प्रवृत्तिः कर्म अनेन सर्वे राजसा गुणा ग्राह्याः स्थिति
रित्यारम्भगतिशक्त्यन्तानिद्रेति यावत् अनेन सर्वे तामसा गुणा ग्राह्याः एतेन क्रमात् सत्त्वरजस्त
मसाख्यानां द्रव्याणां धर्माः परार्थितत्वाद्गुणा इत्युच्यन्ते तदाश्रयत्वात् सत्त्वादिद्रव्याण्युक्ता
रंभकत्वं तद्वदेव गुणा इत्युच्यन्ते तथा च प्रख्यादिस्वभावकत्वात् चित्तं त्रिगुणं सत्त्वादिगुणत्र
यनिर्मितं रज्जुवदित्यर्थः ततः किमित्यत आह प्रख्यारूपं हीति हि शब्दो वाक्यालंकारे अव
धारणे वा चित्तसत्त्वमिति चित्तस्य सत्त्वप्राधान्यप्रतिपादनाय पुनरुक्तं प्रख्यारूपमिति च ते
जः सत्त्वव्यावर्तनायोक्तं तथा च प्रख्यास्वभावं चित्तरूपं सत्त्वं स्वोपसर्जनभूताभ्यां रजस्तमो
भ्यां संसर्गेण क्षिप्तावस्थायामणिमाद्यैश्वर्ये शब्दादिविषये चानुरक्तं भवतीत्यर्थः अतः क्षि
प्राद्यावतन्त्रातिव्याप्त्यवस्थायामणिमाद्यैश्वर्ये शब्दादिविषये चानुरक्तं भवतीत्यर्थः प्रावस्थस्य
वृत्तिनिरोधस्य स्वरूपावस्थानाहेतुत्वात् रागादिक्लेशापरिपंथित्वाद्धानतन्त्रातिव्याप्तिरिति
भावः क्षिप्तावस्थायामतिव्याप्तिं परिहृत्य मूढावस्थायामपि तां परिहरति तदेव तमसेति

उपगमन्मुखं तत्प्रियमित्यर्थः भावस्तु पूर्ववत् विक्षिप्तावस्थायामतिव्याप्तिं परिहरति तदेव प्र
क्षीणेति मोहस्तमो द्रव्यं कार्यकारणाभेदात् तदेव दर्पणस्य मलवच्चित्तसत्त्वस्यावरणं प्रक्षी
णमस्ततः प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानं सर्वविषयाकारवृत्तिमत् एवंभूतं हि रजपग
भोद्दीनोचितं रजोलेशेन संभेदाद्विक्षिप्तं सत् धर्मादिचतुष्टयप्रियं भवतीत्यर्थः अत्रापि भा
वः पूर्ववदेव बोध्यः अवस्थान्तरेतिव्याप्तिं परिहृत्य एकाग्रनिरुद्धावस्थयोर्लक्ष्ययोर्लक्षणं
क्रमेण योजयति तदेव रजोलेशेत्यादिना विक्षेपहेतुना रजोलेशेनापि मलेनापेतं अत एव
स्वरूपप्रतिष्ठं स्वाभाविकेन रूपेण प्रसादादिना सम्यगवस्थितं निर्मलदर्पणवच्च तत् अतस्स
त्त्वपुरुषयोर्बुद्ध्यात्मनोर्विवेकख्यातिमात्रं तन्मात्रवृत्तिकं सत् धर्ममेघध्यानमात्रप्रियं भ
वति। न तु क्लेशप्रियमैश्वर्यप्रियमित्यर्थः धर्ममेघः ध्यानं किमित्याकांक्षायामाह तत्परमिति
तद्धर्ममेघाख्यं ध्यानं परमं प्रसंख्यानं तत्त्वज्ञानं विवेकख्यातेरेव परा काष्ठेति योगिनो वदंती
त्यर्थः तथा चैयमेकाग्रता सत्त्वपुरुषान्यताख्यातिरूपिणी द्रष्टृस्वरूपावस्थानहेतुः क्लेशकर्मा
दिपरिपंथिनी चेति योगलक्षणाक्रान्तेति भावः धर्ममेघसमाधिश्च सूत्रकारेणैव वक्ष्यते
यद्यप्यस्मितानुगताख्यसंप्रज्ञातयोगे सत्त्वपुरुषान्यताख्यातिरस्ति न वितर्कानुगतादौ तथा

प्यनेनैवतेष्पुपलक्षणीयाएतदंगभूतत्वात्तेषामिति निरुद्धावस्थायामपिलक्षणंयोजयन्ने
वसंस्कारराशस्यनिरोधस्यस्वरूपमाह चितिशक्तिरित्यादिना संप्रज्ञातकालेसंसारहेतुत्वादिदो
षदर्शनादेवेतरवृत्तिनिरोधोजायतेतस्माद्वृत्तिसिद्धायांविवेकख्यातिनिष्ठायांविवेकख्यातेरप्य
नात्मत्वसाक्षात्करणात् तत्फलसिद्धेश्चतत्रापिवैराग्यंभवतीत्ततः सर्ववृत्तिनिरोध इतिप्रक्रि
यातत्रयाद्दृशीविवेकख्यातिनिष्ठाविवेकख्यातिवैराग्येहेतुस्तामादौदर्शयतिख्यातिरितो
पंतेन चितिशक्तिः पुरुषाख्यानपरिणामिनी पूर्वधर्मोपाये धर्मान्तरोत्पत्तिः परिणामस्तद्र
हिता कूटस्थनित्यापरमार्थसत्येतियावत् लोकेर्थप्रकाशनरूपेफलरावचैतन्यशब्दः प्रयु
ज्यतेचैतन्यफलोपधानंचनसर्वदासर्वदासर्वेपुरुषेस्तीत्याशयेनशक्तिपदोपादानं तथा
चशक्तिरूपेणावस्थिताचितिरित्यर्थः चितिश्चनगुणः किंतुप्रकाशस्वरूपंद्रव्यमितिद्रव्याद्दृशि
मात्रइतिसूत्रेविस्तरतः प्रतिपादयिष्यामः यतोपरिणामिनीअतएवचितिशक्तिरप्रतिसंक्र
मास्वसंबन्धयथाबुद्धिर्विषयंगच्छतितद्ग्रहणार्थंनैवंचितिरक्रियत्वात् अथवाप्रतिसं
क्रमः संगोविषयेषयस्याइत्यप्रतिसंक्रमानिर्लेपेतियावत् नन्वपरिणामित्वेचात्मनोविषया
कारत्वाभावात् कथंविषयस्फुरणंतत्राह दर्शितविषयादर्शितोबुद्ध्यानिवेदितोविषयोयस्यैइ ६

तिविग्रहः विषयैःसहबुद्धिवृत्तिभिन्नोप्रतिबिंबितासतीभासतइतिभावः वृत्तिसारूप्यमितरत्रेति
सूत्रेचैतद्व्यक्तंभविष्यतियतोपरिणामिनीअतएवशुद्धानंताचसुखदुःखमोहाद्यात्मिकान्य
शुद्धिस्तद्रहितापूर्णाचउक्ताः शुद्धेः परिणामरूपत्वात् सक्रियत्वेपिचपरिच्छिन्नत्वाच्चेति इयंविवे
कख्यातिः धर्मधर्म्यभेदात्तद्वतीवृत्तिः सत्वगुणात्मिकासत्वगुणस्यकार्यात्मनश्चितिशक्तितो
विपरीतापरिणामिनीस्वयमेवविवेकाकारकारिणीप्रतिसंक्रमवतीदीपशिखावत् विषयेषु
सर्पणात् यथातदुक्तं यथासुखदुःखाद्यशुद्धिमतीपरिच्छिन्नाचइत्यतोऽनात्मत्वादिदोषदर्शनात्
तत्फलसिद्धेश्चविवेकख्यातौविरक्तंप्रत्युत्पन्नालेपस्यपर्यंचित्तेतामपिख्यातिंनिरुणद्धिअत्राव
णोतिविलापयतीतियावत् परवैराग्येणहेतुनावित्तस्यसावृत्तिः स्वयमेवविलीयतेयथानिद्रा
दोषेणसुषुप्तौजाग्रदादिवृत्तिरिति शार्करवादेनैवगुदोषान्त्वभिव्यज्यंतेइत्यतोविशेषेणसुषुप्तौ
जाग्रदादिवृत्तिरिति शार्करवादेनैवगुणख्यातेर्दोषदर्शनपुरुषगुणादर्शनमुपपद्यतइतिभावः त
थापापवृत्तिदोषालिप्तत्वेनवृत्तिवैधर्म्येणवृत्तिभेदतन्त्रात्मानंदृश्यतेतावद्दोषदर्शनेपि
आत्मत्वभ्रमात् वृत्तिवैराग्यंनघटते आत्मत्वेनैवपरमप्रियत्वात् अतत्त्वात्मत्वतोरुभयोर
वगुणदोषाभ्यांविविक्तदर्शनंवृत्तिवैराग्येहेतुरित्याशयः तदवस्थंनिरोधावस्थंचित्तंसंस्कारोप

गसंस्कारमात्रानुसारिसंस्कारमात्ररूपेणप्रशांतवाहिभवति सोयंप्रशांतवाहितासपूर्वोक्तोनि
र्बीजः समाधिःनिरोधयोनकिंचित्तत्रयोगेज्ञायतेइतिविग्रहेणासंप्रज्ञातनामाचेतिवाक्यार्थः
असंप्रज्ञातयोगेचित्तबीजस्यसंस्कारस्यतत्वज्ञानजन्यपर्यंतस्याशेषतोदाहान्निर्बीजसंज्ञात
स्येतिभावः बीजदाहादेवचास्यनिरोधस्यस्वरूपावस्थितिहेतुतयाक्लेशकर्मादिपरिपंथितया
चलक्षणसंगतिरित्यप्याशयः सुषुप्तौचनिद्राख्यचित्तवृत्तिसत्वान्नासंप्रज्ञातलक्षणातिव्या
प्तिस्तत्कालीननिरोधस्यक्लेशादिपरिपंथित्वाभावाच्च एतेनयदाधुनिकवेदांतिब्रुवाअसंप्र
ज्ञातेपिनिर्विकल्पमात्मज्ञानंस्वरूपसद्बुद्धिवृत्तिरूपतिष्ठतीतिवदंतितदप्रामाणिकत्वेनैतमन्य
प्यविरोधेनचोपेक्षणीयं युंजीतयोगीनिर्जित्यत्रीन् गुणान् परमात्मनि तन्मयत्वात्मनाभूत्वा
विद्धत्तिमपिसंत्यजेदितिमार्कंडेयपुराणादीरीश्वरयोगेपिवृत्तिशून्यत्वावगमाच्च निर्विकल्प
त्वात्मज्ञानंसंप्रज्ञातकालएवभवति शब्दार्थज्ञानविकल्पशून्यस्यसंप्रज्ञातकालीनज्ञानस्यै
वनिर्विकल्पकत्वस्यलप्स्यमानत्वात् योगद्वयमुपसंहरति द्विविधइति ननुचित्तवृत्तिनिरो
धकःपुरुषार्थइत्याकांक्षायांयोगलक्षणप्रकरणएवप्रवर्तमानेयोगस्यफलप्रतिपादकंसूत्रम ७
धिकप्रश्नमसंबद्धेनोत्थापयतिप्रसंगाद्वात्मनः कोत्स्यामप्यिप्रतिपादयितुं तदवस्थइति ननुअसं

प्रज्ञातावस्थेचेतसिसतिबुद्धिबोधात्माबुद्धिविषयकबोधस्वरूपोबुद्धिसाक्षीपुरुषःकिंस्वभावःकेन
रूपेणतिष्ठतिकिंव्युत्थानइवतदानीमपिप्रकाशरूपएवतिष्ठतिवृत्त्याख्यदृश्याभावादेवतुनपश्य
तिष्ठतिकिं अथवाकाष्ठवदप्रकाशस्वरूपएवात्मानदातिष्ठतिव्युत्थानकालेतुनिमित्तविशेषात्
प्रकाशरूपेणपरिणमतेकिंवादशापिदीपवत्तिष्ठतीत्यर्थः एतेष्वाद्यपक्षंसूत्रेणसिद्धा
तयति तदाद्रष्टुःस्वरूपेवस्थानंतदाअसंप्रज्ञातयोगकालेद्रष्टुःचितिशक्तेःपुरुषस्यस्वरूपेनि
र्विषयचैतन्यमात्रेवस्थानमित्यर्थः यथाजपापायेस्फटिकस्यालोहितेस्वस्वरूपेवस्थानंतथा
वृत्त्यपायेपुरुषस्यवृत्तिप्रतिबिंबशून्येस्वस्वरूपेवस्थानमितिभावः यथाचतदासंस्कारशेषबुद्धे
र्भोनंनभवतितथोत्तरसूत्रेवक्ष्यामः तथाचव्युत्थानएवपुरुषोसुक्षानइवतदानीमपिप्रकाश
स्वरूपएवतिष्ठति योगलक्षणमप्येतद्धेतुनिरोधात्मकमेव तत्रचवृत्त्यात्मकदुःखाभावःपुरुषा
र्थइतिभावः सोयंपुरुषार्थोभाष्यकारेणास्वचितोयथाकैवल्यइत्यमेनैकैवल्यंहिदुःखनिवृ
त्तिरेवपुरुषार्थइतिवक्ष्यतिवक्ष्यतिहेयंदुःखमनागतमितिसूत्रेणेति क्रमेणचरमसंप्रज्ञा
तेअशेषसंस्कारक्षयात् चित्तेनसहवृत्तीनामात्यंतिकनिरोधेसत्यात्यंतिकस्वरूपावस्थानंमो
क्षाख्यमिति ननुतदानीदुःखाभावेप्यन्यदादुःखमस्तीत्यापातं तथाचापरिणामित्वानुपपत्ति

ऽन्यायां शंकां परिहरति भाष्यकारो व्युत्थानेति व्युत्थानचित्तदशायां तु चितिस्तथापि स्वरूपेण
तिष्ठतीति तथा नासंप्रज्ञातस्यैकैवल्यस्य च समानरूपेत्यर्थः सूत्रांतरमवतारयितुं पृच्छति क
थं तर्हीति कूटस्थापि चितिः केन प्रकारेण तर्हि व्युत्थाने तिष्ठतीत्यर्थः असंप्रज्ञातापेक्षयासं
प्रज्ञातेऽप्यत्र व्युत्थानं बोध्यं अत्र प्रस्तुतरसंस्कृतं हेतुपदमध्याहृत्य पठति दर्शितविषयत्वादि
ति वृत्तिसारूप्यमितरत्र इतरत्र व्युत्थाने चित्तेन सह द्रष्टुर्वृत्तौ सारूप्यमित्यर्थः व्युत्थाने हि वि
वप्रतिबिंबरूपयोर्बुद्धिपुरुषवृत्त्योः सारूप्यं तदेतद्व्याचष्टे व्युत्थानेति इतरत्र व्युत्थाने याः चि
त्तस्य वृत्तयो दीपस्य शिखा इव चन्द्ररूपाः भंगुरा अवस्थापरिणामाः सुखानि तिक्तदुःखतामि
वत् स्वसंयुक्तायोकारात्त्रिगुणकार्यत्वात् सुखदुःखमोहात्मयतयाणां तद्योरमूल्याभ
वंति ताभिरविशिष्टा अविलक्षणा वृत्तयो यस्य पुरुषस्य स तथा वृत्तिश्च गुणो न भवति
भागगुणाभ्यां तत्त्वांतरं वृत्तिः संबंधार्थे सप्तमीति सांख्यसूत्रात् भोगो विभक्तः शोधितविस्फु
लिंगवादिति कुतः पुनरपरिणामिनो वृत्तिरित्यत्रोक्तं दर्शितविषयत्वादिति बुद्ध्या निवेदित
विषयत्वादित्यर्थः निवेदनं च स्वारूढविषयस्य प्रतिबिंबरूपेण चित्साक्षात्कारे गृहीतानि हि
पैरप्यानात्मने यः प्रयच्छति अंतःकरणरूपाय तस्मै विश्वात्मने नम इति विष्णुपुराणादिभ्यः

एतदुक्तं भवति यद्यपि पुरुषश्चिन्मात्रोऽविकारी तथापि बुद्धेर्विषयाकारवृत्तीनां पुरुषे यानि प्रति
बिंबानि तान्येव पुरुषस्य वृत्तयः न च ताभिरवस्तुभूताभिः परिणामित्वं स्फटिकस्येवान्यथा तत्त्वतो-
ऽन्यथाभावादिति तदुक्तं सांख्ये जपास्फटिकयोरिव नोपरागः किंत्वभिमान इति सूत्रकारोऽपि व
क्ष्यति चितेरप्रतिसंक्रमायाः तदाकारापत्तौ स्वबुद्धिसंवेदनमिति एतेन सुखदुःखमोहगुण
वृत्तिसारूप्यात् व्युत्थाने चितिरपि दुःखादिमतीव भवति तदेव चित्ते दुःखभोगो दुःखात्म
ग्रहणरूपः प्रतिबिंबरूपदुःखहानमेव चासंप्रज्ञातस्य फलमिति सूत्रद्वयेन सिद्धं येनाहं
सुखी दुःखीत्यादिप्रत्ययादात्मन एव पारमार्थिकी वृत्तिर्मिथ्योक्तिरित्येव प्रत्याख्येयाः स्वतएवे
दात्मनः परिणामस्तर्हि सर्वावयवावच्छेदेन सर्वदा वृत्तिप्रसंगात् अनिर्मोक्षादिप्रसंगः यदि
च मनःसंयोगो निमित्तं तर्हि ज्ञानवादेऽकिंचनत्वेनैव हेतुता लाघवात् आत्ममनस्संयोगानां त्वया
णां हेतुत्वे गौरवात् अनुमानं च अयोकारपरिणामसुखादिकं अंतःकरणोपादानकं बाध
काभावे सति तदन्वयव्यतिरेकानुविधायित्वात् मनःसंयोगवदिति भोगे व्यभिचारवारणा
य तत्पर्यंतं बुद्धेः स्वभोक्तृत्वे च बाधकं कर्तृकर्मविरोधं सूत्रकारो वक्ष्यति अहं कर्ता सुखीत्यादि
प्रत्ययास्तु अहं गौर इत्यादिभ्रमशतांतःपातित्वेनाप्रामाण्यज्ञानास्कंदितत्वेनोक्तानुमानस्य बा

धकाः प्रत्युत प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः यः पश्यति तथात्मानमकर्त्तारं स पश्य
ति इत्यादिस्मृत्युपोद्बलितैर्नोक्तानुमानैर्नैव ते बाध्यंते देहभिन्नात्मसाधकैरनुमानैरहं गौर इ
त्यादिप्रत्ययवदिति दिक् स्वोक्ते बुद्धिपुरुषयोर्वृत्तिसारूप्ये पंचशिखाचार्यसूत्रं प्रमाणयति तथा
च सूत्रमिति ख्यातिर्बुद्धेर्दर्शनं पुरुषस्य इत्यं पंचशिखाचार्यसूत्रं तथा च ख्यातिरिव दर्शनं इत्ये
कमेवराकाकारमेव दर्शनं भ्रमो लोकानामिति सूत्रार्थः इति शब्दश्चात्मोभाष्ययोजनार्थः पर
णीयः ननु सविषयवृत्तेः स्फुरणं चेतनसंयोगादेव भावतु यथा सत्तलघटादिप्रकाशः स्वरूप
संबंधात् अतः किमर्थं चैतन्ये वृत्तिप्रतिबिंबवज्जौ वा वक्ष्यमाणं चैतन्यप्रतिबिंबं कल्प्यत
सत्यमहं जानामीति बुद्धिपुरुषयोरेकताभिमानरूपपरस्परप्रतिबिंबं विनापि दूरस्थवनस्पत्योरिव दो
षवशादेव संभवति तत्र कथं बुद्धिपुरुषयोर्वृत्तिसारूप्यसिद्धिरिति अत्रोच्यते चेतनेनावत् बु
द्धिप्रतिबिंबमवश्यं स्वीकार्यं अन्यथा कूटस्थनित्यविभुचैतन्यस्य सर्वसंबंधात्सदैव सर्ववस्तु
सर्वैर्ज्ञायेत न हि सूर्यसंबंधे सति घटाद्यप्रकाशो दृष्ट इति न चाज्ञानाख्यं ज्ञानप्रतिबंधकं चैतन्ये
कल्पनीयं नित्यज्ञानस्य प्रतिबंधासंभवात् दुःखाज्ञानमयाधर्माः प्रकृतेस्ते तु नात्मन इत्यादि
भिरात्मन्यज्ञानप्रतिषेधाच्च अतोऽर्थभानस्य कादाचित्कत्वाद्युपपत्तये धीकारे नैवार्थग्रहणं वा

च्यं बुद्धौ तथादृष्टत्वात् बुद्धावपि हि संयोगमात्रस्यार्थग्रहणत्वे अतीन्द्रियस्याप्यर्थस्य बुद्धिग्रा
ह्यत्वप्रसंगात् साचार्योकारेना बुद्धौ परिणामरूपाख्यप्रदोविषयाभावेन तत्प्रतिबिंबासंभ
वात् पुरुषे च प्रतिबिंबरूपा विद्यमानवृत्तिमात्रग्राहके पुंसि प्रतिबिंबेनैवोपपत्तेरिति न के
वलं तर्कादेव चितिबुद्धेः प्रतिबिंबं कल्प्यते किंतु तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः इ
मास्ताः प्रतिबिंबंति सरसीव तटद्रुमाः यथा संलक्ष्यते रक्तः केवलः स्फटिको जनैः रंजकाद्यु
पधानेन तद्वत्परमपूरुष इत्यादिस्मृतिशतैरपीति न चैवं संस्कारशेषा बुद्धिः पुरुषे प्रतिबि
बिताभावादिसंप्रज्ञातयोगानुपपत्तिरिति वाच्यं परमाणोरिव वृत्त्यतिरिक्तानां प्रतिबिंब
समर्पणासामर्थ्यस्य फलबलेन कल्पनात् अनादिस्वस्वामिभावस्यैव प्रतिबिंबनियामकत
या वक्ष्यमाणत्वाच्च न परबुद्धिवृत्तेर्भानं अन्तरायवपुरुषायैव तस्येव बुद्धिः पुरुषस्य विषय इति
सांख्यसिद्धान्तः विवेकख्यातिविषयभोगो च पुरुषार्थाविति यथा च चितिबुद्धेः प्रतिबिंब एवं
बुद्धावपि चित्प्रतिबिंबं स्वीकार्यं अन्यथा चैतन्यस्य भानानुपपत्तेः स्वयं साक्षात्स्वदर्शने कर्मक
र्तृविरोधेन बुद्ध्यारूढतयैवात्मनो घटादिवत् ज्ञेयत्वाभ्युपगमात् तथा च वक्ष्यति सूत्रकारो
द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थमिति बुद्धावात्मप्रतिबिंबमेव घटतो त्रिकाबुद्धिश्चिच्छायापत्तिरित्या

त्माकारतेति प्राहुः प्रतिबिंबोपाधौ बिंबाकारो बुद्धेः परिणाम एव स च साक्षिभास्य इति एतेन नी
रूपत्वात् बुद्धिपुरुषयोः संप्रतिबिंबनं न संभवतीत्यपास्तं उभयत्रोभयाकारबुद्धिपरिणामस्यैव
रूपादिप्रतिबिंबवत्त्वाच्च तदेवं बुद्ध्यात्मनोः परस्परप्रतिबिंबरूपाद्दोषादेवैकतात्मामोहं कर्तास्
खीज्ञानामोत्पादिहसरति तदेतत्परस्परं प्रतिबिंबं सांख्यकारिकायामपि व्याख्यामुक्तं तस्मात्
त्संयोगादचेतनं चेतनावदिव लिंगं गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीन इत्युक्तं इति दिक्
यच्चैतच्चैतन्ये बुद्धिवृत्तिसारूप्यमुक्तं चैतन्यस्य बुद्ध्याकारतारूपं इदमेव चैतन्यस्यार्थोपरक्तव
तिभानं तस्य चाकारोऽयं घट इत्यादिरूप एव अन्यथा वृत्तिसारूप्यानुपपत्तेः ॥ ननु वृत्तिबोधस्य
यथाकारोस्ति घटमहं जानामि दुःखितोऽहमित्यादिकं तु बुद्धेरेवाकारो न तु पुरुषस्यापरिणामित्वा
त् अभ्रांतत्वाच्चेति तथा च सूत्रकारो वक्ष्यति चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसं
वेदनमिति ननु वृत्तितद्बोधयोर्घटदीपाविवात्यंतभिन्नयोर्न तद्विज्ञातृत्वं अभिमतमेकत्व
स्फटिकमणिकांतिवत् तर्हि तत्तच्छिन्नवृत्तीनां प्रतिनियतत्वं तत्पुरुषमात्रबोध्यत्वं चेति किं नियामकमि
त्याकांक्षायां प्रतिनियतयोरेव चित्तात्मनोरनादिः स्वस्वामिभावसंबंधस्तन्नियामक इति पा
दयति चित्तमिति यथायस्कांतमणिः स्वस्मिन्नयसः सान्निध्यीकरणमात्राच्छल्यनिष्कर्षणेना १०

ख्यमुपकारं कुर्वन् स्वामिनः स्वं भवति भोगसाधनत्वात् तथैव चित्तमपि अयसः सदृशविष
यत्वात्तस्य स्वामिनः सन्निधीकरणमात्रात् दृश्यत्वरूपमुपकारं कुर्वत् पुरुषस्य स्वामिनः स्वं
भवति भोगसाधनत्वात् अतः चित्तपुरुषयोरनादिः स्वस्वामिभावः संबंध इति शेषः त
तः किमित्यत आह तस्मादिति तस्मात् स्वस्वामिभावः संबंध इति शेषः ततः किमि भावस्य
सिद्धत्वात् स एवानादिसंबंधः पुरुषस्य चित्तवृत्तिदर्शने हेतुरित्यर्थः अतो न परचित्तेन
परिस्य वृत्तिसारूप्यं भवति कदापि तद्वृत्तिबोधेन तयोः स्वस्वामिसंबंधाभावात् ननु स्व
स्वामिभावस्य कथमनादित्वं स हि भोग्यभोक्तृभावरूपं तथा प्रलये न तिष्ठतीति मैवं
अनुपमानधनेऽपि स्तुतस्य स्वस्वामिभावभावेन स्वत्वस्वामित्वयोरतिरिक्तपदार्थत्वा
त् स्वरूपसंबंधविशेषत्वाद्वा प्रतियोग्यनुयोगिभाववत् अथवा स्वभक्तवृत्तिवासना
वत्वमेव बुद्धौ पुरुषस्य स्वत्वं ईदृशो भोग्यभोक्तृभाव एव च तांत्रिकैर्भोग्यभोक्तृयोग्यतेत्युच्य
ते चिदवसानो भोग इति सांख्यसूत्रोक्तस्य सुखदुःखानुभवरूपभोगस्य पुरुषधर्मत्वादिति
। स च स्वस्वामिभावः चित्तपुरुषयोरनादिरेव स्वीक्रियते न च महत्तत्त्वरूपस्य चित्तस्य कार्येन
प्राक्यं तद्धर्मस्यानादित्वमिति वाच्यं अंतःकरणस्य वक्ष्यवत कार्यावस्थायामेव महत्तत्त्व

रिभाषास्वीकारात् बीजावस्थानप्रकृत्यंशास्तत्वरूपानिति येव अस्यपाधर्माधर्मसंस्कारादीना
मासंपविनाप्रलयेवस्थानानुपपत्तेः प्रकृतिमात्रस्यतदाश्रयत्वेनतत् कार्यभोगस्मृत्यादेर
पितन्निष्ठत्वस्यैवौचित्यात् अंतःकरणाकलनान्यथैवं अंतःकरणधर्मत्वं धर्मादीनामिति
सांख्यसूत्रस्यपथाश्रुतार्थानुपपत्तिश्चेति अथैवंबुद्धितत्कारणयोरुभयोर्धर्मादिकल्पने
गौरवमितिचेत् दृष्टानुसारितयास्यगौरवस्यप्रामाणिकत्वात् यथाहि परमाणुपर्यंतमेवघ
टेपाकेनरूपंजायतेनतत् घटभंगेचनैरंतर्येणाभिघटांतरं तद्रूपकंभवति तथैवप्रकृतिपर्यंतमेव
बुद्धौधर्मादिकमुत्पद्यते॥ तद्बुद्धिनाशेचतत्प्रकृतिभिः तादृशधर्मादिमद्देवबुध्यंतरमुत्पा
द्यतेकारणगुणप्रक्रमादित्यादिक् कृत्स्नादिलक्षणान्यपिवृत्तयःसंतीत्यागामिसूत्रस्यप्रय
त्नंपरिहर्तुंचित्तस्यैतत्तेपरपित्वोत्तरसूत्रमवतारयति:पुनरिति:चित्तस्यबहुवृत्तिकत्वेसत्य
पितानिरोद्धव्यावृत्तयः क्लिष्टाक्लिष्टरूपावक्ष्यमाणाः पंचतय्यएवेतिसूत्रेणसहान्वयः प्रमा
णादिरूपवक्ष्यमाणवृत्तिपंचकविरोधेनैवतत्कार्याणामन्यवृत्तीनांनिरोधसिद्धिरितिभावः
वृत्तयःपंचतय्यःक्लिष्टाऽक्लिष्टाः यैःप्रमाणादिलक्षणव्यापारैःचित्तंजीवतितेनवृत्तयउच्यंते: ११
द्विजादीनांयाजनादिवत् क्लिष्टाश्चाक्लिष्टाश्चक्लिष्टाक्लिष्टाःनिरोद्धव्यावृत्तयःक्लिष्टानामक्लिष्ट

वाऽक्लिष्टावाभवंतु वक्ष्यमाणपंचतय्यः पंचप्रकाराएवेतिसूत्रार्थः वृत्तीनामसंख्यत्वात्ति
पावयवाद्येकत्वानुपपत्त्यातप्रयोलक्षणमात्रप्रकारत्वाचित्तं ताःपंचधावृत्तयः इत्यागामि
भाष्यात् इतिक्लिष्टवदक्लिष्टस्यापिहेयत्वप्रतिपादनायक्लिष्टाक्लिष्टविभागप्रदर्शनं तत्रवा
यंक्रमः अक्लिष्टाउपादायक्लिष्टानिरोद्धव्याः ततस्ताअपिपरवैराग्येणेति सत्वेनाप्यतमोह
न्यात्सत्वंसत्वेनचैवहीतिस्मरणात् क्लिष्टाव्याचष्टे क्लेशहेतुकाइति त्रिगुणात्मकतयास
र्वासामेववृत्तीनांक्लेशवत्त्वेनक्लिष्टाक्लिष्टविभागोनोपपद्यतइत्यतक्लेशसंबंधविशेषप
तयास्वीरतयाइत्थंव्याख्यायते अत्रचहेतुःप्रयोजनं क्लेशश्चात्रमुख्यतयावगतोदुःखवाऽस्यः
तथाचक्लेशहेतुकादुःखफलिकाविषयाकारवृत्तयः इत्यर्थः क्लेशजनकत्वेहेतुःकार्येत्यादिक
र्मेशयप्रचयानांधर्माधर्मवासनासमूहानांक्षेत्रीभूतास्तालंबनीभूताःक्लिष्टाइत्यर्थः॥विष
याकारवृत्तिजन्यतृष्णाद्यभिहतःस्तद्धानोपायेयतमानःपरपीडानुग्रहाभ्यांधर्माधर्मावुपचि
नोतिततश्चदुःखधारामनुभवतीतिभावःअक्लिष्टाव्याचष्टेख्यातीतिअक्लिष्टाअक्लेशफलिका
ःताश्चगुणाधिकारविरोधिन्यःगुणानांसत्वादीनामधिकारःकार्यारंभणंतद्विरोधिन्यःअवि
द्याकामकर्मादिरूपकारणनाशकत्वात् ख्यातिविषयाविवेकख्यातिसंबद्धाइत्यर्थःख्यातिसाध

तस्यापि संग्रहाय विषय पदमिति तत्र सूत्रकारेण तामसीनां सात्विकीनां च वृद्धिविद्याध्यानाभे
वृत्तीनां निरोद्धव्यत्वमुक्तं न तु राजसीनां क्लिष्टाक्लिष्टरूपमिश्रवृत्तीनामिति न्यूनतेत्याशंक्य
मिश्रवृत्तीनामत्रैवांतर्भावमाह क्लिष्टप्रवाहेति क्लिष्टशेषीभूता अपि अक्लिष्टरूपा लदं
शा यद्यपि क्लिष्टच्छिद्रेषु संति तथाप्यक्लिष्टा एव अक्लिष्टशब्देन गृहीता भवंति एवमक्लिष्टच्छि
द्रेष्वपि क्लिष्टाः क्लिष्टशब्देन गृहीता इत्यर्थः तथा वैराग्यस्याभिभवे तेरंशाभ्यां क्लिष्टांशिन्योः प्रवेश
इति न न्यूनता इदानीं वृत्तिनिरोधस्य फलं वक्तुमादौ संसारानर्थबीजसंस्कारं दर्शयति तथा
जातीयका इति क्लिष्टाक्लिष्टजातीयकाः संस्कारा इत्यर्थः अस्य जीवस्यायमेकस्य वृत्तिसंस्कारचक्र
स्य स्तंभने मलये च निरोध एवोपाय इत्याह तदेवंभूतमिति तद्वृत्तिसंस्कारचक्रात्मकं चित्तमे
वंभूतं निरोधावस्थमवसितत्वाधिकारं क्रमेण समाप्यमानाधिकारं सदात्मकल्पेनात्माविभागे
न निर्दुःखवत्पातिष्ठति व्युत्थानपर्यंतं अयमभ्यासपाटवेनाखिलसंस्कारक्षये सति प्रलयमा
संति कल्पमेव गच्छति विदेहकैवल्यं प्राप्नोतीत्यर्थः निरोधसमाधेः पुनरनुत्थानमेव योगिनां
मुक्तिरिति भावः पूर्वसूत्रेण सहैषो ज्ञनार्थताः क्लिष्टाक्लिष्टाश्च पंचधा वृत्तय इति पूरयित्वो
त्तरसूत्रं पठति प्रमाणविपर्ययविकल्पनिद्रास्मृतयः स्यामंसूत्रं तत्रेति पूरयित्वोत्तरसूत्रमव १२

तारयति तत्र तासु वृत्तिषु मध्ये प्रत्यक्षानुमानागमाः प्रमाणानि अनधिगततत्त्वबोधः प्रमा तत्क
रणं प्रमाणमिति प्रमाणसामान्यलक्षणं सुगमत्वादनुक्त्वैव विभागः कृतः परैरुक्तानि चेतराणि प्रमाण
निष्वेवांतर्भाव्यानीत्याशयः इति प्रत्यक्षं व्याचष्टे इंद्रियेति इंद्रियाण्येव नाडी चित्तसंचरणमार्गः
तैः संयुज्य तद्गोलकद्वारा बाह्यवस्तूपरक्तस्य चित्तस्येंद्रियसाहित्येनैवार्थाकारः परिणामो भवति न
केवलस्य चित्तस्य शंखपीतत्वाद्याकारतापत्तिनयनादिगतपित्ताद्यन्वयव्यतिरेकाभ्यां अतो रूपादिध्वनि
षु चक्षुरादिनामपि कारणत्वं शास्त्रे स्पष्टयते अत्रोपयोगादिसंयोगेन चात्मवृत्तेः कारणमात्रं प्रदर्शितं
ननु तल्लक्षणे प्रवेशनीयं आत्मादिप्रत्यक्षाव्यापनात् ईश्वरप्रत्यक्षाव्यापनाच्च तस्याजन्यत्वात्
अर्थे सत्यनेन समारोपितत्वप्रतिषेधात् न विपर्यये तिव्याप्तिः विशेषावधारणप्रधानेति वि
शेषणादनुमानागमयोर्व्यावृत्तिः स्मृतिव्यावर्तनाय तद्विषयेति उपरक्तवस्तुविषयेत्यर्थः सामान्य
विशेषाभ्यामत्यंतभिन्नत्वाभावेऽपि तन्निरासायोक्तं सामान्यविशेषात्मन इति अनेन चावयवी
न निराकृतः किं त्ववयविनि सामान्यविशेषयोरविभक्तलक्षणं तादात्म्यमुक्तं पश्चादवयविव्यवस्था
पनादिति अनेनारंभपक्षस्य दोषश्च ध्वनितो दिक्। चक्षुःशास्त्राद्यनंताश्च बुद्धयोऽव्यवस्थापि
नां इत्यादिस्मृतिभ्यो यस्मिंश्शास्त्रादितुल्यतालाभात् वृत्तिः प्रभावत् द्रव्यमेवेति प्रागेवोक्तं सा वृत्ति

रेवदीपप्रभावत् वाह्यार्थमुपसृत्य चक्षुरादिकीभावेन घटाद्याकारा भवति स्वप्रत्यानादेशघटवा
कारतयाचिन्त्यते रत्नभूपमानत्वात् वाह्येपि ज्ञानाकारः सिध्यति अत्रांशे बौद्धानामस्माकं चैकवा
क्यत्वेपि न साम्यं अस्माभिर्बाह्यार्थस्यापि स्वीकारादिति प्रत्यक्षस्य लक्षणं कृतं इदानीं तस्य प्रमाक
रणत्वेन प्रमाणत्वमुपपादयति फलमिति वृत्तिरूपस्य करणस्य फलं पुरुषनिष्ठमित्यतवृत्तिविषय
कोबोधः पुरुषार्थमेव करणानां प्रवृत्तेः अयं च बोधो विषयदेश एव भवति विभुत्वात् ननु अयं
घट इति वृत्तेर्बोधो घटमहं जानामीति रूपस्तस्य च पौरुषेयत्वे पुरुषस्य स्वतन्त्राकारणपरिणामित्वा
पत्तिरिति तत्राह अविशिष्ट इति स च बोधश्चित्तवृत्त्या सह अविशिष्ट इति वृत्तिसारूप्यसूत्रे उपपा
दित इत्यर्थः अयं घट इत्याकारा बिंबरूपा वृत्तिः करणं तस्मादेव वृत्तेश्चेतनेऽपि प्रतिबिंबनाच्चेतनस्य
मप्ययं घट इत्याकारमिव सद्बोधाख्यफलं भवतीति नाम विशेषः शब्देन वक्तुं शक्यते विवेकिभि
रेव क्षीरनीरादिमायुर्वेदस्येव स्वरूपविशेषो नुभूयते दृश्यादिवैधर्म्यादिति भावः पौरुषेयो बोधो
इत्याख्यानं च प्रभावत्स्वगगने प्रोक्तमिति वद्विशिष्टाविशिष्टभेदेनोपपादनीयः करणलक्षणं वा
अफलायोगव्यवच्छिन्नकारणत्वमिति ननु रूपादिषु चक्षुरादीनामेव करणत्वं प्रसिद्धमस्मिन्योरक्षणा- १३
प्यतर इति चेत् सत्यं ॥ किं तु बुद्धिवृत्त्याख्यप्रमाणान्तरं प्रत्येव तेषां करणत्वं न तु पौरुषेयबोधरूपां प्रत्यक्षप्रमां

मुख्यप्रमां प्रमेति चक्षुरादीनां च वृत्तौ करणत्वव्यापारवत् कारणप्रमाद्वयं च सांख्ये स्थितं द्व
योरेकतरस्य वाह्यसन्निकृष्टार्थपरिच्छित्तिः प्रमेति चक्षुरादीनां च वृत्तौ करणत्वव्यापारवत् का
रणत्वरूपं कुठारादाविवेति शेषः ननु विषयाकारेणैव विषयग्रहणं चित्तस्य तेद्दृष्टं पुरुषस्य तु कू
टस्थो न स्वस्याकारतां भजते अतः कथं पुरुषश्चित्तवृत्तिसाक्षी स्यात् कथं वाविशिष्टः पौरुषेयो बो
धः इत्याशंकायामाह प्रतिसंवेदीति संवेदिता बुद्धेः प्रतिसंवेदी तत्समानाकारः पुरुष इत्यर्थः त
च्चतुर्थपादे चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनमिति सूत्रे उपपादयिष्याम इत्य
र्थः यद्यपि चितेः स्वयमाकारो नास्ति तथापि प्रतिबिंबवशात् तदाकारापत्त्या वृत्तिबोधयोरित्यस्याभि
वेति सारूप्यप्रसंगेन प्रागेव व्याख्यातं कश्चित्तु व्याख्यकारणसामानाधिकरण्येन बुद्धावेव प्र
मारूपं फलं ज्ञायते चैतन्यमेव हि बुद्धिदर्पणप्रतिबिंबितं बुद्धिवृत्त्यापार्थाकारतया तदाकारतामाप
द्यमानं फलं तच्च चिच्छायापाख्यं चित्प्रतिबिंबं बुद्धेरेव धर्म इति तन्न पौरुषेयपदस्य पार्थक्यता
पत्तेरसंगापत्तेः प्रतिबिंबस्य तच्छतपाऽर्थाभानरूपत्वानुपपत्तेश्च प्रतिबिंबस्य प्रकाशार्थे
क्रियाकारितायाः क्वाप्यदर्शनाच्च प्रतिबिंबं हि नन्तदुपाधिषु बुद्धेर्विनाकारपरिणाममात्रमिति
किं च परस्परं प्रतिबिंबस्य क्लृप्तिकल्पितसिद्धत्वाच्चितेरेव वृत्तिप्रतिबिंबोपहितायाः फलत्वे पुनर्ज्ञान

शब्देनात्मनस्तत्वप्रतिपादनात् सत्यं ज्ञानमनंतं ब्रह्म ज्ञानमेव परं ब्रह्म ज्ञानं बंधाय चेष्यते
इत्यादिश्रुतिस्मृतिषु चितिवृत्त्योरपि वृत्त्याप्यापतिश्चाहमित्यादिसूत्रेप्यतो भानार्थमपेक्ष्यते बुध्या
रोहं विना साक्षात्त्वभाने कर्मकर्तृविरोधादित्यत एव अपि च बुद्धेरेव प्रमातृत्वे पुरुषो न सिद्ध्ये
त् वृत्तिसाक्षित्वतया पुरुषसिद्धिरिति चेत् एवं सति वृत्तिद्रष्टुरेवात्मत्वात् रूपादेर्द्रष्टृत्वकल्पनो चिता
ननु बिंबप्रतिबिंबरूपयोरेव द्रष्टृत्वं स्यात् भेदेन कल्पितं पुत्रं गौरवादिति किं च ज्ञानाभावे एवं
बुद्धिवृत्तौ भासमानं प्रतिबिंबचैतन्यं स्वस्वरूपं न संभवति कर्मकर्तृविरोधात् ततो बिंबचैतन्येभा
नमावश्यकमिति अत्रापि प्रमात्रादिविभागः प्रमाता चेतनः शुद्धः प्रमाणं वृत्तिरेव च प्रमा धी
कारवृत्तीनां चेतने प्रतिबिंबनं प्रतिबिंबितवृत्तीनां विषयो मेय उच्यते चतस्रः साक्षिभास्याः
स्युः करणस्यानपेक्षणात् साक्षाद्दर्शनरूपं च साक्षित्वं सांख्यसूत्रितं अविकारेण द्रष्टृत्वे साक्षि
त्वं चापरे जगुरिति दिक् पुरुषे वृत्तिबोधरूपं च फलं अनुमानादिस्थलवृत्तिविषयिबोध्यं अनुमे
नं लक्षयति अनुमेयस्येति॥ साध्यविशिष्टः पक्षोनुमेयः तस्य साध्यवत्त्वेन तत्सजातीयेषु स
पक्षेषु अनुवृत्तो विजातीयेभ्यो विपक्षेभ्यो व्यावृत्तो यः संबद्धो धर्मः तन्निष्ठानुमेये पक्षवृत्तित्वनि
यावात् तद्विषयात् निबंधना पिजबंधनेरत्यनुशासनात्॥ तद्विषयज्ञानजन्येति यावत् ए

वंभूतायाः सामान्यावधारणप्रधाना वृत्तिः सानुमानमित्यर्थः संबंध इति पाठेपि संबध्यत इ
ति संबंधः तथा च स एवार्थः सामान्येत्यादि प्रत्यक्षस्यापि तत्स्वरूपकथनमात्रं न तल्लक्षणं
तगतं वैयर्थ्यादिति अनुमानवृत्तेरुदाहरणमाह यथा देशांतरप्राप्तेरिति अत्रान्वयव्याप्ती
दृष्टांतश्चैत्रवदिति व्यतिरेकव्याप्तौ च दृष्टांतो विंध्यश्चाप्राप्तिरगतिरिति अप्राप्तेरिति पंचमी
पाठस्थलेरवरूपमादाय प्रत्यक्षसिद्धेनुमितिवैयर्थ्यादिति आगमाख्यां वृत्तिं लक्षयति आ
प्तेनेति भ्रमप्रमादविप्रलिप्साकरणापाटवादिदोषरहितेनेत्यर्थः मूलवाक्ये आप्तपदेनाप्त
तोक्तेति नोक्तं तदप्युपलक्षणीयं स्वबोधसंक्रांतये स्वबोधसदृशबोधोत्पत्तये इत्यर्थः श्रो
तुर्वृत्तिरिति युक्त्या मेणान्वयः अत्रान्तो कार्य विषयिणी शब्दजन्या वृत्तिरेवागमप्रमाण
स्य लक्षणं शेषं त्वागमशब्दव्युत्पत्तिमात्रं आप्तादागच्छति वृत्तिरित्यागम इत्यागमः तद
र्थविषये त्यंतविशेषणाव्यावर्त्यमप्रमाणमागमवृत्तिं दर्शयति यस्येति दृष्टानुमितार्थ
कत्वाभावेनाप्रवृद्धेयार्थे प्रवृद्धेयप्रतिपाद्यः कोपि स्यात् आगमस्य वक्ता स आगमः स्थात्वं चेत् संवादे
तत्स्वर्गकाम इत्यादिरूपं प्रवृत्तेप्रमाणवृत्तिजनना समर्थ इत्यर्थः नन्वेवं दृष्टानुमितार्थकत्व
क्तिनिमित्तस्य श्रुतिमूलत्वाद्धुनिकागमस्यापि प्लवः स्यादत आह मूलेति प्रमाणेऽरक्षयिता

विपर्ययं लक्षयति विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं विपर्यय इति लक्ष्यनिर्देशः मिथ्याज्ञा
नमिति विलक्षणं मिथ्येत्यस्य विवरणं अतद्रूपप्रतिष्ठमिति यो तद्रूपो न स्वस्मान्नाकारो यो
विषयस्तत्प्रतिष्ठं तद्विशेष्यकमित्यर्थः भ्रमस्य ज्ञानाकारस्यैव विषये समारोप इति भावः
संशयस्याप्यत्रैवान्तर्भावः अत्र च शास्त्रे ऽन्यथाख्यातिः सिद्धान्तो न तु सांख्यवद्विवेकमात्रं
अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येत्यागामिसूत्रात् वैशेषिका
द्यन्यायं विशेषोपदर्शितस्य रजतादेर्नारोपः किंत्वांतरस्यैवेति ज्ञानाकारमनुभवसिद्धं शुक्त्यादि
संनिकृष्टविहाय दूरस्थरजतादिविषयकत्वकल्पने गौरवात् स्वप्ने दृष्टमिदानीं नास्तीति स्वरू
पतो वा बाधनपपत्तेश्च तथा च तत्स्वरूपं संक्षेपस्थिराहह्रीति ॥ तदभिख्यानादेवं तत्तिरे
हितं तन्नो ह्यस्यैव विपर्ययावितिचेन्न मनुप्रतीतिबलेनैव विषयः सिध्यतु तथा च शुक्ति
रजतादिस्थले प्यतद्रूपप्रतिष्ठत्वमसिद्धमित्याशयेन प्रच्छति सकस्मादिति परिहरति यत इति
अबाधितानुभवेनैव विषयसिद्धिरिति भावः ननु बाध्यबाधकभावएवं वैपरीत्येन क
स्मान्न भवतीत्यत्राह भूतार्थेति। सदर्थविषयत्वेन प्रमाणस्य बलवत्वात् न तत्पक्षपातो हि वि १५
पर्यस्याभाव इति अत्रोदाहरणमाह तत्र प्रमाणेनेत्यादिना विपर्ययवर्णनेन हेयत्वख्यापना

याहसेयमिति पंचपर्वा या ऽविद्या संसारानर्थबीजं सा रूपमेव मिथ्याज्ञानरूपा अतिरेव एतद्वि
शेषएवेति यावत् अतद्रूपमवस्थं निरोद्धव्येति भावः पर्वाणि गणयति ॥ अविद्या अस्मितेति
क्लेशाः क्लेशाख्याः क्लेशदत्वादिति भावः रागादीनां मिथ्याज्ञानत्वाभावेपि अविद्यानुगतत्वा
दविद्यापर्वत्वं विपर्ययत्वं च यथांकुरस्य बीजपर्वत्वं बीजत्वं चेति बोध्यं तत्र विद्या विपर्ययो
मोह इति पर्यायाः एवं च सति मोहतमसोर्भेदात् कथं एणं तयोरष्टत्व चतीनामिति सिद्धान्तोप
देतेति चेत् न धर्मधर्म्यभेदेनैवान्नवतीनां विपर्ययादिरूपविभागकरणात् तत्र तमो
विपर्ययादि मत्पदेनेति अत्यंतहेयत्वप्रतिपादनाय अन्वर्थसंज्ञा पंचकं क्लेशानामाह एत ए
वेति स्वसंज्ञाभिः स्वानुरूपसंज्ञाभिः तथा च विष्णुपुराणे तमो मोहो महामोहस्तामिस्रो ह्यन्ध
संज्ञकः अविद्या पंचपर्वैषा प्रादुर्भूता महात्मन इति एतेषामेव च प्रायशः सेनावान्तरविभागः
सांख्यकारिकायामतः भेदस्तमसो ऽष्टविधो मोहस्य च दशविधो महामोहः तामिस्रो ऽष्टादशधा
तथा भवत्यन्धतामिस्र इति अव्यक्तमहदहंकारपंचतन्मात्रेष्वनात्मस्वात्मबुद्धिरविद्या अष्ट
विधं तमः ज्ञानावरकत्वात् एतास्विव देहात्मबुद्धीनामेव भावः देहादीनामेतदारंभकार्यत्वात्
शुक्तिरजतादिविपर्ययाणां तु संसारहेतुतयानात्र गणना विपर्ययादिष्वन्तेवधयोगिप्रत्येकारि

रूपावेशहेतुविपर्ययस्यैवप्रकृतत्वादिति मोहादिष्वप्येवंबोध्यं अष्टस्वणिमाद्यैश्वर्येषुना-
त्मबुध्यात्मीयबुद्धिरस्मितास्वत्वास्मितयोः पर्यायत्वात् सैवचाष्टविषयकतया अष्टविधो मो-
हो मुख्यत उच्यते शेषंपूर्ववत् तथा दृष्टानुश्रविकभेदेन दशसु शब्दादिविषयेषु रागो दशवि-
धो महामोहः शेषंपूर्ववत तथा ऐश्वर्यस्य विषयदशकस्य च परिपंथिनि द्वेषोष्टादशधा ता-
मिस्रः शेषंपूर्ववत तथा ऐश्वर्याष्टकविषयदशकं च नंक्ष्यतीति यस्त्रासः सोष्टादशधा अभिनि-
वेशोंधतामिस्रः शेषंपूर्ववत् एतइति अविद्यादयइत्यर्थः शब्दज्ञानानुपाती वस्तुशून्योवि-
कल्पः शब्दज्ञानानुपाती वस्तुशून्यः प्रत्ययो विकल्प इत्यर्थः शब्दश्च शाब्दज्ञानं च ते अनुपा-
तिनी यस्य स तथा तथा च तदुभयजनकः सर्वदैव बाधाबाधकाल विशेषेणेत्याद्यविशे-
षणार्थः ननु विकल्पस्य सवस्तुकत्वे प्रमाणेंतर्भावः निर्वस्तुकत्वे तु विपर्ययेंतर्भावः तृतीयप्रका-
रासंभवादित्याशंकां परिहरन् लेव विशेषणयोर्व्यावर्त्यमाह स नेति उपायेदोंतर्भावः प्रमाण-
कोप्यनेनंतर्भावहेतुर्वस्तुशून्यत्वेपीति विपर्ययकोपनंतर्भावेचहेतुः शब्दज्ञानेत्यादिः माहा-
त्म्यार्थ्ये तथा च यथार्थे शब्दे न यथार्थे ज्ञाने न च यादृशो व्यवहारो भवति शब्दज्ञानरूपः
तादृश एव व्यवहारो विकल्पादपि दृश्यते विवेकिनामपीत्यर्थः विपर्ययस्तु नैवं बाधोत्तरं १६

देरजतमिति शब्दप्रत्यययोरभावादिति एतेन विपर्ययलक्षणे शब्दज्ञानानानुपातित्वं विशे-
षणं देयमिति भावः विकल्पस्योदाहरणमाह तद्यथेत्यादिना किं विशेष्यं केन विशेषणेन व्य-
पदिश्यते असंतामेदात्रा तस्य च विकल्पज्ञाने विशेषणविशेष्यभावरूपोपेद इत्यर्थः वस्तुशू-
न्यत्वमुपपाद्य शब्दज्ञानानुपातित्वमुपपादयति भवति चेति चैत्रस्य गौरिति यथार्थे शब्द-
त् अत्रापि विशेष्यविशेषणभावव्यपदेशोस्तीति तथा चतिबोधो विवेकिनामपि भवतीत्ये-
त्यर्थः अन्यान्यप्युदाहरणान्याह तथेत्यादिना शास्त्रैः प्रतिषिद्धा वस्तुभूताः सुखादयो धर्मा
यस्येति प्रतिषिद्धवस्तुधर्मा पुरुषः इत्यव्यतिरेकमुदाहरणं॥ अभावस्याधिकरणमात्ररूपत्वे
नाधाराधेयभावविरहादिति निःक्रियः पुरुष इत्यन्यदुदाहरणं लौकिकमप्युदाहरणमप्यमा-
ह तिष्ठतीति तिष्ठति बाणः स्थास्यति स्थित इति गतिनिवृत्तौ गतिनिवृत्तिविषयकविकल्पेव-
र्तमानत्वादिविशिष्टस्य धात्वर्थमात्रे पारमार्थिकतया प्रतीयते कर्तृत्वकर्तृत्व स्यवर्तमान-
त्वादिकं च प्रत्ययत्रयार्थस्तु विकल्पित इत्यर्थः वारेण गतिनिवृत्यनवकूलकत्यभावादिति उदाह-
रणांतरमाह तथानुत्पत्तीत्यादिना व्यवहार इतीत्यंतेन अनुत्पत्तिधर्मो यस्येत्यनुत्पत्तिधर्मोपु-
रुषः स धर्मोनुत्पत्तिरूपो धर्मः प्रमाणविपर्ययातिरिक्ताभ्यां विकल्पकृतो वहुवादिविप्रतिप-

नेस्तन्निरासाय बहून्युदाहरणानि शशं खपुष्पशशशृंगमत्ययान्नापि विकल्पमध्ये प्रवेशनी
याः खपुष्पं नास्तीति प्रत्ययानुरोधेन तादृशप्रत्ययसिद्धेः विकल्पप्रत्ययास्तत्र शेषिकैरगृ
पेज्ञान विशेषतः प्रेषमाणव विशेषस्तैर्मिथ्याज्ञानमध्ये ते प्रवेश्यंते नन्वसत्याभिलापसवि
कल्पनिर्विकल्परूपाभ्यां व्यावृत्तिसिद्धयोगविभागार्थं यद- निर्दिश्यते इतिअभावप्रत्यया
लंबना वृत्तिर्निद्रा: निद्राया वृत्तित्वस्फुटीकरणाय पुनर्वृत्तिग्रहणं जाग्रत्स्वप्नवृत्तीनामभा
वस्य प्रत्ययः प्रतिसंक्रमस्यानेकारणमिति यावत् तच्च चित्तसत्वाच्छादकं तमोद्रव्यं सांध
कारादिवत् तदेवालंबनं विषयो यस्याः सा तथा तादृशी वृत्तिर्निद्रेत्यर्थः बुद्धेर्हि त्रिगुण
त्वाय पदा सत्वरजसी अभिभूय समस्तकरणावरकं तमआविर्भवति तदा मलिनस्य चि
त्तसत्वस्य तमआकारैव वृत्तिः स्वपिमीत्याकारा जायते स्वापश्चाऽजाग्रत्स्वप्नवदभावः
तं च निद्राख्यां वृत्तिमनवबुध्यमानः पुरुषः सुषुप्तस्यानंतः प्रज्ञ इति श्रुतिभिरुच्यत इति न
च चित्तेन चित्तग्रहणे कर्मकर्तृविरोधः वृत्त्या चित्तस्य ग्रहणे न कर्मकर्तृभेदात् नचैवमेक
याद्वृत्त्या वृत्त्यंतरग्रहणसंभवे पुरुषकल्पनावैयर्थ्यं नियमेन वृत्तिगोचरवृत्तिकल्पनेन १८
वस्थायाः सूत्रेणैव वक्ष्यमाणत्वादिति ननु निरोधे कैवल्ये प्रलयादिष्विव वृत्त्यभाव एव सर्वे

स्यां सुषुप्तौ कथं न स्वीक्रियते न च तन्निद्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति सौषुप्तश्रुतावपि
तदानीं ज्ञानाभावस्यैवावगमादित्याशंक्याह सा तु संप्रबोध इति सा तु निद्राप्रत्ययविशेष एव
जागरे स्मरणादित्यर्थः अन्तरावत्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेदित्यादिश्रुतयः सु
षुप्तस्यानेपि भोग्यमस्तीत्याहुः नचैवं श्रुत्योर्विरोध इति वाच्यं आद्यस्य मग्नभेदेन सुषुप्तेद्वैवि
ध्यात् मुख्ये दसंपत्तिरिति सुषुप्तिप्रकरणस्य वेदान्तसूत्रात् अन्यथा श्रुत्योर्विरोधस्यापरिहा
र्यत्वाच्च कदाचिद्रूढतमसा चित्तसत्वस्य तमोगोचरवृत्तावप्यसामर्थ्ये च संभवत्येवेति यत्वाधु
निकाः वेदान्तिनस्त्वाहुः सुषुप्तौ तमःसाक्षिभास्यमेव न तत्र वृत्तिरस्तीति तन्न वक्ष्यमाणस्म
रणानुपपत्तेः साक्षिणः परिणामित्वे संस्कारस्मृत्योरनभ्युपगमात् यच्च तदेकदेशी सुषुप्ताव
ज्ञानाख्यप्रवृत्तिरेव वृत्तिमाह तन्न चित्तस्य तदपि हेयं एवं सति जाग्रत्स्वप्नयोरपि तस्या एव वृत्तिसं
भवे चित्तकल्पनावैयर्थ्यादिति तस्माज्जाग्रत्स्वप्नयोरिव सुषुप्तावपि चित्तस्यैव वृत्तिः जाग्रत्स्वप्नसु
षुप्तं च गुणतो बुद्धिवृत्तयः इति स्मृतिभ्यश्च तथा चित्तत्वेनैव वृत्तिसामान्ये हेतुत्रयोलाघवाच्चे
ति स्मरणकार्यप्रलिंगकमिति यस्यां सत्त्वसचिवं तमआविर्भवति तस्याः सात्विक्या निद्रा
याः उत्थितस्य स्मरणाकारमाह सुखमिति प्रसन्नो निर्मलं मनः स्वस्मिन् ज्ञापयमानां प्रज्ञां यथार्थे

वृत्तिं विशारदीकरोति स्वच्छामर्थप्रतिबोधग्राहिणीं करोतीत्यर्थः विशारदीं करोतीति वा पाठः स्वच्छो
धुः पस्यां रजः सचिवं तमः स्वानिर्भवति तस्माद्राजस्या निद्राया उत्थितस्य स्मरणाकारमाह दुःख
मिति स्त्यानमकर्मण्यं तामस्या निद्राया उत्थितस्य स्मरणाकारमाह गाढमिति क्लान्तमत्यन्तं मुषि
तमिव परैरपहृतमिव तिष्ठतीत्यर्थः आलस्यमिति पाठे तस्यानन्तराचित्तस्यापि चांचल्येन कर्मा
क्षमता आलस्यं तु तमोधर्मे गुरुत्वेन कर्माक्षमता कर्मण्यनिच्छा वेति भेदः ननु भवतु प्रत्यव
मर्शः तथापि कथं सुषुप्तौ प्रत्ययसिद्धिस्तत्राह स खल्विति प्रत्ययानुभवस्तत्रोक्तस्याभाव
प्रत्ययस्यानुभवे ऽसतीति सोऽयं प्रत्यवमर्शः खलु न स्यादित्यर्थः संस्कारासंभवादिति भावः ननु
वृत्तिं विनापि सुखादिवत् सुषुप्तौ स्वापस्य साक्षिभास्यत्वमभ्युपगम्यतां तत्स्मरणमुपपादनी
यमित्याशंक्याह तदाश्रिता इति तद्विषयाः प्रत्ययविषयिकाः स्मृतयोऽपि तदाश्रितास्तदाश्रि
ताः तस्य रूपस्य वृत्त्यस्यान्येनास्मरणादित्यर्थः न च स्मरणमपि साक्षिरूपेणास्त्विति वाच्यं तत्र सं
स्कारासंभवात् स्वस्य साक्षिपरिणामासंभवाच्चेति ननु निद्रावृत्तिरपि तमस्येकाग्रा विषयदुःख
प्रस्यात्वेति साक्षिमर्थं निरोद्धव्येत्याशंक्याह साचेति इतरवृत्तिवत् सुखदुःखमोहात्मकत्वेन स १८
माधिप्रतिपक्षत्वेन च निद्रापि समाधौ निरोद्धव्येत्यर्थः अनुभूतविषयासंप्रमोषः स्मृतिः

भाष्यानुसारेण सूत्रस्यायमर्थः एवमनुभूतौ यौ विषयौ वृत्तितदारूढार्थौ तयोरसंप्रमोषो
ऽपि अनपहरणं धर्मधर्म्यभेदात् तद्वृत्तौ तदुभयविषयिणीति यावत् एवंभूता वृत्तिः स्मृ
तिरिति अत्र प्रत्यभिज्ञादिव्यावृत्तये संस्कारमात्रजन्यत्वमेव स्मृतिलक्षणं सूत्रकारेणानुस्मृ
तेः प्रापितस्वरूपमेवोक्तं तेन न प्रमुषिततकस्मरणाव्याप्तिः अथ वा सूत्रोक्तमेव लक्षणं
तच्च संस्कारमात्रजन्यत्वेन विशेषणीयं प्रमुषिततकं तु संस्कारमात्रजन्यमपि ज्ञानं अनुभ
वमध्ये प्रवेशनीयं शब्दजन्यपदार्थोपस्थित्यादौ स्मरामीति स्फुटं व्यवहारादर्शनात् प्रमा
णत्वादिवृत्तिविभागसूत्रे तु संस्कारमात्रजन्यत्वगुणेनानादृश्य ज्ञाने स्मृतिशब्दप्रयोगे अने
न च सूत्रेणाप्यस्मृतिलक्षितेति स्मृतेर्वृत्तितदुभयविषयकत्वं सूत्रोक्तमवधारयितुं
भाष्यकारो विमृशति किंप्रत्ययस्येति स्मृत्यर्थधातुयोगात् कर्मणि षष्ठी चित्तं किं पूर्वानुभव
रूपं प्रत्ययमपि स्मरति आहोस्विद्विषयमात्रमित्यर्थः तत्र स्मृतेरुभयविषयकत्वरूपमाद्यं
पक्षं सिद्धान्तयितुमादावनुभवस्मरणकारणमनुभवजो यः संस्कारस्तमुपपादयति ग्राह्योपरक्त इत्या
दिना ग्राह्योपरक्तो ज्ञानविशेषणतया घटादिभिरध्यारोपितो ऽतो ग्राह्यग्रहणोभयाका
रनिर्भासस्तदुभयाकारतया प्रसिद्धो यः प्रत्ययोऽयं जानामीत्यनुव्यवसायः स तज्जातीयक

ग्राह्यग्रहणोभयाकारमेवसंस्कारंजनयतिसमानाकारत्वेनैवतल्लाघवादनुभवसंस्कारस्य
तीनां कार्यैककारणभावादित्यर्थः नन्वनुव्यवसायरूपवृत्तेः स्वप्रकाशत्वमेवांतेभोस्मृतविशे
षणार्थः कथं नेष्यत इति चेत् न कर्मकर्तृविरोधेन वृत्तेः स्वविषयकत्वस्यसंभाव्याभाच
तुर्थपादे निराकरिष्यमाणत्वात् ननु किं व्यवसायस्य संस्कारजनकत्वमेव नास्ति किं तु तत्सं
स्कारजन्यं ज्ञानं स्मृतिर्न भवति प्रमुषिततत्ताकस्य पराभिमतस्य स्मरणस्यास्माभिर्व्यवहारानुसा
रेणानुभवमध्ये एव प्रवेशनादिति नन्वनुभवविषयकसंस्कारस्ततः किमित्यत आह सं
संस्कार इति सचोभयविषयकसंस्कारोयदास्वाभिव्यंजकेन कालादिनाभिव्यक्तो भवति तदा
तदाकारं स्वसमानाकारमेव ग्राह्यग्रहणोभयात्मिकां तदुभयविषयिणीं स्मृतिं जनयती
त्यर्थः अनुभूतविषयासंप्रमोषः स्मृतिरिति सूत्रं व्याख्यायानुव्यवसायतज्जन्यस्मरणयोर्विशेषम
प्याह तत्र ग्रहण इति एवं मुख्यं विशेष्यमिति यावत् तयोः प्रत्ययस्मरणयोरत्यंतं समानाका
रत्वेन मंतव्यं यतस्तत्र तयोर्मध्ये बुद्धिरनुव्यवसायरूपा यथोक्तप्रत्ययो ग्रहणाकारविशे
ष्यिका भवति घटमहं जानामीत्यनुव्यवसाये ज्ञानस्य घटांशे विशेष्यत्वात् स्मृतिस्तु ग्राह्या १९
कारविशेष्यका भवति स च घट इत्येव स्मरणात् न ता च पूर्वज्ञातत्वरूपान्नतः स्मृतेर्ज्ञानस्यथा

स्यं विशेष्यमिति अयं चाकारभेदोऽनुभवसिद्ध इति भावः स्मृतेर्स्वांतरभेदं दर्शयति सा च द्वयी
ति भावितः अभावितः सूचितः स्मर्तव्या सोपपयेति भावितस्मर्तव्या तद्भिन्ना चाभावितस्म
र्तव्या तयोरुदाहरणे दर्शयति स्वप्ने इति स्वप्नदर्शनमेव हि भाव्यर्थसूचकतयाशाल्लोसि
द्धेन न जाग्रत्कालीना स्मृतिरिति ननु स्वप्ने पूर्वं दृष्टत्वास्मरणात् संस्कारमात्रजन्यत्वाभा
वाच्च कथं स्मृतित्वमिति चेन्न अपगतस्तदुभयरूपत्वस्य स्वप्नज्ञाने स्थापितत्वात् तादृश
स्य स्वप्नांशस्यैवान्योपन्यासादिति सर्ववृत्तेरुपन्यासस्य बीजमाह सर्वा इति अनुभवात्
अनुव्यवसायात् अननुभावादिति पाठे प्रभावादित्यर्थः यथोक्तानां वृत्तीनां निरोध्यत्वे बी
जमाह सर्वाश्चैता इति एताः सर्वाः प्रमाणादिवृत्तयो बुद्धिद्रव्यस्य सत्त्वगुणस्यैव प्रतिमादिव
द्विषयाकारा द्रव्यरूपा परिणामाः सुखदुःखमोहगुणका इत्यर्थः बुद्धिवृत्तिर्हि रूपादिमतो
भावैवस्तुवादिमतो पुरुषस्य भोग्येति अतो दुःखत्वेन वृत्तयो निरोद्धव्या इत्युपसंहरिष्य
ति ननु सुखवृत्त्वेनोपादेयत्वमेव कुतो न भवेदित्यत आह सुखदुःखेति क्लेशेषु क्लेशव्याख्या
नसूत्रेषु व्याख्येयाः व्याख्यानमेवाह सुखानुशयो राग इत्यादि सुखदुःखानुशयी सुखदुःख
विषयकः तथा च रागजनकत्वाद् दुःखवत्सुखमपि हेयं मोहस्त्वविद्यारूपत्वात् [illegible]

लदुःखनिदानत्वेन हेय इत्याशयः रागा इति अतो दुःखात्मकत्वादेताः सर्वा निरोद्धव्या इत्यर्थः
प्रकरणार्थमुपसंहरति आसामिति तदेवं सामान्यतो योगस्य लक्षणं कृतं इदानीं तस्योपायं
प्रतिपादयिष्यति सूत्रकारस्तत्र संक्षेपात् उपायद्वयं सारसंग्राहकं सूत्रमवतारयति अभ्यासामि
ति अभ्यासवैराग्याभ्यां तन्निरोधः अभ्यासवैराग्ये व्याख्यास्यते अभ्यासवैराग्ययोरवांतर
व्यापारभेदेन निरोधजनने समुच्चयपरावनविकल्प इत्याह चित्तनदीति यथा नदी कदाचि
त् समुद्राभिमुखी वहति कदाचिच्च तद्वैपरीत्येन पर्वताभिमुखा वहति अन्यथा समुद्रगम
नमात्रेणाशुद्ध्येनैव एवं चित्तनद्यपि उभयतोवाहिनी उभयतो वहनस्य प्रयोजनमाह वह
तीति कल्याणं मोक्षस्तदर्थे पापे संसारस्तत्फलत्वात्तत्कारणत्वाद्वा तदर्थे तथा चोक्तं प
स्मादृशां विमोक्षाय निबंधाय परादृशां अयमार्गोऽनेनेवाये विरुद्धफलदो भव इति प्रवाहद्व
यं विशिष्य दर्शयति यात्विति प्राग्भारा अभिमुखी विवेकविषयो निम्नो गमनमार्गो यस्याः इत्य
र्थः उक्तस्य हि प्रवाहाभिमुखं वर्त्मनीचं भवतीति तत्र चित्तनद्यां वैराग्येण विषयमार्गं वति
स्रोतः खिलीक्रियते अस्यां क्रियते विवेकदर्शनस्याभ्यासेन च विवेकमार्गं वति स्रोतः उद्घाट्यते १८
बलवत् क्रियते येन निरोधाख्ये केवलसागरे विलीयते इत्यतोऽवांतरव्यापारभेदेनोभयाधी

नश्चित्तवृत्तिनिरोध इत्यर्थः तदुक्तं गीतायां असंशयं महाबाहो मनो दुर्निग्रहं चलं अभ्यासेन तु
कौंतेय वैराग्येण च गृह्यते इति अत्र विवेकदर्शनमात्रस्याभ्यासः प्राधान्येनोक्तः आगामिसूत्रे
निरोधसाधनानुष्ठानसामान्यस्यैवाभ्यासत्वावगमादिति अभ्यासवैराग्ये क्रमाल्लक्षयति सू
त्रजातेन तत्र स्थितौ यत्नोऽभ्यासः तत्राभ्यासवैराग्ययोर्मध्ये चित्तस्येति अवृत्तिकस्य वृत्यंत
रशून्यस्य ननु वृत्तिसामान्याभाववतः स्थिरत्वं ततः संप्रज्ञातस्य समापत्तिसूत्रे भाष्यकारैर्व्याख्ये
यत्वात् प्रशांतवाहिनेति वृत्यंतराभावात् प्रशांता हर्षशोकादितरंगरहिता एकाग्रवृत्तिधारेत्य
र्थः शांतिश्च तेनैवोक्ता श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च मत्वा घ्रात्वा शुभाशुभं न हृष्यति ग्लायति च स शांत इ
ति कथ्यते इति स्थितिशब्दार्थं व्याख्याय यत्नशब्दार्थं व्याचष्टे तदर्थेति तथा च चर्मणि द्वीपिनं
हंतीतिवदियं निमित्तसप्तमीति यत्नशब्दं व्याचष्टे प्रयत्न इति प्रयत्नमपि पर्यायाभ्यां विशद
यति वीर्यमुत्साह इति तथाप्यस्य प्रयत्नमात्रेणेति विशेषयन्नाह तत्संपिपादयिषयेति तत्सं
पादनेच्छया तदुद्दिश्य वीर्यं कृतिसमाधिपत्तादीनां इष्टमाणानां साधनानां अनुष्ठानं सोऽभ्या
स इत्यभ्यासलक्षणं कृतं ननु व्युत्थानसंस्कारेणानादिना प्रतिबंधात् कथमभ्यासः स्थितिसंपा
दयेत् इत्याकांक्षायामाह सूत्रकारः स तु दीर्घकालनैरंतर्यसत्कारासे

विनइति। तद्विवृणोति। तपसेत्यादिना सत्कारवानित्यंतेन दृढभूमिरित्येतद्विवृणोति व्युत्था
नेति व्युत्थानसंस्कारेणाद्रागित्येव सहसाभिभूत स्थितिरूपो विषयो यस्य स भवतीत्यर्थः
अभ्यासं कृत्वोपरमे च कालांतरमादभिभवो भवत्येवेति प्रतिपादयितुं द्राणीत्येतेत्युक्तं अभ्यासं
लक्षयित्वा वैराग्यं लक्षयति दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यं रागाभाव
मात्रं दोषदर्शनजन्यो रागाभावो वा न निरोधहेतुर्वैराग्यं रोगादिनिमित्तकाद्दविनो यो रागान्दया
त् दोषदर्शनजवैराग्यादनंतरमपि विषयसन्निधेन चित्तक्षोभतः सौभर्यादेर्योगानिष्पत्ते
श्च अतो न वैराग्यस्यैतन्मात्रं लक्षणं किं तु यचोक्तं वितृष्णस्य वशीकारसंज्ञेति निर्देश
इत्याचष्टे स्त्रियइति दृष्टविषयवितृष्णस्येति व्याख्याय आनुश्रविकविषयवितृष्णस्येति व्या
चष्टे स्वर्गेति स्वर्गश्च वैदेह्यं च प्रकृतिलयत्वं च तेषां प्राप्तिरेवानुश्रवाख्यवेदोक्तो विषयस्तत्र
वितृष्णस्येत्यर्थः स्थूलदेहविरहे पि लिंगशरीरेणोपयेषां देवानां भोगस्ते विदेहास्तद्रूपता
च वैदेह्यं येन साधारणभूतेनाहंकारावरणापद्मनोसलीनाः श्लिष्टाः लिंगदेहेन सह गता इतिया
वत् तेषां भावः प्रकृतिलयत्वं न तु प्रलयाख्यो जनः कारणगतस्यैव प्रकृतिस्मृतस्यो भोगाश्रवणा २१
त् अन्यथा प्राकृतप्रलयवदपुरुषार्थत्वाच्च प्रकृतिलयानां च विदेहेभ्यो यं भेदः विदेहाः सा

वरणभूतेनाहंतत्त्वेनाराधास्मीत्ययं मलिनं च विषयं भुंजते प्रकृतिलयास्तु बहिर्गमनेन विदेहा
नप्रत्यपीशात्स्वस्वेन तत्स्मात्तेण तत्त्वेन निर्मले कारणसत्वनिर्मितं विषयं च भुंजते ते च ईश्वरकोटय
उच्यंते इति यद्यप्यंतं हेतुगर्भविशेषणपदं व्याख्याय वशीकारसंज्ञेति विशेष्यपदं व्याचष्टे दिव्यादि
ष्वेति अयमार्थः आदौ विषयाणां निष्प्रयत्ने वस्तरे दोषावरकाभावात् दोषदर्शनेन वैतृष्ण्यं
भवति विरक्तिर्दोषदर्शनादिति स्मृतेः तच्चतुर्विधं यतमानसंज्ञा व्यतिरेकसंज्ञा एकेंद्रियसंज्ञे
ति एताश्चयद्याख्यास्यामः तस्माच्चतुर्विधवैतृष्ण्यादभ्यस्यमानाद्विषयसंयोगकाले
पि दोषदर्शनमप्रतिबद्धमुत्पद्यते वैराग्याद्दोषदर्शनमित्यस्मृत्येतरात्; कुतः पुनःपुनर
प्रतिबंधः तत्रोक्तं प्रसंख्यानबलात् दोषसाक्षात्कारस्य बलवत्वादिति दोषसाक्षात्कारस्य
बला भावान्तु सौभर्यादेः प्राप्विरक्तस्यापि विषयसन्निकर्षेण दोषदर्शनं प्रतिबध्य पुनारग
उत्पादितइति तस्माच्च दोषदर्शनोत्कर्षोद्विषयसंयोगकालेपि यान्वितस्या नाभोगात्मिकाऽन्ना
भोगरहिता तस्य चित्तस्येहेयोपादेयशून्या रागद्वेषशून्या वशीकारसंज्ञा या वितृष्णा सा वैरा
ग्यमपरमिति शेषः उत्तरसूत्रे तत्परमिति वचनादस्यापरत्वं तथा च रागद्वेषशून्यस्य चित्तस्य साक्षा
त्कारस्य योग्यता वशीकारसंज्ञाख्या वैराग्यमिति पर्यवसितं तेन सर्वदैतादृशचित्तप्रसादयोगभा

वेपिननिरोधाभ्यासेभवः तदेवमनेनसूत्रेणहेतुहेतुमद्भावरूपतस्तेत्रातरसिद्धंवैराग्यंचेतव्य
मेवोक्तं तत्रप्रथमभूमिकायतमानसंज्ञानष्टेविवेकसाज्ञानपूर्वकंवैराग्यसाधनानुष्ठानंद्वि
तीयभूमिकाव्यतिरेकसंज्ञासाचजितान्येतानीन्द्रियाणिएतानिचजेतव्यानीतिव्यतिरेकावधार
णयोग्यता तृतीयभूमिकाचैकेन्द्रियसंज्ञा साचबाह्येन्द्रियविषयेषुरूपादिषुरागादिक्षयेसति
एकस्मिन्नेवमानसिमानावमानादिविषयकरागद्वेषादिक्षयोज्ञानपूर्वकइति चतुर्थभूमि
कातवशीकारसंज्ञास्यप्रथमुक्तैवेति अपरवैराग्यमुक्त्वापरवैराग्यमाह तत्परंपुरुषख्यातेर्गु
णवैतृष्ण्यं तदितिवैराग्यंपरमुच्यते तथाचात्मद्वयान्तरसाक्षात्काराभ्यासाद्धेतोरुत्पद्यमा
नसकलगुणेषुवैतृष्ण्यंपरंश्रेष्ठंवैराग्यमित्यर्थः पूर्वसूत्रोक्तवैराग्याद्स्यभेदंदर्शयति दृष्टे
त्यादिना पूर्वसूत्रेविषयदोषदर्शनाद्विजयेषुचवैराग्यमुक्तं नतुहानेनदानींज्ञानेपिविना
शित्वादिदोषदर्शनलाभेपिनालंबुद्धिरूपंवैराग्यंसंभवति अविद्यानिवृत्त्याख्यप्रयोजन
वत्वात् अत्रतुसूत्रेज्ञानेनाविद्यानिवृत्त्यादौसिद्धेतेनैवदोषदर्शनेनानात्मत्वदृष्ट्याचज्ञा
नसाधारणेयत्खिलकार्यकारणेषात्मनत्यसोपेक्षेति वैराग्ययोर्भेदइतिवाक्यार्थः तत्बुद्धी २२
तिपुरुषशुद्धिप्रविवेकख्यातिशक्तिरपरिणामिनीत्यादिनादर्शितस्तेनाप्यापितात्तत्समा

मपुरुषार्थोबुद्धिर्यस्येतिविग्रहः व्यक्ताव्यक्तेति व्यक्ताव्यक्तेस्थूलसूक्ष्मेकार्यधर्मावाश्रितेषे
षुसत्त्वादिगुणेषुतेभ्यः तैः कार्यैः सहितेभ्यस्तेभ्यइतियावत् तद्रूपमिति ततस्माडुभयंपर
स्परभिन्नंवैराग्यमित्यर्थः द्वितीयवैराग्यस्यपरत्वेहेतुमाह तत्रपडुतरमिति ज्ञानप्रसादमा
त्रंवैराग्यमित्यागामिनात्वयः ज्ञानस्यप्रसादश्चास्वरूपंव्याख्यास्यते ननुवैतृष्ण्यंतृष्णाविरहरूपं
वैराग्यंसूत्रकारेणोक्तं तद्विहायतत्स्थंभाष्यकारेणज्ञानरूपंतदयुक्तइतिचेत् नशब्दभेदेप्य
र्थाभेदात् नह्यभावोस्मन्मतेतिरिक्तोस्तिअधिकरणस्यावस्थाविशेषस्यैवाभावत्वात तथा
चचित्तस्यैवातादृशीज्ञानावस्थैवतृष्णाविरहइति यदिचस्तुप्रसादोतृष्णाविरहोपेक्षितस्तदा
ज्ञानप्रसादस्योग्यत्वेवपरवैराग्यमुच्यतां योग्यताचनिर्मलसत्त्वतेति अपिचभवतुवैतृष्ण्य
मेववैराग्यंतथापिज्ञानप्रसादेनैववैतृष्ण्यगतोविशेषोनुमीयतइतिलिंगलिंगिनोरभेदोप
चारात्सूत्रभाष्ययोर्नविरोधः विरामप्रत्ययाभ्यासपूर्वइत्यागामिसूत्रेपिपरवैराग्यस्यप्रत
यत्वलाभाच्चेति ज्ञानप्रसादस्यलक्षणमाह यस्योदयइति यस्यज्ञानप्रसादस्योदयेसतिएत
स्यैवविवरणः प्रत्युदितख्यातिर्निष्पन्नात्मज्ञानोयोगीति प्रापणीयंज्ञानंप्राप्तंसिद्धं यतः क्षी
णाः अविद्यादयः क्षेतव्याः क्लेशाः अतश्चाश्लिष्टानिनिःसंधीनिपर्वाणियस्यसक्लिष्टपर्वो

भवसंक्रमो देहाद्देहान्तरसंचाराख्यः संसारश्छिन्नः पुनर्न भवितेति यावत् यस्य संसारस्याविच्छे
दात् जन्ममरणप्रवाहेऽतिदुःखदो भवतीत्येवं मन्यत इत्यन्वयः ज्ञानप्रसादमात्रमित्यस्य शब्दां
तरेण विवृणोति ज्ञानस्यैवेति ज्ञानस्य परा काष्ठा च विवेकख्यातावलंप्रत्ययो दुःखात्मिकेयम
पि शाम्यतीति निरूपद इत्यर्थः अस्य ज्ञानकाष्ठात्वे हेतुमाह एतस्यैव हीति एतस्यैव यतो ज्ञानप्रसाद
स्य कैवल्यं नांतरीयकं नियतं एतस्मिन्नेव सति कैवल्यमावश्यकं नान्यस्मिन् ज्ञाने यमनियमादौ
वैराग्ये वा तस्माद्वैप्यसंप्रज्ञातानुदयेनाशेषतः प्राचीनकर्मक्षयानियमतः कषाद्यसंभवत
श्च मोक्षे विलंबसंभवादिति तदेवं सामान्यतो योगस्तत्साधनं चोक्तं इदानीं विशेषतो योगतत्सा
धनं वक्तव्ये तत्रादौ योगगतमवांतरविभागं दर्शयिष्यति सूत्रकारः तत्सूत्रावतारयत्प्रकृति
अथोपायेति उपायद्वयेन अभ्यासवैराग्याभ्यां निरुद्धराजसतामसवृत्तेः पुरुषस्य कथं कैः
प्रकारभेदैः संप्रज्ञातयोगः स्यादिति पृच्छ्यत इत्यर्थः अत्र प्रत्युत्तरं सूत्रं वितर्कविचारानंदास्मि
तानुगमात्संप्रज्ञातः अस्यार्थः साक्षात्कारविशेषरूपैर्वितर्कादिभिरनुगमात्तद्धेतोः सम्यक्
प्रज्ञातत्वेन योगः संप्रज्ञातनामा भवति वितर्कादिभूमिभेदैश्चतुर्धा विभक्त इत्यर्थादिति 23
अत्र रूपानुगमादिति सूत्रपाठः प्रामादिकस्तदुपेक्षणीयः भाष्ये वितर्कविकल्पः सविचार इत्या

दिप्रयोगेषु रूपपदाप्रयोगात् आद्यसूत्रेऽपि भाष्यकृत वितर्कानुगतो विचारानुगत इत्यपि वैयर्थ्या
दुपेक्षणीयं वितर्कादिचतुष्टयं व्याचष्टे वितर्कश्चित्तस्येत्यादि इत्यादेरेव प्रयोगाच्च यद्यत्र
पाठे वितर्कादीनां रूपेऽनुगमादिति कस्यचिद्व्याख्यानं तदपि वैयर्थ्यादुपेक्षणीयं वितर्कादि
चतुष्टयं व्याचष्टे वितर्कश्चित्तस्येत्यादिना योनिजं वायोनिजं वा चतुर्भुजादिकं वा स्थूलं षड्विंशति
तत्त्वसंघातमाश्रित्य प्रथमं भावना प्रवर्तते तच्चालंबनं अदृष्टज्ञानीयेषु चेत्तन्मयपर्यन्तेषु वि
वेकेन पूर्वं चिंतनासंभवात् योगबलादेव हितानि स्थापत्साक्षात्क्रियंत इति नतान्यालंबनानि
तथा चैकस्मिन्नेवालंबने क्रमेण चतुःप्रकारः संप्रज्ञातो भवति तत्रालंबने विराट्शरीरादौ प्रथ
मं यच्छ्रितस्य स्थूलाकारत्वात्स्थूलश्चाभोगः परिपूर्णता स्थूलयोर्भूतेन्द्रिययोरदृष्टाऽश्रुतामता
ऽशेषविशेषसाक्षात्कारः सवितर्क इत्यर्थः विशेषेण तर्कणमवधारणं वितर्कः तेनानुगतोऽयु
क्तो निरोधो वितर्कानुगतनामा योग इति भावः सवितर्कनिर्वितर्कौ चास्य वितर्कस्यावांतरभे
दौ वक्ष्यति तत्र च वितर्कशब्दो विपरीततर्कणायोक्तः शब्दार्थज्ञानविकल्पस्यैव तस्मिन् सूत्रे
वितर्कशब्दार्थोपगमात् सूक्ष्मो विचार इति तत्रैवालंबने कारणत्वादिनानुगता ये प्रकृतिमहदहं
कारपंचतन्मात्ररूपा भूतेन्द्रिययोः सूक्ष्मास्तर्पायास्तदाकारत्वात्सूक्ष्मोपश्रितस्याभोगः सूक्ष्म

गतारोषविशेषस्मात् साक्षात्कारः सः विचार इत्यर्थः विशेषेण चरणं सूक्ष्मवस्तुपर्यंतमिति विचा
रः तेनानुगतो युक्तो निरोधो विचारानुगतनामा योग इति भावः सविचारनिर्विचारौ च स्यवि
चारस्यांतरभेदौ वक्ष्यति तत्र च विचारशब्दो मंदचरणापेक्षः तांत्रिकपरिभाषा वा तस्मादेव सू
क्ष्मविषयकसमाधेः कार्याद्युपरागस्यैव विचारशब्दार्थत्वावगमात् आनंदो ह्लाद इति तत्रैवा
लंबने पश्चितस्य विचारानुगतभूम्यारोहात् सत्त्वप्रकर्षेणाजायमानो ह्लादाख्यसुखविशेषे आ
भोगः साक्षात्कारो भवति सत्त्वानंदविषयकत्वादानंद इत्यर्थः तेनानुगतो युक्तो निरोधः आ
नंदानुगतनामा योग इति भावः तदानीं चानंदगोचरतयाहं सुखीति चित्तवृत्तिर्भवति न सूक्ष्म
वस्तुविषयीति विचारानुगतात् विशेषः तथा च गीतासु सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रि
यं वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितमिति आ
नंदस्य च सानंदनिरानंदत्वेन भेदो नास्ति सूत्रभाष्ययोरवक्ष्यमाणत्वादिति अत्र कश्चित् ह्ला
दो ह्लादस्त्वानिंद्रियवर्गः तथा च इंद्रियाकारत्वादिंद्रियरूपोपश्चितस्याभोगः साक्षात्कारः सत्त्वा
नंद इत्यर्थं वदति तन्न एतादृशलक्षणायां प्रमाणादर्शनात् इंद्रियस्यापि स्थूलतया तत्राभो २४
गस्यापि वितर्कमध्य एव प्रवेशाच्च कारणत्वमेव सूक्ष्मत्वमिति भाष्ये वक्ष्यमाणत्वेन केवलत्वे

ष्टृति स्वरूपस्यास्थूलत्वस्येंद्रियसाधारणत्वादिति किंच इंद्रियगोचरसंप्रज्ञातस्यानंदानुगत
त्वसत्त्वे परोक्तरीत्या तत्रापि वस्तुपरागानुपरागाभ्यां सानंदनिरानंदरूपावांतरविभागसं
भवात्तदवचनेनागामिसूत्रभाष्ययोर्न्यूनता स्यात् अस्मद्व्याख्याने चावांतरविभागो न संभ
वतीति न तदवचनन्यूनता यत्तु ग्रहीतृग्रहणग्राह्येषु तत्स्थतदंजनता समापत्तिरिति सूत्रे
ग्राह्यात्स्थूलेंद्रियेषु संप्रज्ञातो वक्ष्यते तत्प्रकारांतरेण संप्रज्ञातस्याखिलविषयसंकलनार्थ
मेव न तु वितर्कानुगतविचारानुगताभ्यामिंद्रियसमापत्तेरानंदानुगतरूपभेदमभिप्रेत्य त
थानात्पर्यग्राहकलिंगाभावादिति दिक् एकात्मिका संविदस्मितेति एकशब्दोऽत्र केवलवाची
एकात्मिका एकाकारा आत्मान्यस्याविषयत्वेनास्तीत्येकात्मिका तथा चोत्तरकालंबने या चितस्य
केवलपुरुषाकारा संवित् साक्षात्कारोऽस्मीत्येतावन्मात्राकारत्वादस्मितेत्यर्थः ॥ सा च जीवा
त्मविषया परमात्मविषया चेति द्विधा वक्ष्यते तेनानुगतो युक्तो निरोधोऽस्मितानुगतनामा
योग इति भावः अस्या अस्मितायाश्चपि सास्मितनिरस्मितरूपो विभागो नास्ति सूत्रभाष्य
योरवक्ष्यमाणत्वात् केवलपुरुषज्ञानस्य निर्विकल्पकमात्ररूपतया द्विविधत्वासंभवाच्च दे
हेंद्रियाद्युपरागतस्सविकल्पानां योगानां वितर्कानुगतादिष्वेवान्तर्भावादिति अत्रत्वा

स्मिताशब्दो विविक्तचेतनाकारतामात्रोपलक्षकः तेनोदासीनभावेन यईश्वरश्चेतनतत्त्व
साक्षात्कारस्तस्यापि संग्रहः सोपाधिकेश्वरसंप्रज्ञातस्य च विचारानुगते प्रवेशः एतावत्संप्र
ज्ञातस्य समयस्यानंदानुगते विचारानुगते प्रवेशस्य मोक्षधर्मे वाक्येनोक्तः वितर्कश्च विवेकश्च
विचारश्चोपजायते मुनेः समादधानस्य प्रथमं योगमादित इति प्रथमं योगं संप्रज्ञातं स
मादधानस्य कुर्वतः आदितः क्रमाज्जायत इत्यर्थः योगारंभमूर्तेतु हरिमूर्तं मनश्चिंतयेत्
स्थूले विनिर्जितं चित्तं ततः सूक्ष्मेण नैर्णयेत् इति स्मृतिद्वयं चास्मिन्नौत्सर्गिकक्रमे प्रमाण
मिति इदानीं संवेद्येकेवले ध्यानं न कुर्याद्रघुनंदनेत्यादिस्मृत्यनुसारेण पूर्वपूर्वभूमिका
सत्तरोत्तरभूमिविषयस्य चिंतनमुत्तरोत्तरभूमिषु च पूर्वपूर्वविषयस्य परित्यागं विदधा
ति तत्र प्रथमश्चतुष्टयानुगत इत्यादिना तत्र प्रथमः सवितर्को वितर्कानुगतः समाधिश्च
तुष्टयानुगतो वितर्कादिचतुष्टयेनानुगतो भवति तस्यायः पिंडवदेकीभावेन स्थूलसाक्षात्का
रे पुरुषपर्यंतानां सर्वेषामेव भानात् स्थूलस्य च विचारादित्रयविषयग्राहकतामात्रेण विचारा
दित्रयानुगतत्वं विवक्षितमन्यथा सांकर्यापत्तेः वितर्कानुगते समाधौ केवलात्मपर्यंतसा
क्षात्काराभावाच्च एवमुत्तरेष्वपि बोध्यं द्वितीयस्त्रितयविशिष्टो विचारानुगतो वितर्कविकलः वित २५

र्कभूमिजयात्तत्परित्यागेन तद्विषयविकलः तृतीय इति तृतीयस्त्वानंदानुगतो विचारविषयेणा
पि विकलः चतुर्थ इति चतुर्थोऽस्मितानुगतस्तद्विकलस्त्वानंदेनापि विकल इत्यतोऽस्मितामात्र इ
त्यर्थः असंप्रज्ञातात्संप्रज्ञातस्य भेदमाह सर्व एत इति सालंबनाः साकाराः एकाग्रवृत्तिप्रकार इ
तिपापन्न समाधयो योगाः क्वापि कारणयोरभेदादिति प्रागेव व्याख्यातं क्रमप्राप्तमसंप्रज्ञातमव
तारयितुं पृच्छति अथेति विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः तस्यापि विरम्यतामिति प्रत्य
यो विरामप्रत्ययः परवैराग्यं ज्ञानेऽप्यलं बुद्धिर्ज्ञानमपि शाम्यत्वित्येवंरूपात्तस्याप्यभ्यासात् योऽन्यः
पुमाञ्जायत इत्याद्यविशेषणार्थः तथा चाद्यविशेषणेनोपायकथनं मध्येन लक्षणकथनं अं
त्येन लक्ष्यकथनं अन्योऽसंप्रज्ञात इत्यर्थः अंत्यविशेषणद्वयं व्याचष्टे सर्वेति समाधेर्योगः
आद्यविशेषणस्य पर्यवसितार्थमाह तस्य परवैराग्यमुपाय इति नन्वेकाग्रतात्कोऽभ्यासोऽप्य
न्साक्षात्कारं कथं न भवति संप्रज्ञाते त्वेवं साकांक्षायामाह सालंबन इति पुरुषपर्यंतं कस्मि
न्नप्यालंबने चित्तस्यैकाग्रतारूपोऽभ्यासोऽस्ति नासंप्रज्ञातस्य साक्षात्साधको भवति आलंबनवस्तु
विशेषितत्वात् अतः पुरुषख्यातिपर्यंतात्स्वचरितं त्यजति पुनरलं बुद्धिरूपो विरामप्रत्ययः परवैराग्या
ख्य एवासंप्रज्ञातेन साधनतयालंबनीक्रियते आश्रीयते स यतो निर्वस्तुकः नास्ति वस्तु चिंतनीयं

पन्नेत्यर्थः ननुतस्यनिर्वस्तुकत्वेकथंतदाभ्यासोहेतुरुत्तत्राह सर्वार्थशून्यइति सोऽप्यसंप्रज्ञातो
ध्येयार्थशून्यः अतोखिलध्येयवैराग्यमेवतत्रहेतुरुक्तइत्यर्थः सत्त्वस्यफलितार्थमाहतदभ्या
सेति कृतवैराग्याभ्यासंचित्तंनिरालंबनंनिर्विषयंअभावप्राप्तमिवभवतितद्रूपकार्याकरणात्
मृतकवद्भवतिइत्येषोवस्थाविशेषइत्यादेरर्थः निर्बीजइति संस्कारद्वाराजन्मबीजंज्ञान
कर्मतद्भूत्यावस्थेत्यर्थः संस्कारशेषसंसारबीजोन्मूलकइतिवार्थः असंप्रज्ञातस्यापिनिमित्त
भेदात् द्वैविध्यंसूत्राभ्यांसूत्रकारोवक्ष्यतितदेवद्वैविध्यंयुक्तिसिद्धंनपूर्वाचार्योक्तमेवेत्याद
र्शयति तयोःसूत्रयोरवतारणायसूत्रद्वयंद्विविधइति सोऽप्यसंप्रज्ञातः आगमिसूत्रेऽस्यप्र
ज्ञापूर्वकत्ववचनात् उपायप्रत्ययोवक्ष्यमाणश्रद्धाद्युपायकारणकोयोगिनामिहलोकेभव
ति इहलोकेयोगाभ्यासानांचदेवताविशेषतापन्नानांदेवलोकेभवप्रत्ययोजन्ममात्रकारण
कइत्यर्थः तत्रोपायप्रत्ययंविस्तरेणवदिष्यन् सूत्रकारः सूचीकटाहन्यायेनादौभवप्रत्ययंव
दिष्यतीतिसूत्रभाष्ययोः क्रमभेदोनदोषायेतिमंतव्यं उत्पत्तिक्रमानुसारेणसौत्रक्रमस्त्वेष्य
परथितारस्तत्रमुख्यापयति तत्रेति तत्रोपायप्रत्ययोयोगिनांप्रबद्धयोगानांभवतिसचपश्चा २६
द्वक्ष्यतइतिशेषः भवप्रत्ययोविदेहप्रकृतिलयानांभवोजन्मतदेवप्रत्ययोकारणंयस्येतिविग्रहः

विदेहाइतिविभूतिपादेस्पष्टीभविष्यमाणानामितिपिमंतव्यावचो विदेहानामिति शरीरनैरपेक्ष्ये
णवृद्धिवृत्तिमंतोविदेहाइतिविभूतिपादेस्पष्टीभविष्यति तेचमहदादयोदेवाः तेषांसाधना
नुष्ठानंविनैवासंप्रज्ञातयोगोजन्ममात्रनिमित्तकोभवति योनिसाद्गुण्येनोत्पत्तिकज्ञानात् तेहि
दैनंदिनप्रलयेकदाचित्सर्गकालेपिस्वसंस्कारमात्रोपगतेनचित्तेनसंस्कारशेषेणनिरोधाव
स्थेनचित्तेनकैवल्यपदमिवप्राप्नुवंतोव्युत्थानकालेचस्वसंस्कारस्यदेवभावप्रापकसंस्कारस्य
विपाकेफलमैश्वर्यभोगंप्रारब्धकर्मयंत्रितास्तिवाहयंतिअतिक्रामंतिततोमुच्यंतइतिशेषः
तथाप्रकृतिलयाइति ईश्वरोपासनयाप्रकृतिदेवतोपासनयावाभिव्यक्तांडसाधारणंत्यक्त्वालिंग
शरीरेणासहप्रकृत्यावरणेगताः तेप्रकृतिलीनाः तेपिचक्रसमाप्तकार्येचेतसिस्वेच्छयैवप्रकृ
तिलीनेसंस्कारशेषेसतिअसंप्रज्ञातयोगेकैवल्यपदमिवप्राप्नुवंति यावदधिकारशेषवशा
त् चित्तंपुनर्व्युत्थितंनभवतितस्यापिभवप्रत्ययइतिशेषः अधिकारसमाप्तौचतेपिमुच्यंतइ
त्याशयः केचित्भवप्रत्ययस्यामितिभनोः विघातयाचेदंसूत्रंइंद्रियादिप्रकृत्यंतचिंतकानामविद्या
कारणकमसंप्रज्ञातंवदंतीत्याहुः तन्नपरवैराग्यस्यासंप्रज्ञातहेतुतयातस्याविद्यासंभवात्
यच्चवायुपुराणे दशमन्वंतराणीहतिष्ठंतींद्रियचिंतकाः भौतिकास्तुशतंपूर्णंसहस्रंत्वाभिमा

निकाः वोद्गादशसहस्राणीति यंति विगतज्वराः पूर्णे शतसहस्रे तु तिष्ठंत्यव्यक्तचिंतकाः निर्गुणंपु
रुषं प्राप्य कालसंख्या न विद्यते इति वाक्यं तत इंद्रियाद्युपासकानामव्यक्तज्ञानानां कर्मदेवा
नां तत्तत्पदावस्थितिकालानेवपरिच्छिनत्ति न तु तेषामसंप्रज्ञातसमाधिकालात् देहाद्यभावे
नवस्यभावकालात्वा इंद्रियादिचिंतामात्रेणासंप्रज्ञातानुपपत्तेः वस्तुभावस्य कादाचित्कस्यमल
यमरणादितुल्यत्वेनापुरुषार्थत्वाच्च इंद्रियाद्युपासकानामिंद्रियाद्यभिमानिसूर्यादिपदप्राप्तिरेवा
मृत्वफलत्वमभवणाच्चेति उपायप्रत्ययमसंप्रज्ञातं तदधिकारिणं चाह श्रद्धावीर्यस्मृतिसमाधिप्रज्ञाप
र्वक इतरेषां विदेहप्रकृतिलयातिरिक्तानां देवानां वा मनुष्यादीनां वा न जन्ममात्रादसंप्रज्ञातो भ
वति किंतु श्रद्धादिभ्यः पंचभ्यः प्रत्ययपर्यंतेभ्य इत्यर्थः संक्षेपतः सूत्रवाक्यार्थमाह उपायेति
उपायः श्रद्धादिः श्रद्धादीन् पंचक्रमेण व्याचष्टे श्रद्धा चेतसइत्यादिना संप्रसादः प्रीतिः यो
गो मे भूयादित्यभिलाषा सा च समर्था मातेव योगिनं पातिप्रतिबंधसहस्राणि तिरस्कृत्य रक्ष
ति यथा योगभंगो न भवतीत्यर्थः श्रद्धात श्रद्धावीर्यं भवतीत्याह तस्य हीति श्रद्दधानस्य विवे
कज्ञो वेश्वरान्तरपुरुषतत्वज्ञाने योगसाधने ऽर्थितया वीर्यं प्रयत्नो धारणारूपो भवतीत्य २७
र्थः समुपजातेति वीर्यत अस्मृतिर्ध्यानं तेन तत्र समाधिर्योगस्य चरमांगं भवति तदेवं श्रद्धाभ

लकाद्वारणाद्यंतरंगत्रयात्संप्रज्ञातयोगे जायमाने प्रज्ञा जीवब्रह्मात्मतरात्मतत्वसाक्षात्का
ररूपो विवेक उपावर्तते उपजायते येन विवेकेन यथार्थं वस्तु जानाति क्रियकर्मी करोति विद्वा
नित्यर्थः तदेवं श्रद्धादीन्व्याख्याय तत्पूर्वकत्वमसंप्रज्ञातस्य व्याचष्टे तदभ्यासादिति प्रज्ञा
यास्त्राभ्यासात् तत्सिद्ध्या तद्विषयकादपि विरागप्रत्ययरूपादलंबुध्या रव्याद्वैराग्याद संप्रज्ञातो
भवतीति सूत्रार्थः आसन्नसमाधिसिद्धौ त्वतिशयेनोपायानुष्ठानं हेतुरिति सूत्रद्वयेन प्र
तिपादनीयं तयोरादिसूत्रमवतारयति तस्य पक्रमते तेखल्विति उपायः श्रद्धादिः तस्य मृदुत्वम
ध्यतामध्यत्वं प्रसिद्धमेव अधिमात्रत्वमतिप्रमाणता अतिशय इति तत्वमिति यावत् संवेगः अप्रा
यानुष्ठाने शैघ्र्यं कश्चित्तु संवेगो वैराग्यमिति व्याचष्टे तन्नयोगिनोनवधात्वानुपपत्तेः उपायका
येत यावैराग्यस्योपायमृदुत्वादिकं विहायस्वतंत्रेणामृदुत्वाद्यसंभवात् संवेगशब्दस्य वै
राग्यवाचकत्वाभावाच्चेति तयासमयेति मृदुसंवेगत्वादिरूपैस्त्रिविध इत्यर्थः तथाधिमा
त्रोपाय इति अधिकप्रमाणको पायो ऽपि मृदुसंवेगत्वादिरूपैस्त्रिविध इत्यर्थः तत्र तेषु नवसु
मध्ये सूत्रेण सहान्वयः अधिमात्रोपायानां तीव्रसंवेगानामासन्नः नवयोगिमध्ये चरमाणा
मेवासन्नोऽसंप्रज्ञातो भवतीत्यर्थः समाधिलाभः तन्निष्पत्तिः न केवलं समाधिरासन्नोपित

मोक्षोपीत्याह समाधिफलं चेति विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि इत्यादि विष्णुपुरा
णादिभ्य इति भावः अत्र कश्चित् तत्राधिमात्रोपायानामिति सूत्रमध्येन प्रवेशयति तन्न त
थासति संवेगस्य त्रिधा विभागेनैव सूत्रोपपत्तौ भाष्येन तथा विभागप्रदर्शनवैयर्थ्यापत्तेः
मृदुमध्याधिमात्रत्वात् ततोपि विशेषः पूर्वसूत्रोक्तविशिष्टं तद्गतस्य तीव्रत्वस्य मृदुमध्याधि
मात्रत्वात् ततोपि विशेषः तत्रैविध्यात् ततोपि विशेषः तस्मादपि विशेषस्तरतमरूपो भवति
पूर्वसूत्रोक्तस्य नवम योगिनः इत्यर्थः एतदेव व्याचष्टे ततोपि विशेष इत्यंतेन भाष्येण फलि
तार्थमाह तद्विशेषादपीति तस्माद्विशेषादपि नवमस्य त्रिविधस्यांतिमानामासन्नतम
इत्यर्थः अपि शब्दस्त्यागामिसूत्रस्य साधनापेक्षया अत्र तीव्राधिमात्रसंवेगस्येत्यपपाठः
अधिमात्रतीव्र इत्युक्तभाष्यतोधिमात्रतीव्रसंवेगस्येत्येव पाठादिति सूत्रांतरमवतारयति
पृच्छति किमेतस्मादेवेति किमेतस्मादेव तीव्रसंवेगस्याधिमात्रत्वादेवासन्नतमः समाधिर्भ
वतीत्यादिरर्थः नवेति वैकल्पिकत्वार्थः विकल्पमेव सिद्धांतयति सूत्रेण ईश्वरप्रणिधानाद्वा
विशेष इत्यनेनान्वयः प्रणिधानमत्र तद्वितीयपादवक्ष्यमाणं किं त्वस्य संप्रज्ञातकारणीभूत २८
समाधिर्भावनाविशेष एव तज्जपस्तदर्थभावनमित्यागामिसूत्रेणोक्तप्रणिधानस्यात्र लक्ष

णीयत्वात् तथा च सूत्रद्वयस्यायमर्थः प्रज्ञातो योगोपायो जीवात्मपरमात्मसाधारणविषय
क उक्तः तत्र जीवात्मप्रज्ञातस्योपायस्याधिमात्रतीव्रसंवेगत्वे सत्येवासन्नतमोऽसंप्रज्ञातो
भवति परमात्मप्रज्ञातस्योपायस्य त्वधिमात्रतीव्रसंवेगत्वाभावेप्यासन्नतमोऽसंप्रज्ञा
तो भवतीति एवं च सति मुख्यकल्पानुकल्पभेदेन परमात्मजीवात्मप्रज्ञययोर्योगमोक्षहेतुत्वं बो
ध्यं उभयप्रज्ञयोरेव देहाद्यभिमाननिवर्तकत्वेन परवैराग्यद्वारकत्वसाम्येपि त्वतितीव्राभ्या
सं विनापि परमात्मप्रज्ञायामासन्नतमयोगहेतुतयाऽऽश्रैष्ठ्यात् ततः प्रत्यक्चेतनाधिगमो
ऽप्यंतरायाभावश्चेत्यागामिसूत्रेणाधिकद्वारकीर्तनात् अत एव श्रुतिस्मृतीतिहासादिषु प्रा
यशो ब्रह्मज्ञानमेव मोक्षहेतुतयोपदिश्यते कदाचिदेव तत्स्थानेऽन्येन जीवतत्त्वज्ञानमिति य
दि च उभयोरेव तुल्यवद्विकल्पः स्यात् तर्हि तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय त
मेवैकं जानथ आत्मानमन्या वाचो विमुंचथामृतस्यैष सेतुरित्यादिश्रुतयो व्याकुप्येरन् तथा
स ईश्वरो व्यष्टिसमष्टिरूपोऽव्यक्तस्वरूपप्रकटस्वरूपः सर्वेश्वरः सर्वविशेषवेत्ता समस्तशक्तिः प
रमेश्वराख्यः ज्ञायते येन उदस्तदोषं विशुद्धं परं निर्मलमेकरूपं संदृश्यते वाप्यवगम्यते वा तज्ज्ञा
नमज्ञानमतोन्यदुक्तं इत्यादिस्मृतयोपि व्याकुप्येरन् मुख्यकल्पत्वे तु एतज्जमार्गणावमस्त इति वाक्य

वत् तादृशवाक्यानां सुखमसाधनपरत्वेनोपपत्तिरिति दिक् ननु जीवप्रज्ञाऽऽसन्नतमयो
गोत्पादनार्थं अभ्यासस्यापेक्षितत्वमपेक्षते ईश्वरप्रज्ञा तु नापेक्षते इत्यत्र कापुक्तिरित्याका
ङ्क्षायामाह प्रणिधानादित्यादि न्यस्तात्मनाचिंतनरूपतयाप्रेमलक्षणभक्तिरित्याकाङ्क्षायामा
ह प्रणिधानादित्यादि न्यस्तात्मनाविंतनरूपतयाप्रेमलक्षणभक्तिरूपाद्वक्ष्यमाणात्प्रणिधा
नाद्वावर्जितोभिमुखीकृतः ईश्वरः स्वव्यापितेऽभिध्यानमात्रेणास्य समाधिमोक्षौ आसन्न
तमौ भवेतामितीच्छामात्रेण येणाशक्त्यादिभिरूपायान्तरानपेक्षमनुगृह्णातीत्यानुकू
ल्यं भजते अतस्तस्मादभिध्यानादपि प्रणिधानविभूत्यादिद्वारा योगिनामासन्नतमौ समा
धिमोक्षौ भवत इत्यर्थः ननु प्रधानपुरुषातिरिक्तं तत्त्वं नास्तीति त्वयाप्यभ्युपगम्यते तत्रे
श्वरो न प्रधानं चेतनत्वाभ्युपगमात् नापि पुरुषः सर्वेषां पुरुषाणां चिन्मात्रस्वरूपत्वेने
श्वरेणेश्वरत्वानीश्वरतायाः स्वतोऽसंभवात् नहि वैशेषिकादिवत् नित्येच्छादिमान् स्वतए
वेश्वरस्त्वयाप्यभ्युपगम्यते औपाधिकत्वे त्वौपाधिकस्य पुरुषस्य जीवानामपीश्वर्यमलङ्कृतस
त्वेनैवस्मृतिसमुपपत्तेः अतः प्रधानजीवातिरिक्त ईश्वरो नास्तीति सांख्याक्षेपस्य निरासकर २६
तयोत्तरसूत्रमवतारयति अथ प्रधानेति क इत्याक्षेपे अथ यथाप्रकृतिपुरुषातिरिक्तस्येश्वरस्य

किंलक्षणमिति प्रश्नेन लक्षणसूत्रमुत्थापयति अथ चेश्वरस्य प्रधानेति क्लेशकर्मविपा
काशयैरपरामृष्टः पुरुषविशेषईश्वरः पुरुषविशेष एवेश्वरः तथा च पुरुषस्य पुरुषेऽन्तर्भावः
नतु पाधेश्चप्रधान इति भावः पक्षो नैकसिद्धजीवमादायेश्वरप्रतिपादकस्मृतिसंगतिर्नेतरे
श्वरेणासिद्धजीवो भवितुमर्हतीति कादाचित्कक्लेशादिसंबन्धादित्यर्थः अपरामृष्टं विशेष
णं व्याचष्टे अविद्याद्य इति अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा इति वक्ष्यति कुशला
कुशलसाधनत्वात् कुशलाकुशलानि धर्माधर्मौः तयोः क्लेशकर्मणोः फले विपाकः स च जा
त्यायुर्भोगाः भोगश्चात्र विषयसत्वादिभिन्नितयोर्षणं शब्दाद्याकारवृत्तिर्वा न तु सुखदुः
खाद्यनुभवः ते च मनसि वर्तमाना इति वक्ष्यमाणात् सहितत्फलस्य भोक्तृत्वेनेन विपाकफल
योः सुखदुःखयोर्भोगस्य पुरुषे वक्ष्यमाणत्वाच्चेति चित्तभूमौ शेरत इत्याशया वासनाख्या
श्चविपाकानुगुणाः तत्कारणानि यतस्तत्र ह्येव शेरते स्माद्भोगवासनामङ्गोऽस्येव कर्मणा
विपाको दीयत इति ननु क्लेशाद्यपरामृष्टत्वं सर्वपुरुषसाधारणमित्याशंक्याह ते च मनसीति
एकस्यैवान्तःकरणस्य वृत्तिभेदाश्चातुर्विध्यं इत्याशयेन पञ्चैते तस्युक्ताः अविद्यात्रमनस्युक्तेति
बोध्यं तथा चायमर्थः ते चाविवादयोपद्यपि मनस्येव संति न कुत्रापि पुरुषे न त्वापि पुरुषेसास्य

रिकेव्यपदिश्यंत इति व्यपदेशबीजं च स्वामित्वापरनामकं भोक्तृत्वमित्याह सहीति हि यस्मा
त्स पुरुषस्तस्य क्लेशादेः फलस्य सुखदुःखयोः स्वस्मिन्प्रतिबिंबितयो भोक्ता भवतीत्यर्थः
स्वामित्वसंबंधेनाध्यारोपे दृष्टांतमाह यथेति तथा च राज्ञा जयी पुरुषो यथा नीत्यादिवदेव पुरु
षः क्लेशादिमान् सुखी दुःखी मूढ इत्यादिर्विद्वद्व्यवहार इति भावः समवायसंबंधेन पुरुषे स
त्त्वादिमत्त्वबुद्धिरेवाविद्येति एवं च स्वत्वाख्येन क्लेशसंपर्केण यद्यप्यन्यतानां पुरुषेस्ति किं त्वीश्व
र एवेत्याह यो ह्यनेनेति अनेन भोगेन क्लेशादिफलभोगेनेत्यर्थः अत्रानेनेति विशेषणादी
श्वरस्य भोगोस्तीत्यवधार्यते सर्वविदनेकगुहशयोस्त्यपि वस्तोपाधिसुखसाक्षितामात्रं चिदवसा
नो भोग इति सांख्यसूत्रात् तथा चोपद्रष्टानुमंता च भर्ता भोक्ता महेश्वरः परमात्मेति चाप्यु
क्तो देहेस्मिन्पुरुषः पर इति गीताद्युक्तः पारमेश्वरो भोग उपपद्यत इति अमर एवेश्वरस्यापि
भोगप्रतिपादिका ऋतं पिबंताविति श्रुतिः यथाश्रुतैवोपपद्यते अनश्नन्नन्यो अभिचाक
शीति श्रुतिस्तु मुख्यमेव भोगं प्रतिषेधति मुख्यभोगश्चाभिमानपूर्वकः सुखाद्यनुभावः
लौकिकस्तेनैव भोगव्यवहारात् सत्त्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोग इत्यागा ३०
मिसूत्रेण तस्यैव लक्षयितव्यत्वात् अतएव जीवभोग्यदुःखादिभोक्तृत्वमेवानश्नन्निति वाक्ये

न प्रतिषिध्यते एकशरीरस्थत्वेन तद्भोगस्यैव प्रसक्तत्वादिति जीवन्मुक्तस्यापीश्वरसदृशत्वाद्भोगो दुः
खभोगमात्रमीश्वराद्विलक्षणमिति अपरामृष्टत्वे परामर्शशब्दप्रयोगात्तत्परामर्शशब्दफलं प्रतिपाद
यितुं शंकते कैवल्यमिति यदि क्लेशादिशून्य ईश्वरः श्रुतिस्मृतिभ्यां व्यवस्थितस्तर्हि कैवल्यं ज्ञानं प्राप्ता
बहवो हिरण्यगर्भादयो केवलिनः कैवलानां जीवन्मुक्तानामध्यक्षाः क्लेशादिशून्याः संति तेनैवेश्वर
त्वप्रसक्त्याः संतीति पूर्वपक्षिणो भावः तथा च सांख्यसूत्रम् मुक्तात्मनः प्रशंसा सिद्धस्य वेति आद्य
स्तु मोक्षो ज्ञानेन द्वितीयो रागसंक्षयात् कृच्छ्रक्षयात्तृतीयस्तु व्याख्यातं मोक्षलक्षणमिति पंचशि
खवाक्यं तद्वाक्ये च तृतीयस्यापि कैवल्यमोक्षादिशब्दार्थत्वात् हिरण्यगर्भादयोपि कैवल्यमुक्ता
दिमंत उच्यंते केवलिन इति पाठे केवलस्याप्रमिति केवलो तृतीयमोक्षो रागादिक्लेशशून्यते
ति परिहरति ते हीति ते हि हिरण्यगर्भादयः प्राकृतिकानि बंधनानि पूर्वस्थितानि छित्त्वैव मुक्ताः
न तु क्लेशादिपरामर्शशून्याः ईश्वरस्तु सर्वदैव क्लेशात्मकबंधनपरामर्शशून्य तथा श्रुत्यादिसिद्धस
ये: ईश्वरस्य सदा क्लेशादिशून्यत्वे मानं तत्रापि परमात्मा हि स नित्यं निर्गुणः स्मृतः कर्मात्मा पुरु
षो योसौ मोक्षबंधैः स युज्यत इत्यादि वाक्यशतानि निर्गुणो गुणाभिमानशून्यः गोत्तापां गुणाभि
मानशून्यत्वेन गुणातीतत्ववचनात् परस्तु निर्गुणः प्रोक्तो ह्यहंकारयुतो पर इति नारदीयादिवाक्य

ईश्वरजीवयोरिच्छादिसाम्येपि तदनभिमानाभिमानाभ्यां निर्गुणसगुणत्वसिद्धेश्च वचनत्रयं बो
ध्यं संसारे प्रकृतिलयानां प्राकृतिको बंधः विदेहानां वैकारिको बंधः दक्षिणादिव्यविषयभाजां दा
क्षिणकं बंध इति तत्राद्यः प्रकृतिष्वभिमानरूपः द्वितीयः शब्दादिविषयरागः तृतीयस्त्विष्टा
नां कर्मदक्षिणादानाध्ययनादिष्वनुरागः तथा चोक्तं प्रकृतेनैव बंधेन तथा वैकारिकेण च दक्षि
णाभिस्तृतीयेन बद्धो जंतुर्विवर्तते इति ईश्वरस्य बद्धेश्वरेभ्यो वैलक्षण्यं वक्ष्यापरामर्षरूपं विव
रणोति यथा मुक्तस्येति निरस्ताविद्यस्येत्यर्थः प्रज्ञायते निश्चीयते संभाव्यत इति प्रकृतिलीन
स्याभिमानसंभवेन पश्चाद्बंधसंभावनेति भावः सदैव मुक्त इति दुःखशून्यस्येत्यर्थः सदैवेश्व
र इति सदैवाप्रतिहतेच्छया युक्तः अत्र केचित् सदैवेश्वर ऐश्वर्यशक्तिमानित्यर्थः न हि वेदांतिभि
रिव प्रलये योगिभिरपीश्वरस्य नित्यमिच्छादिकमभ्युपगम्यते एकांतिप्रकृतेर्गुणसाम्यरूपत्वाभ्युपगम
मविरोधात् इत्येकदेशिनः तत्र यतो नैवाहस्तस्य न निशा नित्यस्य परमात्मन इत्यादिवाक्येनैते
रीश्वरसत्वस्य नित्यमेव ज्ञानेच्छादिकं यथाश्रुतभाष्यानुरोधाच्च विसदृशपरिणामाभावरूपा च
साम्यावस्था नित्येच्छादिमन्नित्यसत्वव्यक्तिसत्वेप्युपपद्यत इति स्वकार्योपयोगेन वचनस्य द्विपरा
र्धीते लय इति किं बहुना आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किंचन मिषदिति श्रुत्या प्रलये ३१
परमात्मनोर्थद्रष्टृत्वं सिद्धं अत्र ईश्वरोपाधेर्ज्ञानलक्षणावृत्तिः प्रलयेप्यस्ति न चोपाधिवृत्तिं वि
नैवेशस्य ज्ञातृत्वमेव बाध्यं बाधकं विना दृष्टानुसारस्यागतो चितत्वात् ज्ञानशक्तिरहं परेति प्रकृत्य
भिमानिदेवतावाक्यविरोधाच्च किं च तमो वा इदमेकमासत् तत्परे स्यात् तत्परेणेरितं विषम
त्वं प्रयातीत्यादिश्रुतिर्धिव परमेश्वरप्रयत्नेनैव गुणवैषम्यं श्रूयते तथा प्रकृतिं पुरुषं चैव प्र
विश्यात्मेच्छया हरिः क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययावित्यादिना प्रकृतेर्वैषम्यहे
तुक्षोभोपीश्वरेच्छात एव स्मर्यते च अतः साम्यावस्थायामप्यनित्येश्वरोपाधेर्ज्ञानादिस्वी
कार्यमिति अपि च एवं सति प्रलये स्वसंकल्पेन स्वोपाधिं स्वस्माद्वियोज्येश्वरः शेते पूर्वसर्गी
यसंकल्पसंस्काराभ्यां च सर्गादावुपाधिरीश्वरेण सह स्वयं संयुज्यत इत्यभ्युपेयं तच्चायुक्तं त
स्य हेत्वविद्याभावाभिस्वत्वेन विद्याया बुद्धिपुरुषसंयोगहेतुत्ववचनेनेश्वरस्याप्यविद्यत्वा
पत्तेः न चाहार्यज्ञानरूपो विद्ययासंयोगः स्यात् सा चाविद्या मायेति तेन तस्याः क्लेशत्वमिति वा
च्यं संयोगहेत्वविद्याया अविवेकख्यातिनाश्यत्वबोधकसूत्रविरोधात् किं च सूत्रकारेण क्लेश
कर्मविपाकाशयैर्वासनाभिस्तत्रैव च अपरामृष्टमेवाह पुरुषं होश्वरं श्रुतिरिति योगियाज्ञव
ल्क्यादिभिरीश्वरोपाधौ संस्कारस्य प्रतिषिद्धत्वात् तदभ्युपगमोपि तेषामपसिद्धान्त एव तथा

ऽनागामिसत्त्वात् इत्यादौ प्रतिषिद्धे कालानवच्छिन्नत्वं चेशस्यात् उपाधिवत्त्वाभावेनैव चेतनस्य का
लानवच्छिन्नत्वात् इत्यादौ अन्यत्र दूषणानि संजितत्वात् प्रलये निरुद्धोऽप्युपाधिः पूर्वसर्गीयसंक
ल्पवासनाभ्यां स्वयं व्युत्थितो भवतीति यच्छास्त्रं तद्दैनंदिनप्रलये योगनिद्रापारावान्तस्य स्वयंभो
रुपाधिपरमेव न परमेश्वरोपाधिपरमिति दिक् शास्त्रप्रामाण्यसिद्धौ शास्त्राख्योक्तेश्वरसि
द्धिरीश्वरसिद्धौ च तत्प्रत्यक्षपूर्वकत्वया शास्त्रप्रामाण्यसिद्धिरित्यन्योन्याश्रयं मन्वानो नास्ति
क ईश्वरे प्रमाणमस्ति न वेति पृच्छति योऽसाविति सर्वपुरुषाणां स्वतरतकरूपं ऐश्वर्यमुपाधिध
र्मत्वेनेति प्रतिपादयितुं प्रकृष्टसत्त्वोपादानादित्युक्तं प्रकृष्टसत्त्वसंबन्धात् तदुपाधिकः शाश्व
तिको नित्य उत्कर्षो ऐश्वर्यमित्यर्थः ईश्वरस्य योपाधौ प्रमाणं कार्योपाधिरयं जीवः कारणोपाधि
रीश्वर इति श्रुत्यादयः तदैक्षत सोऽकामयत तदात्मानं स्वयमकुरुत स एकोऽब्रह्मणस्थाने इति
श्रुत्याद्युक्तस्य ज्ञानेच्छातत्प्रयत्नस्य गुणस्य त्वतोऽनुपपत्तिश्च साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुति
भिरीश्वरस्य निर्गुणचिन्मात्रसिद्धेरित्यत निमित्तकः सप्रमाणकः उत्तरं तस्य शास्त्रं निमित्तमिति
शास्त्रं श्रुतिस्मृतीतिहासपुराणानि पुनः पृच्छति शास्त्रं पुनरिति शास्त्रस्यैव प्रामाण्ये कुत इत्य ३२
र्थः उत्तरं प्रकृष्टसत्त्वनिमित्त इति ईश्वरस्योपाधिर्यत्प्रकृष्टसत्त्वं तन्मात्रप्रत्यक्षरूपकार्याद्यानजन्यता

च्छास्त्रस्य प्रामाण्यमित्यर्थः नन्वेवमन्योन्याश्रयः शास्त्रप्रामाण्ये सिद्धे प्रकृष्टसत्त्वसिद्धिः तत्सिद्धौ
च तत्प्रत्यक्षपूर्वकत्वया शास्त्रप्रामाण्यसिद्धिरिति चेन्न मंत्रायुर्वेदप्रामाण्यवत् ईश्वरसिद्धेः प्रागेव शास्त्र
स्य प्रामाण्यसिद्धेः प्रकृष्टसत्त्वस्य च शास्त्रप्रामाण्यनिर्वाहकतामात्रमत्रोक्तमिति तथा च व्या
पस्त्रत्वं मंत्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमिति एतयोरिति विषयत्वेन समवायसंबन्धेन
च परमेश्वरसत्त्वे वर्तमानयोरेतयोः शास्त्रोत्कर्षयोरनादिर्निमित्तनैमित्तिकभावः संबन्धः शा
स्त्रनैमित्तिकसत्त्वोत्कर्षश्च निमित्तं कारणत्वादित्यर्थः ततः किमित्याकांक्षायामाह तस्मादिति
सदैवेश्वरः प्रलयेऽपि ज्ञानेच्छाकृतिमान् सदैव मुक्तोऽनादिकालेऽवशादिमत्त्वमेतस्यार्थः ईश्व
रस्याद्वितीयत्वमपि प्रतिपादयति तच्चेति नास्तिसाम्यमतिशयश्च यस्मात् तादृशमित्यर्थः अ
तिशयनिर्मुक्तौ हेतुमाह न तावदिति उक्तौ हेतुमाह यदेवेति यस्माद्द्वितीयदेवातिशयितिरतिश
यं तदेव तदैश्वर्यं स्यादिति योजना सातिशयत्वे सत्यैश्वर्यमेव न भवति अप्रतिहतेच्छत्वस्यै
वाभावात् अतो यदेव निरतिशयितदेव मुख्यमैश्वर्यमित्यर्थः ॥ उपसंहरति तस्मादिति ऐश्व
र्येणापत्रकाष्ठाप्राप्त्यते स ईश्वर इत्यर्थः साम्यनिर्मुक्तौ हेतुमाह न चेति द्वयोरिति न च समस्तकाल
स्यापि पराणां दीर्घकालस्यापि रामर्गास्थितत्वेऽत्यरोकस्मिन्नर्थे कथंचिद्विहाभ्यं तत्साभिमताभ्यां

मितेसतिराकस्यसिद्धौसंवत्सासिद्धाबितरस्येछाविघातादनन्तंस्यनत्वंस्यादतोनसमानानेकेश्व
रसंभवइत्यर्थः ननुमयोःसंवत्सान्तवत्वंपुराणत्वंचोभयमेवमवतुतत्राहद्वयोश्चेति नस्य
पुरुषविशेषत्वमुपसंहरतिसचोत्तिस्यादेतत् यदिप्रकृष्टसत्वोपादानादेष शाश्वतिकोजीवेश्व
उत्कर्षश्चेतनविशेषस्यत्वयाप्यभ्युपगन्तव्यस्तथाजीवानामप्यपकर्षोमलिनकार्यसत्वनिमि
त्तकइत्यर्थाद्गतः तथाचश्रुतिरपिकार्योपाधिरयंजीवःकारणोपाधिभेदेजीवेश्वरादिवि
भागासंभवेनलाघवादैक्यात्मककल्पनस्यैवोचितमात् तत्त्वमसि अहंब्रह्मास्मिइत्याकारणभेदेऽपिह्य
पाघ्यपादिषुपपभावेन तथातैकोऽस्यनेकश्चसत्ताभारेधिवाश्रुत्यानित्यादिश्रुतिस्मृतिशते
शनैकेस्यैवप्रतिपादितत्वाच्च भेदाभेदोमयश्रुतिस्मृतिमध्येभेदनिंदयाऽभेदज्ञानस्यमोक्ष
फलकत्वकथनेनचाभेदवाक्यान्येवतस्यापेयराणिभेदवाक्यानित्वनुवादमात्राणीति अत्रोच्य
ते जीवेश्वरयोरंशांशिनोत्नावद्याप्यव्यापकभावस्वीकारेणजीवोपाधिनावछेघस्यात्मप्रदे
शस्येश्वरोपाध्यवछिन्नत्वंवत्कंतथाचयथाब्रह्मांडाकाशस्यगर्दभमुखावच्छेदेनदुःखर
त्वंयथावाकपाद्यवछेदेनोपाधिकंदुर्गधंत्वंशवेकारणसत्वावछिन्नप्रदेशाकाशस्यापीश्वरस्य 33
जीवोपाध्यवछेदेनसंसारित्वंस्यात् यदिचजीवेश्वरौचैतन्यस्यैवांशौनतजीवईश्वरस्यसाक्षा

देशःअतोघटकुंडाकाशवदेवान्योन्यव्यावृत्तौजीवेश्वरौस्वीक्रियतांनदापीश्वरस्यजीवांतर्यो
मित्वानुपपत्तिः जीवप्रदेशेपीश्वरसत्वादिति एवमेवसर्वजीवानामप्यैक्यंनसंभवतिएकस्यै
वचिदाकाशस्यैकोनाकरणादिमत्त्वेपिप्रदेशसंसर्गितःकरणांतरसंबंधात् बंधप्रसंगेनश्रु
त्युक्तबंधमोक्षादिव्यवस्थानुपपत्तेः नह्याकाशस्यभग्नघटप्रदेशस्थस्यघटसंबंधोनभव
तीतिनियमःसंभवतिप्रत्यक्षविरोधात् पर्यायेश्चैकस्मिन्नेवदेशेनेकलिंगदेहसंबंधस्यसमा
नदेशीयभोगेनानुमानाच्चतदेतदुक्तंकपिलाचार्यैः जन्मादिव्यवस्थातःपुरुषबहुत्वं उपाधिभे
देप्येकस्यनानायोगआकाशस्येवघटादिभिरित्यादिसूत्रैरिति नन्वउपाधिविशिष्टयोरेवजीवेश्व
रत्वेवस्तुक्येइतिचेत् न विकल्पासहत्वात् विशिष्टस्यानतिरेकेजीवेश्वरत्वेबंधमोक्षादिसांकर्ये
नादवस्थ्यात् अतिरेकेतुतदनित्यंनित्यंवाआद्येविनाशित्वपातस्यबंधमोक्षाद्यनुपपत्तिःअं
तेवन्ध्रिकमिथ्यापलापमानस्याशीविषमुखनिपातःयदिहिविशिष्टान्यनेकान्यात्मानःकल्प
नीयास्तर्हिअस्मात्लघुत्वगौरवंभवतामप्यापतितअथैकंतत्सामान्यैकात्मकल्पनमितिन
चात्माद्वैतश्रुत्यनुरोधेनतदप्युक्तमितिवाच्यं विशिष्टात्मभ्यःसामान्यात्मनोऽत्यंतभेदेतत
त्स्याद्यभेदवाक्यानुपपत्तितादवस्थ्यात् अत्यंतमभेदेचविशिष्टातिरिक्तत्वाविरोधात् भेदाभेदे

चासन्मात्रप्रवेशादिति अस्माभिरपि हि सामान्यरूपेणाभेदो वैधर्म्यलक्षणभेदनिरासाये
ष्यते विशेषतस्तु भेद इति तत्प्राचेत्युपपत्तेः जैवाचार्यैः नाद्वैतश्रुतिविरोधा ज्ञातिपरत्वादिति ए
वं तावदवच्छेदवादो निरस्तः प्रतिबिम्बवादस्त्वस्मिन्ते विकल्पासहः प्रतिबिम्बस्य तद्धुत्वे प्रतिबिं
बरूपजीवस्य ब्रह्मणा सह अभेदानुपपत्तिः सदसतोरभेदानुपपत्तेः अतद्रूपत्वे चात्मनानात्वस्य
शब्दभेदेन स्वीकारापत्तिः अद्वैताद्यनुपपत्तिश्चेति अत्र च मठानामपर्यपुरिकल्पाः ब्रह्ममीमां
साभाष्ये स्माभिर्निराकृताः तत्त्वमस्यादिवाक्यानि तत्र विस्तरेण व्याख्यातानि संक्षेपतस्त्वत्रापि
व्याख्यास्यामः स्वायान्तर्गृहेणां बलवद्वह्नेर्विस्फुलिंगादिभिः अंशाद्यंशैः विशेषाद्याकाशस्य
घटादिरूपत्वात् अखंडत्वापरत्व भवति किंतु ब्रह्मणि सर्वजीवानामविभागलक्षणाभेदस्य सर्वका
लस्यापि तत्पारमार्थिकत्वेपि यत्किंचिदवच्छेदेन पृथक्त्वं बुद्बुदादिवत् आतिभंगुरस्य विभागलक्ष
णाभेदस्यापारमार्थिकस्योपाधिकत्वमात्रं प्रतिपादयंतीति एतेन भेदनिंदावाक्यानि प्रकरणाभे
देर्विभागवैधर्म्यादिभेदपराण्येव यद्यौनं भेदज्ञानान्मोक्षः अयमत इति तत्परंपरयैव न तु साक्षा
त् अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्ति प्रधानपदेहेयमलकालानां परमे
हि पतत् पश्यंति सूरयः शुद्धं तद्विष्णोः परमं पदं इत्याद्यैः श्रुतिस्मृतिवाक्यैर्विवेकाख्यभेदज्ञानस्यैव ३५

मुख्यत्वात् परमात्मात्मनोर्योगः परमो योग उच्यते इत्युक्तेस्तदन्यद्व्यंहि नेति तद्व्यतापत्त इतिवि
ष्णुपुराणादिषु तत्परं ज्ञानमेवस्यापि निंदितत्वाच्चेति किंबहुना अन्यथा रोजनप्रवरस्य यान्यः पंचवि
शकः तत्स्थत्वाच्चानुपश्यंति एकत्वेति साधवः इति मोक्षधर्मादिषु सोन्याभावाविभागरूपत
यैव भेदाभेदयोर्व्याख्यातत्वेन भेदवाक्याभेदवाक्ययोरर्थनिर्णयेनाधुनिककुतर्काघेक्षेतिदि
क् पुरुषान्तरेभ्य ईश्वरस्य निरतिशयसावज्ञरूपविशेषान्तरं प्रतिपादयन् सूत्रमवतारयति किंचेति
तत्र निरतिशयं सर्वज्ञबीजं बीजं लिंगं सर्वज्ञानुमापकं वक्ष्यमाणं यत्सातिशयज्ञानं यज्ज्ञानं त
त्रेश्वरे निरतिशयमित्यर्थः सावज्ञेबीजमिति पाठेप्ययमेवार्थः यत बीजं कारणं तत्पाद्यस्य सर्वज्ञ
ताकारणं सत्त्वमिति तस्यार्थ इति कश्चित् तन्न ज्ञानस्य न्यूनत्वयोरेव बीजत्वात्राभाष्यकारैर्व्या
ख्यास्यमानत्वादिति व्याचष्टे यदिदमिति यत् अतीतानागतवर्तमानानां प्रत्येकसमुच्चितानां
अतींद्रियार्थानां अल्पं बहु च ग्रहणं ज्ञानमभिदं सर्वज्ञबीजमित्यर्थः कथं बीजं तदाह तदिति एत
त्सर्वज्ञबीजं सातिशयज्ञानं विवर्धमानं यत्र निरतिशयं भवति स सर्वज्ञोस्य यानवस्थानादिति
प्रकृतप्रयोगमप्याह अस्ती [illegible] ातिनाम्[illegible]अंसातिशयत्वान्नेकचित्र्यास्तकाष्ठं सातिशयत्वात्
परिमाणवदित्यर्थः अस्य बाधकाभावस्तत्प्रतिहेतुर्विशेषणीयः तेन गुरुत्वसंस्कारस्त्वादिषु न

व्यभिचारः तेषां चैकत्र काष्ठाप्राप्तौ कार्यमात्रेऽतिशयित्वमेव वा धकं सामान्यात्तारतम्याव्य
वस्थितस्य कार्यतारतम्यस्य व्यवस्था[illegible]नेद्युपरिमाणानां तु नित्यानामपि सिद्धत्वात्क्वचि
त्काष्ठाप्राप्तौ नास्ति बाधकं वस्तुतस्तु यथाऽऽकृते भाष्यादनवस्थापत्तेश्च गुरुत्वादिष्वप्यतिश
यानां क्वचित्काष्ठानुमीयते सामग्रीतारतम्यकाष्ठायाम्यनवस्थापत्त्यैवानुमानसाम्यात्
अत्रैतानदृष्टो विशेषणापेक्षेति अस्मिन्नानुमानेऽस्मत्पादिसर्वेऽड इति स्वत्रतात्पर्यमाह यत्रेति
नन्वत्रानुमानेन सामान्यतः सर्वज्ञपुरुषसिद्धौ अपि तस्य संज्ञाविशेषः कथमवधार्यतेऽइ
त्याकांक्षायामाह सामान्येति सामान्यमात्रेणोपसंहारे निम्नपेक्ष्य ते पर्यवसानमनुमाने
न संज्ञादिविशेषप्रतिपादनक्षममित्यतइत्यादिरर्थः संज्ञा ब्रह्मात्मयोमिपरमात्मादिरूपा
आदिशब्देन षड्गुणैश्वर्यपरमकारुणिकत्वपारमार्थिकान्तत्वजगदाधारकारणत्वाद्योग्याः
स्याः हरिहरादिसंज्ञास्तु तेषामंशशक्तिमदाद्यभेदेनोपासनार्थमेव परमेश्वरस्योक्तं ते
न तु साक्षादेव ब्रह्मविष्णुशिवाद्याख्यास्तत् प्रधानान्वत्वाद्यात्मनः तत्तोऽपत्तानुमैत्रेपदेशाद् क्षादप
स्ततः ब्रह्मविष्णुशिवादीनां परः परः स महेश्वरः इत्यादिवाक्येभ्यः आगमतो वेदाततः पतञ्जाद्यु ३५
निकाः केचन परस्य साक्षादपि लीलाविग्रहं कल्पयन्ति तदप्रामाणिकं विष्ण्वादीनामेव सोऽवतार ।

तारस्मवणात् विष्ण्वादीनां च परमात्मत्वेनाहंभावानेषामवतारा एव परमेश्वरावतारत पास्मृति
स्मृतिषु श्रुतितेन तत्तेऽन्वोन्तः न तस्य कार्यं करणं च विद्यते इत्यादिश्रुतिभ्यः परमेश्वरस्य कार्यकार
णारव्य शरीरद्वयप्रतिषेधात् अनादिमत्परं ब्रह्म सर्वदेहविवर्जितमित्यादिस्मृतिभ्यश्चेति दिक्
ननु नित्यमुक्तस्येश्वरस्य नहि पुरुषार्थाभावात् तस्य प्रवृत्तिर्नैघटते तथा च संसारस्तेस्वोपका
रदृष्टियानं लोकवदितीतिपूर्वपक्षः तत्र प्रवृत्त्यादिनिमित्तापेक्षा नास्तीति मुख्य
समाधाने सत्यपि प्रौढ्या प्रकारान्तरेणापि समाधानमाह तस्यात्मेति आत्मानुग्रहः स्वोपकारः त
स्येश्वरस्य स्वोपकाराभावेऽपि भक्तान् पुरुषानुद्धरिष्यामीत्याशयेन ज्ञानधर्मोपदेशतो भक्त
स्तानुग्रहः प्रयोजनं पुरुषाणां विशेषणं कल्पस्यादि कल्पप्रलये पदेनं दिनप्रलये षुमहाप्रल
येषु प्राकृतप्रलयेषु च संसारिणः स्वकारणगामिनीं तत्र दाम्भरणादुःखभाजइत्यर्थः ननु स्वेष्टसाध
नताज्ञानाभावे कथं व्यापारस्यादितिचेन्न तृणारणिमणिन्यायेन स्वेष्टसाधनताज्ञानपरदुःखज्ञान
योर्विजातीयेच्छाद्वयं प्रत्येवप्रकृतस्वेन हेतुतापाः क्लृप्तत्वात् तथा च स्वस्य स्वतंत्रं लोकवत्लीला केव
लमिति ननु तथापि भक्तानेवानुगृह्णाति नाभक्तान् प्रस्कृतमान्निग्रहात्मपियस्व भक्तेश्वर्यपदानेनेत्यतो
वैषम्यादिना ईश्वरस्य नित्यमुक्तत्वं भज्यते इति चेन्न मैत्र्यं अगेरीष्मस्वाभाव्यवत् विशुद्धसत्त्वमक्तव

शतास्वभावस्यापर्यवयोज्यत्वात् वैषम्यं च रागद्वेषाभ्यामेव भवति न तु भवतिमात्रेणेति अत्र
एव गीता समोहं सर्वभूतेषु न मे द्वेष्योस्ति न प्रियः ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं इति
यद्वा हिरण्यगर्भो वैश्वर्यदानात् अभेयाद्युःखं भवति तत्रापि हिरण्यगर्भादीनामेव वैषम्यंबी
जं ईश्वरस्य न परदुःखप्रहाणेच्छा विद्यमानापि भक्तवशतया कुंठितस्वकार्या प्रतिलंबत इति सर्वं
समंजसं यद्वेश्वरस्य कर्मसापेक्षतया वैषम्यं नैर्घृण्यं च न स्तं मीमांसान्यायेनापाकृतं तत्राप्यय
मेवाशयः लोकानां विहितनिषिद्धरूपाणि कर्माणि देवानां सुखदुःखसाधनानि अतईश्वरेण
सुमत्कृदेवषु अपराद्धाय यत् दुःखं दीयते न पराद्धाय सुखं तत्र कृपारवश्यनिमित्तकमितिस्वप्र
योजनाभावे येषु अपराद्धाय यत् दुःखं दीयते न पराद्धाय सुखं तत्र कृपारवश्यनिमित्तकमिति
स्वप्रयोजनाभावेपि विदुषां प्रवृत्तौ पंचशिखाचार्यवाक्यं सांख्यस्थं प्रमाणयति तथा चोक्तमिति
आदिविद्वान् स्वयंभूः सर्गाद्याविर्भूतो विशुद्धनिर्माणचित्तयोगबलेन स्वनिर्मितं चित्तं अधिष्ठा
य स्वांशेन प्रविश्य कपिलाख्यपरमर्षिर्भूत्वा कारुण्यात् जिज्ञासवे आसुरये तत्त्वं प्रोवाचेत्यर्थः परमे
श्वरस्यापरविशेषं प्रतिपादयति सूत्रकारः स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात् पूर्वेषां पूर्व
पूर्वसर्गेषूत्पन्नानां ब्रह्मविष्णुरुद्रादीनाम गुरुः पिता तथायमो विधयाज्ञानवक्ता यदस्य कुतः कालेना ३६

ववच्छेदात् ब्रह्मादयो हि द्विपरार्द्धादिकालेनावच्छिन्नाः कालानवच्छिन्नं गुरुं विनानसंभवंतीत्यर्थः
यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इत्यादिश्रुतिभ्य इति भावः नवप्रकृति
स्थानेत्राक्षिप्तिः निमित्तमप्रयोजकं प्रकृतीनामित्यागामिसूत्रात् निमित्तकारणस्येश्वरादेस्तत्
स्थानेष्वाविघातकत्वात् एतदेव व्याचष्टे पूर्वे हीति अवच्छेदार्थेन अवच्छेदप्रयोजनेन काले
नोपावर्तते नेन संबध्यते नात्ययो येमाह यथास्येति अस्य वर्तमानस्य सर्गस्यादौ प्रकर्षप्र
कर्षगत्या सिद्धा नोत्कर्षप्राप्ताः स्वतः सिद्ध इत्यर्थः अत्रेश्वरस्य सर्वजीवपितृत्ववचनात् अत्युक्ताग्नि
विस्फुलिंगदृष्टांतानुसारेण च जीवब्रह्मणोरंशांशिभावस्तयोरभेदश्च पितापुत्रवदेवेति भावः
तथा च स्मृतिः यथा दीपसहस्राणि दीपादेकः प्रसूयते तथा जीवसहस्राणि स एवैकः प्रसूय
ते सलिले करकाश्मेवदीयोग्राविचितन्मयः जीवो मोघात्यकबुद्बुदोपक्ते ब्रह्मणि लीयत इत्यादिः
अपंचाभेदो नाखंडत्वादपि त्वविभागएव अविभागश्चहृगपंजलमभ्रदित्यादिगोवचनादि
ति वेदांतसूत्रेण जीवानां ब्रह्मणऽविभागलक्षणाभेदस्यैव वचनात् अविभागश्चदुग्धपंजल
मभ्रदित्यादिमत्स्यपनिपातकः स्वरूपसंबंधेन्या धारतादिवत् किंवा लक्षणानन्यत्वमिति अ
नेन च पितृत्वांतर्यामित्वरूपेण गुरुत्वेन जीवानामप्यात्मेश्वर इति वेदांतमहावाक्यार्थोपि सूचितः

योहियस्यांशोऽक्षाधिष्ठानावाभवतिसनतस्मान्नेतिहृष्यंपश्यात्स्वरूपेमद्वक्षुषःपश्यावाजीयादेहस्येति
दिक् ईश्वरशब्दार्थोविस्तरेणव्याख्यातःइदानींतत्प्रणिधानंव्याख्यातुमादौप्रणिधानांगमंत्रंदर्श
यतितस्यवाचकःप्रणवःतस्येश्वरस्यप्रणवोनामेत्यर्थःअदृष्टविग्रहोदेवोभावग्राह्योमनोमयः
तस्योंकारःस्मृतोनामतेनाहूतःप्रसीदतीतियोगियाज्ञवल्क्यादिभ्यःअदृष्टविग्रहःअप्रकृतशरी
रोदेवःपरमात्माभावग्राह्योभक्तिमात्रग्राह्योमनोमयोमनस्तत्कारणोपाधिशबलोयःशबला
गिवदित्यादिरर्थःकर्त्तव्यविचारेपयोगिनमर्थयप्रतिपत्तिर्वाच्यईश्वरइतिनित्यएवप्रणवेनास
ईश्वरस्यवाच्यवाचकभावइत्यन्नदूतिशयोत्पादनायसंशयपूर्वकमवधारयतिकिमस्येति
ईश्वरप्रणवयोर्वाच्यवाचकताशक्तिःकिमस्यवरस्यसंकेतेनाहार्यायोन्याख्यासरूपेणकृता
आगंतुकीयथापितृविशेषेदेवदत्तादिनामवाच्यतापितृसंकेतेनकृतातद्वत् अथवाप्रदीपप्र
काशवत्स्वाभाविकीयावद्द्रव्यभाविनीत्यर्थःविमृष्यसिद्धांतमाहास्थितइति अर्थेनसंबंधमेवा
भिनयतिप्रकाशयतीत्यर्थःसचशक्तयात्मसंबंधस्तत्वाधारधेयभावादिनत्वरूपसंबंधोति
रिक्तयदार्थेरवनास्तिघटादिनात्माभयोर्वबोध्यंदेवदत्तादिनामतुनैवंयतःपुरुषसंकेतभेदेना
येभेदाभवंतीतिसंकेतेनेतिअयमस्यपितेत्यादिवंरूपेणेत्यन्वयःननुशक्तिनित्यत्वेपिकदाचित्सं

केतभेदाद्देवदत्तादिशब्दवदर्थभेदोपिप्रणवस्यस्यात्इत्याशंकायामाह सर्गांतरेष्वपीति अयमसं
केतोलौकिकोनभवतिअपितुसर्वज्ञेनांतिवशक्तिंपूर्वसिद्धामनुसृत्यैवसंकेतंकुर्वतीत्याशयः
संबंधनित्यत्वेसंप्रतिपत्याख्यकार्येनित्यत्वंप्रमाणयतिसंप्रतिपत्तीति देवदत्तादिशब्दवद्वाच्य
वाचकभावस्यानित्यत्वेकदाचित्संकेतवैपरीत्येव्यवहारवैपरीत्यमपिस्यात्इत्याशयःतथाच
सतिसर्वत्रशब्दार्थेनाश्वासःस्यादित्यागमिनःप्रतिजानतेअवधारयंतीतिसमग्रवाक्यार्थे
नान्वयःप्रणिधानांगमंत्रमुदर्श्यसांगप्रणिधानस्यस्वरूपंसूत्रकारोवक्ष्यतितत्सूत्रंपूरयि
त्वोपायपतिविज्ञानेतिसूत्रेणसहान्वयःतज्जपस्तदर्थभावनं॥सूत्रार्थमाचष्टेप्रणवस्येति
प्रणवेनपरंब्रह्मध्यायीतनिपुणोपतिरितिस्मरणादिति प्रणवार्थमात्रांतरभेदैःकृत्वादिष
वहुधोक्तःसंक्षेपात्तुमाहुर्बोद्धव्योक्तकथ्यते यथाहु इअव्यक्ताव्यक्तेचपुरुषस्तिस्रोमात्राःप्रकी
र्त्तिताःअर्धमात्रापरंब्रह्मज्ञेयमभ्यासचिंतकैरितियरणावार्थचिंतनेनचमुख्यतोद्विविधेतत्रैक
मंशांशिकार्यकारणशक्तिशक्तिमदाद्यभेदेनतत्तायपिंडवदविभागलक्षणैकोभावादहंब्र
ह्मसर्वंखल्विदंब्रह्मत्यादिरूपंभवतितमेतमात्मानमोमितिब्रह्मणैकीकृत्यब्रह्मयात्मनोमित्येकी
कृत्येत्यादिश्रुतेःसर्वंखल्विदंब्रह्मतज्जलानितिशांतउपासीतेत्यादिश्रुतेश्वतथाराकःसमस्तंयदि

हास्ति किंचित्तदन्युतो नास्ति परं ततो ऽस्य न सो ऽहं स ब्रह्म स च सर्वं मे तदात्मस्वरूपं त्यज भेदमोहमि
त्यादिस्मृतेश्च अपरस्य प्रकृतिनानात्वे पुरुषेभ्यो विवेकेन केवलेन ब्रह्मचिन्मात्रतया अनुचिंतनं तु
मिति भेदे ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात् अथात आदेशो नेति शो नेति नेति
नह्येतस्मादिति नेत्यन्यत्परमस्तीत्यमेवैकं ज्ञानयज्ञात्मानं आत्मेत्येवोपासीतेति श्रुतेः प्रकृ
तिपुरुषेभ्यो ऽप्यपुरुषं ब्रह्माणमिच्छेत् अहं ब्रह्मपरं ज्योतिः प्रसंख्याय विमध्यन्ते यः सर्वभूतवि
तत्तोयश्च सर्वान्हृदि स्थितः पश्यन्सर्वा रणोज्ञेयः सोऽहमस्मीति चिंतयेत् इति गारुडादिभ्यश्च तथा
आत्मेति तूपयंति ग्राहयंति चेति ब्रह्ममीमांसासूत्राच्च अत्र गारुडवाक्ये पुरुषस्य ब्रह्मणोऽप्या
सोऽल्यपराघनत्वमेदः विज्ञानात्मनिसेयोऽपक्षेऽनंशेप्र विलाप्यते ब्रह्मणा त्मानमाधारे घटांब
रमिवांबरे इत्यादिवाक्येषु जीवविलापनेन ब्रह्मात्मचिंतनस्य स्मरणात् प्रकृतिस्थापनसाहंच
योद्य अंबरदृष्टांतश्चनाखंडत्वेप याधिरंशोसंक्षिप्तः सवात्ततमतब्रजेत तथा ऽयमात्मा ब्रह्मभे
तियोगिनः परमात्मनेत्यादिवाक्येऽनूस्याभिवायुजलादिवकुलदृष्टांतस्य सामस्य च विशेषान्त
मायात्मदेशात पादि दृष्टांतानामेव च लत्वाच्च किंतु एकरूपस्योपाधिकमिथ्याविभागनिवृत्ति ३०
मात्रेइति विलापनेन च प्रकृत्यादि वज्जीवानामनात्मत्वमेव लभ्यते तदुक्तं मात्स्येन त्वेः संपादितमं

क्तं पुरुषः पंचविंशकः ईश्वरेच्छावशात्सोऽपि जडत्वात्कल्प्यते बुधैरिति मोक्षधर्मे च तेचैनं नाभि
नेदंति पंचविंशकमच्युत षड्विंशमनुपश्यंतः शुचयस्तत्परायणा इति एतेन प्रकृतिपुरुषयोर्वि
लाप्यपर्च्छि घं ब्रह्म तस्मिन्नेवाहंभाववचनाच्च न जीवेभ्यो ऽहंशब्द इति ध्यानयोग्यं तत्र योगेभे
पयमंचिंतनमुपासनादितीयं तत्त्वज्ञानमिति ब्रह्मात्मताज्ञानं चातिदुर्लभं मोक्षधर्मेत्वा
क्तं भवंतो ज्ञानिनो नित्यं सर्वेतश्च निरामयाः रोकान्मां नामावक्ष्यिद्धिकदाचित्प्रतिपद्यत इति
दिक् ईश्वरप्रणिधानादिति पंचम्युक्तमसंप्रज्ञातपर्यंतयोगहेतुत्वं तत्प्रणिधानस्यापेक्षा रे
णतदाहाततइत्यैति प्रणिधानादिभिर्मूर्धिकाग्रता भवति ततश्च परमात्मसाक्षात्कारः ततः
परवैराग्यादसंप्रज्ञातयोग इति शेषः स्वाध्यायमोगसंपत्या परमात्मा प्रकाशत इति वक्ष्यमा
णवाक्यस्वरस्म न उक्तार्थेस्वपितुर्वाक्यं विष्णुपुराणस्थं प्रमाणयति तथा चोक्तमिति योगत
पयोरेकदा न संभवइति योगस्यावियतयोस्वंस्थानकालेन पउक्तः ननु परमात्मसाक्षात्कार
त्परवैराग्यं भवतीति यदुक्तं तन्नोपपद्यते आत्मसाक्षात्कारेणेवाभिमाननिवृत्त्यापरवैरा
ग्यसंभवादिति अत्रोच्यते ब्रह्मज्ञानं तारस्येनात्र न विवक्षितं किंत्वात्मत्वेनैव तथा च जीवात्म
तत्त्वज्ञानात् बुद्धिपर्यंतमभिमाननिवृत्तिवत्परमात्मज्ञानाज्जीवपर्यंतेष्वभिमानो निवर्तेत पंच

विशतीतित्वानि विलाप्यैव सोऽहमित्यात्मतयाऽधिष्ठानब्रह्मसाक्षात्कारादिति नन्वेवं जीव
स्याप्यनात्मत्वं प्रसक्तमिति चेत् न व्यावहारिकपारमार्थिकभेदेनात्मद्वयाभ्युपगमात् आत्मत्वं
हि संधानज्ञातृत्वं क्षेत्रज्ञत्वं च तच्चेश्वरस्यैवास्ति ईश्वरत्ववत् जीवानां परतंत्रत्वात् धर्माधर्मा
धिष्ठातृत्वाच्च जीवानां च वित्तिशक्तिमत्तामात्रेणैवात्मत्वं गौणिकरणं बुध्याद्यपेक्षितं च यथादि
र्पणमोदीनामीश्वरत्वं तद्वत् जीवानामात्मत्वं बंधमोक्षभोगादिभागितया सिद्धं लोकव्यव
हारगोचरतया च व्यावहारिकमेवमेवाहंशब्दोऽपि परमात्मन्येव मुख्यो न तु जीवे प्रयोगादि
बुद्ध्यात्तस्याभावेन प्रयोक्तृत्वात्मत्वादिरूपस्याहंमादिशब्दप्रवृत्तिनिमित्तस्य जीवेष्वभावादिति त
थाचोक्तं त्वामात्मानं परं मत्वा परमात्मानमेव च आत्मा पुनर्बहिर्मृग्य अहोऽज्ञजनाज्ञतेति
परमनात्मानं यद्यपि जीवो मुख्यात्मा न भवति तथापि तत्ज्ञानादपि धर्माधर्मज्ञानादिनि
रत्या मोक्षलक्षणन्येवेति एतेन व्यवहारपरमार्थभेदादैकात्म्यनानात्मतावादौ श्रुतिस्मृति
दर्शनेष्वविरुद्धावित्यपि सिद्धं अधिकं तु ब्रह्ममीमांसाभाष्ये विज्ञानामृते द्रष्टव्यमिति दिक् त
दिदमीश्वरप्रणिधानादेस्मादिसूत्रगणोक्तमर्थं ज्ञाने लिंगपुराणोऽस्य प्रदर्शितं यथा अविद्य ३६
प्रेशस्य योगो नातीतो नाप्यनागतः नाप्यस्मिंस्तथा चैवरागेण त्रिकालता कालेष्वत्रिषु संबंध

स्तस्य द्वेषेण नोप्यनागतः नाप्यस्मिंस्तथा चैव रागेण भवेत् तथैवाभिनिवेशेन संबंधो न कदा
चन कुशलाकुशलैर्भैव संबंधो नैव कर्मभिः भवेत्कालपरं भोरविद्यामनिवर्जनात् विपा
कैः कर्मणां तस्य न भवेदेव संगमः कालेष्वत्रिषु शर्वस्य शिवस्य शिवदापिनः सुखदुःखैर्न संस्प
र्शः कालत्रितयवर्तिभिः तथैव भोगसंस्कारैर्भगवानंतकांतकः पुंविशेषः परो देवो भगवा
न् परमेश्वरः चेतनाचेततो मुक्तः प्रपंचाद्यादविलात्परः लोके सातिशयत्वेन ज्ञानैश्वर्यविलोकि
तौ शिवेनातिशयित्वेन स्थितमाहुर्मनीषिणः प्रतिसर्गे प्रसूतानां ब्रह्मणां शास्त्रविस्तरं उप
देशसरप्रभोकालावच्छेदवर्तिनां कालावच्छेदयुक्तानां गुरूणामपि सो गुरुः सर्वेषामपि सर्वे
शानामपि सर्वेशः कालावच्छेदवर्जितः अनादिरेव संबंधो विज्ञानोत्कर्षयोः परे स्थितयोरिह
शः शर्वः परिशुद्धः स्वभावतः आत्मप्रयोजनाभावे परानुग्रहकारणं हि प्रयोजनं समस्तानां कि
याणां परमेष्ठिनः प्रणवो वाचकस्तस्य शिवस्य परमात्मनः शिवरुद्रादिशब्दानां प्रणवो हि प
रः स्मृतः शंभोः प्रणववाच्यस्य शिवस्य परभावनाज्जपादपि आशु सिद्धिः परा प्राप्या भवत्ये
व न संशयः एकं ब्रह्ममयं ध्यायेत्सर्वं विप्र चराचरं चराचरविभागं च त्यजेदहमिति स्मरन् सत्तां
चरणं प्राहुरं इत्यात्मांबुजासनः कोटिकोप्युतानीशेचांउनिकल्पिताति तत्र तत्र च तत्पर्यन्त

स्थाणोर्हरयो भवाः स्रष्टारः प्रधानेन तथा प्राप्य शंभोस्तु संनिधिं असंख्याताश्च रुद्राख्या असंख्या-
ताः पितामहाः हरयश्चाप्यसंख्याता एक एव महेश्वरः ब्रह्मेन्द्रविष्णुरुद्राद्यैरपि देवैर्गणेश्वरैः आदिमध्यां-
तरहितं भेषजं भवरोगिणां शिवतत्त्वमिति ख्यातं शिवादपि परं पदमिति तदेवं जीवप्रसादादीश्व-
रप्रणिधानादपि प्रज्ञाद्वारा योगस्तत्फलं मोक्षश्च भवतीत्युक्तं इदानीं तपोमध्ये ईश्वरप्रणिधान-
स्य मुख्यकल्पत्वं प्रतिपादयितुं तत्र द्वाराधिक्यं सूत्रेण प्रतिपादयति किंचास्येति अस्य ह्यस्य प्रणि-
धानितो भवतीत्यर्थः ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च तत ईश्वरप्रणिधानात्तत्सा-
क्षात्कारद्वारा तत्तद्दृष्टान्तेन जीवात्मन्यप्यनायासेन प्रज्ञोत्पाद्य साक्षात्क्रियत इति प्रथमसूत्रार्थः
अपिशब्दश्चासन्नतमसमाध्यपेक्षया यद्यपि प्रति प्रतिवस्तुत्वं चेति अनुगच्छतीति व्युत्पत्त्या
ऽसंकुचितः सर्वानुगतः परमात्मैव सर्वः प्रत्यक्शब्दार्थः प्रत्यक्प्रवणं तं भगवच्छब्दसंतं वासु-
देवं कवयो वदन्तीत्यादिष्वपीश्वरे प्रत्यक्प्रयोगदर्शनाच्च तथापीश्वरात्मादिशब्दवद्देवप्रत्यक्शब्दः
पश्चिमवाची न तथापि सर्वप्रत्ययावधिभूते ब्रह्मण्येव मुख्योऽस्य प्रयोग इति अन्तरायाभावश्चैका-
ग्रतासामान्यस्यैव फलमिति यद्यपि तेन तत्प्रतिषेधार्थमेकतत्त्वाभ्यास इति सूत्रेणाद्युक्तो विशि-
ष्टेश्वरप्रणिधानस्यान्तरायाभावफलकत्ववचनमनुवादतया व्याचष्टे राजा वदति अनुवाद ४०

स्य च फलमाधिक्येन विघ्ननिवर्तकत्वलाभः तस्य ह देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवती-
ति श्रुत्या ब्रह्मात्मतादर्शिन इच्छाविघाते देवादीनामप्यसामर्थ्यप्रतिपादनादिति अन्तरा चोक्तं
नारदीयादिष्वपि तस्मान्मुमुक्षोः सर्वसौख्यो मार्गः श्रीविष्णुसंश्रयः चित्तेन चिन्तयानेन वञ्च्यते ध्रु-
वमन्यथा अन्तेपदं तमखिलापदि विघ्नमूर्ध्नि इत्यादि स्वरूपदर्शनमिति कस्य प्रत्यक्चेतो जीवस्य प-
त्यविकं रूपं तस्य साक्षात्कारोऽपि भवतीत्यर्थः अन्यत्प्रणिधानेनास्य साक्षात्कारेऽप्यद्वारवत् द्व-
द्वारमप्यस्तीति प्रतिपादयन्नेव स्वरूपदर्शनं विवृणोति यथैवेति बुद्धेः प्रतिसंवेदी बुद्धिवृत्तिप्र-
तिबिम्बोद्ग्राही तत्साक्षीति यावत् इदं च जीवब्रह्मणोरत्यन्ताभेदनिराकरणाय वैधर्म्यमुक्तं यथै-
वेश्वरः मुख्यादिगुणकस्तथायमपि यो बुद्धेः साक्षी पुरुष इत्येवमधिगच्छतीत्यवधारयति य-
रूपत्वाविशेषादित्यर्थः पुरुषश्चेतनः शुद्धः पापपुण्यविवर्जितः प्रसन्नो निर्गुणः केवलश्चिन्मात्रः
अनुपसर्गो ज्ञात्वा पुनर्भोगरहित इति तदेतदुक्तं नारदीये मायाप्रवर्तके विष्णौ दृढभक्तिः कृतात्मनां
सुखेन प्रकृतेर्भिन्नं स्वं दर्शयति दीपवत् इति यद्यपि अंशिस्वरूपावधारणेनांशस्वरूपावधार-
णवत् अंशस्वरूपावधारणेनाप्यंशिस्वरूपावधारणं भवति अंशांशिनोरेकरूपत्वस्योत्सर्गि-
कत्वात् प्रत्युत ईश्वरस्यावाङ्मनसगोचरत्वात् स्वतत्त्वसाक्षात्कारादेव तदनुसारेणेश्वरे विवेकः

संभवति नान्यथा तथा च श्रुतिरपि यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत इत्यादि
ः तथापि जीवस्य प्रणोत्वनित्यत्वाद्यंशेशे ईश्वरात्म साक्षात्कारो वस्तुतस्तेन ज्ञातुं शक्यत इत्याशयः अत
एव तत्त्वमेवाहमेवनान्यत् इत्यादिश्रुतयः परस्परमेवाविधर्म्यलक्षणमभेदं प्रतिपादयंति अन्यो
न्यद्वैतं तेनान्योन्यधर्माणामन्योन्यस्मिन् अवधारणाय अंतरायस्वरूपप्रतिपादकं सूत्रम
वतारयति अथेति व्याध्यादेरंतरायत्वोपपादनाय सूत्रे चित्तविक्षेपा इति वदिष्यति तस्यव्या
ख्यानार्थं भाष्ये वक्ष्योक्तिः विक्षेपाः विक्षेपकाः सामान्येन दत्तोत्तरं विशेषसंख्यामपि पुनः पृच्छ
ति के पुनरिति व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानव
स्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः चित्तविक्षेपकत्वेनैतानि ते पूर्वसूत्रोक्तो अंतराया इत्य
र्थः व्याघवेन चेतिन्नन्वयव्यतिरेकाभ्यां चित्तविक्षेपकत्वमेतेषां साधयति सहैतैरिति सूक्ष्म
कालानाकलनेन सहेत्युक्तं एतेषामव्यवधानेनैव व्याध्यादिगोचरा वा तन्निवृत्त्युपायगोच
रा वा चित्तस्य वृत्तयो भवंति योगभ्रंशिका इत्यर्थः व्याध्यादीन् क्रमेण व्याचष्टे व्याधिरिति श
रीरधारकत्वाद्धातवो वातपित्तकफानां रसानामाहारपरिणामानां करणानां चक्षुरादीनामा ४१
दीनां च वैषम्यं विसदृशभावो व्याधिः अकर्मण्यतायोगानुष्ठानाक्षमता आमवातादिनादे

हस्याकर्मण्यत्वेपि चित्तस्य योगाविरोधाच्चित्तस्येत्युक्तं संशयाकारमाह उभयादिति इदं गुरुशास्त्रो
क्तं ज्ञानं तत्साधनादि अभावनमननुसंधानं कायगुरुत्वं कफादिना चित्तगुरुत्वं तमसा ताभ्यां
हेतुभ्यामप्रवृत्तिः समाधिसाधनानामननुष्ठानं संप्रयोगात्मा सन्निकर्षजन्यो गर्द्धोभिलाषः विप
रीतज्ञानं गुर्वादिप्रमितार्थे विपरीतनिश्चयः समाधिभूमेरिति वक्ष्यमाणानां मधुमत्यादि
भूमीनामेकतमस्याप्यपि साधनानुष्ठानेऽप्यलाभ इत्यर्थः अप्रतिष्ठालाभेपि ध्वंसः ननु ला
भोत्तरं भ्रंशे का क्षतिरित्याशंकायामाह समाधिप्रतिलंभे हीति प्रतिलंभो निष्पत्तिः स्थैर्ये यत्साक्षा
त्कार इति यावत् अयं भावः साक्षात्कारपर्यंतमेव चित्तस्य तत्तद्भूम्यवस्थानमपेक्षितं अ
तोऽकृतसाक्षात्कारस्य योगारूढस्यापि भ्रंशेऽनवस्थितत्वमेव भवतीति आरूढयोगोपि
निपात्यतेऽधः संगेन योगी किमुतास्यसिद्धिः इत्यादिस्मृतिश्चात्र प्रमाणमिति एतेषां तांत्रि
कसंज्ञाभेदानाहुरन्तरेति न केवलमेते व्याध्यादयो योगांतरायाः अपि तु दुःखादिरूपेवंतरा
यांतरेष्वपि हेतवो भवंतीत्याह दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः
दुःखादीन्यक्रमेण व्याचष्टे दुःखमिति आध्यात्मिकं स्वसंघातमधिकृत्य वर्त्तत इत्याध्यात्मिकं त
च्चद्विविधं शारीरं मानसं च शारीरं व्याध्यादिजनितं मानसं कामादिजं भूतानि प्राणिनो या

देवानलक्षीकृत्य ज्ञापनइत्यर्थिसौतिकंव्याख्यामस्य। देवानधिकृत्यज्ञापनइत्याधिदैविकंशी
तोष्णाद्युत्थमित्यर्थः यद्यपि सर्वमेव विक्षेपो दुःखं दौर्मनस्यं तथापि प्राधान्येन मनोविका
रजन्यत्वाजन्यत्वाभ्यां मानसत्वामानसत्वविभागः एवमन्यत्रापि दुःखस्य सामान्यलक्षणमा
ह येनेति क्षोभश्चांचल्यं पदं गामीति अंगकंपो ऽंगमेजयत्वमिति प्राणेति पुरुषप्रयत्नो विनाप्य
यमेव प्राणो यद्बाह्यं वायुमंतिश्च येनाचामति पिवति शरीरांतः प्रवेशयति सश्वासनामावि
कारइत्यर्थः कोष्ठ्यमुदरस्थं वायुं निःसारयति वहिः करोति। शेषं पूर्ववत्सूत्रवाक्यार्थेभ्यावये
एतइति विशेषः सहभुवो व्याध्यादिविक्षेपोद्भवाः तत्र हेतुमाह विक्षिप्तेति विक्षेपानंतर
मेव जायंते विक्षेपनिवृत्तौ निवर्त्तंत इत्यर्थः नन्वेतेंतरायाः सकार्याः किमीश्वरप्रणिधानमा
त्रनिरस्याः अथवा अन्योपायेनापि निरसितुं शक्या इत्याकांक्षायामुत्तरंप्रवृत्तिसूत्रांतरंवता
रणाय अथेतरति अथ विक्षेपोत्पत्त्यनंतरमेते विक्षेपा अभ्यासवैराग्याभ्यामित्यादिसूत्रोक्ता
भ्यां सामान्याभ्यामेवाभ्यासवैराग्याभ्यां निरस्याः नत्वीश्वरप्रणिधानादेवेति नियम इत्यर्थः
एतत्प्रतिपादकत्वयोत्तरसूत्रमवतारयति तत्रेति तत्र तयोरभ्यासवैराग्ययोर्मध्येऽभ्यास ४२
विषयं जीवेश्वरादिसाधारणं पिंडीकृत्योपसंहरन् इदं मयोक्तं वक्ष्यमाणसूत्रेणाहेत्यर्थः यदि

हीश्वरप्रणिधानमेव केवलमंतरायाभावे हेतुरिति वक्ष्यमाणसूत्रार्थः स्यात्तदा तत्र तत्त्वाभ्या
स इति सामान्योपसंहारेण युज्येत निःसंदेहार्थमीश्वराभ्यासस्यैव चतुर्थुक्तत्वादिति भावः
तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः एकं स्थूलादि किंचित् यत्तु एकतत्त्वशब्देनात्र परमेश्वर एवो
क्त इति तन्न वाधकं विना सामान्यशब्दस्य विशेषपरत्वानौचित्यात् पूर्वसूत्रप्राप्तत्वेन पौन
रुक्त्यापत्तेश्च सर्वमेव चित्तमेकाग्रं नास्त्येव विक्षिप्तं इत्यागामिभाष्यानुपपत्तेश्चेति उक्तो विक्षे
पैकाग्रत्वयोर्वक्ष्यमाणपरिकर्मणश्चोपपत्तये चित्तस्य स्थिरतां साधयिष्यन् चित्तस्य क्षणिक
त्वादिकं दूषयति यस्य त्विति यस्य तु वैनाशिकस्य मते चित्तं प्रत्यर्थनियतं अर्थादर्थांतरं न गच्छ
ति तथा प्रत्ययमात्रं निराधारवृत्तिमात्रं तथा क्षणिकं च भवति तस्य मते सर्वमेव चित्तमेकाग्र
मतो विक्षिप्तचित्तानुपपत्तिरित्यर्थः तदनुपपत्तौ च तेषां स्वशिष्येभ्यः स्वशास्त्रसमाध्युपदेशो
विफल एवेति भावः एकस्य चित्तस्य क्रमेण नानार्थविषयकत्वस्वीकारे तु नायं दोष इत्याह यदि पु
नरिति ततः किमित्यत आह यत्राजोनेति योपि वैनाशिकविशेष उक्तदोषपरिहाराय मन्यते सदृ
शप्रत्ययप्रवाहरूपतैव चित्तस्यैकाग्रता प्रवाहमध्ये विसदृशत्वं च विक्षेप इति तस्य मते योपी
त्यादिभाष्यविकल्पं दूषयति तस्येति मत इति शेषः क्षणिकत्वादिति अतएवाश्रयाभावेन

कापत्तानुपपत्तिरिति शेषः ननु अतीतानागतवर्त्तमानासु सदृशप्रत्ययव्यक्तिषु नित्याद्विवक्षा
सद्भावव्यतिरेकागतताभवत्विति चेन्न अस्मोस्यासमानकालीनेषु व्यासज्यवृत्तित्वासंभवात् क्ष
णिकवादिनां सामान्यधर्माभावेन सादृश्यस्य दुर्वचत्वाच्चेति प्रवाहांशस्य प्रत्येकव्यक्तेरित्यर्थः
दूषयति स सर्व इति सः सर्वः प्रवाहांशः सदृशप्रत्ययप्रवाहान्तःपाती वा विसदृशप्रत्ययप्रवा
हान्तःपाती वा भवतु उभयथैवैकाग्रः चित्तस्य प्रत्यर्थनियतत्वादित्यादिरर्थः अतः स्वसिद्धा
न्तमुपसंहरति तस्मादिति अवस्थितं स्थिरं परमते दूषणान्तरमाह यदि चेति स्वभावभिन्नत्वे
न निःस्वभिन्नत्वेन त्वयाप्यभ्युपगताः प्रत्ययाः ये ये चित्तानाश्रिताः स्युरित्यर्थः अयं शब्दः प्रश्ने
अन्यप्रत्ययदृष्टस्येति तत्र अन्ते चित्तातिरिक्तात्माभावादुक्तः उपचितस्यार्जितस्य कर्माशयस्या
दृष्टस्येत्यर्थः नन्वेकसंतानोत्पन्नत्वेनानुभवसंस्कारस्मृत्यादीनां कार्यकारणभावाभ्युपग
मेनायं दोषः परिहर्त्तव्य इत्याशंक्याह समाधीयमानमिति गोमयपायसीयन्यायादित्यादि
न्यायमेतत् दूषणं समाधीयमानमव्याप्तिपतितिरस्करोति तन्न्यायमेव व्याप्येतत्र दूषणोद्धर
णमाप्यन्त्रमाभासी भवतु इत्यर्थः तत्र हि गव्यत्वं हेतुः प्रसिद्धोस्ति अत्र त्वेकसंतानीयत्वलक्षणो हेतुर
प्यप्रसिद्धः संतानस्यैकस्य निर्वाहकज्ञात्माद्यनभ्युपगमादिति भावः दूषणान्तरमाह किंचेति स ४३

स्वबोद्धृस्य परस्मात्मविषयकानुभवस्तस्याप्यपलापश्चित्तस्य प्रतिक्षणमसत्वे सतीति प्रसज्यत इत्यर्थः
यद्भूतिकयमिति उत्तरपदमिति अस्य यमहमो विशेषणं तथा च योहमद्राक्षं सोहं स्पृशामीत्यादि
प्रत्यये अहमिति यः प्रत्ययांशः स सर्वस्य प्रत्ययस्य दर्शनस्पर्शनादिरूपस्यात्मनो भेदेसतितदाश्र
ये प्रत्ययिनि धर्मिण्यभेदाकारतयाऽनुभवसिद्धोस्तीत्यर्थः आत्मानुभवं व्याख्याय तदुपन्हवं
व्याचष्टे एकप्रत्ययेति अयं चैकप्रत्ययविषयः प्रत्ययव्यक्तिमात्रगोचरको भवन्नन्ते तोऽभेदाका
रोहमिति प्रत्ययः कथं भवन्नन्ते त्वं तन्निन्नेषु क्षणिकचित्तेषु विषयत्वेन वर्त्तमानः सामान्यमेकं
विषयीकुर्यादित्यर्थः सर्वप्रत्ययानुगतधर्मिणः स्थिरचित्तस्यानभ्युपगमादिति भावः ननु अ
भेदाकारोहं प्रत्यय एव प्रमाणीकरतितत्राह स्वानुभवेति अभेदात्मा अभेदाकारः ननु यत्सत्त
त् क्षणिकं इति सत्वेन क्षणिकत्वानुमानादुक्तप्रत्ययो बाधनीयः तत्राह न च प्रत्यक्षेति माहा
त्म्यं स्वार्थे साधकत्वेन तर्कादिभिः अस्य प्रमाणान्तरेणाभिभूयते प्रतिवध्यते उपजीव्यत्वेन बलव
त्वादित्यर्थः शंखः पीत इत्यादिप्रत्यक्षं तु तर्कयोगेन बलवतानुमानेनैव बाध्यते एवं देहात्मा
ना प्रत्यक्षमपि निर्णीतप्रामाण्येन शास्त्रेण संदिग्धप्रामाण्यत्वाद् दुर्बलं बाध्यत इति ननु चित्ताति
रिक्तात्मानभ्युपगमिनामयं दोषः नत्वास्तिकानां अस्माकं प्रत्ययस्य स्थिरात्मविषयकत्वाभ्युपगमा

घ्नतः स्वमतेन कथं चित्तस्थैर्यसिद्धिरिति चेत् पूर्वोक्तात्स्मृतिसंस्कारयोरेकप्रयत्ननियमादित्यवेहि
तदिदं चित्तस्थैर्यमुपसंहरति तस्मादिति परिकर्मोपदेशान्यथानुपपत्त्यापि चित्तस्थैर्यमनुमो
पत इत्याह यस्येति हेतुगर्भविशेषणेनास्थिरचित्तस्येदमागामिसूत्रवक्ष्यमाणपरिकर्म चित्त
प्रसाधनं स्थितिदार्ढ्यहेतुः परिष्कारः शास्त्रेषु निर्दिश्यत इत्यर्थः सूत्रांतरमवतारयति तं पृच्छ
ति कथमिति किमुपायकं किं स्वरूपं किंफलं वा परिकर्म भवतीत्यर्थः सूत्रान्तरमत्र सूत्रेणोत्त
रं मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनं
प्रसादनं स्थितिनिबंधनमित्यागामितृतीयसूत्रस्थेनान्वयः अस्य चात्र सूत्रे वाशब्दवैय
र्थ्यात् । निबंधनत्वं च स्थितस्य भ्रंशाद्धेतुत्वं न तु स्थितिहेतुश्रद्धाद्यप्रतिबंधद्वारा तत्रैव प्रमाणमपि
सूत्रे भाष्यव्याख्यानात् श्रद्धावीर्यस्मृतिसमाधीनामेव स्थितिहेतुत्वमुक्तत्वाच्च अत्र सुखादि
शब्दस्तद्वत्पुरुषपरः धर्मधर्म्यभेदात् सुखितादिवाची भावना चोत्पादनं प्रसादनं प्रसादनं
समाधिप्रतिबंधकं रागद्वेषाद्यधर्मादिमलापसारणेनोपाधिप्रसादवदित्यर्थः ननु सर्वेति मै
त्रीं सौहार्दं करुणां निरुपाधिपरदुःखप्रहाणेच्छां मुदितां प्रीतिमुपेक्षां चौदासीन्यं सर्वत्र भावये
दित्यन्वयः भावनानां चित्तप्रसादे द्वारमाह एवमस्येति शुक्लः पापासंमिश्रः ततो धर्म इत ४४

रतमः क्षये चित्तं निर्मलं भवतीत्यर्थः अदृष्टद्वारकत्वं चैतन्मुख्यत उक्तं रागद्वेषनिवृत्तिरूपदृष्टद्वा
रकत्वमपि बोध्यं तदुक्तं गीतायां रागद्वेषविमुक्तैस्तु विषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्मा
प्रसादमधिगच्छति प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठत इति ननु चित्तस्य प्रसादाख्यपरिक
र्मणो वा किं कार्यमित्याकांक्षायामाह प्रसन्नमिति प्रसन्नं चित्तमेकाग्रं भूत्वा स्थिरपदमभ्रंशयो
ग्यतां लभत इत्यर्थः स्थितिपदमिति पाठे स्थितिः स्थैर्यमित्यर्थः एवं सर्वत्र प्रसादस्य साधनां
तरमाह प्रच्छर्दनविधारणाभ्यां वा प्राणस्य वाशब्दोऽप्यर्थे आभ्यामपि चित्तस्य प्रसादनं कुर्या
दित्यर्थः नासिकापुटाभ्यामिति निरंतरघटेनेत्यर्थः प्रयत्नविशेषादिति सूक्ष्मरूपेण योगशा
स्त्रोक्तरीत्या वमनं रेचनमित्यर्थः विधारणं कुंभकं तच्चाभ्यंतरपूरणानंतरमिति बोध्यं रेचनोत्तरं
पूरणं विना विधारणासंभवात् प्राणायाम इत्युक्तेश्च प्राणायामश्च त्रिविधो रेचपूरककुंभ
काख्य इति स्मृतिभिस्त्रयाणामेव मिलितानां प्राणायामत्वकथनादिति प्राणायाम इति एत
द्रूपं पूरणगर्भं प्राणायाम इत्यर्थः प्रच्छर्दनविधारणे व्याख्याय प्रस्तुतार्थमाह ताभ्यामिति
स्थितिं भावयेत् प्रसादद्वारेति शेषः अत्र प्राणायामो यमादिनिरपेक्षतया चोत्तमाधिकारिणो
योगसाधनतयोक्तः द्वितीयपादे तु मन्दाधिकारिणो व्युत्थितचित्तस्य यमाद्यष्टांगमध्ये प्राणाया

मोचनत्वमद्वयपोनरुक्तं तथा च स्मृतिः प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषमिति प्र
सादापेक्षया स्थितिनिबंधनं परिकर्मांतरमाह विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थिति
निबंधनी प्रकृष्टाख्यातिः प्रवृत्तिः साक्षात्काररूपा विषया विषयाणां शब्दादयः पंचविषयत्वेना
स्याः संतीति विषयवती सा च स्वसाधनादुत्पन्ना स्वांविषयेष्वपि विवेकपर्यंतेषु शब्दाद्यप्र
तिबंधहेतुतया स्थितिप्रयोजिका भवतीत्यर्थः वाशब्दः समुच्चये त्वावश्यकत्वाभावे वा
च्यत्वात् अत्र च मनस इति वचनान्मनस्स्थितेर्योगत्वेनेति बोध्यं विषयवती प्रवृत्तिः पंच
प्रकारां दर्शयति नासिकाग्र इति नासिकाग्रे गंधोपलब्धिस्थाने धारणां कुर्वतो योगिनो
यो दिव्यगंधसाक्षात्कारो स्तोकेनैव कालेन भवति सा गंधप्रवृत्तिरिति तांत्रिकी परिभाषा
एवं सर्वत्र व्याख्येयं तालुदंतोरूपाद्युपलब्धिस्थानमिति शास्त्रप्रमाणपादत्वधारणीयं
स्थितिनिबंधनीत्यस्यार्थे चित्तस्थिरो निबध्नंतीत्यर्थांतरे भवति सूक्ष्मेष्वदृढस्थितिये
ग्यं कुर्वंतीति संस्कारद्वारेत्यर्थः अन्यच्च कुर्वंतीत्याह संशयमिति शास्त्रोपेर्योत्तरे संशयं निराकु
र्वंतीत्यर्थः संशयविधमनप्रकारं च वक्ष्यति समाधिप्रज्ञायामिति समाधौ जायते यया प्रज्ञा
सत्त्वपुरुषान्यतासाक्षात्कारः तत्र वक्ष्यमाणवैराग्यादिरूपद्वारेण कुर्वंतीत्यर्थः एतेनेति ४५

यत्तोरूपवत्प्रवृत्तिर्विषयवती एतेन हेतुना रूपप्राधान्याच्चंद्रादिप्रवृत्त्योपि स्थितिहेतुतया शास्त्रांतरे
दृश्यमानात्त्वस्यामेव विषयवत्त्वं प्रदर्शनीयाः इत्यर्थः अतो न न्यूनतेति भावः संशयं विधमंती
ति यदुक्तं तत्र शंकां निराकुर्वन्नेव तद्विवृणोति यद्यपि हीति तैस्तैः शास्त्रैः स्वानुमानैराचार्योपदेशै
श्च निर्णीतमप्यर्थतत्त्वं परमार्थभूतमेव भवतीति निश्चयाभावात्तत्र संशयः संभवतीति शेषः संशयमु
पपादयति तथापीति तथापीति यावद्धुपलब्धार्थैकदेशः स्वकरणोपलब्धुमेव न्यायादिभिर्नसाक्षात्
क्रियते तावत्सर्वं शास्त्रादि परोक्षमिव व्याजेनानिवत्संदिग्धतात्पर्यकं भवति इत्यतो नापवर्गादि
षु निश्चयं जनयतीत्यर्थः तात्पर्यं संशयापादितो हि संशयो निर्णीतेप्यर्थे भवति अतएव शास्त्रस्थल
केनुमानेपि संशयो भवतीत्याशयः संशयमुपपाद्य तद्विधमनप्रकारमाह तस्मादिति उपोद्घल
नमत्रपूर्वोक्तस्य तात्पर्यं संशयापसारणं तत्र शास्त्रार्थेषु श्रद्धोपत्तेर्द्वारमित्यर्थे वेति विश्वस्य
तदर्थः एतदर्थं निश्चयाय अत्र श्रद्धोत्पादनार्थे समाधिप्रज्ञायां श्रद्धाद्वारो भवंतीति यदुक्तं तद्वि
वृणोति अनियताश्चेति अनियतास्वन्यस्वविस्थितासु चित्तवृत्तिषु मध्ये तत्तद्देवादिप्रवृत्त्या गंधा
दीनां दोषदर्शनात् तद्विषयके वशीकारसंज्ञे वैराग्ये जाते सति विक्षेपह्रासात् तस्य तस्य अंतरेण
रभ्यमिरूपस्यार्थस्य साक्षात्कारे चित्तं समर्थं स्यादित्यर्थः वैराग्यस्य द्वारं विक्षेपाभ्यपगतिबंधनि

वृत्तिस्वरूपं विवृणोति तत्र थाचरतीति वशीकारसंज्ञा वैराग्ये च सतीत्यर्थः चित्तस्यैर्ये निबंधनं प
रिकर्मोक्तमाह विशोका वा ज्योतिष्मती विगतः शोको यस्या इति विशोकेति हेतुगर्भं विशेषणं
तथा च यतो विशोका ऽतो वक्ष्यमाणज्योतिष्मती प्रवृत्तिः स्थितिहेतुरित्यर्थः द्विविधा विशोका
विवृणोति हृदयेत्यादिना एवाद्वयी विशोकेत्यंतेन हृदयपुंडरीकस्थाने चैतच्चित्तं धारयतो याबु
द्धिसंवित्तत्साक्षात्कारो भवति यद्वक्ष्यमाणं रश्मितामात्रमस्मीत्येतावन्मात्राकारं चित्तं भ
वति एवाद्वयी विशोका ज्योतिष्मती उच्यते इत्यन्वयो भविष्यति तत्र बुद्धिसंविदि ज्योतिष्मती
संज्ञायामन्वर्थतामाह बुद्धिसत्त्वं हीति बुद्धिरूपं सत्त्वं भास्वरं स्वपरप्रकाशकं तेजोवत् आका
शवद्विभु च भवति तत्र बुद्धौ स्थिति वैशारद्यात् निर्मलैकाग्र्यात् बुद्धिप्रवृत्तिः सूर्यादिप्रभांतस
दृशाकारेण विकल्पते विशेषेणोत्पद्यत इत्यर्थः अतो विषयस्य ज्योतिष्मत्त्वेन विषयिण्यपि प्र
वृत्तिरपि ज्योतिष्मतीति भावः अत्र चांतःकरणस्य विभुत्वमाचार्येण सिद्धांतितं अंतःकरणयो
गस्य चेयं योगशास्त्रोक्ता प्रक्रिया उदरोरसोर्मध्ये यत्पद्मं तिष्ठति यदधोमुखं अष्टदलं तदूर्ध्वं रेचक
प्राणायामेनोर्ध्वमुखं कृत्वा तस्मिन्नालंबने चित्तं धारयेत् तत्र हि चित्तं तिष्ठति तदा यथायथम
ध्ये सूर्यमंडलमकारो जागरितस्थानं तस्योपरि चंद्रमंडलं उकारः स्वप्नस्थानं तस्योपरि वह्निमंड ४६

मंडलं मकारः सुषुप्तिस्थानं तदुपरि परं ब्रह्मव्योमात्मकं नादलक्षणोपस्थानमस्ति यमर्द्धमात्रम
दाहुरिति योगिनः तत्र कर्णिकायां विषयव्याप्तिशाखसहस्रवत्या मनोवहा नाड्यप्यमलाति
ष्ठति यस्या अलाबुलतिका या इव ऊर्ध्वमुखी राकारणं खा सुषुम्नेति योगिमतेन याच शाखा सूर्य
याव्रस्तना ऽ या वा स्याम्यपि सूर्यादिमंडलानि योजानि सैव मनोवहा नाडी चित्तस्थानं भव
ति तस्यां चित्तं धारयतो योगिनश्चित्तसाक्षात्कारो जायत इतिः तथास्मितायामिति अस्मि
तात्मत्वनाहंकारः किंत्वात्मतत्त्वं तमणुमात्रमात्मानमनुविद्य अस्मीत्येवं तावत्प्रजानीत इत्युक्तेति अस्मिताम
तात्महंता नानायप्योपयत्वाद्धु भावमत्यपप्र निर्विशेषसामान्यमात्रता वोद्धनाप्रयुक्तः त
था चास्मितायां विविक्तचिन्मात्रेषरुषे समापन्नं तद्रूपतापन्नं अत एव निस्तरंगमहोद
धिकल्पं पुरुषाकारत्वात्स्वयमपि तत्कल्पं तत्प्रशांतं शोकादिनिमित्तकक्षोभरहितत्वात्सं
तं सर्वतो नावतं अस्मितामात्रं अस्मीत्येतावन्मात्राकारं आत्माकारतापत्त्यं भवतो त्यर्थः
आत्मनश्चित्त ज्योतिर्मेयत्वात् तदाकारस्य ज्योतिष्मत्त्वं स्पष्टमेवेति पुनर्नोक्तं ननु नेनात्मसा
क्षात्कारे ऽपी वक्तुनार्थत्वात्कथमस्य स्थितिशेष तयोपन्यास इति चेत् नकुतात्मसाक्षात्का
रेणापि ज्ञाननिष्ठपापरवैराग्यार्थमभ्यासापेक्षणादिति गंधादिप्रवृत्तिभ्य अस्मितायाम

यत्रविशेषो यथा शब्दादिप्रवृत्तयो यथान्तरेषु चित्तस्थैर्यहेतवः अस्मितामयप्रवृत्तिरुक्ता विषयव
तीति अपि च जीवात्मसाक्षात्कारस्य परमात्मनि चित्तस्थितिहेतुत्वमस्तीति अस्मिताशब्द
ये पूर्वाचार्यैरुक्तेन विवृणोति यत्तदित्यादि अणुमात्रं सूक्ष्मतमं अनन्तविद्यमावरणमननाभ्यां
अस्मितामात्रं चेति द्विविधा विशोकाज्योतिष्मतीत्युच्यते यथा येनास्मीत्येतावन्मात्राकारे
ण साक्षात्करोतीत्यर्थः एषा द्वयीति विषयवती अस्मितामात्रं चेति द्विविधा विशोकाज्यो
तिष्मतीत्युच्यते शास्त्रकृद्भिः अनया योगिनश्चित्तं स्थितिपदं लभत इत्यर्थः ननु गन्धा
दिप्रवृत्तिवद्बुद्धिसंविदोऽपि विषयवतीत्वे पूर्वसूत्रेणैव तद्ग्रहणं युक्तमिति चेन्न गन्धादिपं
चकस्य विषयशब्दस्य प्रसिद्धत्वात् अस्य सूत्रे च मुख्यविषयवत्याः पूर्वसूत्रेणोक्तत्वात् बु
द्धेश्च पुरुषसाक्ष्यतया विषयशब्दो गौण एव असंगस्य पुरुषस्य बुद्धिवद्बन्धाभावेन सिद्धे
याभावेन सिद्धः ध्यात्वर्थायोगात् अतो बुद्धिसंविदो गौणं विषयवतीत्वमत्र सूत्रे प्रोक्तमि
ति विशोकत्वं चास्मितासंविदः साक्षादेवास्ति तरति शोकमात्मविदिति श्रुतेः बुद्धिसंविद
स्तु विशोकत्वं संस्कारशेष्या किंवा विवेकख्यातिद्वारेति बोध्यं चित्तस्थैर्यकारणं परिकर्मान्त ४०
रमाह वीतरागविषयं वा चित्तं आचष्टे वीतेति विगतरागस्य सनकादेर्यच्चित्तं तदेवालम्बनं

तेनोपरक्तं तद्धारणया तदाकारतापन्नं योगिचित्तं विरक्तसदालम्बनान्तरेऽपि स्थितियोग्यतां लभ
त इत्यर्थः तथैव परिकर्मान्तरमाह स्वप्ननिद्राज्ञानालम्बनं वा स्वप्नज्ञानं स्वप्नरूपं ज्ञानं तदा
लम्बनकं चित्तं प्रपञ्चज्ञाने स्वप्नदृष्टिमच्चित्तमिति यावत् तथा चोक्तं दीर्घस्वप्नमिमं विद्धि दी
र्घं वा चित्तविभ्रममिति इयं च दृष्टिः कामदुघत्वादिगुणैर्यो विषयेषु दृष्टिवत् क्षणभंगुरवि
षयकत्वादिगुणैर्योग्यतज्ज्ञाने स्वप्नदृष्टिरूपेति एतदपि वैराग्यद्वारा चित्तस्थैर्यहेतुरित्याशयः
निद्राज्ञानालम्बने चेति निद्रारूपं ज्ञानमेवालम्बनं यस्य तत्तथा सत्त्वेऽपि बंधविस्मृतात्मके सु
षुप्त इति मच्चित्तमिति यावत् तदुक्तं परस्मात्संस्थावरं तं च प्रसुप्तं यस्य मायया तस्य वि
ष्णोः प्रसादेव यदि कश्चित् प्रमुच्यते चराचरं लय एव प्रसुप्तमिह पश्यतां किं स्वप्नव्यवहारे
पुनर्विरक्तं भवेन्मन इति भाष्यं च स्वगमं ॥ यथाभिमतध्यानाद्वा किं बहुना यदेवाभिमतं ह
रिहरस्वरूपादिकं तदेवादौ ध्यायेत् तस्मादपि ध्यानात्तत्र लब्धस्थितिकस्य चित्तस्यान्यत्रापि
विवेकपर्यन्तं सूक्ष्मेषु विनैव साधनान्तरं स्थितियोग्यता भवतीत्यर्थः इत्यमेव व्याचष्टे य
देवेति परिकर्मनिष्पन्ने लक्षणमाह परमाणुपरममहत्त्वान्तोऽस्य वशीकारः अस्य परिकर्मितचे
तसः परिकर्मनिष्पन्नस्य परममहत्त्वं येषां पुरुषादीनां ते परममहान्तः आचष्टे सूक्ष्म इति सूक्ष्मेऽस्य

परिमाणे चित्तस्य निवेशनं अवस्थानम् अभ्यासोरित्यर्थः लभते योगीति शेषः स्थूल इति स्थूले
महत्परिमाणेऽन्यत्सर्ववत् एवं तामिति एतत्सूक्ष्मस्थूलरूपकोटिद्वयं पक्षद्वयं संचरतोऽस्य चि
त्तस्य योऽप्रतिघातः केनाप्यप्रतिबद्धता स वशीकारश्चित्तस्य विधेयत्वं भवतीत्यर्थः परशब्दाद्
परोऽपि वशीकारोऽस्ति दोषदर्शनजन्यो वशीकारसंज्ञारूपरतिभावः तदपेक्षयास्य परत्वे हेतुमा
ह तद्वशीकाराद् इति तस्माद्वशीकारात्परिपूर्णे समाप्तस्यैव साधनाकांक्षं चित्तं अभ्यासांतर
साध्यपरिष्कारं नापेक्षत इत्यर्थः वशीकारसंज्ञावैराग्यानंतरमपि तच्चित्तमभ्यासकृतं वशी
कारमपेक्षत एवेति तदपरं निकृष्टमिति भावः तदेवमभ्यासवैराग्यादिकं परिकर्मोत योग
साधनमभिहितं सामान्यतो योगद्वितयं च प्रोक्तं अतः परं योगयोः फलं वक्तव्यं तत्रादौ संप्रज्ञा
तस्य फलं ध्यानादिव्यावृत्तं प्रतिपादयन्सूत्रमवतारयति अथेति अथशब्दः प्रश्ने समाप
त्तिः सम्यगात्मं वनाकारत्वापत्तिः प्रत्यक्षवृत्तिरित्यर्थः चित्तस्यैवं प्रज्ञाख्यावस्था संप्रज्ञाते
व भवति न तु धारणाध्यानसमाधिषु तेषु सामग्र्येणालंबनाग्रहणात् साक्षात्कारस्यैव वि
शेषाकारत्वादिति क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदंजनता समा ४८
पत्तिः क्षीणवृत्तेरपगतवृत्त्यंतरस्य चित्तस्येत्यर्थः अभिजातस्य निर्मलस्य मणेरिव ग्रहीत्रादि

षु तत्स्थतया तदंजनता सम्यक् तदाकारता जायते सा च समापत्तिशब्दवाच्या भवतीत्यर्थः अ
त्र संप्रज्ञातफलभूतायाः प्रज्ञायाः समापत्तिरिति तांत्रिकी परिभाषापि प्रसंगादुक्ता सा चासंप्र
ज्ञातव्यावृत्तस्य संप्रज्ञातस्वरूपस्य परिचायकतयैव संप्रज्ञातयोग इति पश्चाद्वक्ष्यते तेन एव सबी
जः समाधिरिति सूत्र इति क्षीणवृत्तेरिति हेतुगर्भं विशेषणस्यापमाणः चित्तस्य स्वतराव स
र्वोऽर्थसाक्षात्कारसामर्थ्यमस्ति विषयांतरव्यासंगदोषादेव तत्तत्प्रतिबद्धमतो हंतं तत्प्रतिबंध
स्य निःशेषतो विगमे स्वतरा वध्येयवस्तुसाक्षात्कारस्तद्रूपापत्त्याख्यो भवतीति भाष्ये प्रत्यस्त
मितेति प्रत्ययस्य प्रत्ययांतरस्येत्यर्थः समापत्तेरपि प्रत्ययत्वात् उत्पत्तिक्रमानुरोधेन सौत्रपा
ठक्रमं उल्लंघ्य ग्रहणाद्यादि समापत्तीः सदृष्टांता व्याख्यानाय मादौ स्वयं विवृणोति यथेति उपाश्रय
भेदात् जपाकुसुमाद्युपाधिविशेषात् तद्रूपोपरक्तस्तत्तद्बिंबोद्ग्राही सन् स्फटिक उपाधितत्सा
कारतयैव निर्भासते प्रतीयते तथा ग्राह्यालंबनेनोपरक्तं समर्पितप्रतिबिंबवृत्तेः प्रत्यक्ष
रूपतालाभाय ग्राह्यसमापन्नमिति ग्राह्यगतविशेषाकारमित्यर्थः एवंभूते चित्ते ग्राह्यस्वरूपा
नाकारेणैव साक्षिणि निर्भासत इत्यर्थः अत्र समापत्तिरूपस्य प्रत्यक्षस्य प्रामाण्याय ग्राह्या
कारेणैव साक्षिणि निर्भासत इत्यनेन तत्फलमुक्तं पौरुषेयबोधस्यैव प्रमाणफलत्वादिति एवं

सर्वेत्त्वग्राह्यसमापन्नायवांतरं त्रैविध्यमाह भूतेति अत्र भूतसूक्ष्मशब्देन तन्मात्रादिप्रकृति
पर्यंतं गृहीतं सूक्ष्मशब्दस्य कारणार्थतया भूतेंद्रियग्रहणं स्थूलशब्देन च महाभूतानि गृहीता
नि विश्वभेदशब्देन च स्थावरजंगमादयोवांतरभेदा ग्राह्याः अग्रेऽपि पूर्ववत् गृह्यतेनेनेति ग्रह
णमिंद्रियं तत्र समापत्तौ सूक्ष्मस्थूलविश्वभेदरूपं त्रैविध्यमतिदिशति तथा ग्रहणेष्वपीति
इंद्रियाणां सूक्ष्मं बुद्ध्यहंकारावित्ति भाष्यकारो वक्ष्यति स्थूलं च चक्षुरादिकं विश्वभेदश्च स्थाव
रजंगमानां चक्षुरादिविशेषा इति अवांतरविभागमतिदिश्य ग्रहणसमापत्तिं सामान्यतो दर्श
यति ग्रहणालंबनेति पूर्ववद्व्याख्येयं गृहीतृसमापत्तिं पूर्ववत् व्याचष्टे तथा गृहीत्रिति गृही
तृत्वं बुद्धेरपि व्यपदिश्यत इति तद्व्यावर्त्तनाय पुरुषपदं अत्र च ग्रहणफलोपहितत्वं गृहीत
त्वं स्वरूपयोग्यतापरं चे मुक्तपुरुषेषु प्रयावचनानौचित्यात् ईश्वरस्य चात्रैव प्रवेशः तद्गुणस्व
रूपयोग्यमात्रेष्वपि समापत्तिर्व्याचष्टे मुक्तेति मुक्ता आत्यंतिकलयं गता शुकादयः समग्रसू
त्रार्थमाह तदेवमिति सामान्यतः समापत्तिरुक्ता तत्र गृहीतृसमापत्तौ स्थूलसूक्ष्मविषयकत्व
रूपविशेषाभावात्साकल्येविधैव ग्राह्यग्रहणसमापत्त्योस्तु तद्विशेषसत्त्वात्तयोर्विशेषाना ४८
हत्रिभिः सूत्रैः तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः ततीयसूत्रे सूक्ष्मविष

यकसमापत्तेर्वक्ष्यमाणतया स्वसूत्रद्वयस्य स्थूलविषयकत्वं परिशेषाल्लभ्यते स्थूलं कार्यं
सूक्ष्मं कारणं तत्र स्थूलं द्विविधं भूतानि तन्मात्राणां कार्याणीद्रियाणि चाहंकारस्य कार्याणी
ति तत्र च स्थूलसूक्ष्मसमापत्ती द्विविधे भवतः तासु चतसृषु समापत्तिषु सविकल्पिकायाः
स्थूलविषयकसमापत्तेर्लक्षणमिदं सूत्रं तदेतद्व्याचक्षाणस्त्रादौ शब्दार्थज्ञानविकल्पमुदा
हरति तद्यथेत्यादिना दृष्टमित्यंतेन इत्यविनिर्भागेनैवमभेदेन विभक्तानां वस्तुतो भिन्ना
नामपि ग्रहणं विकल्पाख्यं लोके दृष्टं पूर्वोक्तविकल्पलक्षणाक्रांतत्वादित्यर्थः ननु वस्तुभ्य
न्यथेसति विकल्पः स्यात् प्रतीतिबलात्त्वभेदोत्र वस्तुसन्नेव भवतु तत्राह विभज्यमानाश्चे
ति अन्वयव्यतिरेकाभ्यां परीक्षकैर्विभज्यमाना विविच्यमाना अन्ये शब्दज्ञानधर्माभ्यां भिन्न
: शब्दधर्मोऽकारत्वमंदत्वादयः एवमर्थधर्मोजडत्वमूर्त्तत्वादयः शब्दज्ञानधर्माभ्यामन्ये एवं
ज्ञानधर्माः प्रकाशमूर्त्तत्वादयः शब्दार्थधर्माभ्यामन्ये इत्ययमेतेषां शब्दार्थज्ञानानां विभक्तो
ऽन्योन्यभिन्नः पंथाः स्वरूपभेदोऽत्र पदमार्ग इत्यर्थः समापत्तिरेव विकल्परूपेत्यतो विकल्पसं
कीर्णत्वानुपपत्तिरित्याशयेनान्यथा सूत्रार्थं व्याचष्टे तत्रेति तत्र गवादौ स्थूलभूतेंद्रियेषु स
मापन्नस्य समाहितस्य योगिनः समाधिप्रज्ञायां समारूढो योगवाद्यर्थः सपदि शब्दार्थज्ञान

विकल्पेन गौरित्येभासनतद्वत्येवं शब्दार्थज्ञानानां भेदत्रयेणानुविद्धो विषयीकृतो भवतीति तदा सा
संकीर्णा विकल्पमिश्रिता विकल्पविषयीभवदर्थविषयिणीति यावत् समापत्तिः सवित
र्कसंज्ञा न भवतीत्यर्थः अत्र हि गौरित्यभिमित्यंशे शब्दार्थयोर्भेदविकल्पः भासनत्वंशे चा
र्थज्ञानयोर्भेदवितर्कोसमापत्तिभेकल्पः अर्थद्वारा च शब्दज्ञानयोरप्यभेदविकल्पः एवं ना
रायणोयं भासनत इत्यादिरूपेश्वसवितर्कासमापत्तिर्भवतित्यत्र शब्दादिविकल्पैर्येपास
भवमन्येपि विकल्पा उपलक्षणीयाः रूपं च समापत्तिरपरं प्रत्यक्षमविद्यालेशसंवंधादि
ति सूत्रोत्तरं योजयितुं प्रथमं तावन्निर्वितर्को स्थूलसमापत्तिं व्याचष्टे यदा पुनरिति अयं भा
वः शब्दसंकेतस्मरणपूर्वकेतावत् क्रमेणागमानुमानज्ञाने भवतः संकेतश्चायं गौरिति शब्दा
र्थयोरितरेतराध्यासात्मकः एतद्वैतमसम्यग्परं च ब्रह्मयदोंकार इत्यादिश्रुतिषु उस्मकारेकारम
कारान् ब्रह्मविष्णुमहेश्वरा इत्यादिस्मृतिषु अमरा निर्जरा देवा इत्यादिकोशेषु च संकेतस्य विक
ल्पिताभेदरूपत्वावधारणात् ततश्च संकेतग्रहसमानाकारेणैव शब्दबोधस्तन्मूलकानुमानं
च भवतीत्यतश्चागमानुमानज्ञानयोरपि श्रवणमननरूपयोर्विकल्पसंकीर्णत्वमेव: ततश्चेत
न्मूलिकायाः प्रथमं ज्ञायमानसमाधिप्रज्ञा सापि विकल्पसंमिश्रैव भवतीति सा सवितर्का भव ५०

ति यदा पुनरर्थमात्राददर्थमात्रप्रवणो न चैतसां संस्कारे न स्मृतिलयप्राप्तेतदा समाधौ तन्मूलको
विकल्पो न जायत इति निर्वितर्को भवतीति तदिदमाह शब्दसंकेतेति शब्दसंकेतस्य स्मृतेः परिशु
द्धिरपगमः तस्यां सत्यां तत्स्मृतिनिमित्तकेन श्रुतानुमानज्ञानकालीनविकल्पेन शून्यायां समाधि
प्रज्ञायां अर्थः स्वरूपाकारेणैवावधार्यत इत्यादिरर्थः आरोपसंपर्काभावादिति भावः अगृही
तग्राहित्वं निर्वितर्कसमापत्तेः प्रामाण्यं यस्यापि संपर्को नास्तीति प्रतिपादनाय स्वरूपमात्रेणाव
स्थितोर्थ इत्युक्तं परमिति आरोपसंपर्काभावादिति भावः अगृहीतग्राहित्वं निर्वितर्कसमापत्ते
प्रामाण्यप्रयोजकं दर्शयति तच्चेत्यादिना दर्शनमित्यंते न श्रुतानुमानयोः श्रवणमननयोर्वी
जं बीजं शब्दार्थव्यावषेत न इति प्रभवतः प्रकर्षेण भवतः गुरुहणाशेषविशेषसाक्षात्कारं विना
असंदिग्धाविपर्यस्तवस्तुस्वरूपप्रतिपादनासंभवात् अतः सवितर्कागतधिगतोपि विशेषोस्या
विषय इत्यर्थः नन्वेवं सर्वज्ञगुरुणा श्रुतिस्मृतिभ्यामेवाशेषविशेषप्रतिपादनं स्यादिती यं मर्थो
निर्वितर्कसमापत्तिरिति तत्राह न चेति सहभूतं तत्कालीनं गुरोर्विशेषतत्त्वेपि सविशेषः एतदेन
अशेषो वक्तुं न शक्यते इक्षुक्षीरादिविशेषवत् इदंतदिति निर्देष्टुं गुरुणापि न शक्यत इति स्मृतेः
अतः सर्वज्ञवाक्यादपि निर्विकल्पकसमापत्तिसमानाकारं ज्ञानं न संभवतीत्यर्थः तं तः किमित्य

तत्राह तस्मादिति संकीर्णां गृहीत मात्रगादिह तदेवमुत्तरस्तत्स्य लक्ष्यमवधार्यैत्सत्रमवतारयति
निर्वितर्कायाः इति स्पष्टं स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का यतः स्मृति
परिशुद्धौ सत्यां आपतेत तयास्वरूपशून्येव प्रभवतीत्यतोर्थमात्रस्य निर्भासोपनेत्यर्थमात्रनि
र्भासाखिलविकल्पस्वरूपास्मृतिः चिंतासवितर्केकालेप्यनुवर्त्तते तदपगमे सतीत्यश्च पदार्थः
शब्दसंकेतस्यागमस्मृतिहेतुत्वेस्वगोचरज्ञानद्वाराबोध्यसंकेतश्च शब्दार्थयोः कल्पिताभेद
मात्ररूपतः संकेतस्मृतौ तन्मूलकज्ञाने वा भेदविकल्पश्रोतसंगीकरति शब्दविकल्पशून्यत्वेहे
तुमुक्त्वा ज्ञानविकल्पशून्यत्वे हेतुमाह स्वमिवेति इवकारेभिन्नक्रमेणात्यक्तेति पदानंतरं यो
जनीयः त्याग स्वाद्यरूपं वा ग्रहणमिति तत्तीयपदस्यार्थमाह पदार्थमात्रेति तस्याप्यर्थमाह ग्रा
ह्यस्वरूपापन्नेव भवतीति स्वानिर्वितर्केति एवं निर्भासायाः समापत्तिः सानिर्वितर्केत्यर्थः
तदेवसूत्राभ्यां प्रतिपादितौ सवितर्कनिर्वितर्कयोगौ सविकल्पनिर्विकल्पशब्दाभ्यामपि शा
स्त्रेषूक्तौ ननु वितर्के विचारेप्यादिसूत्रे चयः स्थूलविषयको योगो वितर्करूपत्तः सएवात्र सवित
र्कनिर्वितर्कसमापत्तिरूपेणाद्विधोक्त इति ननु तस्यानिर्वितर्कस्य साक्षात्कारस्य विषयः किमवयवाः ५१
किं वाऽवयवी आद्ये वक्ष्यमाणनिर्विचारसमापत्त्यासहैकविषयत्वापत्तिः अंत्येऽवयविनः क

ल्पितत्वेन तद्गोचरनिर्वितर्काया विकल्पशून्यत्वानुपपत्तिरित्याशंक्यावयविनं व्यवस्थापयन्न
वयविविषयकत्वमेवास्या वद्गुनाक्षादवधारयति तत्राचेत्यादिना लौक इत्येतेन व्याख्या
तं पूर्वाचार्यैरिति शेषः तस्यानिर्वितर्कायाः गवादिर्घटादिर्वा लोकस्त्रालंबनमित्यन्वयः नन्व
वयविनि किं प्रमाणं तत्राह एकबुध्युपक्रम इति एको गौरिति बुद्धिमुपक्रमते आरभत इत्ये
कबुद्ध्युपक्रमः अतो नावयवानावयवानामनेकतयाऽवयविव्यवहारनिर्वाहकत्वमिति
भावः नन्वेवमप्येकमत्ययान्तरेण्यादेकं विज्ञानमात्रमेवावयविव्यवहारनिर्वाहकरोत्तर
स्के तत्राह अर्थात्मेति अर्थात्मा दृश्यरूपः विज्ञानमात्रत्वेस्वस्यस्वदृश्यत्वानुपपत्तिः कर्मक
र्तृविरोधादिति भावः नन्वेवमवयवेभ्योऽवयविनोतिरेकेकथमयंपरोज्ञानमित्यादिरूपो
वयवावयविनोरभेदप्रत्ययो नस्यादित्याशंकामपाकरोति अणुप्रचयविशेषात्मेति अणू
नामेव प्रचयाख्यसंयोगनिमित्तको यो विशेषः परिणामरूपस्तत्स्वरूप इत्यर्थः तथा च सा
मान्यविशेषयोर्भेदांगीकारात् अभेदप्रत्ययोप्युपपन्न एवेति भावः न च भेदाभेदयोर्वि
रोध इति वाच्यं भेदस्यान्योन्याभावरूपत्वात् अभेदस्य चाविभागरूपत्वादितिन्न यं वा विभा
गोन सक्ष्णानन्यत्वं लक्षणभेदकालेप्यभेदप्रत्ययात् किंतु आधाराधेयभावविवत्स्वरूपसं

वंधविशेषणावदुग्धजलयोरिवेति एतत्सर्वं परिणामसत्त्वे विशिष्यप्रतिपादयिष्यतिस्वयं
भाष्यकारः ननुयद्यवयवीएकीकृतस्तर्हि तस्यैकावयवनाशेनाशात्तस्यानुपलब्धिप्रसंगः
किंचावयविनोनित्यत्वेसर्वदाकार्यकारिताप्रसंगः अनित्यत्वेवासदुत्पादतः शशशृंगाव
पिकारणमापारादुत्पद्येतेत्याशंकामपाकरोति सचेति सचस्थूलोवयवीस्वकारणानामन
सूक्ष्माणांसाधारणः प्रत्येकंपरिसमाप्तो ननुद्वित्वादिवद्व्यासज्यवृत्तिः एकावयवव्यवधानेपि
प्रत्यक्षत्वप्रसंगात् अन्यथैकावयवनाशेप्यवयवांतरैः वयव्यवस्थानात्तदुपलब्धिः अवय
वविभागविशेषणवावयवविनाशकः सचविशेषोजातिरूपो फलवलात् कल्प्यतइतिभा
वः तथाचास्मान्मतः संदेवस्तस्यासेघनुगतः नांतः शशशृंगाद्युत्पत्तिप्रसंगः नत्वप्रमा
णमाह फलेनव्यक्तेनानुमितइति अभिव्यक्तिलक्षणकार्यानुमितः असदभिव्यक्तौ सर्वत्रस
र्वाभिव्यक्तिप्रसंगात् ननुतर्हिसर्वदैवाभिव्यक्तिः कुतोनभवति तत्राह स्वव्यंजकेति स्वाभिव्य
क्तिहेतुर्यत्कारणंतदेवांजनं अभिव्यंजनंकारणंयस्यतथाभूतः सन्नाविर्भवतिवर्त्तमानाव
स्थांप्राप्नोति नसर्वदातथाधर्मांतरोदयकालेचमरणपातादिनातिरोभवति अतीतावस्थां ५२
प्राप्नोति सएवत्वावयवानांधर्मोवयवीत्युच्यतइत्यर्थः अतोनोक्तदोषावकाशः कार्यनि

त्यत्वेप्यभिव्यक्तस्यैवकार्यस्यस्वकार्यकारित्वादितिभावः स्यादेतत् अभिव्यक्तिरपिनित्यानित्या
वाआद्येसर्वदैवाभिव्यक्तिकार्यप्रसंगः अंत्येप्यवयवाद्यादेरेवानित्यत्वमभिव्यक्तिवदस्तुव्यर्थ
मभिव्यक्तिकल्पनमिति उच्यते अतीतानागतावस्थावत्वरूपमनित्यत्वंघटादावभिव्यक्तौचेष्य
तएवाद्यंतयोः कार्यस्यासत्तासत्त्वप्रतिषेधायध्वंसादिप्रतियोगित्वस्यैवप्रतिषेधात् अती
तानागतावस्थयोध्वंसप्रागभावस्थलाभिषेकमात्रएवास्माकंविशेषात् अभिव्यक्तिकल्पना
चनत्वर्थोघटोनागतोघटोतीतइतिव्यवहारवत् घटोवर्त्तमानइति व्यवहारस्यापिघटमा
त्रेणासंभवात् घटस्यावस्थात्रयसाधारण्येनातीतादिकालेपिवर्त्तमानत्वव्यवहारप्रसं
गात् नचैवमभिव्यक्तेरप्यवस्थात्रयकल्पनेनवस्थेतिवाच्यं बीजांकुरादिवत्प्रामाणिकत्वेना
दोषत्वस्यसांख्यसूत्रेणोक्तत्वात् किंचसनएवाभिव्यक्तिरित्येवसत्कार्यवादिनोनियमः अभि
व्यक्तेश्चाभिव्यक्त्यंतरास्वीकारेणानस्यासत्त्वायोत्पादेपिनक्षतिः कार्याणामनागतावस्थै
वाभिव्यक्तेरप्यनागतावस्थासैवचाभिव्यक्त्युत्पत्तौनियामिका अतः शशशृंगादिवैलक्षण्यंत
थाहियथायथैरुत्पत्तेरुत्पत्तिरभावेचाभावः स्वरूपमेवेष्यतेतथैवाभिव्यक्तेरभिव्यक्तिः स्वरूपमे
वेत्यस्माभिरभ्युपगंतव्यं घटादेरतीतानागतावस्थैवतदभिव्यक्तेरप्यतीतानागतावस्थेइति

अथैवमभिव्यक्तिरपि घटस्वरूपमेवास्त्विति चेन्न अतीताद्यवस्थघटेनाभिव्यक्तिव्यवहारप्र
संगस्योक्तत्वादिति दिक् यत्तु वैशेषिकाः प्रागभावमेव कार्योत्पत्तिनियामकं कल्पयंति तदसत्
आभावकल्पनापेक्षया भावकल्पने लाघवात् भावानां दृष्टत्वात् अस्मानपेक्षत्वाच्च अपि
च अभावेषु स्वतो विशेषे भावत्वापत्तिः प्रतियोगिरूपविशेषश्च प्रतियोग्यसत्ताकाले नास्ति
अतो भावस्याविशिष्टतया सर्वत्र सर्वोत्पत्तिप्रसंग एवेति अवयवेभ्यो विज्ञानाच्चातिरिक्त
तया हेतुभूतं ताभ्यां वैधर्म्यं ज्ञानमवयविनि दर्शयति योसाविति तद्विशेषणानि यथासं
भवमवयवज्ञानाभ्यां वैधर्म्याणि वैशेषिके स्मारणकशब्देनोच्यते यः परिमाणविशेषः स एवा
णीयानित्युक्तः कार्येषु परमसूक्ष्मत्वाभावादिति अवयवादिविलक्षणजलाहरणादिव्यव
हारकारितया व्यतिरिक्तोवयवीति प्रतिपादयति तेनावयविनेति अवयवातिरिक्तोवयवी ना
स्तीत्यवयववादावनिर्विकल्पकस्य तत्कारविषयपद्धतिवैनाशिकमतमपाकरोति यस्य पुन
रिति यस्य मते स प्रचयनिमित्तको विशेषोऽवयव्याख्योऽवस्तुकस्तुच्छः सूक्ष्मं चावयवरूपं का
रणं न प्रत्यक्षगोचरं तस्य मते चयस्याभावात् प्रायेण सर्वमेव मिथ्याज्ञानमित्यापन्नं यतोऽतद्रू ५३
पप्रतिष्ठमेव मिथ्याज्ञानमिति तदा च सर्वस्य मिथ्याज्ञानत्वे सम्यग्ज्ञानमपि किं स्यात् तस्या

देव विषयाभावेन क्वापि ज्ञानस्य सद्विषयकत्वासिद्धेरित्यर्थः तत्र हेतुर्यद्यदिति नत्ववयवज्ञान
स्यासम्यग्ज्ञानत्वं स्यादिति चेन्न सूक्ष्मं चेत्यादिना अवयवानामप्रत्यक्षत्वस्योक्तत्वात् अप्रत्य
क्षेष्ववयवेषु लिंगं चावयव्येव तस्याभावात् सर्वावयवज्ञानं प्रमाणाभावादेवासिद्धमित्याश
यः ज्ञानज्ञानस्य सम्यक्ज्ञानत्वं कदाचित्स्यादित्याशयात् प्रायेणेत्युक्तं वस्तुतस्तु अवयव्यभा
वे संघाताश्रितत्वेन परैरभ्युपगतस्य ज्ञानत्वस्यापि रूपादिवन्मिथ्यात्वे सर्वज्ञाने भ्रमोऽज्ञा
नत्वादित्यनुमानसंभवाच्चेति स्वसिद्धांतमुपसंहरति तस्मादिति सवितर्कायाः कदाचित्
विकल्पेनाप्युपपत्तिरित्याशयेन निर्वितर्काया इत्युक्तं तदेवं स्थूलविषये सूत्रद्वयेन समाप
त्तेर्द्विधा विभागं कृत्वा सूक्ष्मविषयेपि तस्या द्वैविध्यमतिदिशति एतयैव सविचारा निर्विचारा
सूक्ष्मविषया व्याख्याता एतया सवितर्कनिर्वितर्करूपया स्थूलविषयकसमापत्त्या सूक्ष्मवि
षयापि सविचारनिर्विचाराख्या समापत्तिद्वयी व्याख्याता अर्थोपरागानुपरागसाम्येनेत्यर्थः
वितर्कविचारेत्यादिसूत्रे यः सूक्ष्मविषयकाभोगो विचार इत्युक्तः स एवात्र सविचारनिर्विचार
समापत्तिरूपेण द्विधोच्यत इति स्मर्तव्यं कार्याद्युपरागानुपरागयुक्तां समापत्तिं द्विधा विभजते
तत्र भूतसूक्ष्मेष्विति अत्र भूतशब्द इंद्रियाणामप्युपलक्षकः सामान्यतरावस्थसूक्ष्मविषयत्वे

नास्याः समापत्तेर्मोक्षे व्याक्षेपत्वात् भूतेंद्रियाणां परसूक्ष्मं कारणं तन्मात्रादि प्रकृतिपर्यंतं सू
क्ष्मविषयत्वं चालिंगपर्यवसानमित्यागामिसूत्रात् तेषूपजन्यमानधर्मविशिष्टेषूत्पादेश
कालनिमित्तैर्विशिष्टतयाऽनुभूयमानेषु या समापत्तिः सा सविचारेत्युच्यत इत्यर्थः अत्र दे
श उपर्यधः पार्श्वादिः कालो वर्तमानादिः निमित्तं परिणामप्रयोजकः पुरुषार्थविशेष इति
पूर्ववदेवाशयवत् यथार्तिरिक्तः तन्मात्रादिरूपो विषयो समापत्तेर्विषय इत्याह तन्मात्रापीति उ
दितो वर्तमानः उपतिष्ठते ज्ञानारूढं भवतीति सविचारां व्याख्याय निर्विचारां व्याचष्टे यापुनरिति
यातु सर्वथा सर्वैः स्वरूपैः सर्वतः देशकालाद्यनवच्छेदतः समापत्तिः शान्तोदिताव्यपदेश्यध
र्मानवच्छिन्नेषु अतीतवर्तमानभविष्यद्धर्मैरनवच्छिन्नेषु भूतसूक्ष्मेषु उत्पद्यते सा निर्विचारा
अनवच्छिन्नशब्दस्यासंबद्धार्थत्वभ्रमनिरासाय विशेषणद्वयं सर्वधर्मेत्यादि सर्वधर्मान
गतेषु सर्वधर्माणामात्मकेषु चेत्यर्थः निर्वितर्कसाम्यमस्याः प्रतिपादयति एवं स्वरूपं हीति
पूर्वसूत्रानुसारेणोत्तरग्रन्थोऽयं उक्तस्य समापत्तिचतुष्टयस्य विषयविभागमाह तत्रेति महतस्थू
ले केवलविकृतिरिति यावत् तेनेंद्रियाणां घटपरमाणूनां च संग्रहः भूतपरमाणूनां च सूक्ष्म ५४
मध्ये प्रवेशो वक्तुं न शक्यते आगामिसूत्रे पार्थिवस्याणोर्गंधतन्मात्रे सूक्ष्म इत्यादिना तन्मात्रा

दीनामेव सूक्ष्मत्वस्य वक्ष्यमाणत्वात् सूक्ष्मत्वं च तत्वान्तरकारणत्वं तच्च जलादिभूतचतुष्ट
यावत्पर्यंतं हि रिंद्रियाणामगुणराहित्येन विशेषणीयं वस्तुतस्तु अत्र प्रकृतिसिद्धान्तान्मूतास
न्तरभूते घायाधारकारणास्येव न तु प्रकृतयः अतोऽत्र तत्वान्तरप्रकृतित्वमेव सूक्ष्मत्वमिति ननु
शब्दार्थज्ञानविकल्पसंकीर्णत्वासंकीर्णत्वमेव कथमेतयोर्वैषम्येन नातिदिश्यते तत्राह ए
वमुभयोरेतयैव निर्वितर्कया विकल्पहानिर्व्याख्यातेति एवं स्वरूपमिव विकल्पहानिरपि
यथोक्तविकल्पराहित्यमपि उभयोः सविचारनिर्विचारयोरेतयैव पूर्वोक्तया निर्वितर्कया यथ
योक्तविकल्पशून्यया सूत्रकारेण व्याख्यातप्रायमित्यर्थः पूर्वभूमिकायां त्यक्तविकल्पस्यो
त्तरभूमिकायामसंभवादिति सूक्ष्मविषयेत्युक्तं तत्र सूक्ष्मो विषयः किंपर्यन्त इत्याकांक्षा
यां निर्वितर्कया यथोक्तविकल्पशून्यया सूत्रमाह सूक्ष्मविषयत्वं चालिंगपर्यवसानं सूक्ष्म
श्चासौ विषयश्चेति सूक्ष्मविषयः आलिंगं प्रकृतिस्तत्पर्यन्ते वस्तु सूक्ष्मविषयतेत्यर्थः तत्रस्थू
लमारभ्य प्रकृतिपर्यन्तं स्थूलसूक्ष्मतारतम्यमाह पार्थिवस्येति स्थूलकार्याः पंचविधा अण
वस्तत्र पार्थिवाणवपेक्षया गंधतन्मात्रं समापत्तेः सूक्ष्मो विषयः यद्यपि पार्थिवाणुर्जल
विशिष्टगंधतन्मात्रारब्धः तथापि गंधतन्मात्रस्य प्राधान्यात्तदेव पार्थिवाणोः सूक्ष्ममुक्तं

एवमाप्यादीनां त्रयाणां पूर्वपूर्वभूतविशिष्टरसादितन्मात्रकार्यत्वेप्याकाशस्याहंकार
विशिष्टशब्दतन्मात्रकार्यत्वेपि च प्रधानादेकैकतन्मात्रमेव सूक्ष्ममित्युक्तमिति वेदितव्यं तेषा
महंकार इति तेषां च तन्मात्राणामहंकारः सूक्ष्मः कारणत्वात् अत्र च तन्मात्रैरिंद्रियाण्यप्यु
पलक्षणीयानि अस्यापीति अहंकारस्यापीत्यर्थः लिंगमात्रं महत्तत्त्वं तद्धि स्वकारणस्य प्र
कृतेरनुमापकमात्रं अंकुरवत् प्रकृतिगतविशेषाणां महदहंकारादिष्वेव प्रकटीभावात् यथाप्र
कांडादिषु अलिंगपर्यवसानत्वं अव्यक्तत्वेन वालिंगादिति बीजगतविशेषाभिव्यक्तिर्नांकुरमात्रे
णेति अलिंगं प्रधानं अकार्यत्वेन कस्याप्यननुमापकत्वादिति अलिंगपर्यवसानत्वं अव्यक्तत्वेन
वालिंगादिति चोदयति नन्विति ननु पुरुषः प्रकृत्यपेक्षयापि सूक्ष्मोस्ति निर्धर्मकत्वादिति पूर्व
पक्षं परिहरति सत्यमिति यथोपादानतयालिंगापेक्षितं सौक्ष्म्यं प्रधानस्यास्ति नैवं पुरुषस्य
तस्यापरिणामित्वात् उपादानतया च सूक्ष्मत्वमत्र विवक्षितमित्याशयः ननु यदि पुरुषः
कारणं न भवति तर्हि यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशं
ति तद्ब्रह्म तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी इत्यादि श्रुतिस्मृतिशतविरोध
इत्याशंकां परिहरति किंत्वलिंगस्येति हेतुत्वं भवति किंतु लिंगस्यान्वयिकारणमुपादानकारणं ५५

मुपादानकारणं पुरुषो न भवतीति सूत्रशेषेणान्वयः तत्र परमात्मनोधिष्ठातृत्वेन निमित्तकारणत्वं म
याध्यक्षेण प्रकृतिः सूयते सचराचरमिति गीतादिवचनात् प्रधानपुंसोरजयोर्यतः क्षोभः प्रवर्तते
नित्ययोर्व्यापिनोः श्रीवत्सजगदादौ महात्मनोः तत्क्षोभकत्वात् ब्रह्मरूपस्य बीजहेतुर्विरंजनः अहेतुरपि सर्वा
त्माज्ञायते परमेश्वरः इत्यादिसकलश्रुतिपुराणादिप्रतिपाद्यं यत्तु ईश्वरस्याधिष्ठानत्वरूपमुपादानत्वं
यतो वा इमानि भूतानि जायंते इत्यादिप्रयुक्तश्रुतिस्मृतियोग्यमाकाशस्येवाद्युपादानत्ववत् तद्
प्यत्र दर्शने निमित्तकारणतामध्य एव प्रवेश्यते पुरुषाणां विकारित्वमनभिमतत्वापेति पुरुषार्थे
प्रकृतेः प्रवृत्त्यभ्युपगमेन च जीवपुरुषाणामपि महदाद्यखिलसृष्टिहेतुत्वं संयोगमात्रेणानो
पादानत्वेन यावोक्तं वृष्ण्यादयो विशेषास्तात्रात्मकादौ ईश्वरे रूपाः पुरुषाधिष्ठितादेव वर्तते रे मुनि
पुंगवाः सत्त्वं रजस्तम इति प्रकृतेरभवन् गुणाः यथा प्रक्षोभ्यमाणाः पुरुषानुमतेन चेत्यादिस्मृ
तिभिः जीवानामधिष्ठानसंयोगमात्रेणानुमतिरूपः पूर्वकल्पीयकर्मादिरूपेत्ति दिक् तदेवं
व्याख्यातं ग्रहणसमापत्त्योः स्थूलसूक्ष्मविषयभेदेन विशिष्टाविशिष्टरूपतत्त्वतोर्विभाग उक्तः
ग्रहीतृसमापत्तौ च यः सविकल्परूपो विशेषः स एतावान्निर्वक्तव्यः तदंतर्भूतः चेतनोपरागोलोचा
चेतनेषु योगस्यानवस्थापितत्वात् अतो ग्रहीतृसमापत्तौ सविकल्पाविकल्पादिविभागो नोक्तः

वितर्केत्यादिसूत्रेण पूर्वसंप्रज्ञातस्यावांतरविभाग एवोक्तः इदानीं प्रयोक्तसमापत्त्याख्यका
र्यमुखेनोक्तः समाधिः ता एव ग्रहीतृग्रहणग्राह्येषु समापत्तय एव सबीजः समाधिः संप्रज्ञातयो
ग इत्यर्थः समापत्तिरूपसाक्षात्कारहेतुत्वाद्योगस्य समापत्तित्वमुक्तं योगस्य ततो वांतरविशेषा
भावादिति ननु ग्रहीतृग्रहणग्राह्यसमापत्तिर्वितर्कविचारास्मितानंदगतात्वात्स्वरूपः संप्रज्ञाता एव सं
गृह्यते न पुनरानंदानुगत इति कथं ता एवेत्यवधारणमिति चेन्नास्मानंदस्य बुद्धिधर्मत्वेन
ग्राह्यमध्ये प्रवेशात् ननु दुःखबीजसंस्कारहेतुतया समापत्तय एव सबीजाः ननु वृत्तिनिरोधा
त्मको योग इति कथमुच्यते ता एव सबीजयोग इति तत्राह भाष्यकारः तास्वेतास्त इति बहिर्वस्तु
ष्य नात्मधर्माः संस्कारधर्मादयो दुःखबीजानि ज्ञापयं तत्राभ्य इति बहिर्वस्तुबीजाः संप्रज्ञातानि
रोधात्मकापि संस्कारहेतुत्वात् धर्ममेघताच्च तथा च वितर्कादिसूत्रोक्तरीत्या चतस्रः प्रकृते न त्रि
धा विभक्ता ग्राह्यग्रहीत्रादिविषयिकाः समापत्तयो बहिर्वस्तुबीजा इत्यतस्ताभिः संबंधात्समाधेः
संप्रज्ञाताख्यो वृत्तिनिरोधोपि सबीज उच्यत इत्यर्थः ननु स्थूलसूक्ष्मसमापत्तेरेव चतुर्विधत्वा
दानंदास्मितासमापत्त्योः सद्भावात् समापत्तयो भवंतीति तत्कथमुच्यते चतस्र इत्याशंक्यात्रपाक
रेति तत्र स्थूल इति तत्र च तस्रुषु समापत्तिषु मध्ये स्थूले येरा का एव समाधिरवांतरभेदैर्नैव स ५६

वितर्कनिर्वितर्करूपतो वितर्कानुगतादिरूपैः पूर्वसंप्रज्ञातो द्विधा तथा सूक्ष्मे ग्राह्येपि एक एव समा
धिरवांतरभेदैर्नैव सविचारनिर्विचाररूपतो द्विधा प्रोक्त इत्यतो वितर्कानुगतादिरूपे पूर्वसंप्रज्ञा
तयोगश्चतुर्धा उपसंख्यातः परिगणित इत्यर्थः केचित्तु सूत्रस्य एवकारो भिन्नक्रमः तथा च ताः स
वितर्कनिर्वितर्कसविचारनिर्विचाररूपाः चतस्रः समापत्तयः सबीजसमाधिरेवेति सूत्रार्थः ते
न ग्रहीत्रादिसमापत्तेरपि सबीजत्वं भाष्ये प्रागुक्तं विरुध्यत इत्याहुः तन्न ग्रहीत्रादिसमापत्तेः स
बीजत्वानुक्त्या सूत्रकारस्य न्यूनतापत्तेः एवकारवैयर्थ्याच्च यथाक्रमस्यैव एवकारस्योपपत्तौ
भिन्नक्रमत्वानौचित्याच्चेति यद्वा न्यत्रैरुक्तं ग्राह्यविषये स्थूलसूक्ष्मभेदेन सवितर्कादिरूपाश्च
तस्रः समापत्तयः ग्रहणाख्ये चेंद्रियेषु सानंदनिरानंदरूपे द्वे समापत्ती ग्रहीतृषु च सास्मित
निरस्मितरूपे द्वे समापत्ती इत्यष्टौ समापत्तयो बोध्याः युक्तिसाम्यादिति तदपि हेयं
प्रमाणादर्शनात् आनंदानुगतास्मितानुगतयोर्निरानंदनिरस्मितत्वरूपविशेषासंभवा
च्च आनंदो हि ह्लादमात्रः अस्मिता च चैतन्यमात्रसंविदिति भाष्यकृता प्रोक्तं न तु द्विधं ह्लाद
शब्देन व्याख्येयलक्षणाप्रसंगात् नापि अहंकारपरत्वं चैतन्ये अस्मिताशब्देन व्याख्येयं ल
क्षणापत्तेः अतः कथं ह्लादवतः संप्रज्ञातस्य ह्लादशून्यत्वं कथं वा चिन्मात्रसंविद्युक्तस्य

संप्रज्ञातस्य तत्सूक्ष्मत्वमिति दिक् तस्मादवांतरभेदेन पंचैव समापत्तयः ग्राह्यग्रहणयोः स्थू
लसूक्ष्मभेदेन सवितर्काद्याश्चतस्रः पंचमी च ग्रहीतृविषयेति संप्रज्ञातयोगस्यानंदानुगतस्मा
दाद्यावांतरभेदेन षोढैवेति ॥ उक्तासु समापत्तिषु निर्विचारायां विशेषं कंचिदाह निर्विचारवैशा
रद्येऽध्यात्मप्रसादः ॥ सामान्यतो वैशारद्यमादौ व्याचष्टे अशुद्ध्येति रजस्तमोबुद्धिकारणं पा
पादिरशुद्धिः सैवावरणलक्षणो मलः तस्मादपेतस्येति हेतुगर्भं विशेषणं प्रकाशात्मनः प्र
काशस्वभावस्य बुद्धिरूपसत्त्वस्य कारणपापादेः रजस्तमोभ्यामनभिभूतः अत एव स्वच्छः
स्थेयगताशेषविशेषप्रतिबोधसमर्थो स्थितिप्रवाह एकाग्रताधारा चित्तस्य वैशारद्यमि
त्यर्थः समग्रं सूत्रार्थं व्याचष्टे यदेति अध्यात्मनि बुद्धौ वर्तत इत्यध्यात्मं तादृशः प्रसादः शार
घेविवलोनि भूतार्थैतिपथार्थविषयकः क्रमाननुरोधी युगपत्सर्वार्थग्राही स्फुटः प्रत्यक्ष
स्य प्रज्ञाख्य आलोक इत्यर्थः अत्रैव परमर्षिगाथामुदाहरति तथा चेति न रतिशोकमात्मवि
दिति भक्तेरशोच्यः अहं दुःखी पापीत्यादिरूपैः स्वस्याशोच्यः सन्सर्वान्वैव जनान्शोचते दुःखि
तान्पश्यति स्वयं शोकमोहि पुरुषः स्वापेक्षयाऽकं चित्सुखिनमिव कदाचित् पश्यति मोचात्सं ५७
शोच्यः सत्परमार्थतो दुःखसमुद्रमग्नं सर्वं जीवजातं दुःखितमेव पश्यति अस्मत्वादित्यर्थः अ

श्लोकानंतरमिति शब्दः पादपूरणाय तथा च निर्विचारवैशारद्ये जाते स्वयमेव प्रकृतिपुरुष
विवेको वा परमेश्वरतत्त्वं वा साक्षात्क्रियते न तु तत्साक्षात्कारः पुनर्योगापेक्षेति विचा
रणाय उत्कर्षः पूर्वसूत्रोक्तसबीजसमाधौ जायमानायाः समापत्त्याख्यायाः प्रज्ञायाः अन्वर्थ
तोन्निकीं संज्ञामपि दर्शयति ऋतंभरेति तत्र प्रज्ञा तस्मिन्निति तत्र तस्य विवरणं तस्मिन्समा
हितचित्तस्येति पूर्वोक्ते सबीजयोग इत्यर्थः न चास्य वहितसूत्रोक्तवैशारद्यप्रसादे वा कथं त
त्तेत्यनेन पराम्रष्टत इति वाच्यं द्वितीयसूत्रतो न समाधिप्रज्ञासामान्यपरत्वस्य लक्ष्यमा
णत्वात्तन्नगतस्यात् ननु संज्ञाकथनमात्रेण किं प्रयोजनमित्याशंक्याह अन्वर्थेति विपर्या
सरूपं ह्यन्यं विपर्यासज्ञानं यद्यपि सवितर्कयोगजप्रयोजनमित्याशंक्याह अन्वर्थेति वि
पर्यासरूपं ज्ञानं विपर्यासज्ञानं यद्यपि सविकल्पप्रज्ञायां शब्दार्थज्ञानविकल्पोऽस्ति तथापि ऋ
तंभरज्ञातीयत्वस्य वक्त्र विवक्षितत्वान्न तस्यामव्याप्तिः साक्षात्पंचसमाधिजप्रज्ञात्वेन अ
यवान्तरसमाहितचित्ते जायमानायाः प्रज्ञायाः सैव ऋतंभरेत्यन्वर्थ इति सूत्रार्थः लौकिकज्ञानेऽ
विद्यालेशसंपर्काद्रूपं भावादिति योगकाले प्रकृष्टा प्रज्ञा भवतीत्यत्र श्रुतिं प्रमाणयति तथा
चेति ध्यानस्य चित्तनस्य योभ्यासः पौनःपुन्यं तत्र योरसस्तादरस्तेन तथा चश्रवणमननतिदि

ध्यासनैर्मल्यहेतुभिः सबीजयोगकाले प्रवृत्तां प्रकृष्यमाणप्रकर्षेण विपर्यासरहितेनोपार
पन्नतत्प्रज्ञातः परवैराग्यद्वारा एव स्वमाणमुत्तमयोगं निर्बीजं लभत इति श्लोकार्थः ननु आगमा
नुमानानुमानयोरपि प्रमाणत्वात्ताभ्यामेव तत्त्वदर्शनत्वं गच्छतां किं योगेनेत्याशंकामिरस्यायोत्तर
सूत्रं प्रवर्त्तते न योजयति सा पुनरिति श्रुतानुमानाभ्यामन्यविषया विशेषार्थत्वात् सा तु समा
धिसामान्येनाप्रज्ञा श्रुतानुमानरूपप्रज्ञाभ्यां श्रवणमननाभ्यामन्यविषया अतिरिक्तवि
षया विशेषार्थत्वात् विशेषो ऽर्थो विषयो यस्याः सा तत्त्वात् तत्त्वादित्यर्थः समाधिप्रज्ञायाः श्रव
णमननाभ्यामतिरिक्तविषयत्वं विवृणोति श्रुतमागमेति नहि विशेषेणेति पदार्थतावच्छेद
करूपेणैव पदार्थः शाब्दबोधे भासते ऽन्यथातिप्रसंगात् पदार्थतावच्छेदकत्व घटत्वादि सा
मान्यमेव नतु तद्विशेषाः तेषामानंत्येन सर्वेषामेकदा नपस्थितेः तत्तत्स्वरूपैः शक्तिग्रहासं
भवात् समेत् विशेषाणामन्योन्यं व्यभिचाराद्वा सामान्यतः श्रुतेऽप्यर्थे विशेषसंशयदर्शनाच्चे
ति इत्युक्तमिति अनुमानमित्यस्य विशेषणं अत्रहि व्यापकतावच्छेदकेन गतित्वादिसामान्ये
नैवानुमानं भवतिः नतु क्रियादिगतविशेषरूपैरिति अनुमानेनचेति सामान्योपसंहार इ ५८
त्युक्तइत्यनुषंगः ननु श्रुतानुमानागोचरोऽपि विशेषो लौकिकप्रत्यक्षेण गम्यतां योस्तु किंयोगज

प्रत्यक्षेणेति तत्राह न चास्येति नन्वेवं तस्य विशेषस्याप्रामाणिकतयाऽभाव एवास्त्वित्याशं
कां प्रतिषेधति न चास्य विशेषस्येति नहि निर्विशेषं सामान्यमस्तीति न्यायेन सर्वस्यैव व
स्तुनि विशेषसिद्धेरिति भावः अतः परिशेषात् समाधिप्रज्ञाग्राह्य एवासौ विशेष इत्युपसंहर
ति इति समाधीति स्थूलस्य विशेषः कदाचिल्लौकिकप्रत्यक्षगोचरोऽपि स्यादिति स्थूलेऽपि
त्यन्तमतस्सूक्ष्मगत इत्येवोक्तं पुरुषगतो वेति एतेन पुरुषेऽप्यपि विशेषादिधर्माः स्वीकृताः
धर्मनिषेधस्तु विशेषगुणाद्यभावादिपरः अथवा स्वस्वोपाधिप्रतिबिंबा एवातीतानागत
वर्त्तमानाः सत्त्वसंतानसाधारणाखिलपुरुषेष्वन्योन्यं विशेषा इति बोध्यं स्यादेतत् व्यवहिता
दिषु सन्निकर्षाद्यभावात्कथं समाधिप्रत्यक्षग्राह्यत्वमपि स्यात् अपयोगजधर्मस्यापि
सन्निकर्षत्वं कल्प्यमिति चेन्न संयोगादिभिरननुगमात् प्रत्यक्षे विषयस्य कारणत्वेनातीता
दिप्रत्यक्षस्यैवमप्यलं भवाच्चेति अत्रोच्यते अस्माकमंतःकरणस्य विभुत्वेनातीतादौ
तो स्वरूपतः सत्त्वेन च सदा संयोगसन्निकर्षात् योगजधर्मेण च व्यवहितातीतादितानप्र
तिबंधकत्वमेव निरस्यत इति तदेतत्सांख्यभाष्ये लीनवस्तु लब्धातिशयसंबंधाद्दान
दोष इति सूत्रे ऽस्माभिः प्रपंचितं उपसंहारमुखेन सूत्रवाक्यार्थमाह तस्मात् श्रुतेति एते

नद्दशामहत्त्वमस्तीतिवत् शब्दादेवसाक्षात्कारात्मकोभवतिनिर्विशेषत्वेनचात्मतोनवि
शेषस्तद्दार्थेमपियोगजप्रत्यक्षापेक्षेतिनवीनवेदांतिप्रलापोपास्तिद्धोंतरावस्वंशास्त्रात्
क्तेर्थेसमानतंत्रसिद्धांतस्यैवसिद्धांतत्वादिति यथोक्तप्रज्ञायाःसंस्कारजनकत्वंउत्तरसूत्रो
पयोगितया प्रतिपादयति समाधीतिननुतथापिप्रज्ञोत्पत्तिपर्यंतंयोगापेक्षास्तुप्रज्ञोत्प
त्त्यनंतरंतुपुनःसंप्रज्ञातपरंपरायाःकिंफलमित्याशंकायामाह तज्जःसंस्कारोऽन्यसंस्कारप्र
तिबंधःप्रतिबंधःकार्यविरोधित्वंइदमेववाधशब्देनभाष्यकारोवक्ष्यति सर्वेषांचसं
स्काराणांचित्तनाशादेवनाशइत्यपिमभाष्येस्फुटीभविष्यति सूत्रार्थमाचष्टेबाधनइ
त्येतेनत्वाशेनइत्याशयःसंस्कारस्यासानाशपक्षेतिविग्रहात्संस्कारारापमनवुद्धसंस्का
रमित्यर्थःउद्बुद्धसंस्कारस्यबवाधोनसंभवति उद्बोधप्रतिबंधस्यैववाधशब्दार्थत्वा
दितिभावःननुवृत्तिनिरोधसंस्कारस्यव्युत्थानसंस्काराभिभावकत्वंवक्ष्यतितत् किम
र्थंसमाधिप्रज्ञासंस्कारस्यापिव्युत्थानसंस्काराभिभावकत्वमिष्यतइतिचेन्नवृत्तिवावच्छि
न्नाभाववस्यैववक्ष्यमाणयुक्त्यासंस्कारजनकत्वसिद्धेः ननुसंप्रज्ञातकालीनस्यवृत्तिविदुः ५९
वृत्तिनिरोधस्यापि स्मृतिहेतुतयासिद्धात्प्रज्ञासंस्कारादेवव्युत्थानसंस्काराभिभवस्यवक्ष्य

माणप्रयोजनस्योपपत्तेः ननुएकरूपैवप्रज्ञाव्युत्थानसंतानस्यतयावोत्पादितेनसंस्कारेण
व्युत्थानसंस्कारबाधसंभवेकिमर्थंपुनःपुनःसंप्रज्ञातानुष्ठानंतत्राह व्युत्थानसंस्कारा
भिभवादिस्यादितनव्यसंस्कारबाधःश्रुतिस्मृतिसिद्धस्यपुनःपुनर्व्युत्थानस्यानुपप
त्तेःउपपदेशाद्यनुपपत्तेश्चकिंतुसंप्रज्ञातपरंपराजन्येनदृढतरतसंस्कारेणैवतत्बाधः
त्सदृढेभ्यनाद्यमिद्धैः संप्रज्ञातसंस्कारैस्तस्यबाधार्थंतन्नुतापरंपरैवक्रियतेतथाचसं
स्कारदार्ढ्यार्थंप्रज्ञासंस्कारचक्रमपेक्ष्यतइति एतेनप्रज्ञायाःसाक्षादेवव्युत्थानसंस्कार
बाधकत्वंकाय्ययाप्रज्ञाःएकप्रज्ञयैवसंस्कारबाधेव्युत्थानाद्यसंभवात् प्रज्ञासंस्कारे
णदृढतरस्वरूपवैज्ञात्यसंभवेनतस्यैवव्युत्थानसंस्कारबाधकतावच्छेदकत्वकल्पनया
व्युत्थानाद्युपपत्तिरिति व्युत्थानसंस्कारेषुमध्येयाविद्यासंस्कारस्यायंविशेषः यत्सम्प्रज्ञ
यात्मनितेनैवसंस्कारेणाविद्यासंस्कारोबाध्यते नतत्रप्रज्ञासंस्कारचक्रापेक्षेति एतच्चोक्ते
प्रतिप्रसवहेयाःसूक्ष्माइत्यागामिसूत्रद्वयेप्रकटीभविष्यतिइदमत्रावधेयंत्मास्मिन्सूत्रे
शेषस्त्वेचाखिलसंस्कारदाहस्ययोगफलत्ववचनात् प्रारब्धकर्मणोप्यतिक्रमेणाश्रुत
रमोक्षःकेवलज्ञानासाध्योयोगयोरस्यरक्षणफलमिति नहिभोगसंस्कारस्यनिःशेषतो

दाहेप्यारब्धकर्मापि फलापालेऽदृष्टकारणाभावात् योगाग्निदग्धकर्मेव योविरागत् इत्यादि
वाक्ये संकोचकप्रमाणाभावाच्च ज्ञानाग्निः सर्वकर्माणीत्यादिषु त्वगत्या संकोचः क्रियते
तस्य तावदेव चिरं इति ज्ञानिनि विषयकत्वेः उपदेशावैयर्थ्यानुपपत्तेश्च सांख्यवेदांतसूत्र
योश्च ज्ञानिनामेव प्रारब्धभोगावश्यकत्वोक्तान्यर्द्धभुक्तप्रारब्धकर्मणां नाशे तत्फलस्य
कालप्रतिनियमानुपपत्तिरिति चेत् न शास्त्रोक्तनाशकानाश्यकर्मस्वेव कालप्रतिनिय
मात् अन्यथा कर्मविपाकोक्तप्रायश्चित्तस्य शांतिकर्मादेश्चार्द्धभुक्तपापनाशकत्वानु
पपत्तिः शास्त्रोक्तनाशकनाश्यकर्मणां तु स्वावधिपर्यंतमेव फलदातृत्वमिति दिक् न
न्वेवं प्रज्ञासंस्काराणि शायस्वीकारेन तेनापि पुनर्जन्म भविष्यति न वासंप्रज्ञातयोगेन तस्य ना
शो भवितेति वाच्यं असंप्रज्ञाताभावेपि प्रारब्धसमाप्त्यनंतरं केवलज्ञानतो मोक्षाभ्युपग
मात् इत्याशंकते कथमसौ विति साधिकारं स्वकार्यजननक्षमं परिहरति नन्विति तेप्र
ज्ञासंस्कारा क्लिष्टं स्वकार्यक्षं मनन कुर्वंति जन्मकारणस्याविद्यादिक्लेशस्य विनाशनादित्यर्थः
कर्मनाशनादित्यपि बोध्यं वर्तमानसमापनादपि साधिकारं न कुर्वंतीत्याह चित्तं हीति स्वका ६०
योदवसादयंतिकर्त्तव्यश्रस्यं कुर्वंति तत्र हेतुः ख्यातीत्यादि हि यस्माच्चित्तस्य व्यापारो विवेक

ख्यातिपर्यंतः विवेकख्यातिनिशामत्स्यं द्यपरवैराग्यजननद्वारेण समाप्यत इत्यर्थः क्षीणवृत्तेरित्या
दिसूत्रैः संप्रज्ञातस्य फलादिकमुक्तं इदानीमसंप्रज्ञातस्य फलादेः सूत्रं प्रवर्तिष्यते तत्सूत्रे प्र
ज्ञासंस्कारस्यान्यद्युपलक्षे सर्ववृत्तितत्संस्कारयोर्निरोधो भवतीति न पुनर्जन्मसंभावनेत्यर्थः
तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः पूर्वपूर्वेसंप्रज्ञातेनावन्मज्ञेव निरुध्यते प्र
ज्ञासंस्कारस्य तनानवमात्रं भवति एवं क्रमेण तु तस्यापि प्रज्ञाकृतसंस्कारस्याप्यसंप्रज्ञातपरं
परया निरोधे तत्ताभिभवे ज्ञापमाने चरमासंप्रज्ञातेनानि बीजयोगस्य पराकाष्ठा भवत्यपुन
ख्येयानेत्यर्थः सर्वनिरोधादितिसूत्रावयवेन निर्बीजत्वे हेतुरुक्तः यतः प्रज्ञातत्संस्काराश्चास
वीप्यतं तं विलाप्य तनोऽतो निर्बीजः दुःखबीजैः संस्कारादिभिः शून्य इत्यर्थः पूर्वपूर्वासंप्रा
ज्ञातव्यक्तिषु च क्रमेण बीजभागेन नाक्रोशानिर्बीजत्वमसंप्रज्ञातलक्षणोपपूर्वभाष्यकृतोक्त
मिति स्मर्तव्यं तथा चरमासंप्रज्ञातेन सर्वप्रज्ञासंस्काराः क्षीयंते इत्यतो न ते चित्तं साधिका
रं कुर्वंतीति भावः एतेनासंप्रज्ञातपरंपरायाः प्रज्ञासंस्कारांतलयः फलं तत्रैवोक्तं स
त्रस्य स्यापि शब्दस्यार्थे भाष्यकारो व्याचष्टे सनकेवलमिति ससामान्यं निर्बीजयोगः न केव
लसमाधिप्रज्ञायानिरोधी भावाभावरूपेणान्यापि तत्क्रमेण प्रज्ञाकृतसंस्काराणामपि प्राति

बंधीऽस्मतं तमभिभावक इत्यर्थः ननु यदि प्रज्ञाकृतसंस्काराणामप्यसंप्रज्ञातो बाधकः तर्हि
सकृदसंप्रज्ञातादेव सर्वसंस्कारबाधे व्युत्थानं कदापि कस्यापि न स्यादित्याशयेनाक्षिपति
कस्मादिति परिहरति निरोधइति न निरोधः साक्षादेव प्रज्ञासंस्कारान् विलापयति किंतु नि
रोधपरंपराजन्यो दृढतरः संस्कार एव प्रज्ञासंस्कारानस्यंते विलापयतीत्यर्थः दृढतरत्वं च ज्ञा
तिविशेष इत्युक्तं न च ज्ञानस्यैव संस्कारजनकत्वं दृष्टं निरोधस्तु न ज्ञानं संस्कारशेषचित्ताव
स्थाविशेषमात्रत्वात् तस्मात्तस्य संस्कारजनकत्वे किं प्रमाणमित्याशंकायामाह निरोधस्थितीति नि
रोधस्थितावसंप्रज्ञातावस्थाने यो मुहूर्ताहोरात्रमासादिरूपः कालक्रमः क्रमेण कालवृद्धिस्त
द्दर्शनेन निरोधावस्थचित्तजन्यः संस्कारोनुमेयः संस्कारवृद्धिं व्यतिरेकेण तन्नियामकासंभ
वादित्यर्थः संप्रज्ञातस्य तु क्रमेण कालवृद्धिः प्रज्ञासंस्कारतारतम्येनैवोपपद्यते इत्यतो नसं
प्रज्ञातस्य संस्कारहेतुतेति ननु प्रज्ञासंस्काराणाम्परमासंप्रज्ञातेनास्तु बाधस्तां निरोधसंस्का
राणां तु कुतः समुच्छेदस्तेन तदनुच्छेदे चसाधिकारत्वमेव चित्तस्येति मोक्षानुपपत्तिः किंच प्रली
नानामपि संस्काराणां कदाचिद्योगीश्वरसंकल्पादिना दग्धबीजस्येव पुनरुद्बोधोपि संभा
व्यते इत्याशंकामपाकरोति व्युत्थाननिरोधेति असंप्रज्ञातापेक्षया समाधिप्रज्ञापि व्युत्थानं तत्र ६१

तो व्युत्थानज्ञानसामान्ये विरोधिसमाधिश्चासंप्रज्ञातः तदुभयप्रभवैः सहसहितैः कैवल्य
भागीयैः कैवल्यहेतुकर्मसंस्कारैर्विशिष्टं चित्तं स्वकीयप्रकृतौ नित्यायां स्वयमेव प्रलीयते दग्
धेंधनानलवदात्यंतिकलयं गच्छति परिणामस्वाभाव्यात् तत्स्वामिपुरुषस्य भोगहेतुवि
सदृशपरिणाम एव हि पुनर्न भवति तद्धेतोः पुरुषार्थस्याभावादित्यर्थः अथवा कैवल्यभा
गीयैः कैवल्यपर्यंतस्थायिभिर्व्युत्थानादिसंस्कारैः सहेति चित्तविशेषणं अनेन सूत्रेण
पूर्वोक्तशंकानिराकरणमप्युपपादयति तस्मादिति तस्मान्निरोधसंस्कारस्यापि क्षयात्तेनि
रोधसंस्कारा इत्यादिरर्थः ननु भवत्वयोगद्वयाच्चित्तस्यात्यंतिकोलयः तथापि पुरुषार्थः
कः सिद्ध्यतीत्याकांक्षायामाह यस्मादित्यादि यस्माच्चित्तं निवर्त्ततेऽत्र तस्मिन्निवृत्ते सति
पुरुषो मुक्त इत्युच्यते तत्र हेतुगर्भं विशेषणं स्वरूपेत्यादि स्वरूपमात्रमप्रतिष्ठः पर
रूपैः प्रतिबिंबितदुःखादिभिर्मुक्तः शुद्धः स्वत्वसंबंधेन पुण्यपापयुक्तः भोगसाधनत्वस्यैव
स्वत्वतया कूटस्थस्यापि संसारदशायां स्वत्वाद्युपपपात् एतादृशमुक्तेः साध्यत्वमुपपन्नं
केवल उपाधिसंयोगाख्यबंधमुक्त इत्यर्थः एवंरूपो मोक्ष एव योगस्य मुख्यं फलमित्याश
यः पारमार्थिको दुःखभोगादिसंबंधो हेयाख्यसंयोगरूपसंबंधो वा लोके बंध इत्युच्यते तन्मु

त्रिष्ववद्धेरेव न कूटस्थस्यासंगस्य पुरुषस्येति प्रतिपादयितुं मुक्त इत्युच्यत इत्यन्तेन शास्त्रेषु मु
क्त इति व्यवहारमात्रं क्रियत इति तस्यार्थः तदुक्तं सांख्यसूत्रेण वाङ्मात्रं न तु तत्त्वं चित्त
स्थितेरिति पुरुषे बंधादिकं वाङ्मात्रं चित्तगतबंधाद्यवस्थानादित्यर्थः पुरुषार्थत्वं च पार
मार्थिकमेव बद्धः खं मा भुंजीयामिति प्रार्थनादिति भावः सांख्यप्रवचन इति सांख्यशास्त्रस्ये
व प्रकर्षेणाव चनं सांख्यप्रवचनं सांख्ये ह्यभ्युपगमवादेनेश्वरं प्रतिषिध्यासंप्रज्ञातयो
गनैरपेक्ष्येणाचज्ञीवतत्त्वज्ञानादेव मोक्ष उक्तः अस्मिंस्तु शास्त्रे निरुपद्रवासंदिग्धैहिक
मुक्तिनियमाय परमेश्वरविषयान्नात्ममोक्ष उक्तः अस्मिंस्तु शास्त्रे निरुपद्रवासंदिग्धैहिक
मुहेतुरसंप्रज्ञातयोगश्च प्रदर्शित इति भावः इति श्रीपातंजलभाष्यवार्त्तिके श्रीविज्ञानभि
क्षुनिर्मिते प्रथमः समाधिपादः श्रीगणेशाय नमः भैरवो जयति अथ द्वितीयः पादः ननु
प्रथमपादेनैव योगः सोपायः सफलस्सावांतरभेदैः सह प्रोक्तः तत्किमपरमवशिष्यते य
दर्थं द्वितीयपाद आरभ्यत इत्याकांक्षायामाह उद्दिष्ट इति समाहितचित्तस्य योगारूढचि
त्तस्योत्तमाधिकारिणोऽभ्यासवैराग्यमात्रसाधनेनैव क्रियायोगादिसकलांगानां नैरपेक्ष्ये ६२
ण प्रथमपादे योगः प्रदर्शितः तेषां बहिरंगत्वं वक्ष्यति त्रयमंतरंगं पूर्वेभ्य इति सूत्रेण तदभा

वेऽपि भावादिति तस्माद्राष्ट्रेणैव तथा चोक्तम् आश्वमेधिके अपेतव्रतकर्मा तु केवलं ब्रह्मणि स्थि
तः ब्रह्मभूतश्चरंल्लोके ब्रह्मचारीति कथ्यत इति तथा गारुडेऽपि आसनस्थानविधयो न यो
गस्य प्रसाधकाः शिशुपालः सिद्धिमाप स्मरणाभ्यासगौरवादिति ते चाभ्यासवैराग्ये न सर्वे
षां द्रागित्येव भवतः अतोऽसुस्थितचित्तो बहिर्मुखोऽपि योगारुरुक्षुः क्रमारकेनोपायेन योग
युक्तः स्यादिति तमुपायं वक्तुमेतच्छास्त्रमारभ्यत इत्यर्थः तदेवमधिकारभेदेन साधनभे
देन साधनभेदो गारुडादिष्वप्युक्तः ॥ आरुरुक्षुपतीनां च कर्म ज्ञाने उदाहृते आरूढयोग
वृक्षाणां ज्ञानयोगौ परौ मताविति त्यागो वा स्वकर्मणां गीतायामपि आरुरुक्षोर्मुनेर्योगं
कर्म कारणमुच्यते योगारूढस्य तस्यैव शमः कारणमुच्यत इति कारणं योगस्य तपः स्वाध्या
येश्वरप्रणिधानानि क्रियायोगः योगोपायत्वाद्योगः क्रिया चासौ योगश्चेति विग्रहः तप
आदीनि त्रीणि क्रियायोग इत्यर्थः ईश्वरप्रणिधानरूपो भक्तियोगोऽप्यत्र क्रियायोगमध्य
एव प्रवेशितः यतो योगास्त्रयो मया प्रोक्ता भक्तिज्ञानक्रियात्मका इत्यादिस्मृतिषु परा
वयोगोपायत्वाद्योगा उक्ताः तत्र ज्ञानयोगो धारणाध्यानसमाधिरूपः पूर्वपादे प्रोक्तः
विस्तरस्तस्यातिभविष्यतीति यद्यपि प्रमादयोऽपि क्रियायोगास्तथापि वक्ष्यमाणेषु यम

नियमादिषुमध्येतपःस्वाध्यायेप्रदर्श्यतत्परोपयद्विविधंकेवलेनैतेनापितौवर्त्तेरणयोगो
भवतीतिसूचयितुमितिबोध्यं नमस्वाध्यायपरेश्वरप्रणिधानेचतत्त्वज्ञानेश्वरानुग्रहाभ्यां
द्वाराभ्यांयोगोपकारकंस्यात् तयस्तदेहेंद्रियशोधनाभ्यांकेनद्वारेणयोगस्योपकारकंभ
वतुप्रसन्नचित्तस्योभक्तत्वेनयोगविरोधमेवेत्याशंक्यतपसोद्वारमाह तातपस्विनइतिअसि
द्धौहेतुमाहअनादीतिअनादिक्लेशकर्मवासनयाहेतुभाविवानानाविधाअशुद्धिःपापा
ख्याप्रत्युपस्थापितविषयजालतयायोगविरोधिनीतपसोविनानसंभेदंनतुतामापद्यत
इत्यर्थः इतीति इत्यतःसाधनमध्येतपसोग्रहणमित्यर्थः योगविरोधाशंकामपाकरो
तिनचेति तच्चतपतपश्चित्तप्रसादाविरोधिमद्देवानेनयोगिनाकर्त्तव्यमितिपरमर्षिभिर्म
न्यतइत्यर्थः पवित्राणांपापक्षयहेतूनांप्रथमपादोक्तप्रणिधानादतिरिक्तमत्रप्रणि
धानमाहसर्वक्रियाणामितिलौकिकवैदिकसाधारणेनसर्वकर्मणांपरमेश्वरेतर्पणमि
णिअर्पणमित्यर्थः तदुक्तंगीतायां यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्य
सिकौंतेयतत्कुरुष्वमदर्पणमितितत्र्यर्पणंचकामतोकामतोवापियत्करोमिशुभाशु ६३
भंतत्सर्वंत्वयिसन्यस्तंत्वत्प्रयुक्तःकरोम्यहमित्यादिस्मृतिभिर्व्याख्यातमिति तत्प्रयुक्तःकरो

म्यहमितिचिंतनमेवसन्न्यासइत्यर्थः अत्रप्रयोक्तृत्वमंतर्यामिविधयैवनतुश्रुतिदारान्त्र
सुभकर्मसुश्रुतभावादिनिरासनिरपेक्षयापिप्रकृष्टंद्विविधंकर्मार्पणंतरंकौर्मेप्रोक्तं य
था ब्रह्मणादीयतेदेयंब्रह्मणेसंप्रदीयते ब्रह्मैवदीयतेचेतिब्रह्मार्पणमिदंपरं नाहंकर्त्ता
सर्वमेतत् ब्रह्मैवकुरुतेतथा एतत्ब्रह्मार्पणंप्रोक्तमृषिभिस्तत्त्वदर्शिभिरिति ततफलेति
एतदपिकौर्मेप्रोक्तं यद्वाफलानांसंन्यासंप्रकुर्यात्परमेश्वरे कर्मणामेतदप्याहुर्ब्रह्मार्पण
मनुत्तमपिनिकर्मफलानामीश्वरोभोक्तेतिचिंतनंकर्मफलसंन्यासः भोक्तारंयज्ञतपसां
सर्वलोकमहेश्वरमित्यादिवाक्यात् तदुक्तंकरोतियद्यत्सकलंपरस्मैनारायणायेतिसमर्प
येत्तदितियज्ञादीनांहींद्रादिभावापन्नस्यांतर्यामिणोभोगएवमुख्यंफलं येप्यन्यदेवताभ
क्तायजंतेश्रद्धयान्विताःतेपिमामेवकौंतेययजंत्यविधिपूर्वकमित्यादिवाक्येभ्यइति नन
न्वथाकेविश्वास्यदेवताविशेषस्यैवेतरदेवतायज्ञनेनयज्ञनेप्रोक्तेनपरमात्मनइतिचेन्ना
परंहिब्रह्मकथितंयोगयुक्तेनतन्मयेनअनुगीतावाक्यतःश्रीकृष्णस्यभगवतोनान्यापरमात्मो
पदेशस्यैवलाभादितियद्यपीश्वरस्यभोगोनित्यःतथापिसिद्धक्षायस्यत्तिवत् तदुत्पत्तिगौ
णीयज्ञादिसहकारिलौकफलदानतयेश्वरप्रीतेरभिव्यक्तेः नन्वीश्वरप्रणिधानमत्रपर्वेया

दोक्तभावनारूपमेककार्यं न भवतीति तत्राह स हि क्रियायोग इति स हि स एव फलसंन्यासः क्र
मोपेतं च क्रियायोगो भवति कर्मशेषत्वात् तज्जपस्तदर्थभावनमिति पूर्वोक्तं च भावना
रूपं प्रणिधानं ज्ञानमेव कर्म तच्छेषत्वयोरभावादित्यर्थः उत्तरसूत्रेण सहान्वयमुद्दिशन्नै
यर्थ्यमिति बोध्यं तेषां योगद्वारमाह समाधिभावनार्थः क्लेशतनूकरणार्थश्च उभयार्थ
त्वे हेतुमाह स हीति अभ्यासम्यक्निष्कामादिरूपेणासेव्यमानः स हि स एव कर्मयोगः कर्मोति
रिक्तविषयेभ्यो निरुद्धवृत्तिकं निष्प्रपंचं चित्तं करोति ततः क्रमेण सत्त्वोद्रेकादेकाग्रमन्यत्रा
पि करोति अविद्यादिकं च प्रकर्षेण नाशेन तनू करोति सत्त्वशुद्ध्यादिद्वारेत्यर्थः उक्तमा
धिकारिणश्च समाधियोग्यता क्लेशतनुता च सिद्धैवेत्यतः पूर्वपादे तदुभयं योगसाधनत
यानोक्तं ननु अविद्यादीनां क्लेशानां नाशेनैव संसारविच्छेदः अयतनूकरणेन तु किं प्रयोज
नमित्याकांक्षायामाह प्रतनूकृतानिति प्रतनूकृतांश्च मुक्तेंधनतुल्यीकृतान् क्लेशान् क्रिया
योगः स्वयमुद्दीपितेन प्रसंख्यानाग्निना विवेकख्यातिवह्निना दग्धबीजवदप्रसवधर्मि
णोऽप्रसवस्वभावान् संस्कारजनकान् करिष्यति जीवन्मुक्तिदशायामिति शेषः प्रसंख्या
नाग्निज्वालनेन तनूकरणस्य द्वारं वदन् सूत्रोक्तार्थमुपसंहरति तेषामिति अपरमध्यानमि ६४

भूतात्तथावानभिभवरूपतनूकरणस्य द्वारमिति सूक्ष्मेति सूक्ष्मविषयत्वात् सूक्ष्मा सा
क्षात्काररूपिणी प्रज्ञा क्रमेण समासकृत्या सती चरमा से प्रवृत्ता प्रतिप्रसवापन्नलयापक्लि
ष्यते विदेहकैवल्यदशायामिति शेषः तदेवं क्रियायोगस्य मोक्षज्ञानादिव्यापारकथनात्
कर्मयोगो ज्ञानादिसाधनतया ज्ञानाद्यंगमेव न साक्षान्मोक्षहेतुरिति सिद्धांत इति उत्तर
सूत्रावतारणाय पृच्छति अथेति अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः पंचविपर्ययाइ
ति परिपित्वा संक्षेपतः सूत्रार्थमाह क्लेशा इतीति इति शब्दोऽविद्यादिपरामर्शी तथाऽवा
विद्यास्मितारागद्वेषाभिनिवेशा इति पंच विपर्ययाः क्लेशा इत्यर्थ इति योजना अत्र कियंत इ
ति प्रश्नस्योत्तरं पंचेत्यनेन के त इत्यस्य चोत्तरं विपर्यया इत्यनेनाह पंचविपर्यया इति त्रपंचे
त्यर्थादेव लब्धे विपर्ययात् इति च पुरस्कृतं विशेषलक्षणस्य सामान्यलक्षणपूर्वकत्वौचित्या
त् विपर्ययशब्दस्त्वत्र संसारहेतुविपर्ययार्थकः अतो न मुक्तिरजतविपर्यये क्लेशलक्षण
व्याप्तिः रागादीनां च विपर्ययकार्यतया विपर्ययत्वं बोध्यं प्रकृतस्य च संसारहेतुविपर्यय
स्य लक्षणं अदृष्टसामान्यहेतुमनोविशेषगुणत्वमिति ननु क्लेशशब्दो दुःखवाची किमित्य
विद्यादिषु परिभाषितः किमर्थं वा तेषामुच्छेदोऽपेक्षित इत्याकांक्षायामाह ते स्पंदमाना इति

।ते क्लेशाः स्पंदमाना लब्धवृत्तिका दृष्टादृष्टद्वारा गुणानां सत्त्वादीनां अधिकारं कार्यारंभणसा
मर्थ्यं द्रढयंति बलवत्कुर्वंति तथा गुणानां परिणामं वैषम्यरूपमवस्थापयंति निर्वर्तयं
ति तत्त्वमहदादिरूपकार्यकारणप्रवाहमुन्नमयंति प्रवर्तयंति पदार्थमेतत्सर्वं कुर्वंतीत
द्दर्शयति परस्परेति कर्मविपाकं जात्यायुर्भोगं वाभिनिर्हरंति निष्पादयंति किं स्वतंत्रा एव नेत्या
ह परस्परानुग्रहतंत्रीभूत्वेति अविद्यातो रागो रागाच्चाविद्येत्येवमादिरूपाभ्योन्यानुग्रहा
धीना भूत्वेत्यर्थः अस्मात्समाहितेनैव हि क्लेशानां स्थैर्यं भवति येन स्थैर्येण विपाकं परं
निर्वहंतीति भावः तथा च क्लेशरूपदुःखदत्वादविद्यादीनां क्लेशपरिभाषा तां निर्कीत्यादु
खनिदानतयाऽविद्यादयः समुच्छेत्तव्या इति भावः क्लेशानां स्वरूपलक्षणानां सर्वेषामेव ज्ञान
नाश्यत्वं बध्यमानमुपपादयितुं अविद्यामूलकत्वमन्यक्लेशानामाह अविद्याक्षेत्रमुत्तरे
षां प्रसुप्ततनुविच्छिन्नोदाराणां निमित्तकारणस्यापि प्रसवभूमित्वं प्राधान्यमात्रेण गौणं व्या
ख्यास्यते अत्रेति अत्र एतेषु क्लेशेषु मध्ये चतुर्भेदानामस्मितादिक्लेशानामित्यादिरर्थः प्रसु
प्तादीनां सर्वेषामेवाविद्यासत्त्वे सत्त्वं तदभावे तदभाव इत्याशयः तेषां चतुर्विधभेदं विवृणो
ति तत्र का प्रसुप्तिरिति चेतसि शक्तिमात्रेणानागतावस्थयावस्थितानामस्मितादीनां बीजभा ६५

वोपगमः स्वकार्यजननसामर्थ्यं प्रसुप्तिरित्यर्थः अस्माद्व्याख्यानात् कार्यस्यानागतावस्थैव कारणेऽ
पेशक्तिरिति लब्धं सैव च उपादानकारणतेति भावः दग्धबीजभावां पंचमीमवस्थां व्यावर्तयितुं बीज
भावोपगम इत्युक्तं दग्धबीजभावानां चास्मितादीनां पुनरप्रसवादविद्या न क्षेत्रमिति तासां पंचम्यव
स्थानलक्ष्येति भावः कदाचित्प्रबोधसत्त्व एव प्रसुप्तिः संभवतीत्यतः प्रबोधमपि दर्शयति तस्ये
ति तस्य प्रसुप्तक्लेशस्य स्वस्वविषये संमुखीभावो निष्पत्तिः प्रबोध इत्यर्थः पंचम्यवस्थायाम
तिव्याप्तिभावं प्रतिपादयति प्रसंख्यानेति प्रसंख्यानवतो विवेकख्यातिकारिणो जीवन्मुक्त
स्य दग्धक्लेशबीजतया सन्मुखीभूतेऽपि निकृष्टेऽपि विषये असौ क्लेशानां सन्मुखीभावः पुन
र्न भवति तत्र हेतुर्दग्धबीजस्य कुतः प्ररोह इतीति कारणाभावादित्यर्थः तत्र तस्य पुनः क्लेश
प्ररोहे शास्त्रप्रसिद्धं चरमदेहकत्वमप्रमाणं पतित अत इति पुनः प्ररोहे सति देहांतरोत्पत्त्या ज्ञा
नि देहस्य चरमत्वानुपपत्तिरिति भावः तथा च स्मर्यते बीजान्यग्न्युपदग्धानि न रोहंति यथा
पुनः ज्ञानदग्धस्तथा क्लेशैर्नात्मा संपद्यते पुनरिति ज्ञानदग्धैः क्लेशरूपबीजैर्देहं नाभिरात्मा
देहो न पुनरुत्पद्यत इत्यर्थः क्लेशाख्यबीजहानादित्यर्थः दग्धबीजभावापन्नावस्था नात्रापरि
गणने बीजमाहात्म्ये चेतितं नैव चरमदेहक एव दग्धबीजावस्थानास्यत्र पुनर्जन्माभावादित्य

र्थः॥अतोनास्तिदग्धबीजावस्थस्यप्रसवोनापितत्प्रसवभूमिरविद्येतिभावः॥जीवन्मुक्ता
नांविषयसंनिकर्षेपिक्लेशानामभिव्यक्तेःक्लेशसंस्काराएवतदानास्तीतिविवेकेनलब्धइत्येति
भ्रमंनिरस्यतिसत्तामितिसूक्ष्मरूपेणसतांक्लेशानामेवतदाचरमदेहेबीजत्वसामर्थ्यरू
पेजननसामर्थ्यंदग्धंनाशितमित्यादिरर्थः।अग्न्यादौदाहादिशक्तेर्यथाद्रव्याभाविनाद
र्शनाच्छिन्नेनसंदेहोवक्लेशशक्तेरशेषतोनाशसंभवात्तच्चतेप्रतिप्रसवहेयाःसूक्ष्माइतिसू
त्रेव्यक्तीभविष्यतिउपसंहरन्तिइत्युक्तंप्रसुप्तिर्दग्धबीजानामप्ररोहश्चेतिशिष्यावधानायक्र
मप्राप्तंतनुत्वस्यनिर्वचनंप्रतिजानीतेतनुत्वमुच्यतइतिप्रतिपक्षेतिक्लेशप्रतिपक्षःक्रि
यायोगस्तस्यभावनमनुष्ठानंतेनोपहताःक्लेशास्तनवोविवेकख्यातिप्रतिबंधाक्षमाभ
वेतिएतदेवतनुत्वमितिशेषः॥केचित्तुसम्यग्दर्शनंश्रवणादिरूपंपरोक्षमविद्यायाःप्रति
पक्षःएवंभेददर्शनमस्मितायाःअहेयानुपादेयताज्ञानरूपंमाध्यस्थ्यंरागद्वेषयोःउपकरणा
ख्यानुबंधबुद्धिनिवृत्तिरभिनिवेशस्यएतेषांभावनेनानुष्ठानेनोपहताइत्यर्थमाहुःविच्छिन्नतां
व्याचष्टेतयेति क्लेशानामन्यतमेनाभिभवादन्येनविषयसेवनाद्वाविच्छिद्यविच्छिद्यतेनतेना
त्मनापूर्ववदतनुभावेनैवपुनःसमुदाचरंतिआविर्भवंतीत्यतोविच्छिन्नाएवंव्याख्यामवंतीस ६६

र्थः अत्रवीप्सयाविच्छेदसमुदाचारयोःपौनःपुन्यंदर्शयन्नाप्रसुप्तान्भेदउक्तःप्रसुप्तिर्हिक्ले
शानांव्यंजकविलंबेनैकद्वित्रिजन्मादिबहुकालव्यापारानभिव्यक्तिःविच्छिन्नतातुस्वसप्र
तिबंधकःक्लेशप्रवाहस्यास्मिकालमंनरागरानभिव्यक्तिरितिभेदः तेनतेनात्मनेत्यनेनच
तन्ववस्थातोभेदउक्तइतिविच्छेदेप्रमाणंपृच्छतिकथमितिउत्तरंरागेतिरागकालेक्रोधस्य
स्यादर्शनात्क्रोधस्यविच्छिन्नतासिध्यतीत्यर्थःतदाक्रोधाभावेचपुनःक्रोधोत्पत्यसंभव
ःअसत्कार्यानभ्युपगमादितिभावःएवंक्लेशांतरेपिद्रष्टव्यंरागकालेक्रोधस्यविच्छेदेच
विरोधोबीजमित्याह नहीतिकालिकविच्छेदंक्लेशानामुदाहृत्यदैशिकविच्छेदमप्युदाहरति
रागश्चेतिविषयांतरेननास्तिअपितुविच्छिन्नावस्थस्तत्रास्तिअन्यथाऽसदुत्पादासंभवा
दित्यर्थःअतोविषयांतरेतदारागोविच्छिन्नइतिभावःनदेवलोकव्यवहारेणाप्यवधार
यतिनैकस्यामितितत्रराकस्यांस्त्रियामित्यर्थःसहीतिसहिरागस्तदाअन्यत्रप्रसुप्तोवात
नुर्वाविच्छिन्नोवेकतरोवश्यंभवतितन्वविच्छिन्नतामाशयान्नोदाहृतइत्याशयःउदाहृता.
न्व्याचष्टेविषयेइति लब्धवृत्तिर्लब्धस्वाभाविकवृत्तिरित्यर्थःतेनतनुव्यावृत्तिःननुप्रसुप्तवि
च्छिन्नयोःकथंक्लेशत्वंदुःखाजनकत्वात् इत्याशंक्याहसर्वएवैतइतिक्लेशविषयत्वंक्लेशज

ननुयोग्यत्वंनातिक्रामंतीति उदाहरणावस्थायांप्रसुप्तादिरूपस्यधर्मिणोदुःखदत्वादित्यर्थः न
न्वेवंसर्वासामेवक्लेशावस्थानांकालभेदाद्भावात् रूपेकथंप्रसुप्तादिरूपेणक्लेशानांविभाग
इत्याशंक्यतेकस्तर्हीतिपरिहरति उच्यतइति प्रसुप्तादिरूपाणांचतुर्णांक्लेशानामेकत्वमि
तिसत्यमेतत् तथापित्ववस्थाभिर्विशिष्टानामेवक्लेशानांविच्छिन्नादित्वंविवक्षितं यथै
कस्यैवपुरुषस्यैवालकतरुणवृद्धादिरूपोविभागइत्यर्थः उक्तायाउदारावस्थायाःकारणंप्र
दर्शयतिहानाद्युपायेति स्वव्यंजकेनविषयध्यानेनांजनेनाभिव्यक्तउदारोभवतिक्लेशः
अतोमुमुक्षुणाप्रतिपक्षभावनावद्विषयसंगत्यागोपिकार्यइत्याशयः निमित्तकारणे
पिक्लेशक्षयेनगुणोनात्रगौणइत्याहसर्वएवेति ननुरागादीनांतत्त्वाभावात्कथ
मविद्याविशेषत्वमित्याशंक्येनपृच्छतिकस्मादिति उत्तरंसर्वेष्वितिसर्वेष्वेवेतरक्लेशेष्व
विद्यैवव्यापिकाभवतितत्रहेतुर्यदितिअविद्याकार्येणविपरीतोक्तिपतेअनुशेरतेअनुगताभवं
तिशेषंस्पष्टं तथाचविशेष्यान्तरद्वादइतिन्यायेनाविद्याप्राधान्यात् तत्राविद्यामिश्रितेषुसर्वक्ले
शेष्वविद्याभेदत्वमुपपन्नंयथासुवर्णादिषुपार्थिवांशमिश्रितेषुतेजोविशेष्यात्तेजोभेद
त्वमितिभावः अविद्यैवस्थूलंदुःखबीजंइत्युक्तंइदानींपंचक्लेशान् पंचभिःसूत्रैःक्रमेणाल ६६

क्षयति अनित्याशुचिदुःखानात्मसुनित्यशुचिसुखात्मख्यातिरविद्या अनित्यादिचतुष्ट
येक्रमेणनित्यादिबुद्धिरविद्येत्यर्थः अविद्याचतुष्टयंक्रमेणव्याचष्टेउदाहरणानिवद
र्शयति अनित्यइति अनित्यत्वमसत्त्वंकालनिष्ठाभावप्रतियोगित्वमितियावत् तस्यैवस्वरूपा
ख्यानेकार्येइतिनित्यत्वंचसत्त्वंतदुक्तंगारुडे अनात्मन्यात्मविज्ञानंअसतःसत्स्वरूपता सु
खाभावेन्त्यासौख्यंमायाविद्याविनाशिनीति भागवद्गीतायांच नासतोविद्यतेभावोना
भावोविद्यतेसतः उभयोरपिदृष्टोन्तस्त्वनयोस्तत्त्वदर्शिभिरिति असतःप्रागभावप्रतियोगि
नोभावोविनाशित्वंनास्तिसतश्चानादिभावस्याभावोविनाशोनास्तीत्यर्थः अविनाशित
तद्विद्धीत्याद्युत्तरवाक्यात् अत्राभावप्रतियोगित्वरूपानित्यत्वमेवासत्त्वमुक्तमितिइत्यामे
वास्तितसद्बुद्धिरूपोऽविद्यामाहात्म्यप्रपंचस्याविषयकइतिश्रुतिस्मृतिडिंडिमः तथाप्रपंचस्या
नस्यास्तितसदाकारकत्वाद्भ्रमत्वमपिमुक्तिरजतादिज्ञानवद्बोध्यतइतिउक्ताविपायाःप्रपंच
मेवोदाहरणमाचार्योव्याहधुवेति वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमित्यादि
श्रुत्यापिप्रपंचस्येदृशमेवासत्यत्वमुक्तं यत्नवीभत्सइतिकुत्सितेःयथित्यइतियावत् का
यस्याशुचित्वेस्मृतिंप्रमाणयति उक्तंचेति स्थानमूत्राद्युपहतेमातुरुदरंबीजंशुक्रशोणिते

उपष्टंभो मातृभुक्तान्नादिरसः निस्यंदो नवद्वारैरामकूपादिभिश्च क्षरणं निधनं मरणं तत्राव
श्यंभुद्धिहि तेन वः स्पष्टाः तथा स्नानादिभिः शौचाधानादपि सदास्वतोऽशुचित्वमनुभोपतद्या
ह इत्याक्षेपणीयत्वादिति ननु भवतु शरीरमशुचि तथापि तत्राशुचिख्यातौ किं प्रमाणमित्याशङ्का
यामाह अशुचौ शुचिख्यातिर्दृश्यत इति नवीनेव शशांकवदियं कन्या कमनीयामधुनोमृ
तस्यावयवैरंशैर्निर्मितेव ज्ञायते निश्चीयते हावः शृंगारलीला कस्यचित्कापस्यति शुष
स्य केनचंद्रकलादिना निर्मलेनाभिसंबंधः साधर्म्यं नास्येव विवक्षितसाधर्म्यमित्यर्थः
उपसंहरति भवतीति एतेनेति एतेनाशुचौ शुचिख्यातेर्व्याख्यानेनापुण्ये पुण्यप्रत्ययेन प्रशिलारोहणा
दौ हिंसादौ वा पुण्यप्रत्ययस्तथानर्थे चार्थप्रत्ययो नरकाद्यगमनादिना दुःखबहुले तथाऽपुरुषार्थे धना
दावर्थप्रत्ययो व्याख्यात इत्याख्यातः अशुचौ शुचिख्यातिरूपो भोगोत्कृष्टसाधनात्साधनमात्रोप
लक्षकत्वादित्यर्थः भाष्ये क्रमप्राप्तविद्याद्वयमसमासाभावेऽपि संसारहेतूनां विद्यानामष्टुप
लक्षकमतोऽन्नन्यूनतातत्रेत्युत्तरग्रंथे नरतीत्याप विद्यां व्याख्यातुमादौ वक्ष्यमाणमन्त्रमुखे
नतस्योदाहरणप्रदर्शयति तथा दुःखइति तथेत्यस्य तत्र सुखख्यातिरविद्येत्यनेनान्वयः वक्ष्य
तीति अर्थादिति शेषः तत्रेति ज्ञापद्दुःखइत्यर्थः अत्र च दुःखमेव सर्वं विवेकिन इत्यागामिसू ६०

त्रे दुःखसाधनतया दुःखबहुलतया च दुःखत्ववचनात् दुःखसाधने दुःखनिवृत्ताख्यानात्विक
त्सुखसाधनत्वबुद्धिः तथा दुःखप्रचुरे सुखप्रचुरत्वबुद्धिश्चानंती पात्रविद्येति बोध्यं अत्र स्यपाके
वलदुःखे सुखभ्रमस्याप्रसिद्धेरिति चतुर्थीमविद्यामाचष्टे तथानात्मनीति तस्या उदाहरणं
चाद्येति वाक्यस्य देहस्य उपकरणे पुत्रादिष्वहं बुद्धिस्तथा विषयभोगावच्छेदकतयाऽन्त
तः करणस्य उपकरणे शरीरेऽहं बुद्धिस्तथा भोग्यतया साक्षात्पुरुषस्योपकरणेऽन्तःकरणेऽहं
बुद्धिरित्यर्थः इमामेव चतुर्थीमविद्यामाश्रयप्रपंचो विद्याकार्यमित्युच्यते अहं कर्तेत्याद्यभि
मानस्यैव धर्माधर्मोत्पत्तिद्वाराऽखिलजगद्धेतुत्वादिति अत्र पञ्चशिखाचार्यसंवादमाह त
थेमदिति पद्यामयोक्तं तथान्यत्र चतुर्थ्यविद्याविषये पंचशिखेनाप्येतदुक्तमित्यर्थः व्यक्ता
व्यक्तव्याकृताव्याकृतं स्थूलसूक्ष्मरूपं बुद्धिसत्वमात्मत्वेनाभ्युपगृहीत्वा तस्य संपत्तिसमसंबन्धा
दिकं शुभवासनाऽदृष्टादिकं चानुनन्दत्यात्मसंपदं मन्यमानस्तस्याव्यापत्तिरिच्छाविघातादिरू
पादिकं चानुशोचत्यात्मविपत्तिमन्यमान एवं विशेषः स सर्वोऽविद्यानिमित्तमुक्तमित्यर्थः ननु
शुक्तिरजतादिभ्रमरूपाणामविद्यानां च पञ्चमत्रगणनानां नकृतेत्याशंकामाहरणमिति पदोरिवच
त्वारि पदानि पादा अस्य शास्त्रस्येति चतुष्पदाऽसवं भवन्ति येषां संसारस्य मूलं भवतीत्यर्थः न

थावसंसारहेतुतया नान्यासामत्रागणनमिति भावः ननु विग्रहतोऽविद्याशब्दस्य विद्याभिन्न
त्वं विद्याप्रत्यूपत्वं वास्य तन्नमविद्यात्वं वार्थः स्यात् न तु विपरीतख्यातिरित्याशंक्याह तस्याश्चेति
तस्याश्चाविद्यायाः स्वतन्त्रत्वं वस्तुत्वं च विज्ञेयं न त्वभावोऽमित्रागोष्पदवदित्यर्थः
दृष्टान्तं विभजते यथा नामित्र इति न मित्राभाव इति नाप्यभावशब्देन संसर्गाभावान्योन्याभा
वौ गृह्येते न मित्रमात्रमिति नाप्यमित्रं यस्मादिति व्युत्पत्त्या केवलमित्राभिन्न इत्यर्थः किन्तु तद्वि
रुद्धो मित्रविरुद्ध इत्यर्थः तथा च निरूढलक्षणेति भावः किन्तु देशस्तदेव विपुलो देशविशेषोऽ
गोष्पद इति परिभाषितः प्रमाणं विद्या ज्ञानान्तरमिति रत्न नाविद्याशब्दस्य ज्ञानविशेषे रूढता
व्याकरणात् अत्राधुनिकवेदान्तिनामसमार्थत्वोपवर्णनं त्वात्यन्तमात्रमवधेयं क्वाचित्कस्त्वं त्रिगु
णात्मकप्रकृतावविद्याशब्दो गौणः अविद्याधर्मकत्वात् अविद्यया तत्रारोपितत्वात् जड
त्वाच्च विद्याविद्याशब्दयोर्ज्ञानाज्ञानवाचित्वेनात्मानात्मवाचित्वादिति अस्मिंश्च दर्शने सांख्या
नामिवाविवेको नाविद्याशब्दार्थः किन्तु वैशेषिकादिवत् विशिष्टज्ञानमेवेति तत्र भाष्याभा
प्रवगन्तव्यं अविद्यानन्तरं तत्कार्यभूतामस्मितां लक्षयति दृग्दर्शनशक्त्योरेकात्मतेवास्मि
ता दृग्द्रष्टा दृश्यते अनेनेति दर्शनं करणं बुद्धिः प्रत्ययादौ फलोपधाने नाल्लीति शक्तिग्रहणं ६८

तयोरेकात्मतेव धर्मतः स्वरूपतश्चात्यन्तभेदाकारो विपर्ययोऽस्मिताऽहंकार इत्यर्थः एतदेव
शब्दान्तरेणाह पुरुष इत्यादिना एकस्वरूपापत्तिरिवैकाकारोपः क्लेशः सोऽस्मितेत्यत इत्यन्वय
अविद्यातथास्मितायाश्चायं भेदो यद्दृश्यादावादौ या सामान्यतोऽहंबुद्धिरयं च भेदाभेदेना
प्युपपद्यते अत्यन्ताभेदाग्रहणात्सैवाविद्या तदनन्तरकालीनः पुरुषे बुद्ध्यादिगुणदोषा
रोपईश्वरोऽहमहं भोगीत्यादिरूपः न वा दूरस्य वनस्पत्योरिव तयोरत्यन्तमेकताभ्रमः अस्मि
तातत्र तदुभयरूपिणीति भ्रमत्वाविशेषेपि कार्यकारणभावरूपान्तरविशेषादविद्या
स्मितानुगतदुभयरूपिणीति भ्रमत्वाविशेषेपि कार्यकारणभावो लोकानुसारेणावधार्य
ते लोके यथा देहकलत्रपुत्रभृत्यादिषु आत्माभावो ज्ञायते पश्चादेव तेषां सुखदुःखादिकमा
त्मन्यभिमन्यते ज्ञात्वा ह्युपाधिषु मतिबिंबादिरूपेण च द्वाध्यारोपो भवति पश्चादेव तच्चे द्रष्टादिषु
तद्धारणकंपमालिन्याध्यारोपो भवतीति अयं च कार्यकारणभावः पूर्वसूत्रभाष्यस्थेन पञ्चशिख
वाक्येनाप्युक्तः तथा सांख्यकारिकयापि पाठक्रमेणोक्तः तस्मात्तत्संयोगादचेतनं चेतनावदिव
लिंगं गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीन इति ननु बुद्धिपुरुषयोरन्योन्याध्यारोपेणैवाहं सु
खी दुःखी त्यादिव्यवहारोपपत्तौ किमस्मितारोपेणेति किं प्रमाणं परस्परारोपश्चास्मितोरभेदग्रहं विना

पिरंगरजतयोरिव संभवत्येव अग्निलोहयोर्दूरस्थवनस्पत्योर्वा पुनः स्फुटैकप्रत्ययदर्शना
त् अभेदारोपः सिध्यति आत्मबुद्ध्योस्तु परमसूक्ष्मतयानाभिस्फुटमेकप्रत्ययत्वमिति तत्रा
ह भोक्तृभोग्यशक्त्योरिति अत्यन्तविभक्तयोरित्यत्र हेतुरत्यन्तासंकीर्णयोरत्यन्तविपरीतधर्म
कयोरिति भोग्यभोक्तृत्वे एव स्फुटे वैधर्म्ये अनयोः कर्मकर्तृविरोधादिति भावः एवंभूतयोर्भो
क्तृभोग्ययोः पुरुषबुद्ध्योरविभागप्राप्ताविव सत्यामेकत्वप्रत्यये सत्येव भोगः संभवति भेदाग्र
हे तु तयोः कैवल्यमन्योन्यवियोग एव भवति परवैराग्यात्परः कथं भोगः स्यादित्यर्थः तथा च
भोगान्यथानुपपत्तिरेकात्मतारोपप्रमाणमित्याशयः अत एव सत्वपुरुषयोः प्रत्ययाविशेषो
भोग इति सूत्रं वक्ष्यति योऽहं सुखी सोऽहं तदनुभवितेत्येकाकारतेव च बुद्ध्यात्मप्रत्यययो
रविशेषस्तस्मिन्सत्येव च लोके भोगव्यवहार इति जीवन्मुक्तस्य च गौण एव भोगः सुखादिसा
क्षात्कारमात्ररूप इति वक्ष्यामः इदं चोपलक्षणं सुखदुःखज्ञानाद्याश्रयोऽहं करवेति प्रत्य
योऽप्येकात्मतारोपप्रमाणं बोध्यं अस्मितायाः स्वरूपे अविद्याजन्यत्वे च पंचशिखाचार्यवाक्यं
प्रमाणयति तथा चोक्तमिति परमार्थतो बुद्धितः परं प्रकृतं पुरुषं बुद्धेराकारशीलविद्यादि ६८
भिर्विभक्तमसंपश्यन्नपश्यन्नविवेकाज्जनस्तत्र बुद्ध्याकारादिष्वात्मबुद्धिमस्मितां कुर्यात्

शांताद्याकारोऽस्मि जातमदादिशीलोऽस्मि विद्यादिमानस्मीत्येवरूपां मोहेन पूर्वं स तत्रोक्ताविद्ययेत्यर्थः अस्मि
तालक्षणं पित्वा तत्कार्यं रागं लक्षयति सुखानुशयी रागः सुखानुशयी सुखतत्साधनमात्रविषयको
यः क्लेशः स राग इत्यर्थः मात्रपदादविद्यादिव्यावृत्तिर्जीवन्मुक्तेच्छाव्यक्तेरागएव न भवति संस्कारहेतुत्वा
दिति न तत्रातिव्याप्तिः रागस्य कारणं वदन्निममेवार्थं भाष्यकारो व्याह सुखाभिज्ञस्येति सुखाभिज्ञ
स्य वा सुखानुस्मृतिपूर्वको य इत्यर्थः तेन सुखसाक्षात्कारतः सुखस्मृतितश्च रागोऽस्य तथा राग
वतीति रागस्य कारणमुक्तं पर्यायैः रागशब्दार्थमवधारयति गर्ध इत्यादिना रागप्रतिघातोऽस्यतया
रागस्य पश्चाद्द्वेषं लक्षयति दुःखानुशयी द्वेषः सर्वं पूर्ववत् प्रतिहन्तुमिच्छा जयतीति प्रतिघः अपजिघां
सेति वचनात् द्वेषोऽपीच्छाविशेष एवेत्याचार्याशयः द्वेषमूलकतया द्वेषस्य पश्चादभिनिवेशं
लक्षयति स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः स्वस्य रसेन संस्कारमात्रेण वहतीति स्वर
सवाही अपिशब्दस्समुच्चितमविद्वांसं तमेवेतिच्छेदः परामृशति रूढः प्रसिद्धः तथा च यथा अ
विद्वज्जनस्य तथा विदुषोऽपि स्वरसवाहित्वहेतुना यः क्लेशो लोके प्रसिद्धः सोऽभिनिवेश इत्यर्थः अ
विद्यारूपत्वमविदुषि न संतीति न तेष्वतिव्याप्तिः नन्वेवं कथं पूर्वोक्तमविद्याव्याप्तत्वमभिनिवेशस्य
घटतां अविद्यानाशेऽप्यभिनिवेशसत्वादिति चेन्न संसारहेतुतावच्छेदकरूपेणैव विपर्ययव्याप्तत्व

स्याविवक्षितत्वात् संसारहेतुत्वं च मरणत्रासातिरिक्तमपयवे नैवफलवत्वादिति अयं पंचक्लेशो भया
ख्यं रतिवक्ष्यति भाष्यकारः अभिनिवेशस्यात्यंतदुरंतत्वप्रतिपादनाय विद्वत्परिहार्यत्वमुखेन ल
क्षणांतरं भयसामान्यमेव तु अभिनिवेशो रागादिवदिह विवक्षित इति तत्राद्यो भाष्यकारोऽभिनि
वेशस्य स्वरूपमाह सर्वस्येति सर्वस्य विदुषोऽविदुषश्चायमात्माशीः प्रायेणाद्युक्तविशेषः सदै
व भवति ता मे बाहमानभूवमिति माहमभावं भूयासं जीव्यासमित्येवंरूपेत्यर्थः इयमाशीश्च
त्रासो भयमित्युच्यत इति भावः विदुषोऽप्यपरिहार्यत्वमुपपादयितुं यत्नोक्तमभिनिवेशस्य
कारणमवधारयति नचेति अननुभूतो मरणस्य धर्मो दुःखातिशयो येनतस्य स्मरणोर्नसं
भवति घनादिना शत्रुजन्यदुःखस्येव घनादिपुनराहरणाशीर्दर्शनात् घनं मे मा नश्यतु सदैव
भूयादिति अतएव तस्याशिषः पूर्वजन्मनि मरणदुःखानुभवस्तत्कारणतया प्रतीयत अनुमी
यत इत्यर्थः एतेन जीवस्यानादित्वमपि प्रसंगात्साधितं जन्मनस्तु कूटस्थविनाशत्रस्य नैतैर्देहेंद्रि
यबुद्धिवेदनादिभिरघः संबंध इति यत्तु नज्ञायते न म्रियत इत्यादिवाक्यं तदात्मन उत्पत्तिवि
नाशावेतदेहादेरिव प्रतिषेधतीति बोध्यं ननु इह जन्मन्येवात्मानादिना मरणदुःखानुभवेना ७०
भिनिवेशस्येमप्यभवतु किमर्थं पूर्वजन्मानुभवः कल्प्यत इत्याशंकामपाकरोति सचायमिति

सचायमात्माशीरूपोऽभिनिवेशः स्वरसवाही स्वाभाविकोऽत्यंतमूढस्य कृमेरपि मरणदुःखप्रत्यक्षादिभि
रसंभाव्यो मरणत्रास उच्छेददृष्ट्यात्मक उच्छेददृष्टिकार्यः पूर्वजन्मानुभूतमरणदुःखमनुमापयति पू
र्वजन्मनि मरणदुःखानुभवमनुमापयतीति यदनुभवो येन मरणत्रासे जनितया वासनया इह जन्म
नि मरणत्रासो भवतीति शेषः मरणभयस्य द्वेषरूपस्यापि संस्कारजनकत्वेन निरोधस्यैवागत्या
कल्प्यत इति अभिनिवेशं तत्कारणं च व्याख्याय सूत्रवाक्यार्थमाचष्टे यथा वेत्यादिना रूढ इत्यंते
न विज्ञातेति विज्ञातः संप्रज्ञातयोगेन साक्षात्कृतः प्रपंचस्य पूर्वांतोपरांतश्च प्राद्यंतौ येन स त
था तस्य तत्वज्ञस्येत्यर्थः कुशलाकुशलयोरिति वक्ष्यमाणत्वादिति एतेनाद्यंतयोरवशिष्यमाण
मेवंरूपप्रपंचस्य तत्वं तत्त्वपरंब्रह्म विकारस्तु मध्यं वाचारंभणमात्रमिति समस्ताख्यमपि सिद्धांतइ
ति सिद्धं तथा चोक्तं मोक्षधर्मेऽपि अंतेषु रेमिरे धीरा न ते मध्येषु रेमिरे अंतप्राप्तिं सुखामाहुर्दुःख
मंतरमेतयोरिति सुखां माहुरिति पाठस्तु साधुः ननु तत्वज्ञस्याविद्यास्मितादभावात्कथमयमात्मा
शीरित्याशयेन शंकते कस्मादिति संस्कारमात्रजन्यत्वेन परिहरति समाना हीति इयं वासना तदाशी
र्हेतुत्वात् तेनेत्यर्थः इयं च बलवत्तरा बाह्यानावि तैन सह जन्मनि ज्ञानेन बध्यत इत्येतत् अविद्यादिसं
स्कारेभ्यो विशेषः ननु कुशलस्यात्मनित्यत्वनिश्चयात्कथमान भूवं भूयासमितीच्छा स्यात् सिद्धत्व

ज्ञानस्येच्छाप्रतिबंधकत्वादितिचेत् न विशेषदर्शनेसत्यपीदृगिच्छादृष्ट्यापलत्वसेनेतादृश
संस्कारस्य उत्तेजकत्वात् एतेनयदाधुनिकावेदांतिब्रुवाः आहुः आत्मासुखस्वरूपः निरुपधि
पयोक्तेच्छाविषयत्वात् बाह्यसुखवदित्यनुमानेनात्मनः सुखरूपतासिध्यतीति तदप्यपा
स्तं पूर्वपूर्वजन्मसुखपल्लासेवाजातस्तेनतदाज्ञानतापालद्वासनातो निरुपधीच्छासंभवात् अ
मथाप्यात्मत्वेनैवाप्रियत्वकल्पनीचित्यच्चेति क्रियायोगः क्लेशतनूकरणार्थ इत्युक्तं तत्र क्लेश
तनूकरणस्य फलं वक्तुमाह तेप्रतिप्रसवहेयाः सूक्ष्माः प्रसवा अविरुद्धः प्रतिप्रसवः प्रलयः त
थाचप्रतिप्रसवेनचित्तस्यप्रलयेनसूक्ष्मादग्धबीजभावाः क्लेशाहेयाः इत्यर्थः तदेवभाष्यका
र आह ते पंचेतिपंचमध्ये अस्मितानिवेशोमरणातिरिक्तानवयोगीनो दग्धबीजकल्पोभवती
त्युक्तमेवननुतनूकरणे दग्धबीजभावः प्रलयश्चेतिसमुच्चयः अतो दग्धबीजभावप्रतिपादक
सूत्रस्यस्त्वमेवाद्यानुचितमितिचेत् न मख्यफलतया प्रलयस्यात्रादौ निर्वचनात् तत्रद्वारकांक्ष
याच दग्धबीजभावस्यपश्चादुक्ष्यमाणत्वादिति ननु क्लेशतद्वासनयोर्वक्ष्यमाणप्रसंख्याने
नैवनाशोस्तु किमर्थं तत्रचित्तनाशोपेक्ष्यतइतिचेत् न ज्ञानदग्धैस्तथापि क्लेशैरित्यादिशास्त्रप्र ७१
माण्येनज्ञानाग्निनादाहस्यैवसिद्धेर्नैतन्नाशस्ययुक्तिश्चात्रप्रागेवोक्ताकारणोच्छेदापेक्षत्तेर्यावद्

व्यभाविवदर्शनमितितथाचयोगाग्निनाव्युत्थानसंस्कारदाहेनैवसंज्ञानाग्निनोपिक्लेशसंस्कारयो
र्देहिश्चभवतिनतुतन्नाशः नन्वेवमपिक्लेशसंस्कारदाहेनैवसंसारस्यांतोच्छेदसंभवेसंस्कारसहि
तचित्तनाशः किमितिमोक्षायापेक्ष्यतइतिमैवं योगिसंकल्पेनदग्धबीजादिवत् दग्धबीजश
क्तिकादपिकदाचित्पुनरंकुरोत्पत्त्यापत्तेरिति तनूकरणस्यद्वारं दग्धबीजभावं प्रतिपादयत्सूत्रंप
र्यपेत्वापगतिस्थितानामितितद्वृत्तयइतिसमासांतर्गततच्छब्दस्यार्थः क्लेशैः सहान्वयः स्थितानां
मित्यस्यविवरणं बीजभावोपगतानामिति एतच्चसूत्रेणसहव्याख्यास्यामः ध्यानहेयास्तद्वृत्तयः क्ले
शानामितिस्थितानां बीजभावोपगतानां क्लेशानां प्रावृत्तयः स्थूलाः अभिव्यक्तावस्थाः ताः प्रथमं
क्रियायोगेनास्मीकृताः सत्यः प्रसंख्यानेनसमाधिजप्रज्ञारूपेणध्यानेनध्यानकार्येणहात
व्याः प्रतिबद्धोत्पत्तिकाः कर्तव्याः यावत्सूक्ष्मीकृताः अस्यैवविवरणंयावद्दग्धबीजकल्पा भवंती
त्यर्थः तत्रश्चप्रतिप्रसवहेयाइतिपूर्वसूत्रेणोक्तमितितिनतूकरणादिपुनिषुसकरत्वदुःकरत्व
रूपंविशेषं दृष्टांतेनाह यथावस्त्राणामितिनिर्धूयतेवानाहत्यापनीयतेपलेनयाक्षाराद्यहा
यदिना उपायेनक्षारसंयोगादिनाअन्तरेदृष्टांतेसाधनत्रयंदार्ष्टांतिकेपिसाधनत्रितयाभिप्राये
णोक्तं स्वसेति स्वल्पः क्रियायोगः प्रतिपक्षस्तनुताहेतयोसाध्यस्थूलानामतनूकृतानां नाशयासम

हानतिदुष्करः प्रसंख्यानाग्निरसंप्रज्ञातयोगस्याध्यवित्तमानाशस्यप्रतिपक्षो दाहकनाशकोपाया
मितिमहाप्रतिपक्षा इत्यर्थः अनेन सत्क्लेशजीवन्मुक्तानां व्युत्थानरूपोऽप्यविद्यालेशस्तिष्ठतीत्युपग
मस्याधुनिकानां वेदांतिब्रुवाणामपि सिद्धांत इति निर्णीयं तस्यासतिस्थूलानामपि प्रतिप्रसव
मात्रहेयत्वापत्तेरिति इदानीं क्लेशाः किमर्थं हेया इत्याकांक्षायां क्लेशानां परंपरया दुःखनिदान
त्वं सूत्रत्रयेण वक्तव्यं तत्रादौ क्लेशानां दुःखोत्पादने साक्षाद्द्वारमाह क्लेशमूलः कर्माशयो दृष्टादृष्ट
जन्मवेदनीयः दृष्टादृष्टजन्मनी वर्त्तमानभविष्यती वेदनं भोगः कर्माशयो धर्माधर्मौ तौ दृष्ट
जन्मभोग्यो वास्यादृष्टजन्मभोग्यो वाऽभयथैव क्लेशमूलकौ क्लेशे सत्येव भवत इत्यर्थः यस्मा
द्धेतुतो भावो यस्य बुद्धिर्न लिप्यते हत्वापि स इमांल्लोकान्न हंति न निबध्यते इत्यादिवाक्यातेभ्य
इति भावः यथा बाधिकारिविशेषतया क्लेशानां धर्मादिजनकत्वं शौचादिवत् एवं तज्जनक
त्वं शौचादिवत् एवं तज्जनककर्मादिषु गणादिरूपैः प्रवर्त्तनादपीत्यपि बोध्यं क्लेशमूलकत्वं
विवृणोति तत्रेति तत्र चित्ते लोभादिरूपदोषत्रयसत्त्वे एव पुण्यपापरूपौ कर्माशयौ भवत इ
त्यर्थः रागद्वेषमोहाख्यानां च दोषाणामदृष्टनियामकत्वं क्वचिद्दर्शितं रागद्वेषादयो दोषाः स
र्वे भ्रांतिनिबंधनाः कामोऽस्य मवेद्धो वः पुण्यापुण्यमिति श्रुतिः तद्वशादेव सर्वेषां सर्वदेहस

७२

मुद्भव इति दृष्टजन्मवेदनीयमुदाहरन्ति तत्रतीव्रेति स च इति इह जन्मनीत्यर्थः परिपच्यते का
वेदनीयं पापमुदाहरति तथेति यदि त्यनुवर्त्तते यथाक्रममुक्तयोः पुण्ययोर्नेन परमेश्वरेणाबा
फलो पद्मिनी क्षिप्यते दृष्टजन्मवेदनीयं पुण्यमुदाहृत्य दृष्टजन्मवेदनीयं पापमुदाहरति त
थेति यदित्यनुवर्त्तते यथाक्रममुक्तयो पुण्यपापयोर्दृष्टान्तावाह यथा नंदीश्वर इति अदृष्टज
न्मवेदनीयं च कर्म प्रसिद्धत्वान्नोदाहृतं प्रसंगतो व्यतिरेकावप्युदाहरति तत्र नारकाणामिति ना
रकिपुरुषाणां धर्माद्यनुत्पत्तेः ननु स्वर्गिणामपि कर्मनोत्पद्यत इति कथं नारकिमात्रवचन
मिति चेत् न स्वर्गिणां भारतवर्षमागत्य लीला मानुषविग्रहेण प्रयागादौ कर्मानुष्ठानस्य त
त्फलस्य च श्रवणादिति शेषं सुगमं न केवलं कर्माशय एव क्लेशः कारणं अपि तु तत्फलेष्वपि
अतस्तास्वपि दुःखोत्पादने क्लेशानां साक्षात्परंपरया द्वाराणीत्याह सति मूले तद्विपाको जात्या
युर्भोगाः क्लेशरूपे कर्माशयस्य मूले सत्येव कर्माशयस्य विपाकः फलं भवति क्लेशाश्च वासनारू
पाएव जन्मादिविपाककारणं विपाकस्यैव रूपमाह जात्यायुर्भोगा इति जातिर्जन्म आयुर्जीवन
कालः भोगः सुखदुःखात्मकशब्दादिवृत्तिरित्यर्थः ननु सुखादिसाक्षात्कारस्यात्र भोगः ते
ह्लादपरितापफला इत्यनन्तरसूत्रे तस्य विपाकजन्यताश्च वचनात् इति स्यादेतत् क्लेशानां कर्मस

हकारित्वे प्रमाणं नास्ति ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुनेत्यादिवाक्येभ्यो हि ज्ञानस्य
क्लेशक्षयहेतुत्ववत् कर्मक्षयहेतुत्वमपि सिद्धं अतः क्लेशाभावकाले कर्माभावस्यावश्यकत्वा
त्तत एव विपाकाभावः स्यादिति अत्रोच्यते विविधयोनिहेतुशुभाशुभकर्मसु सत्सु यत्र रागादि
रंतकाल उद्बुद्धस्तिष्ठति मरणानंतरं तामेव योनिं जीवः प्राप्नोति नेतरामित्यन्वयव्यतिरेकाभ्यां कर्म
बद्धरागादिदोषोपि विपाकहेतुः तथा च श्रुतिः तदेव सक्तः सह कर्मणैति लिंगं मनो यत्र निषिक्त
मस्येति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति च तथा गीतापि पुरुषः प्रकृतिस्थो हि भुंक्ते प्र
कृतिजान्गुणान् कारणं गुणसंगोऽस्य सदसद्योनिजन्मस्विति आपस्तंबश्च वीतरागजन्माऽदर्श
नात् नरकादिष्वपि रागाद्यनुसारेणैव विपाको भवति निषिद्धकृत्यादिसक्तानामेव तप्तलोहमयना
रीसमालिंगनादिफलश्रवणात् अतः क्लेशोपि स्वानंतरोत्पन्नविपाकारंभहेतुः ज्ञानोत्तरं चारब्धविपा
कः समाप्यत एवानन्तारभ्यत इति न तत्र क्लेशापेक्षेति अपि चात्रैव सूत्रे भाष्यकृता कर्माशयस्या
पि प्रसंख्यानदग्धबीजभावस्य दाह एव ज्ञानेन क्रियते न तु नाश इत्यभिप्रेतः स च क्लेशाख्यसहका
र्युच्छेदेनैव ज्ञानस्य हि व्यापारद्वयं क्लेशाख्यहेतूच्छेदेन कर्मानुत्पादः प्राचीनकर्मणां दाहश्च न तु ७३
कर्मनाशः प्रारब्धकर्मणोपि नाशप्रसंगात् न च प्रारब्धातिरिक्तकर्मत्वेन ज्ञाननाश्यताकल्पनेति वा

च्यं लाघवेन क्लेशस्यैव विपाकारंभहेतुत्वकल्पनौचित्यात् प्रारब्धफलकस्य कर्मणो बीजशक्तिना
शेपि फलं समाप्यत एव बीजदाहेप्युत्पन्नांकुरवदिति अत एव ज्ञानाग्निदग्धकर्माणं तमाहुः पं
डितं बुधाः भोगाग्निदग्धकर्मचयो विराडिति ताविष्णुपुराणयोर्ज्ञानयोगाभ्यां कर्मणो दाह एव
प्रतिपन्नो न तु नाश इति तदेव वाचस्पतिना क्षीयंते चास्य कर्माणीत्यादिना कर्मणामपि दाह एवो
क्त तथा तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशाविति ब्रह्मसूत्रेपि विनाशशब्दो निष्फलता
पर एव मंतव्यः कर्माशयानां नाशस्तु ज्ञानवासनानाशवत् चित्तनाशादेव भवति धर्मिनाश
स्य धर्मनाशहेतुतायाः सामान्यत एव क्लृप्तत्वादिति तस्मात् ज्ञानेन क्लेशस्येव तदा नूतनकर्मानु
त्पादवत् प्राचीनकर्मविपाकारंभोपि भवति क्लेशाख्यहेतुसहकार्यभावात् अतो ज्ञानात्
क्लेशाख्यसहकार्युच्छेदेनैव कर्मदाह इति सर्वं सुस्थं तदेतत्सर्वमभिप्रेत्य भाष्यकारः सूत्रमिदं व्या
चष्टे सत्सु क्लेशेष्विति विपाकारंभो नारंभणाद्वा जीवन्मुक्तस्य प्रारब्धविपाकेषु न क्लेशाः कार
णमित्युक्तं तस्य प्रारब्ध एव विपाकः कर्मणा समाप्यत इति एतेन जीवन्मुक्तस्य भोगार्थमविद्या
लेशकल्पनमज्ञानामपेक्षणीयं आरब्धविपाके क्लेशानामहेतुत्वादिति। क्लेशानां कर्माशयस
हकारित्वं ज्ञानादग्धकर्माशयस्यैव विपाकारंभहेतुत्वं च दृष्टान्तेन प्रतिपादयति यथा तथेति

क्लेशेनावनद्ध इति ज्ञानाग्निप्रदग्धबीजभावत्वपि बोध्यं दृष्टान्तानुसारेण तन्न प्रसंख्यानदग्धबीज
भावो वेत्युत्तरवाक्याच्च नापनीतक्लेश इति स्वविपाकगोचरक्लेशशून्यस्येत्यर्थः अतो न प्रसंख्या
नदग्धबीजभावो वेत्यस्य क्लेशसनाथाभावकालीनः कर्माशयो संकोचोदाहरणमिति ज्ञा
त्यायुर्भोग इति व्याचष्टे सच विपाक इति कर्मणो जन्मकारणत्वे केचन विशेषमवधारयितुमा
हतत्रेदं विचार्यत इति तत्र जन्मलक्षणविपाकेऽस्य च विचारस्य प्रयोजनं स्वयमेव वक्ष्यति
तत्र चत्वारो विकल्पाः कर्मैकत्वपक्षं ध्रुवं कृत्वा जन्मैकत्वानेकत्वरूपप्रथमं विकल्पद्वयं कर्मानि
कत्वं च ध्रुवं कृत्वा जन्मानेकत्वैकत्वरूपं अपरं विकल्पद्वयमिति आक्षिपतीति फलदानायेम
मारभ्यतीत्यर्थः किमनेकमिति अनेकं कर्म मिलित्वाऽनेकं जन्म करोतीत्यर्थः आद्यविकल्पे
तु न मिलनमुक्तमिति तन्मो विशेषः तत्राद्यं विकल्पमपाकरोति नतावदेकमिति पृच्छति कस्मा
दिति उत्तरं अनादीति प्रचितस्य संचितस्य अवशिष्टस्य आगमकस्य अविशिष्टस्येति पाठे अमो
ममभुक्तत्वेनाविशिष्टस्येत्यर्थः सांप्रतिकस्येहिकस्य फलक्रमानियमात् अनाश्वास इति पर्योक्ता
नामनंतकर्मणां मध्ये किं कर्म प्रथमं फलं दास्यति किं वा पश्चादिति फलक्रमे नियमो नास्त्य ७४
तो लोकानां पुण्यानुष्ठाने फलानाश्वासः स्यात् भाव्यनंतकालमध्ये भाविपापादिनानुष्ठीयमा

न कर्मणो विनाशसंभवात् इति भोगक्रमनपेक्षकर्मानुष्ठानाद्वेत्यर्थः द्वितीयं विकल्पं निराकरोति
न चैकमिति अनेकजन्मसु किंचित्कत्वाफलदानायानेकजन्मनः कारणमेकैककर्मस्वपि न भवती
त्यर्थः अत्र हेतुं पृच्छति कस्मादिति उत्तरमनेकेष्विति अनेकेषु जन्मसु क्षिप्यमाणं कर्मैकैकं प्रत्येक
मेवानेकस्यासंख्यजन्मनः कारणं अतो वशिष्टस्य तदितरस्य तद्विरुद्धफलस्य कर्मणः इति यावदिति
तृतीयं विकल्पं निराकरोति न चानेकं कर्मेति पृच्छति कस्मादिति उत्तरं तदनेकमिति तथा चेत्प्र
थमपक्षोक्तदोषस्यानाश्वासस्य प्रसंग इत्यर्थः तदेवं पक्षत्रयेऽपि दूषिते चतुर्थं पक्षं सिद्धान्तयति त
स्मादिति तस्माज्जन्मारभ्य आमरणपर्यन्तकाले विहितनिषिद्धैर्यो धर्माधर्मसमूहो गुणप्रधानभा
वापन्न उत्पादितः स मरणकाले आरब्धकर्मभोगसमाप्त्या लब्धावसरः सन्नेकप्रयत्नेन मिलित्वा स्व
फलदानाय मरणं प्रसाध्य संमूर्छितः प्रवृद्धवेगः एकमेव जन्म गुणप्रधानभावापन्नः स्वफलयोग्यं
करोति नानेकमित्यर्थः मरणं च लिंगदेहस्य स्थूलदेहादुत्क्रमणं न तु नाशो न मनस्कृतेः नाशस्य
भोगाहेतुत्वात् कर्मोजन्यत्वस्वाभाविकत्वयोर्भाष्ये वक्ष्यमाणत्वाच्च ननु केवलजन्मनाऽकिंप्रयो
जनं तत्राह तच्च जन्मेति आयुषोऽपि न स्वतः पुरुषार्थत्वमत आह तस्मिन्नायुषीति अससाविति ज
न्महेतुरित्यर्थः अन्योऽपि हि द्विकमात्रविपाको न भवतीति वक्ष्यति अत्रोत्सर्गिकमुपसंहरति अत इति

एको भवोऽस्मिन्नवाप्येत प्राप्नोतीत्येकभविकः कर्माशयसमूहः पूर्वाचार्यैरुक्त इत्यर्थः एकभ
विकं इति पाठे त्वेकभविकं कर्म तज्जन्यादृष्टं चैकभविकमित्यर्थः नन्वेवं स्वर्गनारकिणां कथं पुन
र्जन्मादि स्यात्स्वर्गादिशरीरे धर्माद्यनुत्पत्तेः प्राचीनसर्वकर्मणां च तत्रैव समापनादिति चेन्न स्वर्गा
दिजनककर्मणामेव ब्रह्मलोकस्थावरादियोनिलाभपर्यन्तफलश्रवणात् शास्त्रानुक्तकालवि
शेषस्यैव फलस्यैकभविकत्वनियमादिति त्रिविपाकं कर्मोक्त्वा एकद्विपाके कर्मणी प्राह दृष्टज
न्मेति नंदीश्वरवन्नहुषवच्चेति दृष्टान्तद्वयं पूर्वोपन्यासक्रमेणोक्तं स्यात्तु व्युत्क्रमेण योजनीयं प्र
तिज्ञाक्रमेणोदाहरणौचित्यात् नंदीश्वरस्य स्वस्वत्वात्पूर्वमनुष्यजन्मनः पुण्यविशेषेणायुर्भो
गस्यं विपाकद्वयं देवसंबंधस्य नहुषस्य चेंद्रत्वसंपादककर्मणो वदीर्घायुष्यस्यालाभात्
पापविशेषेण केवलं सर्पभोगरूप एक एव विपाक उक्त इति तत्र च नंदीश्वरनहुषयोर्मनुष्य
शरीरस्यैव बाधेकादिवद्देवसर्परूपपरिणामान्तरात् न जन्मान्तरं अपूर्वदेहानुत्पादादिति न
न्वेवं कर्माशयवत् ज्ञानवासनाप्येकभविकैव स्यात् तथा च तासामनादित्वं स्वाशिषो नित्य
त्वादित्यागामिसूत्रे वासनानामनादित्ववचनं नोपपद्येत इत्याशंकां परिहरति क्लेशकर्मेति ७५
क्लेशकर्मणो विपाकस्य योऽनुभवस्तन्निमित्तवृत्तिनिवहो ज्ञानरूपः तैर्निष्पादिताभिर्वासनाभिरनादि

कालसंमूर्छितमप्यवितं पुष्टमिति पाठः अतएव विविधरूपाभिस्ताभिः पटवस्त्रस्येव तच्चि
त्रितमिव चित्तं ग्रंथिभिराततं मत्स्यजालमिव वर्तते इत्यन्तराणां वासनानां अनेकभवपूर्विकाः स्यो
क्तोपं ते अन्यथा मनुष्यायोन्यनं च मनुष्यजन्मनैव स्यादित्यर्थः अत्र वासनानां जीवमत्स्य
बंधकचित्तजालग्रंथितत्वेन रूपणात् भिद्यते हृदयग्रंथिः छिद्यन्ते सर्वसंशया इत्यादिश्रुता
वपि हृदयग्रंथिर्वासनैव न त्वाधुनिककल्पिताहंकारादिरिति सिद्धं कर्माशयस्याधर्माध
र्मरूपात्संस्काराद्वासनानां भेदं स्वरूपमाह यः संस्कारा इति नाश्वानादिकालीना इत्युपसंहारः
औत्सर्गिकमेकभविकत्वं क्वचिदपवदितं भूमिकां रचयति यस्त्वसाविति नियतः स्वाभाविको
विघ्नं भस्यः तादृशो विपाकोपस्यपलतया त्वावंध्यो मन्यो षः कर्मान्तरानभिभूतश्च कर्माश
यः तद्विपरीतश्चानियतविपाक इत्यर्थः अयं चार्थोऽनियतविपाकस्त्रैविध्यभाष्ये व्यक्तीभवि
ष्यति तत्राऽदृष्टजन्मवेदनीयस्यानियतविपाकस्यैवायं नियम इति एकभविकत्वनियम इत्यर्थः
नन्वदृष्टजन्मवेदनीयस्यानियतविपाकस्य चेति स्वागमं दृष्टजन्मवेदनीयस्य भावांहेतवेनैक
भविकत्वाभावः स्पष्ट एवेत्यतो नियतविपाकस्यैवैकभविकत्वनियमाभावे हेतुं पृच्छति क
स्मादिति उत्तरं योऽदृष्टेति दृष्टजन्मवेदनीयस्यैकभविकत्वं शंकैव नास्तीत्याशयेनैवादृष्टजन्म

वेदनीयस्येति स्वरूपाख्यानमात्रेण न तु दृष्टजन्मवेदनीयस्यानियतविपाकत्वं नास्तीत्यादिः क्वचित्त्रि
दाशयः संभवति प्रयोजनाभावात् यो ह्यदृष्टजन्मवेदनीयोऽनियतविपाकस्तस्य त्रि
विध इत्यर्थः यथाऽकृतेत्यवक्ष्यमाणस्याविपक्वनयस्य संग्रहानुपपत्तेः तिसृष्वेकां गतिमाह कृत
स्येति अपरिपक्वस्य अदत्तफलकस्य विनाश इत्यर्थः तथा च तस्य नाशेनैकभविकत्वमित्याश
यः द्वितीयामाह प्रधानेति प्रधानकर्मणा यागादिना सहैव तदंगानां पशुहिंसादीनां स्वफल
नाय च फलप्राप्तिः प्रधानकर्मण्युपगमनं यथा धान्यबीजैः सहोत्पन्नानां तृणबीजानां
तैः सहैवानुत्सृजनमध्यस्यापि तानां धान्यबीजेन सहैव वपनप्राप्तिर्न स्वातंत्र्येण तद्वदुप
सर्जनमयानुष्ठितत्वान्न स्वातंत्र्येण फलदानमिति तथा च प्रधानकर्मातिशयस्य यदावन्त
त्कर्मान्तरेणाभिभवस्तदानुपसर्जनस्यापि नैकभविकत्वमित्याशयः तृतीयां गतिमाह नि
यतविपाकेति अत्र प्रधानेनांगिकिं तद्बलवत्तरं नियतविपाकेन प्रधानकर्मणा स्वविरुद्धफ
लदेनाभिभूतस्य प्रतिबद्धस्य चिरमवस्थानं द्वित्रिवतरादिजन्मसु यस्य तत्तथावस्थानमित्यर्थः
तथा च तस्यैनैकभविकत्वमित्याशयः तत्राद्यामुदाहरति तत्र कृतस्येति शुक्लः कर्माशयो ७८
धर्मः कृष्णश्चाधर्मः तयोरन्योन्यस्य नाशे श्रुतिमुदाहरति यत्रेदमिति पुण्यपापरूपे द्वे कर्मणी

पुरुषे वेदितव्ये अवधारयितव्ये द्वे द्वे इति वीप्सा पुरुषभेदात्कर्मभेदमभिप्रेत्योक्ता यतः पुण्यकृतः
पुण्यनिर्मित एको मुख्यो राशिः समूहस्य समूहिकार्यत्वात् पापकस्य पापराशेरपहंति वोऽस्यति
हंतीति वत्कर्मणि प्रबीनस्मात्सुकृतानि कर्माणि कर्तुमिच्छस्व तत्त्वं कर्म इहलोक एव ते तुभ्यं कव
यो वेदयंते प्रतिपादयंतीत्यलोकं तदिति श्रुत्यर्थः इच्छस्वेति छांदसत्वादात्मनेपदं द्वितीयां
गतिमुदाहरति प्रधानेति यत्र यस्मिन्विषये पंचशिखाचार्येणेदं वक्ष्यमाणमुक्तं तदेव प्रधा
नकर्मण्यवापगमनमित्यन्वयः स्यात्स्वल्प इत्यादिवाक्यस्यायमर्थः हिंसादिजन्यपापेन या
गाद्यपूर्वस्य स्वल्प एव संकरः स्यात् सोऽपि सपरिहार्यः स्वल्पेनैव प्रायश्चित्तेन परिहर्तुं शक्यते यदि
च प्रमादतः प्रायश्चित्तं न क्रियते तदा प्रत्यवमर्षः बहुसुखमध्ये अल्पदुःखेनांशेन योग्यं भोज
ननांतरीयकदुःखवत् अतः कुशलस्य कर्मणोऽपकर्षायदेयत्वापनालं नयमस्करइति शे
षं करिष्यतीत्यंतं पंचशिखवाक्यं तृतीयां गतिमुदाहरेति नियतेति उक्तस्वरूपं बलवत्त
मेव प्रधानत्वं तन्न्वेवं कर्मविशेषस्य चिरमवस्थाने सति पूर्वोक्तसर्वकर्मणामेकदेव प्रायणाद
भिव्यक्तिः कथमुपपद्यत इत्याशयेन शंकते कथमिति सिद्धांतमाह अदृष्टेति कर्मणः कर्मणा
मान्यस्य समानमेकं न त्वदृष्टेति अदृष्टजन्मवेदनीयस्येति प्रसंगादुक्तं अत्रानियतविपाकस्य वे

त्रिवाशब्दः क्वचित्तिष्ठतिसवाशब्दोप्यर्थः गतित्रयमुपसंहरतिपतितिति उपासीनप्रतीक्षेतवि
पाकंविपाकारंभकंस्वाविरुद्धकर्मान्तरमितिशेषः उपासनस्यावधिमाह यावदितितस्यसमा
नमविरुद्धंकर्माभिव्यक्तौनिमित्तंयावन्नेतत्फलोन्मुखीकरोतीत्यर्थः यद्यज्जन्मकृतंपापंमयास
मसुजन्मसुतन्मेरोगंचशोकंचमाकरोहंतिसत्तमोस्मादिवाक्यानितथाकर्मगतेर्दुर्विज्ञानत्व
षनानिर्धेनादृशकर्मविपाकस्येवेत्याह तद्विपाकस्यैवेति अभिमतकर्मविपाकस्यैवकुत्रकदाके
नमित्तिविशेषेणाभिव्यक्तोस्यावधारयितुमशक्यत्वादित्यभिमतकर्मगतिश्चित्राश्चदु
नरूपादुर्विज्ञानाचेत्यर्थः नन्वेवमेकभविकत्वंक्षतमित्याशंक्याह मचोत्सर्गस्येति निवृत्तिः
क्षतिरित्यर्थः क्वचिदपवादेप्येकभविकत्वमौत्सर्गिकमेवानुमन्यतेस्माभिरित्यर्थः नचैवम
प्यपवादाशंकयाऽनाश्वासस्तादवस्थ्यंमपवादस्यस्वानुष्ठानमात्रनिमित्तकत्वात्तद्वित्वेऽश
क्यपरिहारत्वादिति यच्चाधुनिकवेदान्तिभिरेकभविकमतंमयाभिचारेणदूषितंतदज्ञानादेवऔ
त्सर्गिकतामोत्सर्गस्याप्रकृतोक्तत्वादितिसर्वेसुस्थं इदानीमुक्तानांकर्मणांविपाकानांक्ले
शानांसुखंफलमाह तेह्लादपरितापफलाःपुण्यापुण्यहेतुत्वात्तेविपाकाःसर्वएवसमुच्चि ७७
तसुखदुःखफलकाःसमुच्चितपुण्यपापहेतुकत्वादित्यर्थः अत्रसुखावच्छेदेनपुण्यहेतुकादु

खावच्छेदेनचापुण्यहेतुकाइतिविभज्यप्रतिपादयति तेजन्मायुरित्यादिनासुखदुःखयोश्चफ
लत्वंभोग्यतयेति प्रागेवव्याख्यातं विपाकांतर्गतभोगस्वशब्दाद्याकारवृत्तिरेवेतितस्यापिसुख
दुःखहेतुत्वमुपपन्नं तदेवमनेकसूत्रैःप्रोक्तमविद्यायादुःखनिदानत्वंतस्यापाचार्यैरक्लृसूत्रेणै
वार्थादुक्तंदुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायेतदनंतराभावादपवर्गइति
कारणनाशादेवहिकार्यानुत्पादइतितदेवंदुःखनिदानतयाक्लेशानांहेयत्वमुक्तं ननुकथंस
र्वेविपाकाःसुखदुःखफलकाः ब्रह्मलोकादौदुःखासंभिन्नसुखसत्त्वादित्याशंकांपरिहरति
यथाचेदमिति यथाचेदयरिदृश्यमानरोगादिदुःखंप्रतिकूलात्मकंद्वेष्यस्वभावंभवतिएवं
सर्वेनैवविषयसुखकालेपिदुःखंयोगिनांप्रतिकूलात्मकंतिष्ठतीत्यर्थः दुःखत्वंसाधनयोरे
करूपेणाग्रहणायप्रतिकूलात्मकमित्युक्तं मठानांदुःखसमुद्रमग्नानांसुखनांतरीयकसूक्ष्म
दुःखेषुदृष्टिर्नास्तीतियोगिनइत्युक्तं यथाचलोकिकदुःखमिवविषयसुखमपिदुःखशबल
तयादुःखत्वेनहेयमेवेतिभावः यद्यपिस्वर्गादौकटुदुःखमिवविषयसुखमपिदुःखशबलतया
दुःखत्वेनहेयमेवेतिभावः यद्यपिस्वर्गादौसुखमधिकंतथाप्यल्पमपिदुःखंबलवद्द्वेषविष
योभवतियत्नवत्त्वेचसुखाभिलाषाभिभावकत्वंतथाचसांख्यसूत्रं यथादुःखाद्द्वेषःपुरुषस्य

नतथा सुखादभिलाव इति अस्मिन्सूत्रे सुखदुःखयोरिव कर्मविपाकफलत्ववचनात् जीव
न्मुक्तानामपि प्रारब्धविपाके सुखदुःखपरिभवतरणवत्स्वाभिमानिके तु न भवतः तत्कार
णक्लेशाभावादिति सिद्धांतः तथा च श्रुतिः नह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्तीति
आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् इति
च स्मृतिश्च वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यत इति सूत्रांतरमवतारयति तं सुखस्या
पि ज्ञानिदृष्ट्या दुःखत्वे हेतुं प्रच्छति कथमिति तदुपपादकतयोत्तरसूत्रमवतारयति तदुप
पद्यत इति परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः परिणा
मश्च तापश्च संस्कारश्च तज्जन्यानि दुःखानि तैः सर्वं व्याप्तं तत्कारणत्वादिति यावत् तथा गु
णवृत्तिविरोधाद्वा यतो दुःखसंभिन्नत्वाच्च प्रकृतितत्कार्यसुखादिकं सर्वं दुःखमेव विवेकि
नः सुखदुःखतत्त्वसाक्षात्कारिणो मतमिति वाक्यार्थः प्रतिपदं व्याख्या च भाष्ये भविष्यति
एवकारेण चानुकूलात्मकसुखरूपतां व्यवच्छिनत्ति यद्यप्ययोगिनोपि दुःखमेव सर्वं तथापि
संमूढत्वात् सुखकाले दुःखतया न जानाति योगी तु सुखकालेपि तस्य दुःखात्मकत्वं पश्यती ७८
ति प्रतिपादयितुं विवेकिन इत्युक्तं ननु सुखसाधनं तथा सुखं संभिन्न तथा च सुखमेव कथ

संबंधं न भवतीति चेन्न दुःखेषु बलवद्द्वेषस्योक्तत्वात् सामान्यतो बाहुल्यस्याप्यत्र निपातमत्र
त्वञ्च विरोध्यात्तदाद इति स्यापात् तदुक्तं विषयप्रणो कलत्रमित्रपुत्राद्येर्गृहक्षेत्रधना
दिकैः क्रियते तन्न आभरिसुखं पुंसां यथाऽसुखमिति संसारे च सुखापेक्षया दुःखबाहुल्यं जै
गीषव्याससंवादेप्युक्तं भविष्यतीति तत्र परिणामदुःखं हेतुतया सुखस्यापि दुःखत्वं प्र
तिपादयति सर्वस्यापमिति उत्सर्गतः सर्वलोकस्य सुखानुभवकाले तत्सुखे रागो जा
यते रागाच्च सुखमिदमेव स्थिरं भवतु परमेश्वरमानस्यपत्नीत्यादिसकसात्मको मानसः कर्मा
शयो धर्माधर्मरूपो भवति कर्माशयाच्च जन्मादि दुःखमिति प्रागेवोक्तमिति अर्थः सुखभोग
काले रागजकर्माशयवद्द्वेषमोहतोपि कर्माशयः परिणामदुःखहेतुरस्तीत्याह तथा च द्वेषी
ति तथा सुखभोगकाले तद्विरोधितया दुःखसाधनानि द्वेष्टि सुखं भ्रंशदुःखं मे माभूयात्
यान्नुभवमेवनत्यत्तित्यादिरूपेण तथा दुःखसाधनानि परिहर्तुमशक्तो मुह्यति चेत्यतो द्वेष
मोहकृतोप्यस्ति कर्माशय इत्यर्थः रागद्वेषमोहानां च प्रवृत्त्यादिद्वारेण बलात्कारादप्यदुःखहेतु
त्वमस्तीति तथा वोक्तमिति सुखस्य रागानुविद्धत्वं च भाष्ये चोक्तं सुखानुशयी राग इति सूत्रेसु
खाभिज्ञस्येत्यादि भाष्येण त्यर्थः मानसकर्माशयद्वारा सुखस्य परिणामदुःखत्वं प्रतिपाद्य

शारीरकर्माशयद्वारापि तद्दाहनानुपहत्येति शारीरः कर्माशय इति सुखभोगकाल इति शे
षः एताभ्यां च मानसशारीराभ्यां कर्माशयाभ्यां वाचनिकोपि कर्माशयः शापाशीर्वादजन्यउ
पलक्षणीयः सुखस्यापि परिणामदुखत्वं येन दुखत्वेन विद्यासूत्रे प्रमाणीकृत्योपपादय
ति विषयसुखं चेत्यादिना ननु सर्वे दुखोत्तरा वेदं वस्तुमवितुमिति चेन्न सुखस्याविद्यात्वोप
पादनात् अत्र च वक्ष्यमाणपादनकालारावद्दृष्टद्वारापि परिणामदुखमुपदेष्टुमादावेव विष
यसुखस्याविद्यात्वप्रतिपादनात् अत्र च वक्ष्यमाणपारमार्थिकसुखस्यावर्त्तनाय विषयेसु
खं अविद्या विषयपदार्थानां बुद्धिमात्रतया सुखमविच्छिन्नभेदनिर्देशः भोगेन सुखं भव
तीत्येवं रूपा भोगजदुःखे सुखबुद्धिरविद्या सा चाविद्या न तत्सूत्रे विवेचितात्मनो नाम
विद्याप्रतिपादयन्नेवम्प्रकारान्तरेण परिणामदुःखं दर्शयति याभोगेष्विति तत्रादौ पारमार्थि
के सुखदुःखविकल्पयति नदुःखमित्यंते नन्वयं भावः विषयसुखं पारमार्थिकसुखं न भवति
दुःखबहुलत्वेन दुःखसंभिन्नत्वेन च विवेकिनां निरुपाधिप्रियत्वाभावात् सुखानुशयीरा
ग इति सूत्रानुसारेण निरुपाधिप्रियत्वस्यैव सुखलक्षणत्वादिति अतः शांतिस्त्विन्नस्यापा ७९
रोपरमस्तन्निमित्तिकादुःखनिवृत्तिरिति यावत् सैव पारमार्थिकं सुखं सुखेडः स्वंसुखात्मय

इति स्मरणात् तस्मादिदुःखासंभिन्नतया विशेषदर्शिनामपि निरुपाधिप्रियत्वाच्च तस्यैव साधनं
भोगेष्विंद्रियाणां तृप्तिरिच्छाविच्छेदश्च न त्वावश्यकानि। सराकोचलक्षणानंदः श्रोत्रियस्य चाका
महतस्येति श्रुतिश्च न चाभावयतः शांतिरशांतस्य कुतः सुखमिति अत्र विषयसुखशब्देन
चित्तस्य शांतिनिमित्तकाङ्क्षादोपि गृहीतः तस्यापि दुःखसंभिन्नत्वेन दुःखत्वस्याविद्यालक्षणे
विवक्षितत्वादिति यासौ स्यादिति यावेंद्रियाणां लौल्यात् भोगतस्मात् अभिन्नतस्यानुपशांति
रेतिचांचल्यं तद्दुःखं दुःखबाहुल्यतो विविक्तिभिर्हेयत्वादिसर्थः सुखदुःखयोस्तत्साधनयो
श्चैवं निर्णये सति विषयसुखस्य तत्साधनभोगस्य चाविद्यकमेव सुखत्वं न तत्साधनत्वं चेत्येवं अ
तश्च विषयसुखस्य परिणामदुःखत्वमित्येतत्प्रघट्टकेनाह नचेंद्रियाणामित्यादिना यस्मादसंते
न भोगाभ्यासमन्विति तथा चोक्तं न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णव
र्त्मेव भूय एवाभिवर्द्धत इति वृश्चिकेति वृश्चिकविषभीतः कासादिक्षुद्रदुःखभीत विषयाख्य
सुखार्थी स्त्रीपुत्रादिमयमहादुःखसर्पैर्दष्ट इति दृष्टांतार्थः विषयानुवासित इति परिणाम
दुःखपंकमग्नतायां हेतुरुक्तः विषयसंस्कारसंस्कृत इत्यर्थः परिणामदुःखमुपसंहरन्नेव विवेकि
न इति विशेषणव्याख्यसेमाह एवापरिणामेतिदुःखतादुःखसमूहोत्तननेतिवत् प्रतिबलाद्वेष्या

सुखकालेपियोगिनमेवक्लिश्नातिदुखाकरोतीत्यर्थः सतेपश्यंतिवर्वेणइतिन्यायेनायोगि
नंपरिणामकालएवविषयसुखंदुखाकरोतियोगिनंतुसुखकालएवानर्थहेतुतादर्शनेनदु
खाकरोतीतिभावः क्रमप्राप्तंतापदुखंव्याख्यातुंप्रश्नपित्र्यपवेतेति तापोदुखंकिंतापजन्यदु
खसामान्यमित्यर्थः उत्तरंसर्वस्येतिपूर्ववदेवव्याख्येयं पूर्वंसुखानुभवोरागानुविद्धउक्तःइदं
तीवदुखानुभवोद्वेषानुविद्धउच्यतेइत्येवविशेषइतिसकर्माशयइति सन्तापकालीनःकर्मा
शयोद्वेषेणैवरागमोहाभ्यामपिपूर्ववन्मानसोभवतीत्यर्थः मनसापरिस्पंदनंपदुक्तंतत्का
यिकहिंसार्थमेवनस्वातंत्र्येणमानसकर्माशयहेतुरतोनयोनरुक्तंपच्चपिनापदुखनापा
मपिपरिणामदुखत्वेवात्रमदर्श्यतेतत्थापिपूर्वकालउत्तरकालेचसर्वदैवदुखत्वात्तापज
दुखस्यपरिणामदुःखात्पृथग्निर्देशःअतःपरिणामात्तदुखंपरिणामदुखमितिबोध्यं क्रम
प्राप्तंसंस्कारदुखंप्रदर्शयतिकापुनरितिसुखदुखसंस्कारजन्यदुखसामान्यमित्यर्थः उत्तरंसु
खानुभवादितित्रत्रेयंप्रक्रियात्मादौसुखदुःखानुभवेस्तत्संस्कारशयोनदुद्भूसंस्कारलतः
कालादिविशेषेस्तदुद्बोधः ततस्मृतिस्ततोरागद्वेषौतयोश्चप्रवृत्तिः ततश्चपुनर्दुखमिति
ज्ञानसंस्कारान्नदुखंप्रतिपाद्यधर्माधर्मरूपात् कर्मसंस्कारादपिदुखंप्रतिपादयतिएवंकर्म ८०

भ्यइतिसुखदुखरूपेविपाकइत्यन्वयः नन्विदमपिपरिणामदुखत्वेनेतिचेत् सत्यंतथापिसं
स्कारपरंपरायात्र्यनंतदुःखप्रतिपादनायगोवलीवर्दन्यायेनास्यदुखस्यपृथगुपन्यासोबो
ध्यः विवेकिनइतिविशेषणस्याभिप्रायंविस्तरतःसकलदुखसाधारणमाहएवमिदमिति
स्वाभाविकत्वपात्र्यंनतत्वलाभापानादौयुक्तंस्तोतसोविशेषणंविप्रसृतमितिविस्तीर्णमि
त्यर्थः अत्यतःपात्रेणआधारेणगोलकेनतुस्तोविद्धानित्युक्तंविवृणोतिपयोर्गेतिरागानि
माविदुखानिइतरमयोगिनंप्रतिपत्तारंएवादिनापरिणामदुखत्वातारमप्यविद्धंसमित्य
र्थः इतरेतवर्तमानकालएवक्लिश्यंतीत्याह इतरंत्विति इतरंत्वयोगिनंनित्यर्वाणत्वात्
नुस्वोत्पत्त्यनंतरमेवप्रवर्तेत्याप्नुवंतीत्यन्वयः नतुपरंमितिशेषः आधिभौतिकाधिदैवि
काध्यात्मिकरूपाणिपर्वाणिपेषांतापानांतेतथात्रिपर्वत्वेहेतुगर्भविशेषणंवास्येतिबा
ह्यंशब्देनाधिभौतिकाधिदैविकयोर्ग्रहणंइतरस्यविशेषणंतरमनादौस्याचनुपातिनमि
त्यत्रतएत्यंतं अनादिवासनाभिर्विचित्राभिःनानारूपयाचित्तवृत्त्याचित्तनिषयात्र्यविद्यया
ऽनुविद्धंलिप्तमिवअत्रतरावहातव्येपिदेहेंद्रियादावहंकारममकारंवेतमिवेत्यर्थः आत्मनोऽ
विद्यातिताद्यभावप्रतिपादनायदूषोत्याद्युक्तंशेषप्रतिरोहितंपरिणामादिदुखत्रयस्यसोवि

नोऽविद्यात्मिकाया भावप्रतिपादनाय ज्ञानेन यद्यत्फलं तदपि प्रसंगादाह तदेवमिति सूत्रं
गुणवृत्तिविरोधाच्चेति हेतुं व्याख्यानुक्तो योऽयं न्यायगुणो त्रिगुणानां सत्त्वादीनां पर्वस्वतिश
यास्तेषामेव विरोधः राक्षदानवस्थानं न तु सम नाधिकभावेन वृत्तौ नो विरोधोऽस्ति अतः प्राधा
न्येन सत्त्वपरिणामे सुखात्मकचित्तवृत्तावपि तदुपसर्जनतया रजोंऽशपरिणामभवत्वं दुःखमप्य
स्त्यस्येवेति दुःखसंभिन्नत्वात्सर्वे सुखाद्यपि दुःखमेव विवेकदृष्ट्येति तस्य दृष्टस्यार्थः गुण
वृत्तिविरोधादिति प्रमादिकपाठे तु गुणवृत्त्यतिशयस्यैव विरोधादित्यर्थः तदेतद्व्याचष्टे प्र
ख्याप्रवृत्तीति प्रख्या प्रकाशः प्रवृत्तिः क्रिया स्थितिः स्तंभः धर्मधर्म्यभेदात्तद्रूपाः सत्त्वाद्यो
बुद्धिरूपेण परिणता गुणाः परस्परसाहाय्याः सन्तः शान्तादिरूपं प्रत्ययं वृत्तिं त्रिगुणं सुखदुःख
मोहवेत्तमेवारंभन्ते सुखादीनां हन्तादिकार्यत्वात्तयः कश्चन प्रत्ययः शान्तो वा घोरो वा मूढो वा
भवति स सर्वोऽपि त्रिगुण एव नैकैकमात्रगुण इत्यर्थः शान्तादिपरिभाषा त्वयं च सुखदुःख
मोहाधिक्यमात्रेणेति तथा च सुखवृत्त्यपि प्रत्यये दुःखमस्त्येव न्यूनतरांशप्रत्ययोपादानतया तेन सु
खेऽपि दुःखस्याविभागलक्षणो भेदो हरीतक्यामिव षण्णां रसानामिति प्रत्ययरूपबुद्धिवृत्तिः प्र २९
दीपशिखावत् बुद्धेः शिखाद्रव्यरूपा भागगुणास्यात्त्वात्तरं वृत्तिः संबंधाद्येसत्यैनीतिसामा

स्त्वात्मतः प्रत्ययस्य सुखादिगुणवृत्त्याश्रय इति ननु सुखकाले सूक्ष्मो दुःखात्मको रजःपरि
णामोऽपि यमेन भवतीत्यत्र किं मानं तत्राह चलं चेति प्रदीपावयवानामिव बुद्ध्यवयवानां गु
णानां वृत्तं क्रियाचं चलं प्रतिक्षणमन्यथा च भवति न तु निर्व्यापारा गुणाः स्थितिं तिष्ठन्ति तत्क्षणि
केऽस्मिन्नस्मिन्परिणामस्तु क्रमिकमित्यर्थः यद्यपि सर्वमेव जडवस्तु प्रतिक्षणपरिणामि तथापि स
त्त्वाभिप्रायेण चित्तमिति विशेषवचनं तथा च चित्तगतस्य सत्त्वस्य वृत्तिकाले रजसो वृत्तिर
वश्यकीति भावः नन्वेकरूपप्रत्ययः कथं विरुद्धसुखादिरूपात्मकः स्यात् तत्राह रूपातिश
या इति बुद्धेरूपाण्यष्टौ भावा धर्मादयो धर्मज्ञानवैराग्यैश्वर्यो धर्माज्ञानावैराग्यानैश्वर्यो
णि वृत्तयश्च द्रव्यरूपाः शान्तादिनामकाः परिणामास्तेषामतिशया उत्कर्षा एव परस्परं विरु
ध्यन्ते यदा धर्म उत्कृष्यते तदा नाधर्म उत्कृष्यते एवं यदा ज्ञानादि तदा नाज्ञानादि तथा शान्त
घुत्कर्षकाले घोराद्युत्कर्षो न विरुध्यते सामान्यानि त्वपकृष्टानि अतिशयैः सह प्रवर्तन्त एवे
त्यर्थः ननु भवतु चित्तस्य सुखात्मकप्रत्यये दुःखत्वं सुखात्मकेषु शब्दादिविषयेषु तु कुतो
दुःखत्वं येन सर्वं दुःखं स्यादित्यत आह एवमेत इति यथा चित्तस्य प्रत्यया एवमेव सर्वे पदार्थाः
सर्वे रूपाः सुखदुःखमोहधर्मका भवंतीति यतस्ते गुणाः सत्त्वादयो घटादिरूपेणापि परिण

ताः परस्परसाहित्येनोत्पादितसुखदुःखमोहात्मकप्रत्यया इतीत्यर्थः नहि विषयगत
वैषम्यगतविशेषं विना विषयसंबंधमात्रेण सुखाद्यात्मकचित्तवृत्तिहेतुत्वमर्हति अप्र
वस्थापत्तेः विषयगतविशेषश्च चित्तगतसुखादिनियामकत्वेनाह विशेषः सुखादिरूपत
वविषयेषु कल्प्यते कार्यानुरूपस्यैव कारणस्यौचित्यात् अतो विषयेपि सुखादिधर्मान्तरं
सुखादिवत्सिध्यतीति भावः ननु सुखदुःखरूपादिवद्विषयधर्मोस्यान्तां मोहस्तु ज्ञानरूपः
कथं विषयधर्मः स्यादिति चेन्न अस्मिंस्तदाकारतामात्रस्यैव मोहशब्दार्थत्वात् सा च विष
येष्वप्यस्ति महदादिविकारकारणतायाः प्रकृतावपारमार्थिकत्वात् तदुक्तं मोक्षधर्मे ऽज्ञानमो
हात्मकं विद्धि अव्यक्तं व्यक्तसंज्ञकमिति अपि च सर्वकार्याणां बुद्ध्याख्यत्रिगुणात्मकमहत्तत्त्व
स्य परिणामत्वादपि मोहवत्त्वमिति ननु यदि सर्वे सर्वरूपास्तर्हि सर्वं सुखात्मकमपि स्यादि
ति न दुःखस्यापि हेयत्वं स्यादित्याशंकायामाह गुणप्रधानेति तथा च दुःखबहुलतया दुःख
प्राधान्याद्दुःखमेवेत्युक्तं न सुखं विशेष्यान्तद्वाद इति न्यायेनेति भावः उपसंहरति तस्मादिति
तस्मात्परिणामेत्यादिसौत्रहेतुत्रयादित्यर्थः तदेवमत्र प्रधानादेर्व्युत्थितचित्तस्य योगसा ८२
धनं क्रियायोगमुक्त्वा तत्प्रसंगेन क्लेशास्तद्धानोपायस्तथा हेयत्वाय दुःखनिदानं चेह

खं च प्रतिपादितं इदानीं संक्षेपेणोक्तं समग्रशास्त्रार्थं विस्तरेण सूत्रकारः पुनर्वदति सूत्रजा
तैः शास्त्रसमाप्तिपर्यन्तैः तान्यवतारयितुं तेषां विषयज्ञानमादौ समासतः संक्षेप्य दर्शयति
तदस्येति तत्तस्मादस्य ह्येयस्य सामान्यरूपस्य दुःखस्य महतः सन्तेर्बीजं मुख्यं निमित्तकारणमवि
द्याप्रभवक्लेशास्तस्याश्चाविद्यायाः समन्ततोच्छेदहेतुस्तत्त्वज्ञानं तत्र तत्प्रविविक्ता शास्त्रवदिदं योगशा
स्त्रं चतुर्व्यूहं चत्वारो व्यूहा हेयादीनां गणशः प्रतिपाद्यास्मिन्निति चतुर्व्यूहमित्यर्थः रोगादि
तुल्यत्वप्रतिपादयन्नेव तेषां व्यूहानां स्वरूपाण्याह तत्र दुःखेति संसरत्यस्मिन्निति संसारो ऽत्र प्र
पंचः ननु दुःखमेव हेयमिति वक्ष्यति तत् कथं संसारो हेय उच्यते तत्राह दुःखबहुल इति दुःखब
हुलत्वात्संसारस्य दुःखमित्यर्थः प्रधानेति नन्वविद्या दुःखहेतुरित्युक्ता संयोगः कथमत्र
दुःखहेतुरुच्यत इति चेत् व्यापारकथनायेत्यवेहि अविद्या हि बुद्धिपुरुषसंयोगाख्यजन्म
द्वारैव दुःखहेतुः कार्यकारणाभेदेन चैवेत्यबुद्धिरत्र प्रधानशब्दार्थः द्रष्टृदृश्ययोः संयोगो हे
यहेतुरित्यागामिसूत्रादिति संयोगस्येति उक्तसंयोगस्यात्यन्तिकी निवृत्तिरेव हानं दुःखहानमि
ति यावत् तद्धानकारणत्वादित्यर्थः हानोपाय इति सम्यक् प्रकृतिपुरुषविवेकसाक्षात्कारो दुः
खहानोपायो मोक्षोपाय इत्यर्थः असंप्रज्ञातयोगस्त्वभ्युत्तरमोक्षार्थमेवास्त इत्याशयः

येन योगो हानोपायतयाऽत्र नोक्तः ये तु नास्तिकाभ्युपेते संयोगहानं न मोक्षः किं तु चित्तरूपस्या-
त्मनस्त्याग एव मोक्षः किं वा संसारिविज्ञानसंतानोच्छेदेन जीवन्मुक्तविज्ञानसंतानलाभ ए-
व मोक्ष इति तन्मतनिरसनाय नैकं स्वशास्त्रस्यैव सम्यग्दर्शनत्वमवधारयति तद्धीति तत्र व-
स्तुस्वरूपमध्ये आत्मनो हानं उपादानं वा न पुरुषार्थ इत्यर्थः इति शब्दस्य हेतुवाद इत्यनेनान्व-
यः उक्तार्थे हेतुमाह हाने तस्येति तस्य हाने स्वत्यागे हि स्वोच्छेदवचनं प्रसज्येत स्वत्याग-
स्य भेदनं च स्वेनात्मनः असंभवात् तच्चायुक्तं स्वनाशस्य लोके पुरुषार्थत्वादर्शनात् स्वीयत्वेनैव स-
स्वदुःखाभावयोः पुरुषार्थत्वादित्यर्थः स्वयं म्रियमाणोऽपि दुःखहानार्थमेवाग्निप्रवेशादौ प्र-
वर्तते न तु स्वनाशार्थमिति भावः हेतुवाद इति हेतुः स्वरूपस्य सकारणतावादः स्यात् तथा च
भावकार्यत्वेन विनाशित्वप्रसंग इत्यर्थः उभयेति इत्यतो हानोपादानोभयनिषेधे स्वयं नित्य-
तावाद एव परिशेषात् सिध्यतीत्यनन्तरं तदेतदयोक्तं चतुर्व्यूहं शास्त्रं सम्यग्दर्शनं सम्यग्दृश्यते
नेनेति व्युत्पत्त्येत्यर्थः इदानीं वक्ष्यमाणसूत्रगणमवतारयति तदेतदिति तदेतच्छास्त्रं चतुर्व्यू-
हमिति क्रमेणाभिधीयते प्रतिपाद्यते सूत्रकारेणेत्यर्थः हेयं दुःखमनागतं अनागतमिति ८३
विशेषणस्य फलमाह दुःखमतीतमित्यादिना अतिवाहितमतिक्रान्तं अतः सिद्धतया तद्धानं न

पुरुषार्थः तथा वर्तमानमपि स्वसत्ताक्षणे भुज्यत एवेति तथा त्यक्तुं न शक्यते स्वोत्तरक्षणेत्यन्त्यक्ष-
णे न च तृतीयक्षणे स्वयमेव भंक्ष्यतीति तद्धानार्थः प्रयासो विफल इत्यर्थः नन्वेवमनाग-
तस्यापि हेयत्वं न घटते परचित्तदुःखस्य स्वचित्तस्थत्वेनैवाभावात् स्वचित्तवृत्त्यनागतदुःख-
स्याग्राह्यं भावित्वात् अन्यथासत्त्वे प्रमाणाभावादिति चेन्न स्वचित्तस्यैवानागतदुःखस्य का-
रणोच्छेदेनात्यन्ताहेयत्वात् वर्तमानलक्षणमप्राप्तस्याप्यनागतदुःखस्य चित्तनाशेन नाश-
त्वकदाचिद्वर्तमानोऽपि चानागतधर्मोऽनुमानात् सिध्यति सर्वं सर्वात्मकमिति भाष्यकारेणत-
त्रोपपादे सर्वत्रैव परिणामिवस्तुनि विकारजननशक्तेः कार्यानागतावस्थारूपायाः जलभू-
म्यादिदृष्टान्तैः शान्तोदिताव्यपदेश्येत्यादिसूत्रेऽनुमेयत्वादिति शेषं पूर्वसूत्रे व्याख्यातप्रायं
अस्माच्च सूत्रादात्यन्तिकी दुःखनिवृत्तिरेव मोक्ष इति सिद्धं अस्मिन् सूत्रे दुःखं मुख्यमेव ग्रा-
ह्यं मुख्यस्यैव स्वतो हेयत्वात् तद्धानं च समवायसंबंधेन यद्यपि स्वरूपेण नित्यसिद्धं तथापि भो-
ग्यतारूपस्वत्वसंबंधेन घटादीनामिव तद्धानं न नित्यसिद्धमिति तेन संबंधेन तद्धानं पुरुषा-
र्थ इत्याशयः तथाहि नश्यति तस्मिन् निवर्त्ते पुरुषः पुनरिदं तापत्रयं न भुङ्क्ते इति तदेतदुक्तं सा-
ख्यसूत्रयोः त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ इति दुःखात्यन्तविमोक्षोऽपवर्ग इति च

यत्तु आनंदत्वलक्षणो रूपं तच्च मोक्षे प्रतिबिंबनं इत्येवंविधवाक्यजातं तत् दुःखनिवृत्त्याख्यास्व
खपहेरमिव तदानीमभोग्यसुखस्यापुरुषार्थत्वात् सुखं दुःखसुखात्पर इति परिभाषया हृद्वि
बाधनाच्च हेयस्य सूत्रं व्याख्याय क्रमप्राप्तहेयहेतुप्रतिपादकं सूत्रमवतारयति तस्माद्धेयहे
यमिति द्रष्टृदृश्ययोः संयोगो हेयहेतुः द्रष्टृपदार्थमाह द्रष्टेति बुद्धेः प्रतिसंवेदनं संवेदनस्य बुद्धि
वृत्तेः प्रतिबिंबः प्रतिच्छविवदयं प्रयोगः सोऽस्यास्तीति बुद्धिसाक्षीति फलितार्थः दृश्यपदार्थमा
ह दृश्या बुद्धिसत्त्वेति बुद्धिसत्त्वस्यापि दृश्यत्वेनात्र विशेषणत्वं विवक्षितं धर्मा इति च बुद्ध्यारूढ
त्वेन बुद्धिधर्मत्वमभिप्रेत्योक्तं न तु बुद्धिकार्यत्वाभिप्रायेण प्रधानादेरपि दृश्यत्वेन तत्त्यागानौचि
त्यात् उक्तसूत्रे प्रधानस्यैवास्मत्यतो दृश्यत्ववचनाच्च यद्यपि बुद्ध्यारूढो भवत्पुरुषोपि दृश्यः त
थापि तस्य निर्दुःखतया तद्दर्शनं न हेयहेतुरित्याशयेनात्र दृश्यमध्ये पुरुषं न गणयतीति त
था च सुखदुःखमोहात्मकदृश्यवत्या स्वयं च दृश्यया बुद्ध्या सह द्रष्टुः साक्षिणः काष्ठाग्निवत् संयो
गो बंधाख्यः पुरुषस्य दुःखहेतुरिति सूत्रार्थः ननु बुध्यारूढे दृश्ये द्रष्टुर्ज्ञानरूपः संयोगो हेयहेतुर
स्तु विवक्षितः स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोग इत्यागामिसूत्रेणास्य संयोगस्य ज्ञानहे ८४
तुत्वेनैव लक्षणीयत्वात् न तु ज्ञानरूपत्वेनेति मैवं तस्माच्च सूत्रात् बुद्ध्यात्मसंयोगवत् घटात्मसं

योगोपि भोगहेतुर्बोध्यः भोक्तृभोग्यसंयोगस्यैव सामान्यतो भोगहेतुता या लाघवेनौचित्यात् विषयभो
गे च बुद्ध्यवच्छेदेन विषयसंयोगस्य हेतुत्वात् नातिप्रसंग इति अस्य च संयोगस्य पुरुषार्थो हेतुरिति व
क्तुं सकलपुरुषार्थवत्त्वरूपं स्वत्वं तद्वतो पुरुषस्य प्रतिपादयति तदेतदिति न च नस्य हेतुरविद्येत्यागामि
सूत्रेणैव संयोगस्य कारणं वक्ष्यत इति नास्ति संयोगकारणाकांक्षेति वाच्यं अविद्याया अपि पुरुषा
र्थसमाप्तिद्वारैव बंधहेतुतायाः वक्ष्यमाणत्वादिति तदेतदित्यादेरयमर्थः तत् बुद्धिसत्त्वं एतज्जगद्
दृश्यं यत्रालीनेतदृश्यं अतो अयस्कान्तवत्संनिधिमात्रेणोपकारितया स्वयं दृश्यतया च ज्ञानमात्रस्व
रूपस्य स्वामिनः पुरुषस्य स्वमात्मीयं भवतीति ननु बुद्धेः कथमन्यः स्वामी स्वीक्रियते नैव परतंत्रा
स्वयं द्रष्टृस्वार्थे वा भवति तत्राह अनुभवकर्मेत्यादि यतः कर्मकर्तृविरोधेन तद्दृश्यत्वानुपपत्ता
अनुभवात्मेयत् पुरुषस्य कर्मत्वं द्विषयतामापन्नं संवेदनं अन्यस्वरूपेण पुरुषचैतन्येन प्रतिल
ब्धात्मकं सिद्धसत्ताकं अन्यस्वरूपेणास्य प्रयोजनेन लब्धस्थितिकं वा अतः स्वतंत्रं पुरुषान्नाश्रितम
पि परार्थत्वात् परतंत्रे पयस्य स्वामित्वं अर्थः तदेवं दृश्यत्व भोग्यात्मकाखिलपुरुषार्थस्य बुद्धिनिष्ठ
त्वे सिद्धे सत एव पुरुषार्थयोग्यतावत्योर्बुद्धिपुरुषयोः संयोगो हेतुरिति वदन् सूत्रवाक्यार्थमाह तयो
रिति तयोः स्वस्वामिनोः दृश्यते नयेति दर्शनं बुद्धिः अनादिरयाः प्रवाहरूपेण पुरुषार्थकृतत्व

वचनात् न च पुरुषस्यार्थसंयोगांगीकारे सत्यपरिणामित्वभंग इति चेत् न सामान्यगुणातिरिक्त
धर्मोत्पत्तेरेव व्यवहारेण सारेण परिणामशब्दार्थत्वावधारणात् अन्यथा संयोगाद्यैराकाशस्य
द्वित्वादिभिश्च पुरुषस्य परिणामत्वव्यवहाराभावात् पद्मपत्रस्य तोयेन पद्मपत्रस्यापरिणामसं
गादिश्रवणाच्च संयोगविभागसंख्यादयस्तु द्रव्यसामान्यगुणा इति अपि च श्रुतिस्मृत्योः सुखा
दिरूपाः परिणामा एव पुरुषेनाभ्युपगम्यंते मनोन्वयव्यतिरेकेण मनस्येव लाघवतस्तत्क
ल्पनात् मनसो वच्छेदकत्वं परिकल्प्यान्यत्र तत्कल्पने गौरवात् संयोगादिकं प्रति तु द्रव्यत्वेनैव
हेतुतया पुरुषस्यापि तत्संभवात् पुरुषस्य द्रव्यत्वं चानाश्रितत्वतः परिमाणतश्च सिद्धमिति
यद्यपि कारणावस्था बुद्धिः पुरुषश्च विभुः तथापि तयोः संयोगः परिच्छिन्नगुणांतरावच्छेदे
न संभवत्येव महदाद्यखिलपरिणामानां त्रिगुणसंयोगं विनानुत्पत्तेः स च संयोगजः संयोगः
न तु कर्मजः अवयवसंयोगाद्वयविसंयोगवदवच्छेदकीभूतगुणसंयोगात् एव विभ्वोः सं
योगोत्पत्तेः भूतलस्य घटसंयोगेन घटावच्छिन्नाकाशसंयोगोत्पत्तिवत् वैशेषिकशास्त्रे वि
भ्वोः संयोगश्च साक्षादेव निषिद्धः न तु संयोगजः संयोग इति यदि चात्मनः संयोग एव नास्ती ८५
ति स्वीक्रियेत तर्हि प्रकृतिपुरुषसंयोगात्सृष्टिस्तद्वियोगतश्च प्रलय इति श्रुतिस्मृतिसूत्राणि नो

पद्येरन् न च भोक्तृभोग्ययोग्यतैवात्रोपचारिको त्र संयोगो वक्तव्यः तस्याः स्वस्वामिभावरूप
त्वेनानादितया कार्यत्वस्यांजस्यानुपपत्तेः किं च तस्याश्चाविनाशित्वे ज्ञाननाश्यत्ववचनविरोधः
नाशित्वे परिणामः पुरुषस्य स्यादिति ननु संयोगस्वीकारे पुरुषस्यासंगताक्षतिरिति चेत् न पुष्क
रपत्रे पुरुषदृष्टांते संयोगसत्वेप्यसंगत्वाभ्युगमात् स्वाश्रयविकारहेतुसंयोगस्यैव संगत्वात्
पुरुषे च तादृशसंयोगास्वीकारादिति तस्मात्पुरुषार्थनिमित्तको बुद्धिपुरुषयोः संयोगो भव
ति स एव च जन्मरूपतया दुःखहेतुरिति सिद्धं स च संयोगविशेषः परमेश्वरस्य योगमायायो
गीन्द्रैरप्यचिंत्यः श्रुतिस्मृतिगम्यानविशेषतस्तर्कगोचरो भवति यथा खलु नित्यसत्त्वमसंग
मविद्यादिरहितं विभु चिन्मात्रमात्मानं न जीव जातमीश्वरो निबध्नाति तथा चोक्तं अचिंत्याः ख
लु ये भावा न तांस्तर्केण योजयेदिति सेयं भगवतो माया यन्नयेन विरुध्यते ईश्वरस्य विमुक्त
स्य कार्ये एषमुत बंधनमिति च संयोगस्य दुःखहेतुत्वे पंचशिखाचार्यस्य संवादस्माह तद्यथा चो
क्तमित्यादिना प्रतीकार इत्यंते न तयोर्बुद्धिपुरुषयोः संयोगो दुःखहेतुस्तस्य परिवर्जनादत्यंतो
च्छेदात् दुःखस्यात्यंतिकः प्रतीकार उच्छेदः स्यादित्यर्थः नन्वनादिकालप्रवृत्तस्य दुःखहेतुसंयो
गस्योच्छेदो न शक्यः संभावन इत्याशयेन प्रकृतिप्रसंगात्तदुच्छेदकारणमवधारयति तं कस्मादिति उ

त्रंदुखहेतोरिति परिहार्यस्येत्यनेन प्रकृत्यादिनित्यव्यावृत्तिः तथा च दुखहेतुत्वनित्यत्वलिंगेन सं
योगस्य शक्योच्छेदकत्वं चानुमेयमित्याशयः दुखहेतोः प्रतीकार्यत्वे लौकिकमुदाहरणमाह तद्य
थेति भेद्यत्वं भेदजदुखभागित्वं भेत्तृत्वं च भेदद्वारा दुखहेतुत्वं पादानधिष्ठानं पादेनानारोह
णं पादत्राणमुपानत् तद्व्यवहितेन वा पदा कंटकस्यारोहणमित्यर्थः एतत्त्रयं दुखाद्यपदुखहे
तु तत्परीहारोपायरूपमित्यर्थः योवेदेत्यनेनैतत्त्रयज्ञानस्य प्रतीकारहेतुत्वं वदन् एतत्त्रयं म
मुक्षुभिर्ज्ञेयमित्यपि सूचितवान् ननु तापो दुखमिति पर्यायः तथा च दृष्टांते यथा भेद्यमेत
प्रतीकाररूपं त्रितयमस्ति नैवं दार्ष्टांतिके तत्रैकस्या बुद्धेरेव तप्यतापकोभयरूपत्वाभ्युपगमा
त्पुरुषस्य निर्दुखत्वादित्याक्षिपति कस्मादिति सिद्धांतमाह त्रित्वोपलब्धीति वाध्यदुःखस्यल
उक्तत्रयोपलब्धिबलादंतःदुखःस्थानेपित्रयसिद्धिरिति भावः तस्य प्रकारमाह तत्रापीति त
त्रापि दार्ष्टांतिकेपि त्रयं भावः बुद्धेरेकत्वेपि त्रिगुणात्मकत्वादंशत्रयमस्ति तत्र रजोंशस्तापकः
सात्वांशस्तप्यो बुद्धिपुरुषयोर्वियोगश्च दुखप्रतीकार इति त्रयमुपपन्नमिति ननु पुरुष एकरू
पं न तप्यो भवतीत्याशयेन पृच्छति कस्मादिति सिद्धांतमाह तथापीत्यादिना क्षेत्रज्ञेस्यं तेन
कर्मस्थत्वात् कर्मतंत्रत्वात् सकर्मकत्वादिति यावत् कर्मत्वं च क्रियाव्याप्यत्वं दुखव्याप्यत्वं वाः परि ८६

णामिनि न संभवतीत्यर्थः वृत्तिव्याप्यत्वं तु विषयतारूपमपरिणामिन्यपि संभवत्यतो ज्ञानक्रि
याकर्मत्वं पुरुषस्योपपद्यत इति विशेषः यद्वा पुरुषस्य स्वज्ञेयत्वं नद्रपि स्वप्रतिबिंबितबुद्धिवृत्तिव्या
प्यत्वमेवेति न तत्रापि परिणामापेक्षेति नन्वेवं कथं दुखनिवृत्तिः पुरुषार्थः परदुखस्याहेयत्वात्
च व पुरुषनिष्ठत्वभ्रमात् दुखं हेयं स्यादिति वाच्यं विदुषामपि दुखहानार्थमसंप्रज्ञातार्थितायाः
सीकारादित्याशंकां समाधत्ते दर्शितविषयत्वादित्यादिना पुरुषो यतो दर्शितविषयो बुद्धिसत्त्वेन
निवेदितविषयो तः सत्त्वे तप्यमाने सति प्रतिबिंबरूपेण बुद्धिसत्त्वसमानाकारो भवन्ननुतप्यत इ
तिमृदैद्वेव्यते त्वनुतप्यत इवेत्यर्थः न हि स्वाकारप्रतिबिंबनातिरिक्तं विषयनिवेदनमपरिणा
मिनि संभवति प्रतिपादितं चैतद्वृत्तिसारूप्यमितरत्रेति सूत्रेन यथा च प्रतिबिंबरूपेण भोगाख्य
संबंधेन विदुषामपि दुखस्य हेयत्वान्न पुरुषार्थासंभवदोष इति भावः येन पुरुषस्य भोक्तृत्वम
पि नेच्छंति तेषामेवाधुनिकवेदांतिब्रुवाणामयं दोषः इदानीं द्रष्टृदृश्यसंयोगानां त्रयाणामेवस्वरू
पं सूत्रकारो वक्ष्यतीति तत्र दृश्यरूपप्रतिपादकं सूत्रमवतारयति दृश्यस्वरूपमुच्यत इति त्रयपा
ठक्रमे विपरीत्येनादौ परीत्येनादौ दृश्यकथनस्य बीजं दृशिमात्र इत्यागामिसूत्रे मात्रपदेनाखि
लदृश्यभेदतो द्रष्टा प्रतिपादनीयः तत्र च प्रतियोगिनां दृश्यानां ज्ञानाभाव इत्यादावपेक्ष्यम इति

पूर्वसूत्रेव प्राधान्यमादायैव दुःखरूपस्यास्य इति बोध्यं प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भो
गापवर्गार्थं दृश्यं तत्र प्रकाशादिकार्यभागवाच्येऽपि शेषादानं प्रकाशो बुद्ध्यादिवृत्तिरूपा
लोको भौतिकालोकश्च क्रिया प्रवृत्तिः स्पन्दनं च स्थितिः प्रकाशक्रिययोरभावो ऽस्य स्वरूपत्वेन
यः प्रतिबंध इति यावत् तच्छीलं गुणात्मकमिति विशेष्यपदमत्रोत्तरसूत्रे गुणपर्वाणीति विभा
गवर्णनात् लभ्यते एतदेव भाष्यकारैरेते गुणा इति व्याख्यातं नादृशे गुणे प्रमाणमाह भूते
न्द्रियेति भूतेन्द्रियात्मकस्य स्थूलसूक्ष्मरूपाणां भूतानां स्थूलसूक्ष्मरूपाणां चेन्द्रियाणां कारणं तेन
महदादिनिखिलकार्यकारणत्वमेव सत्त्वत्र गुणेषु तेषां प्रकाशादिरूपाणां चेन्द्रियाणां त्रिगुणात्म
कानां जडकार्याणां त्रिगुणात्मकजडकारणं विनानुपपत्तेरिति गुणानां कार्यमुक्त्वा स्वरूपसत्ताप्रयो
जकं प्रयोजनमाह भोगापवर्गार्थमिति भोगापवर्गप्रयोजनवदिति सूत्रार्थः नन्वेवं गुणत्र
यस्यैव दृश्यत्वं प्राप्तं न तु विकाराणामिति चेन्न गुणपर्वत्वेनोत्तरसूत्रेण तेषामपि संग्राह्यत्वा
दिति तदेतत्सूत्रं व्याचष्टे प्रकाशशीलमिति ननु सत्त्वादिगुणा एव चेत् प्रकाशादिशीला दृश्यत्वे
नाशेऽक्तास्तर्हि प्रकृत्यवचनात् सूत्रकारस्य न्यूनता तत्राह सत्त्वादिगुणानामेव भूतेन्द्रियात्मक
त्वस्वीकारे प्रकृतिसिद्धान्तक्षतिः नैयायिकादिस्यां शंका गुणा एव प्रकृतिशब्दवाच्याः न तु तद ८७

तिरिक्ता प्रकृतिरस्तीत्यत आह एते गुणा इति एतेन सत्त्वादयो गुणा एव प्रधानशब्दवाच्या
भवन्ति प्रधीयतेऽस्मिन् कार्यजातमित्यादिव्युत्पत्त्या प्रधानप्रकृत्यादिशब्दैरुच्यन्त इत्यन्वयः तथा
च सांख्यसूत्रं सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वादिति सत्त्वादिषु गुणत्वं च पुरुषोपकरणत्वाद्बंध
कत्वाच्च न तु प्रकाशक्रियादिवत् परसमवेतत्वादिति भावः प्रधानशब्दवाच्यत्वोपपादनाय गु
णानामेव जगन्मूलकारणत्वनित्यत्वादिकं हेतुगर्भविशेषणैरुपपादयति परस्परेति सत्त्वस्य
प्रविभागोऽत्राधिकभागः स्वल्पाभ्यां च रजस्तमोभ्यामुपरक्तः संसृष्ट एवं रजस एवं तमसश्चेत्येवं
परस्परोपरक्तप्रविभागाः तथा संयोगविभागधर्माणः परस्परं संयोगविभागस्वभावाः एतेन
गुणानां द्रव्यत्वं सिद्धं तथा इतरेतरसाहाय्येनोत्पादितावयविनः कार्यकारणभेदेन चारंभवा
दाद्विशेषः ननु यदीतरेतरसाहाय्येन सर्वे गुणाः सर्वकार्यकारणानि तर्हि सत्त्वादेरपि क्रियादिहे
तुत्वेन सत्त्वक्रियत्वाद्यापत्त्या प्रकाशादिशक्तिसांकर्यमिति तत्राह परस्परांगांगित्वेऽपीति अंगां
गिभावेनोत्पादितेऽपि द्व्यणुके प्रकाशगुणः सत्त्वस्यैव क्रियागुणो रजस एवं स्थितिगुणस्तमस
एवेत्यतो न प्रकाशादिशक्तिविभागस्य संभेदः संमिश्रणमित्यर्थः तथा तुल्यजातीयातुल्य
जातीयशक्तिभेदानुपातिनः सत्त्वत्वादिना तुल्यजातीया विजातीया अन्योन्यसहकारिशक्तिविशे

षाः तदनुपातिनस्तेषामविशेषेणोपष्टंभकस्वभावादित्यर्थः एतेनसत्वादीनिव्यक्तिरूपे
णानंतानित्रिगुणत्वादिव्यवहारस्तुसत्वत्वादिजातिमात्रेणवैशेषिकाणांनवद्रव्यव्यवहारव
दितिसिद्धं अतएवलघुत्वादिधर्मैरन्योन्यंसाधर्म्यंवैधर्म्यंचगुणानामितिसांख्यसूत्रेणस
त्वादीनांसाधर्म्यवैधर्म्येलघुत्वादिरूपेप्रदर्शितेइति तथाप्रधानवलापोस्वस्वप्राधान्यका
लेऽभिव्यक्तसांनिध्यादिकार्येषुभवतितथागुणत्वेपिइतरोपसर्जनतादशायामपिव्यापार
मात्रेणतथाविषयविधयाप्ययस्कांतमणिवच्छिन्नस्याकर्षकावक्ष्यतिहि अयस्कांतमणि
कल्पाभिषया अपःस्वधर्मेकंचित्तमिति तथाप्रत्ययमंतरेणाभिव्यक्तिविनाशानभिव्यक्ति
कालइतियावत् तदानीमिकतमस्ययस्यकस्यचित्गुणांतरस्यवृत्तिमनुसृत्यवृत्तिमंतः
वर्तपतिशयानामेवविरोधस्योक्तत्वादितिविशेषणावर्गोर्थः रातइत्यमित्युच्यतइतिएतद्गु
णत्रयमेवकार्यकारणभावापन्नंद्रव्यमुच्यतेनास्तितेतोतिरिक्तंद्रव्यंतरमित्यर्थः अतएवच
गुणस्यापिवैशेषिकाभ्यांद्रव्यावकरूपेणाविभक्तंतेवेदांतिभिस्तमायाशब्देनोच्यंतेमायांतु
प्रकृतिंविद्यादितिश्रुतेःतदुक्तंवृद्धवासिष्ठे नामरूपविनिर्मुक्तंयस्मिन्संतिष्ठतेजगत् तमा ८०
हुःप्रकृतिंकेचिन्मायामन्येपरेत्वणूनितिनिस्यादितव्यपदित्रिगुणातिरिक्तप्रकृतिर्नास्ति तदाऽत्र

जामेकांलोहितशुक्लकृष्णामित्यादिश्रुत्युक्तंप्रकृतेरेकत्वादिकंव्याहन्यतेतथाहेतुमदनि
त्यमव्यापिसक्रियमनेकमाश्रितंलिंगं सावयवंपरतंत्रंव्यक्तंविपरीतमव्यक्तंइत्यादिनोक्ता
व्यापकत्वाक्रियत्वनिरवयत्वादिस्मृतिपरंपराप्रधानस्यगुणानांचाधारूपश्चसांख्यादिसि
द्धांतोव्याहन्येततथाशांतेप्रधानस्यगुणात्मपःस्यरन्यापिनरइत्यादिस्मृतिपरंपरासुप्रधान
स्यगुणानांचाधाराधेयभावहेतुहेतुमद्भावयोर्वचनंनोपपद्येततथासत्वंरजस्तमइतिगु
णाःप्रकृतिसंभवाःइतिगीतादिवाक्योक्तंसत्वादेःप्रकृतिकार्यत्वंचानुपपन्नंतथाचाविंशति
तत्वपक्षोपिनोपपद्येतेति अत्रोच्यते पुरुषभेदेनसर्गभेदेनचभेदाभावरावप्रकृतेरेक
त्वमजादिवाक्यैस्तन्मूलकसांख्यादिभिश्चप्रतिपाद्यतेअजावाक्येनयानात्पर्यावधारणात्
भोग्यभोक्त्रोर्हिमध्येभोग्यागुणाभोग्यत्वाभोग्यत्वाभ्यांसर्गभेदेनभिद्यंतेरातेभोगाहार
तेचनेतिमुक्तपुरुषोपकरणानामप्यन्यपुरुषभोग्यत्वात् भोक्तारस्तुपुरुषाः भोक्तृत्वाभोक्तृ
त्वाभ्यांसर्गभेदेनभिद्यंतेपूर्वसर्गमुक्तानोत्तरसर्गेभोक्तारःकित्वन्यएवेति अतःप्रकृतेरेक
पुरुषस्त्वनेकइत्युच्यतेतथानरागुणाःसर्वसर्गेषुसाधारणेभवंतिमहदादिविकाराणांत
सर्गभेदेवभिन्नत्वेस्यप्रमिवच्चातोनव्यक्तेःपुनरनुदयस्यवक्ष्यमाणत्वादिति यदितुप्रकृति

रेकैव व्यक्तिः स्यात् तदानिमित्तमप्रयोजकं प्रकृतीनामिति प्रकृतिबहुत्वसूत्रविरोधः इंद्रो मा
याभिः पुरुरूप ईयत इत्यादिश्रुतिविरोधश्चेति व्यापकत्वं च प्रकृतेः कारणत्वसामान्येनैव
बोध्यं कारणद्रव्यशून्यप्रदेशाभावात् गंधादेः पृथिव्यादिव्यापकत्ववत् महदादिकं तत्सामान्ये
नापि न व्यापकमिति निष्कृतसर्वांशभेदेन प्रकृतेर्व्यापकत्वपरिच्छिन्नत्वयोरभ्युपगमाद्गुणानां
तत्परिणामः प्रकृत्याप्यणुत्वादिस्त्वागामिसूत्रोक्तप्रकृत्यापूरोधटन इति प्रकृतेरक्रियत्वं चाध्यव
सायाभिमानादिरूपप्रतिनियतकर्मशून्यत्वमेव न तु चलनादिकर्मशून्यत्वं प्रधानात् क्षो
भ्यमाणाद्भूतधा पुंसः प्रचलनात् प्रादुरासीन्महद्बीजं प्रधानपुरुषात्मकमित्यादिस्मृतिषु
प्रकृतेरपि चलनापरनामक्षोभावगमात् प्रकृतेर्गुणसाम्यस्य निर्विशेषस्यमानापि चेष्टा
यतः सम्भवात् काल इत्यभिधीयत इति स्पंदक्रियास्मरणाच्च यत्तु क्वचित्पुरुषस्यापि क्षो
भः श्रूयते स संयोगोन्मुखत्वेन गौणः प्रकृतिकर्मणैव संयोगोत्पत्तेरिति प्रकृतेर्निरवयव
त्ववाक्यानि चारंभकावयवनिषेधकानि न तु वनांशनक्षतसानामंशानां निषेधकानि
एतेन एते प्रधानस्य पुण इत्यादिवाक्यान्यप्युपपादितानि वनत्तुरस्य प्रधानस्यांशिनः स्व ८८
साम्यदाडिमादितलस्य गुणरूपतूल्यस्यांशत्वाभ्युपगमादिति पञ्चसंतादीनां प्राकृतिका

पेत्ववचनं तद्व्यवहाराभिप्रायेण प्रकाशादिफलोपहितत्वयैव हि सत्वादिव्यवहारो दृश्यत
इति त्रयस्य गुणनित्यत्वसिद्धांतव्याघातात् त्रखंडैकप्रकृतेर्विचित्रपरिणामासंभवाच्च
संभवे वा महदादिकार्यांतराणामपि केवलप्रकृतेरेव संभवात् गुणकल्पनावैयर्थ्ये किंच
गुणरूपावच्छेदभेदादेव तत्संभव इति चेत् न तथा सति गुणेभ्य एव वैकार्योपपत्तौ तदति
रिक्तप्रकृतिवैयर्थ्यं किंच यदि गुणत्रयातिरिक्ता प्रकृतिः स्यात् तदा गुणसाम्यमनद्रिक्तमप्र
नेचमहामते उच्यते प्रकृतिर्हेतुः प्रधानं कारणं परमित्यादिस्मृतिषु सत्वरजस्तमसां सा
म्यावस्था प्रकृतिरिति सांख्यसूत्रे च साम्यावस्था गुणानां प्रकृतिर्हेतुः प्रधानं कारणं परमि
त्यादिस्मृतिषु सत्वरजस्तमसां प्रकृत्ववचनमात्रस्येनमोपपद्यते च विशेषाविशेषलिंग
मात्रालिंगानि गुणपर्वाणीति व्यक्तसूक्ष्मा गुणात्मानः परिणामक्रमसमाप्तिर्गुणानामित्या
दिसूत्रेषु भाष्ये च गुणानामेव मूलकारणत्ववचनमित्यादिदूषणं स्यादिति साम्यावस्थाव
त्त्वं प्रकृतिलक्षणे विशेषणं त्वपि तदा कदाचित्संबंधेनोपलक्षणं काकवंतो देवदत्तस्य
गृहा इतिवत् साचसूनाधिकभावेनासंहननावस्था त्रकार्यावस्थेति यावत् तदुपलक्षितत्वगु
णत्वं च प्रकृतिलक्षणं महदादिव्यावृत्तमेव सर्गकालेपि गुणानां प्रकृतित्वोपपत्त्या न प्रकृति

नित्यताक्षतिर्नापीश्वरसत्वस्यसदैकरूप्येणासाम्यावस्थाभ्यत्वेपितत्रप्रकृतिलक्ष
णाव्याप्तिरितिदिक् गुणेषुप्रमाणोपदर्शकंभूतेंद्रियात्मकमितिविशेषणंव्याचष्टे तदेतद्भू
तेतिभूतभावेनेत्यस्यविवरणंपृथिव्यादिनेतितत्राप्यवांतरविशेषमाहसूक्ष्मस्थूलेने
ति तन्मात्रास्सूक्ष्मपृथिव्यादीनि महाभूतानिस्थूलपृथिव्यादीनीतिइंद्रियभावेनेत्यस्यविव
रणंश्रोत्रादिनेतितत्राप्यवांतरविशेषमाहसूक्ष्मस्थूलेनेतिविशेषणंमोक्षोपपादकंव्या
चष्टेतत्तुनाप्रयोजनमित्यादिनाततगुणत्रयंनप्रयोजनमसंसत भूतेंद्रियरूपेणप्रव
र्ततेऽपितुप्रयोजनंस्वीकृत्यैवप्रवर्ततेइत्यतस्तद्दृशंगुणत्रयंपुरुषस्यभोगापवर्गार्थं
हिभोगापवर्गोफलकर्मेवेत्यर्थः भोगापवर्गौव्याचष्टेतत्रेष्टानिष्टेतिइष्टानिष्टगुणाःसुख
दुःखात्मकाःशब्दादयःतत्स्वरूपावधारणंतदाकाराबुद्धिवृत्तिःनतुपुरुषनिष्ठःसाक्षात्का
रोबुद्धिनिष्ठतापावक्ष्यमाणत्वात् सहितफलस्यभोक्तेत्यनेनपुरुषनिष्ठस्यभोगोत्तरस्यव
क्ष्यमाणत्वात् पुरुषनिष्ठभोगस्यचित्स्वरूपतयानित्यत्वेनतवफलत्वमेजस्यालीतिभावः
शब्दादिव्यक्तिकालेविवेकख्यातिसत्वेवक्ष्यमाणापवर्गएवेतितादृशशब्दादिव्यावृत्यर्थम ९०
विभागापन्नमितिविशेषणंपुरुषेणसहाविविक्तंत्वहंकारितामनेत्यात्मनिष्ठतयाभिम

न्यमानमितियावत्जीवन्मुक्तस्यभोगाभासएवत्वहंशृणोमीत्याद्यभिमानगर्भैवश
ब्दादिवृत्तिर्गुणेषुभोगव्यवहारात् भोक्तुरितिभोक्तुःपुरुषस्ययत्स्वरूपमुपाधिविविक्तंचै
तन्यंतदाकाराबुद्धिरपवर्गःव्यादौतमोक्षोज्ञानेनद्वितीयोयोगसंक्षयात् कृत्स्नक्षयात्तती
यस्तु व्याख्यातंमोक्षलक्षणमितिपंचशिखवाक्यात् अपवृज्यतेऽनेनेतिव्युत्पत्तेरित्यर्थः
ननुभोगापवर्गातिरिक्तार्थमपिदृश्यंकथंभवतीत्याकांक्षायामाहतयोरिति दर्शनंबुद्धि
वृत्तिःअविभागापन्नतायांपंचशिखाचार्यसंवादमाहतथाचोक्तमिति अयंलोकस्त्रिषु
गुणेषुसर्वेकर्तृषुसत्सुगुणत्रयापेक्षयाचतुर्थेतुरीयेपुरुषेगुणव्यापाराणांज्ञानदर्शनंसा
क्षिमात्रेकर्तृत्वेपनीयमानान् बुद्ध्याभिसमर्प्यमाणान्सर्वभावान्गुणपरिणामान्तत्रैवपु
रुषेऽनुपपन्नान्युक्तिसिद्धानित्यपश्यन्नदृष्ट्वागुणेभ्योन्यद्दर्शनंचैतन्यंशंकतेसंभावयत्य
पीत्यर्थःअत्रविवेकाग्रहणेभिन्नत्वेनदेवतत्वस्यावस्यनातीयहतिपुरुषविशेषणंबुद्धि
पुरुषयोर्द्वयोरपिस्वच्छत्वसूक्ष्मत्वादिनासाम्याद्गुणपुरुषयोस्तुल्यजातीयत्वंजडाज
डत्वपरिणामित्वापरिणामित्वादिभिस्त्वेवैजात्यमित्याशयःअत्रभाष्येगुणत्रयापेक्षया
पुरुषस्यचतुर्थत्ववचनात् अस्मान्यपितुरीयवाक्यानिजाग्रदाद्यवस्थासत्वादिगुणत्र

पापेक्षया पुरुषस्य चतुर्थत्ववचनात् अस्यास्य पितुरीयवाक्यानि जाग्रदाद्यवस्थासत्त्वादिगु
णत्रयापेक्ष्या साक्षित्वमेव पुरुषस्य तुरीयावस्थां वदंतीति इति सिद्धं तथा च स्मर्यते सत्त्वाज्जा
गरणं विद्याद्रजसा स्वप्नमादिशेत् प्रस्वापनं तु तमसा तुरीयं त्रिषु संततमिति ननूक्तयोर्भो
गापवर्गयोर्गुणकार्यतया गुणनिष्ठत्वेन कथं पुरुषस्य भोगापवर्गौ चेदृश्यमित्युक्तमि
त्याशंक्य तावेतावि ति यतो बुद्धिकृतौ अन्वयव्यतिरेकाभ्यां बुद्धिकार्यौ अतो लाघवेन बुद्धा
वेव वर्तमानौ न तु पुरुषनिष्ठौ इत्यादिरर्थः दृष्टांतप्रदर्शनपूर्वकं परिहरति यथेत्यादिना यु
द्धे स्वामित्वान्नृपादिवत् तौ व्यपदिश्येते इति वाक्यार्थः बंधमोक्षौ यथोक्तभोगापवर्गौ
सहितत्फलस्येति बुद्धिगतयोर्विपर्ययावधारणयोः फलस्य सुखादिरूपस्य भोक्ता स्वप्रतिबिं
बितस्य साक्षी अतस्तयोः स्वामीत्यर्थः अत्र पुरुषस्यापि स्वांतंस्तेन भोगस्योक्तत्वात् स्वरू
पप्रतिष्ठा वा चितिशक्तिरिति शास्त्रांतसूत्रे पुरुषस्य स्वतोपि मोक्षस्य वक्ष्यमाणत्वाच्च पुरु
षस्य भोगापवर्गौ न निराक्रियेते बुद्धिगतभोगापवर्गयोः स्वतः पुरुषार्थत्वाच्च करणव्यापारस्य
पुरुषार्थतासिद्धांताच्च अपितु परिणामरूपौ यथोक्तभोगापवर्गावेव पुरुषस्य निराक्रियेते अ ६१
तएव तावेतावित्यनेन भोगापवर्गौ विशेषितौ भाष्यकारेणेति पुरुषाणां च संसारिणां सत्त्व

णव भोगो बुद्धिवृत्त्यविविक्तः सुखादिसाक्षात्कारः जीवन्मुक्तेश्वरयोस्तु गौणो भोगः सुखादिसाक्षा
त्कारमात्ररूपः ईश्वरलक्षणसूत्रे प्रतिपादितमस्माभिरिति यदि च पुरुषे यथाभोगमोक्षौ न
स्वीक्रियेते तदा कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते
मुक्तिर्हित्वान्यथाभावं स्वरूपेण व्यवस्थितिरित्यादिवाक्यानि नोपपद्येरन्निति दिक् बुद्धेरेव पर
मौ बंधमोक्षव्यपदिशति बुद्धेरेवेति बुद्धिरूपेण परिणतानां गुणानामेवेत्यर्थः तदर्थावसा
यो विवेकख्यात्या पुरुषार्थसमाप्तिः तथा च यथोक्तभोगापवर्गरूपैः पुरुषार्थैः संबंधो बुद्धे
र्बंधो वियोगश्च मुक्तिरिति भावः एतौ च बुद्धेः परमबंधपरममुक्ती पूर्वोक्तौ न भोगापवर्गौ च प
रं च जीवन्मुक्ती इत्यविरोधः एतेनेति एतेन शब्दादिविषयभोगविवेकख्यात्योः पुरुषे उप
चारिकत्वेन ग्रहणस्योपि पुरुषेऽप्युपचरितसत्ताका वेदितव्या इति शेषः ग्रहणं स्वरूपमात्रे
ण ध्येयज्ञानं धारणास्थितं तत्तु ऊहोऽर्थगतविशेषाणां वितर्कणं अपोहो वितर्कितमध्ये विचारतः
क्रियतां निराकरणं तत्त्वज्ञानं वितर्कितमध्य एव विचारतः कियद्विशेषावधारणं अभिनिवे
शस्तदाकारतापत्तिरिति प्रकृतस्य योगस्य भूमिकारूपतयेतये च चित्तपरिणामा अत्र गणिता
एतेऽध्यात्मीयो छाराकरस्यादयडुपलक्षणीया इति नन्वनेन सूत्रेण गुणानामिव दृश्यत्वं प्रोक्तं न तु वि

कारणमिति न्यूनतानिरासाय प्रवर्त्तमानं सूत्रांतरमवतारयति दृश्यानांत्विति स्वरूपभेदा
वधारणार्थं अवांतरभेदप्रतिपादनार्थमित्यर्थः विशेषाविशेषलिंगमात्रालिंगानि गुण
पर्वाणि गुणानामेको वंशस्तस्य लिंगादिविशेषांतपर्वचतुष्टयं बीजांकुरवदवस्थाभेदाः ना
त्यंतभिन्नाः अतो गुणेष्वेव सर्वदृश्यानामंतर्भाव इति सूत्रकारस्याशयः कार्यैः कारणस्यानु
मीयंत इत्याशयेन विशेषादिक्रमेण पर्वगणनं तत्र प्रथमपर्वणो विशेषस्य यो यो विशेषस्तस्य
तमाह तत्राकाशेति आकाशादीनि भूतानि शब्दादितन्मात्राणां शांतादिविशेषरूपस्पर
र्शादिधर्मकस्थूलद्रव्याणामत एवाविशेषसंज्ञकानां विशेषा अभिव्यक्तशांतादिविशे
षकाः परिणामाः यथाक्रममिति शेषः तथेति विशेषा इत्यागामिनान्वयः मनस इंद्रियस
त्वप्रवेशो हेतुगर्भं विशेषणं सर्वार्थमिति सर्वेषां दशेंद्रियाणामर्थो यस्येति मध्यम
पदलोपी समासः मनःसहकारेणैव श्रोत्रादीनां शब्दादिग्राहकत्वादिति अहंकारस्य विशेष
त्वे हेतुगर्भं विशेषणं अस्मितालक्षणस्येति अभिमानमात्रधर्मकस्य श्रवणस्पर्शनदर्श
नादिरूपविशेषरहितस्याहंकारस्येति शेषः पिंडीकृत्य विशेषपर्वोपसंहरति गुणानामिति ए ६२
षं चैते भूतैकादशेंद्रियगणाः षोडशसंख्याको गुणानां विशेषात्मा परिणाम इत्यर्थः ननु इंद्रि

यवत्तन्मात्राण्यहंकारस्य विशेषाः कथं नोक्ताः शब्दस्पर्शादिविशेषवत्त्वादिति चेत् न विशेषमा
त्रस्यैवात्र विशेषपरिभाषणात् तन्मात्राणि तु भूतानामविशेषा अपि भवंतीति अविशेष
पर्व व्याचष्टे षडविशेषा इति षड् गणयति शब्दतन्मात्रमित्यादिना अस्मितामात्र इत्यंतेन ए
कद्वित्रीति लक्ष्यतेऽनेनेति लक्षणं धर्मः तन्मात्राणां द्रव्यत्वलाभाय लक्षणपदं तथा चोत्त
रोत्तरतन्मात्रेषु पूर्वतन्मात्राणां हेतुत्वाच्छब्दतन्मात्रं शब्दमात्रधर्मकं तत्कार्यं तथा स्पर्शत
न्मात्रं शब्दस्पर्शोभयधर्मकं एवं क्रमेणैकैकलक्षणधर्मवृद्धिरित्यर्थः एतेषु च मात्रपदैः
शांतादिविशेषस्यैव व्यावृत्तिर्न तु गुणांतरसंपर्कस्य एकद्वित्र्यादिलक्षणत्ववचनात् तन्मात्रा
ण्यविशेषाणि अविशेषास्ततो हि ते न शांता नापि घोरास्ते न मूढाश्चाविशेषिण इति विष्णु
पुराणाच्चेति ननु तन्मात्रेषु परस्परं कार्यकारणभावे सिद्धे एव कारणगुणक्रमेणोत्तरोत्तरं गुण
वृद्धिः सेत्स्यति तत्रैव तु किं प्रमाणं श्रुतिस्मृत्योः स्थूलभूतेष्वेवाकाशादिक्रमेण कारणतासि
द्धेरिति चेत् आकाशादिस्थूलभूतेभ्यो वाय्वाद्युत्पत्तिदर्शनेन सूक्ष्मेष्वपि भूतेषु तथा कार्यकार
णतासिद्धेरिति चेत् आकाशादिस्थूलभूतेभ्यो वाय्वाद्युद्भावकल्पनस्यौचित्यमिति एतानि च
तन्मात्राणि तामसाहंकारात् शब्दादिक्रमेणोत्पद्यंत इति बोध्यं अस्मितामात्रोऽभिमानमात्रत्व

त्विकः तेनेंद्रियभावापन्नाहंकारव्यावृत्तिः एते सत्तामात्रस्येति सत्ता विद्यमानता व्यक्ततेति या
वत् व्यक्ततामात्रं महत्तत्त्वमाद्यकार्यत्वात् प्रलये हि सर्वे विकाराः द्रव्यं व्यतीतानागतरूपाभ्या
मेव तिष्ठंति न तु विद्यमानतया अतस्त्वाद्यविकारे कुतस्त्वदयो महान् सर्गादौ सत्त्वं लभते स
सत्तामात्रमुच्यते स च सत्तामात्रतया सत्तामात्रमस्यते सद्विशेषाणामहंकारादीनां तदा
नीमभावात् अंतरावयास्कमुनिना जन्मादिषड्भावविकारमध्ये जन्मोत्तरमस्तीति विकार उ
क्तः तथा च संसारवृक्षस्यास्तितामात्रपरिणामो महत्तत्त्वं बुद्धिपरिणामस्त्वहंकारादिरिति ए
वं मूलस्य सर्वविकाराणामात्मनः स्वरूपस्य महतो महत्तत्त्वस्य बुद्ध्याख्यस्य परिणामाः षट्
अविशेषसंज्ञकास्तस्यार्थः अविशेषत्वं च सामान्यत्वं यद्यपि षोडशविशेषाणां सामान्यत्वे
महत्तत्त्वमहंकारयोरप्यस्ति तथाप्यविशेषशब्दः पंकजादिशब्दवद्योगरूढः षट्स्वेवेति अत्र षण्णा
मेतन्मात्राणां बुद्धिपरिणामत्वमहंकारद्वारैव मंतव्यं सूक्ष्मविषयत्वं चालिंगपर्यवसानमिति
सूत्रे भाष्येण तथा व्याख्यानत्वादिति लिंगमात्रपर्व व्याचष्टे यत्तत्परमिति अविशेषेभ्योऽव
रवर्ती सत्त्वं वंशस्योदित्यर्थः जगदंकुरो महत्तत्त्वं तल्लिंगमात्रमित्यर्थः लिंगमखिलवस्तूनां ६३
व्यंजकं तन्मात्रं महत्तत्त्वं महत्तत्त्वं हि स्वयंभोगादिसंसः कार्यब्रह्मणोडयाश्चिभूतं सर्गादौ सर्वे

जगन्दासपदेनोदेतिसत्तोत्थितचित्तवत्ज्ञानातिरिक्तस्व्यापारः पश्चादेवाहंकाराद्युत्पत्तौ
भवत्यतो लिंगमात्रमित्युच्यते तथा च स्मृतिः ततो भवन्महत्तत्त्वमव्यक्तात् कालचोदितात्
विज्ञानात्मात्मदेहस्थं विश्वं व्यंजं तमोनुद इत्यादिः मनुनाप्युक्तं ततः स्वयंभूर्भगवानव्यक्तो
व्यंजयन्निदं महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुद इति क्वचित्तु लयं गच्छतीति लिंगपदस्या
र्थमाह तत्तु प्रमाणादर्शनादुपेक्षितं अहंकारादेरपि लयगमनेन महत्तत्त्वमात्रे लिंगमात्रप्र
योगानौचित्याच्च तथा लिंगमिति मात्रशब्दार्थानुपपत्तेश्चेति तस्मिंस्तत्त्वे महदाख्ये प्रयोगवी
जं अहंकाराद्यखिलविकाराधारत्वमाह तस्मिन्निति तस्मिन् सूक्ष्मरूपे ते पूर्वोक्ता अविशेष
विशेषाः षडशीत्यनवस्थापन्ना नागतावस्थायां स्थित्वा उत्तरोत्तरं वंशपर्वाणीव क्रमेण विवृद्धि
काष्ठां स्थावरजंगमांतां प्राप्नुवंति महात्मा द्रुमः द्रुत्माकश्यपो जगदंकुर इति स्मृतेः तथा प्रतिसं
सृज्यमानाः प्रतीपमानाश्च ते तस्मिन्नेवावस्थापन्नातीतावस्थायामनुगताभूत्वा तेनैव स
ह यत्तत्प्रसिद्धसाम्यावस्थागुणत्रयरूपमलिंगं तत्प्रधानाख्यमूलकारणं प्रतियंति प्रकृतेर्लीयं
त इत्यन्वयः एतेन महत्तत्त्वोपाधिकस्य कार्यब्रह्मणोपि जगत्स्थितिलये हेतुत्वं प्रसंगाद्या
ख्यातं प्रधानस्यालिंगत्वोपपादनाय व्यक्तमिति विशेषणं स्वयमव्यक्ततया न परस्य व्यंजकमि

स्यलिंगमित्याशयः पुरुषात्परामिमन्तशशश्रृंगादिभ्यश्च व्यावर्त्तनायनिःसत्तासत्त्वाविशे
षणं निर्गते पारमार्थिके सत्तासत्त्वे यस्मादिति विग्रहः कूटस्थनित्यत्वं हि पारमार्थिकसत् स
तोस्तित्वं तन्नासत्ता नास्तित्वे सत्यता कुतः तस्मान्न विज्ञानमतेऽस्ति किं वितर्कविरुद्धाविरुद्धि
जवस्तुजाते यद्वा सत्यात्वं द्विजस्यातिभ्रमोननत्तथा तत्र कुतोहितत्वमिति गारुडवैष्णवा
दिवाक्येभ्योसत्तासामान्याभावस्यैव पारमार्थिकसत्तात्वसिद्धेः तच्चसत्त्वं प्रधानेनास्ति महदा
द्यखिलविकाररूपैः प्रलयेप्यसत्त्वात् सूक्ष्मदशस्तु परिणामितया प्रतिक्षणं तत्तद्धर्मरूपेण
पायाच्च तथाच श्रुतिस्मृतयः चेतनत्वं चिन्मात्रं सत् क्षणं न संतिष्ठति जीवलोकः क्षयोदया
भ्यां परिवर्त्तमान इत्याद्या इति यथा च सत्तया वर्जितमेवमसत्तयापि पारमार्थिकावर्जितं
सत्तासामान्याभावस्यैव पारमार्थिकासत्त्वात् तच्च प्रधानेनास्ति नित्यत्वात् अर्थक्रियाका
रित्वात् श्रुतिस्मृत्यनुमानसिद्धत्वाच्चेति इत्थमेव च सदसद्भ्यामनिर्वचनीयं त्रिगुणात्म
कं मायाख्यं प्रधानमिति वेदांतसिद्धांतोप्यवधारणीयः नासद्रूपा न सद्रूपा माया नैवोभया
त्मिका सदसद्भ्यामनिर्वाच्या मिथ्याभूता सनातनीत्यादित्यपुराणादिषु मायाख्यप्रकृतेः पार ९४
मार्थिकसत्त्वादिरूपेणानिरूप्यत्ववचनात् न तु प्रपंचस्यात्यंततुच्छतात्यंतविनाशिता

वा वेदांतसिद्धांतः नाभाव उपलब्धेः भावे चोपलब्धेरिति वेदांतसूत्राभ्यामेवात्यंततुच्छता
यानिराकरणात् सत्त्वाच्चावरस्य असद्व्यपदेशादिति चेन्न धर्मांतरेण वाक्यशेषात् वैधर्म्या
च्च न स्वप्नादिवत् इत्यादिपर्याप्तवेदांतसूत्रेभ्यः प्रपंचस्य सदसद्रूपतापारावसिद्धेश्च ध
र्माच्च न स्वप्नादितरेणानीतानागतधर्मेण शास्त्रेषु स्वप्नादिदृष्टांताश्च क्षणभंगुरपारमार्थि
कासत्त्वांशेनैवेति बोध्यं न हि स्वप्नगं चर्वेनगरादयोप्यत्यंतासंतः स्वप्नादावपि साक्षिभा
स्यमानस्य पदार्थोभ्युपगमात् अन्यथा संध्ये सृष्टिराह हीति वेदांतसूत्रेणैव स्वप्ने सृष्ट्य
वधारणं विरुद्ध्येत न स्वप्नादिवदिति वेदांतसूत्रेण च जाग्रत्प्रपंचस्य केवलमानसत्त्वमेव नि
राकरोति एतेन स्वप्नादिदृष्टांतैः प्रपंचस्य मनोमात्रत्वाभ्युपगमो नवीनवेदांतिनामप
सिद्धांत एव वेदांतसूत्रेणापि स्वप्नतुल्यत्वाभावनिर्णयात् तस्माद्यथार्थमेव प्रपंचस्यास
त्वं न्यायमीमांसायामपि सिद्धांतः समानतंत्रसिद्धांतत्वाच्चेति दिक् कश्चित्तत्त्वांतरविशेष
णेचार्थक्रियाकारित्वमेव सत्त्वं विवक्षितं तच्च प्रलये प्रकृतितद्विकारयोर्नास्तीत्याह तत्त्वई
श्वरान्यपुरुषस्याप्येवमसत्त्वप्राप्तश्चायत्संभवनात् जीवेष्वपि हि विषयप्रकाशनस्याया
रोपरमणात् सत्तालयः स्वापः प्रलयेस्तीतीश्वरप्रकरणे श्रुतिस्मृतिषु प्रसिद्ध इति प्राधान्यस्य

पारमार्थिकसदसत्त्वाभावोपपत्तये तद्विकाराणामपि पारमार्थिकत्वोऽसदसत्त्वे नस्त इति प्रति
पादयितुं प्रधानस्य विशेषणान्तरं निःसदसदिति निर्गते सदसती यस्मादिति विग्रहान्निःस
सदिति पाठेऽप्ययमेवार्थः प्रधानवन्नहि यद्विकारजातं तत्पारमार्थिकसत्त्वं भवति परिणा
मित्वेन स्वधर्मैः प्रतिक्षणं विनाशनात् अद्वैतपक्षेऽप्येतदवस्थापत्त्यसत्त्वाच्च वाचारंभणं विका
रो नामधेयं मृत्तिकेत्येव सत्यं अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्तनिधनान्ये
व तत्र का परिदेवनेत्यादिश्रुतिस्मृतयः प्रकृतिविकाराणां नित्यतारूपं सत्त्वं निराकुर्वंति अत्र च प्र
तीतिविकाराणामाद्यन्तयोरभावमात्रावशेषत्वेनास्थिरत्वेऽपि तदपेक्षया स्थिरत्वरूपं सत्यत्वं
कारणस्य विवक्षितं नित्यो नित्यानां सत्यस्य सत्यमिति श्रुत्यंतरेणादृष्टार्थसिद्धेः न पुनर्वि
काराणामत्यन्ततुच्छतया मृद्विकारस्य घटस्य विकारदृष्टान्तत्वानुपपत्तेः न हि लोके मृद्विकारस्या
त्यन्ततुच्छत्वं सिद्धमस्ति येन ब्रह्मकार्यप्रपंचतुच्छत्वे दृष्टान्तता तस्य स्यादिति यथा प्रधानव
न्निकार्यजातमत्यंतसत्त्वं भवति एवमत्यंतासत्त्वमपि न भवति अतीतानागतादिरूपैः सदा
सत्त्वात् तद्धेदं तर्ह्यव्याकृतमासीत् आसीदिदं तमोभूतमप्रज्ञातमलक्षणं अप्रतर्क्य २९
मविज्ञेयं प्रसुप्तमिव सर्वतः इत्यादिश्रुतिस्मृतिभ्य इति दिक् नन्वेवं सविकारस्य प्रधानस्य स

दसत्त्वप्रतिषेधे सति प्रकृतेः सदसदात्मकताप्रतिपादकश्रुतिस्मृतिशतव्याकोपः सदस
द्वाधावाधाभ्यामिति सांख्यसूत्रविरोधश्चेति मैवं तथाविधवाक्यानां भक्तरूपव्यावहारि
कसदसत्त्वापरत्वात् सांख्यसूत्रे च बाधाबाधौ रूपभेदेन सार्वकालिकौ विवक्षितौ तदुक्तं जगन्म
यो भ्रान्तिरियं न कदापि न विद्यते न कस्यचित् जलबुद्बुदवत् स्थितमिति भ्रांतिरिति पारमा
र्थिकत्वमसत्त्वमाश्रित्य ज्ञानज्ञेययोरभेदविवक्षयोरभेदविवक्षयोक्तं अत एव गौतमसूत्रं तत्त्व
प्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिरिति तात्त्विकमिथ्याबुद्धिर्नित्यपदार्थज्ञानं च प्रधानं
मिथ्याज्ञानं प्रसिद्धमिथ्याज्ञानं शुक्तिरजतादिज्ञानमिति पारमार्थिकत्वमलक्षणं च तद
भाववत्ति तत्प्रकारकत्वमसद्विषयकता वा तदुभयमपि परिणामिनित्यपदार्थबुद्धिष्वप्यस्ती
ति व्यवहारिकपारमार्थिकभेदेन सत्तादिद्वैविध्यं च विष्णुपुराणादिषु सिद्धं यथा सद्भावए
षो भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् एतत्तु यत्संव्यवहारभूतं तत्रापि चोक्तं भु
वनाश्रितं ते इति तथा चलोकसिद्धा माया इति कपिलसत्ता शुक्तिरजतस्वाप्नपदार्थानां मनो
मात्रपरिणामानामिति यन्न परमात्मचैतन्यस्येव सत्त्वं न तु जीवचैतन्यानामपि इति वेदां
तरहस्यं नामीनोऽस्ति दृष्टा श्रोता मंता बोद्धेत्यादि श्रुतिसिद्धं तत्तुल्यप्रमत्वरूपामतिपार

मार्थिकसत्तामभिप्रेत्यैवबोध्यं प्रलयेहिपरमात्मनिप्रकृतिपुरुषयोर्व्यापारे परमसूक्ष्मल
योभवति प्रकृतिःपुरुषश्चोभौलीयेतेपरमात्मनीत्यादिवाक्येभ्यःपरमात्माचसदाजीवत
त्वरूपतयालयभूमिरितिसएवपरमार्थसन्नप्रकृतिपुरुषाविति वेदांतमहावाक्यमर्यादा
एतेनसदसत्वयोर्विरोधादेकत्रासंभवइत्यपास्तंव्यवहारपरमार्थभेदेनकालभेदेना
वच्छेदभेदेनस्वरूपभेदेनप्रकारभेदेनचतयोरविरोधादितितदेवंश्रुतिन्यायसिद्धंसत्यत्व
मिथ्यात्वविभागमविदुषामाधुनिकानांवेदांतिब्रुवाणांप्रपंचात्यंतासत्यत्वादिस्त्वप
सिद्धांतानास्तिकमतानुसारिणोमुमुक्षुभिर्दूरतःपरिहरणीयाःसमानन्यायेनात्रत्यसिद्धांता
नामेवब्रह्ममीमांसानासिद्धांतत्वादितिसर्वसमंजसं लिंगमात्रपरिणाममुपसंहरति
एतेषामितितेषांगुणानामित्यर्थःअलिंगपर्वव्याचष्टेनिःसत्तासत्तमितिनिःसत्तासत्तमित्यु
क्तोयःपदार्थःसोलिंगनामागुणानांपरिणामःसत्त्वसाम्यावस्थानामकोगुणेभ्योतिरिक्तइ
तितस्यगुणपरिणामत्वमुपपद्यते तस्यांचसाम्यावस्थायांप्रधानत्वादिशब्दोधर्मधर्मि
भेदेनमहदादिव्यावृत्त्यर्थमेवात्रश्रुतिस्मृत्योःप्रयुज्यतेपरमार्थतस्तुगुणाएवतदुपल ६६
क्षिताप्रधानंभाष्येगुणानामेवप्रधानत्वस्योक्तत्वादिति इदानींपर्वणांगुणानांचपरस्परंभे

धर्म्यभेदोप्युत्पादनीयःतत्रादावलिंगावस्थारूपस्यपर्वणःपर्वत्वंयाद्गुणेभ्यश्चैवेत्यर्धेनप्रतिपादय
तिअलिंगावस्थायामिति पुरुषार्थोविषयभोगविवेकख्यातीतत्कार्यौसुखदुःखाभावौचसपुरुषार्थो
नालिंगावस्थांप्रतिहेतुःयतोऽलिंगावस्थायामादौसृष्टेःप्राक्पुरुषार्थेनापुरुषार्थसमूहःकारणता
भिमतोनोत्पद्यतइत्यर्थःदुःखनिवृत्तिमावर्त्तनापकारणमित्युक्तंप्रलयकालेदुःखनिवृत्तेःकर्मक्षया
देवोपपत्तेःप्रलयाप्रयोजनतयादुःखनिवृत्तिःप्रलयकारणंनभवतीत्याशयः उपसंहरतिनत
स्याइति एतदुक्तंभवतिव्यक्तावस्थायागुणेभ्यःशब्दाद्युपभोगादिरूपःपुरुषार्थोजायतेततःसतस्या
मनागतावस्थायाःकारणंभवतुसाम्यावस्थायांतुनतज्जन्यःकश्चनपुरुषार्थोस्तीत्यतोनास्याःपुरु
षार्थःकारणमिति एतावताकिमित्यत आह नासौपुरुषार्थकृतेतिनित्यःव्याख्यायतइतिशाश्व
तीतिशेषःनित्यास्वाभाविकीन्नैमित्तिकत्वेनपर्वत्रयापेक्षयाप्यस्वाभाविकत्वेपिसर्गकाले
पिधर्मादिभिःप्रतिबंधाद्गुणानांसाम्यरूपःपरिणामइतिभावःअव्यक्तावस्थायाअस्वाभावि
कत्वेनव्यक्तावस्थापेक्षयाबहुकालावस्थायित्वमेवनित्यत्वंसत्यत्वापरनामकंव्यवहारसिद्धं ध
र्मोनित्यःसुखदुःखेत्वनित्येइत्यादिभारतादिप्रमाणात् ईदृशनित्यत्वंचगीतादिषूक्तं अव्यक्तादीनि
भूतानिव्यक्तमध्यानिभारत अव्यक्तनिधनान्येवतत्रकापरिदेवना इत्यादिभिरिति अपकार

वेदासत्वरूपंनित्यत्वमेवाप्यत्रार्थोस्त्रसर्गेपिगुणसाम्यस्यात्यंतत्तोच्छेदात् अंशेनतएववैषम्ये
णकारणरूपस्यगुणसाम्यस्यसर्वदासत्वात् अतएवसाम्यावस्थायाअत्यंतोच्छेदेपर्वत्वानुपप
त्तेश्च अनेनहिसूत्रेणऊर्ध्वमूलमधःशाखइत्यादिगीतोक्तअव्यक्तमूलप्रभवइत्यादिमोक्षधर्मो
दितंचावस्तुससंसाररूपोगुणावृक्षएवयतःपर्वतयानिरूपितःतस्यचवंशातस्यगुणाव
क्षस्यावरणानोपूर्वपूर्वतत्वानांअंशानशेनोत्तरतत्वरूपेणपरिणामोभवतिसमुद्रस्येणतः
फेनादिरूपतावत् नतदम्बुद्ध्यस्यैवपूर्वपूर्वतत्वस्यसर्वांशेनपरिणामाःउत्पत्तिकालेपिव
हिर्ध्वस्यकारणेनपुनराप्रणाये तत्कारणानांस्वकार्यावरकत्वपाऽवस्थानंसिध्यति तस्मात्सर्गे
कालेपिवहिरलिंगावस्थावस्थानात्तस्यानित्यत्वमिति ननुप्रकृतिमाद्यायाश्चवेवावरणनिवृ·
स्याद्दस्यप्रपंचेनततन्मात्राण्यपीतिवेन्नसूक्ष्मस्थूलभूतयोरेकत्वविवक्षयाच्छयाप्याव
रणवचनात् अतएवभागवतद्वितीयस्कंधेपरतस्तगतोपंचभूतानांवहिस्तन्मात्रावरण
तिरुक्ताइंद्रियाणिचाकारणत्वान्नावरणानितेषामुत्पत्तिस्तन्मात्रसमानदेशपयातिलस्य २७
मानदेशसूक्ष्मतैलोत्पत्तिरितिदिक् इतरस्मिन्नवस्थात्रयेत्वनित्यत्वरूपंवैधर्म्यमाहत्र
यफलामिति आदौ उत्पत्तौ उपादानकारणत्वमवछेदार्थमाह सर्वाध्येरति आलिस्यामिति आत्मय

स्येनापिशेषः शेषंसुगमं पर्वसुनित्यानित्यत्वरूपंवैधर्म्यमुक्त्वापर्विणांगुणानांपर्वभ्यो
वैधर्म्यमाह गुणास्त्विति गुणास्तुसत्वादयःसर्वविकारेषुअनुगताःअतउत्पत्तिविनाशाभ्
यामनपवारितनित्याइत्यर्थःअलिंगावस्थापिहिमनेवंनित्येतिननुत्रिगुणात्मकप्रकृतेर्नि
त्यत्वेप्रकृतिंपुरुषंचैवप्रविश्यात्मेच्छयाहरिःक्षोभयामाससंप्राप्तेसर्गकालेव्ययाव्ययौत
स्मादव्यक्तमुत्पन्नंत्रिगुणंद्विजसत्तमेत्यादिस्मृतिषुप्रकृतेर्व्ययोत्पत्तिवचनंकथमुपपद्येत
त्राह व्यक्तिभिरेवेति गुणान्वयिनीभिर्गुणधर्मैःकार्यव्यक्तिभिरेवातीतानागतवर्तमानतापरि
णामवतीभिर्हेतुभिर्जन्मविनाशवंतइवतेगुणाःप्रतीयंतेकार्यकारणविभागात् नतते
षांस्वतोजन्मविनाशौस्तइत्यर्थःतथाचस्वानुगतानांव्ययादिनैवगुणात्मकप्रकृतेर्व्ययादि
व्यवहारइत्याशयःपरिणामस्तुप्रकृतेःपारमार्थिकत्वेसतिव्याप्यानामुत्पत्तिविनाशयोःव्याप
केषुव्यवहारेदृष्टांतमाहयथेतिदरिद्रातिक्षीणोभवतिइतिसमःसमाधिरिति इदंसमाधा
नंदार्ष्टांतिकेपिसमानमित्यर्थः ननुतथापिप्रकृतेर्नित्यत्वंनोपपद्यतेमूलप्रकृतेर्विश्वमाया
निवृत्तिःप्रकृतिःपुरुषश्चोभौलीयेतेपरमात्मनीत्यादिवाक्येभ्यइतिचेत्तदंतोत्तरत्वात्कार्यवि
नाशेनतत्रापितन्निवृत्तिवचनात्व्यापारेपरमात्मलयस्यैवपुरुषसाहचर्येणतत्रावधार

णाद्युविपोज्ञपत्तयाम्योर्न्यप्रधानपुरुषावुभौ प्रधानपुंसोरनयोरेष संहारद्वैरित इति कौर्मे
वाक्याद्युक्तन्यथाम्यापानुग्रहेणावलवतीभिः प्रकृतिनित्यताश्रुतिभिर्विरोधाच्च एवमेव प्रकृ
तिपुरुषयोः पुराणेषु श्रूयमाणोत्पत्तिरन्योन्यसंयोगेनाभिव्यक्तिरेव बोध्या संयोगलक्षणो
त्पत्तिः कथ्यते कर्मजानयोरिति स्मृतेः तथा चोक्तं न च रत्तउद्भवः प्रकृतिपुरुषयोरजयोह्य
पयुक्ता भवंत्यसस्मत्तो जलबुद्बुदवत् त्वपितद्भेन तो विविधा नामगुणैः परमेश्वरितद्भा
णेवेमथुनिलिस्सुरणेबरसाद्इति इदानीं प्रकृत्यादीनां स्वस्वकार्येस्तमापयितुं पर्वणा रस्यवि
त्तमलिंगादीनाम विरल्लं क्रमं दर्शयति लिंगमात्रमिति प्रत्यासन्नमस्य वहितकार्ये तत्रेति
तद्धि लिंगमात्रं तत्रालिंगे लिंगावस्थप्रधाने स्वरूपेणाविभक्तमित्यत स्ततो विविच्यते
विभक्तं भवति तत्र हेतुः क्रमेति क्रमस्य योर्वो पर्यस्य क दाप्यनतिक्रमादित्यर्थः यदि हि का
रणेष्वनागतावस्थाभिरस्तता मप्युत्पत्तिः स्यान्न हि अविशेषाः सर्वे सर्वत्रोत्पद्यते तथा च
तीतमप्युत्पद्येत न च प्रागभावः कारणं अभावस्यासिद्धेः किंचाभावस्य निमित्तकारणत्वाभ्यु
पगमे तस्यैवोपादानकारणत्वमपि स्यात् तथा च जितं शून्यवादिभिः अथाभावस्योपादान २०
त्वं न दृष्टमिति चेत् तत्संनिमित्तत्वेपि तुल्यं तउपादानतावन्निमित्तत्वमपि नाभावस्य तस्मात्का

र्यं न नष्टिरिवानागतावस्थारूपिणी कार्यरूपेण परिणमत इति तदनेन भाष्येण सत्कार्य
वादः प्रसाधितः तथेत्याद्यप्येवं व्याख्येयं महदादिभिः प्रकृत्यावनुमानप्रकारश्च सांख्यसूत्रे
हृतोऽस्माभिरपि तन्द्राष्ये प्रपंचितो विस्तरभयान्नेह प्रस्तूयत इति तथा चोक्तं परस्तादिति
यथाऽविशेषेभ्योऽनंतरमेदभिन्ना विशेषा जायंते तथा परस्तादस्येव स्वस्त्रस्यादावुक्तमि
त्यर्थः ननु कथं गुणपर्वणां चतुर्धा विभागः सूत्रकारेण कृतः अस्यांऽस्यावरजंगमादिरूपैः
पर्वेण मानंत्यादित्याशंक्य ब्रह्मांडादीनां सर्वेषां विशेषकार्याणां विशेषेष्वेवांतर्भावमाह
न विशेषेभ्य इति विशेषेभ्यः परमन्नरभावि तत्वांतरं त्वमेदो नास्ति अतो विशेषाणां तत्वांत
रपरिणामो नास्तीत्यर्थः अतो ब्रह्मांडादिकं सर्वं विशेषपर्वणो वर्गहीतमिति भावः तत्वांतरत्व
द्रव्यत्वं तत्वांतरत्वं च स्वाव्यत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं पंचविंशतितत्वेषु पंचविंशति
जात्यनंगीकारे वतत्वांतरत्वं स्वावृत्तिद्रव्यविभाजकोपाधिमत्वमिति नन्वेवं तत्वभेदात्कथं
मंतःकरणस्यैकत्वं तत्र तत्रोक्तं घटेनेति उच्यते यथा विशेषाख्यपंचतत्वान्निकेकैव पृथि
वी प्रागुत्पन्ने ततः तस्याः खननमंथनादिना पार्थिवे जलतेजसी अभिव्यक्तमात्रे भवतस्त
थैवंतःकरणवादौ महान्जायते पश्चाच्च तस्याहंकारादिवृत्तिभेद इति नहि किं विशेषाणां

परिणामा एव न संतीति नेत्याहुस्तेषां त्रितयात्मकत्वात् ताइति सूत्रकारेणोत्तरपादइति शेषः स्या
देतत् महदादिक्रमेणोक्तः सृष्टिप्रकारः आकाशादिक्रमबोधकश्रुतिविरोधाद्‌पः श्रुतौ न
मात्राप्रकरणे नतेपदार्थेष्वकलितानामन्वादिस्मृतयश्च सांख्यस्य स्मानुवादेन धर्मादिपर
एव न प्रकृत्यादिपर इति न स्मृतिभिरपि प्रकृत्यादिसिद्धिरिति अत्रोच्यते गुणत्रयात्मिका प्रकृ
तिस्तावत् मूलकारणं तथा मैरजसो रूपं तद्रजः खल्वीरितं विषमत्वं प्रयात्येपोपनिषदि श्रूय
ते यथा तमो वा इदमेकमास तत्परे स्यात्तत्परेणेरितं विषमत्वं प्रयात्येतद्वै रजसो रूपं तद्र
जः खल्वीरितं विषमत्वं प्रयात्येतद्वै सत्त्वस्य रूपं तत्सत्त्वमेवेरितं तमसः संप्रास्रवत् तत्सोंऽशो
ऽयं यश्चेतामात्रः प्रतिपुरुषं क्षेत्रज्ञः संकल्पाध्यवसायलिंगः प्रजापतिस्तस्य प्रोक्ता अस्य तन
वो ब्रह्मा रुद्रो विष्णुरित्यादि तथा गर्भोपनिषदि चतुर्विंशतितत्त्वान्यंते नक्रमेणोक्तानि यथा
ऽष्टौ प्रकृतयः षोडश विकाराः शरीरइति तथा प्रश्नोपनिषदि च एव ह वै तत्सर्वे परेऽस्मात्मनि
संप्रतिष्ठते पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमा
त्रा चाकाशश्चाकाशमात्रा चेत्यादिना परमात्मनि सर्वेषां योविंशतितत्त्वं तिष्ठति समुद्रेन द्रनदी २६
वत्स्पष्टं अतश्चतुर्विंशतितत्त्वानि मत्स्यपुराणस्याप्यनुमेयश्रुत्या च सिद्धानि अत्राद्वैतश्रुतिस्तु

नत्तासां वाधिकाव्यवहारपरमार्थभेदेन विषयभेदात् व्यावहारिकाद्वैतश्रुतीनां वा विभा
गलक्षणाभेदपरतायाएव नदीसमुद्रादिदृष्टांतैः खगमेदिति तेषां च महदादीनां सृष्टिक्रमो
पि श्रुतौ पाठक्रमाद्‌ बाध्यते एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिराप
श्च पृथिवी विश्वस्य धारिणीत्यादिषु पद्यं तैत्तिरीयके वियदादिसृष्टिः श्रूयते तत्र वियतः प्रा
क् बुद्ध्यादिसृष्टिः पूरणीयास्मत्सुन्नेय श्रुत्येकवाक्यतयादोऽप्येवियद्वाद्यपुरणवदिति किंच
सांख्योक्तसृष्टिक्रमे स्पष्टैव श्रुतिरस्ति यथा गोपालतापनीये एकमेवाद्वितीयं ब्रह्मासीत
तस्मादव्यक्तमेवाक्षरं तस्मादक्षरान्महत् महतो वै अहंकारः तस्मादेवाहंकारात्पंचतन
मात्राणि तेभ्यो भूतानीति वेदांतसूत्रैरपि बुद्ध्यादिक्रमेणैव सृष्टिरुक्ता तत्र नवीनानां भु
व्याख्या वास्माभिस्तन्त्रान्यानीति वेदांतसूत्रैरपि बुद्ध्यादिक्रमेणैव सृष्टिरुक्ता तत्र नवीनानां
व्याख्या वास्माभिस्तन्त्राष्य एवापाह्नेति तदेवं सांख्यशास्त्रे प्रपंचितानि चतुर्विंशतित
त्त्वान्यत्र संक्षेपतः सूत्रद्वयेनोक्तानि एतेषां च स्वरूपादिकं तत्रैव प्रदर्शितं संक्षेपतस्त्वत्राप्यु
च्यते पंचभूतान्येकादशेन्द्रियाणि च प्रसिद्धान्येव तन्मात्राणि भूतानां साक्षात्कारणानि शब्दा
दिमत्सूक्ष्मद्रव्याणि अतएवानि सूक्ष्मभूतान्यपि क्वचिदुच्यंते महदहंकारौ च मोक्षधर्मे लक्षि

तौ यथा हिरण्यगर्भो भगवानेष बुद्धिरिति स्मृतः महानिति च योगेषु विरंचिरिति चाप्युत धृतं
नैकात्मकं येन कृत्स्नं त्रैलोक्यमात्मना तथैव बहुरूपत्वाद्विश्वरूप इति स्मृतः एष वै विक्रियाप
न्नः सृजत्यात्मानमात्मना अहंकारं महातेजाः प्रजापतिमहंकृतमित्यादि अत्र चोपासनार्थं
शक्तिशक्तिमदभेदेनोपाध्योर्नामादिकमुपाधिमत्त्वेन तयो रुक्तेर्मनुष्यपश्वादिनामरूपा
दिवत् स्मृत्यंतरेषु सांख्ययोगयोश्चाविवेकतो जडवस्तुन्येव तद्व्यवहारः ज्ञानैश्वर्यादिरूपम
हंत्वस्याभिमानरूपाहंकारस्य चांतःकरणधर्मत्वादिति प्रकृतिस्तत्त्वयोर्विंशतितत्त्वकारणा
नित्यत्वादिनामकसूक्ष्मद्रव्याणि असंख्यानि गुणशब्दश्चैतेषु पुरुषोपकरणत्वात् पुरुष
बंधकत्वाच्च प्रयुज्यते तच्च गुणत्रयं सुखदुःखमोहधर्मकत्वात्सुखदुःखमोहात्मकमुच्यते
पुरुषाणां सर्वार्थसाधकत्वाद्राजामात्यवत्प्रधानमुच्यते जगदुपादानत्वात्प्रकृतिर्जग·
न्मोहकत्वाच्च मायेत्युच्यते वैशेषिकादिभिश्च स्वस्वपरिभाषया परमाण्वज्ञानादिशब्दैर्भो
च्यत इति तदुक्तं वासिष्ठे नामरूपविनिर्मुक्तं यस्मिन्संतिष्ठते जगत् तमाहुः प्रकृतिं केचिन्मा
यामेके परे त्वणून् इत्यादिनेति एष चतुर्विंशतितत्त्वानि सर्गो देहस्थूलसूक्ष्मशरीररूप १००
रूपेण परिणमंते तत्र स्थूलं पंचभूतेभ्यः सूक्ष्मं च शेषेभ्यः तयोश्च सूक्ष्मं कारणं चैतस्मा..

लिंगं च कृत्वा पुरुषस्य लिंगशरीरमिष्यते तत्राहंकारस्य बुद्धौ प्रवेशात्सप्तदशावयवकं सां·
ख्यशास्त्रे प्रोक्तं सप्तदशैकं लिंगमिति अत्र एकत्वं समष्ट्यभिप्रायेणोक्तं व्यक्तिभेदः कर्मवि
शेषादित्युत्तरसूत्रेण व्यक्तिरूपतया बहुत्वस्यैव लिंगशरीरस्य व्यक्तिभेदवचनात् अयं च व्य
ष्टिसमष्टिभावो नववनप्रकृत्यवत् किंतु पितापुत्रवदेव तच्छरीरसमुत्पन्नैः कार्यैर्हेतुः करणैस्स
ह क्षेत्रज्ञाः समुत्पन्नास्तज्जाने भ्यस्तस्य धीमत इति मन्वादिवाक्यैर्हिरण्यगर्भस्य शरीरद्वयं
शेरे वाखिलपुंसां शरीररूपोत्पत्तिरिति सिद्धं वनवृक्षयोस्तु नैवं कार्यकारणभावो ह्यतोतिदि
क् सूत्रोंतमवतारयति व्याख्यानमिति दूषणदर्शिमात्रः शुद्धोपि प्रत्ययानुपश्य दृशिरत्र गु
णः किंतु प्रकाशस्वरूपं द्रव्यं ज्ञानं नैवात्मनो धर्मो न गुणो वा कथंचन ज्ञानस्वरूप एवात्मा
नित्यः सर्वगतः शिव इत्यादिस्मृतेः अग्न्यौष्ण्यादिषु च भेदाभेदावेवं औष्ण्याग्रहणेपि चक्षुषा
ग्निग्रहणात् पुरुषस्य ज्ञानग्रहणं विनानग्रहणत इति मात्रशब्देन पूर्वसूत्रोक्तप्रकाशक्रिया
दिगुणव्यावृत्तिः तेषां च सर्वेषां विशेषगुणानामेतदभावः शुद्धशब्देन च भूतेंद्रियात्मकत्व
व्यावृत्तिः शुद्धोपि बुद्ध्यभेदभ्रमोपपादनाय शेषं विशेषणं अत्र च परिणामित्वपारार्थ्यादेव
नत्वादीनि बुद्धेरशुद्धिः तद्राहित्यं च पुरुषस्य शुद्धिरिति भाष्ये व्यक्तीभविष्यतीत्यपारार्थ्या

प्रत्ययानुपश्यः प्रत्ययं बौद्धमनुपश्यति प्रत्ययसमानाकारतापन्नरवसन् बुद्धिवृत्तिसाक्षी
त्यर्थः अनेन विशेषणेन द्रष्टुः परिणामित्वं चोक्तमिति शुद्धोपीत्यादिभागस्य फलांतरं च भाष्य
कारो व्याख्यास्यति दृशिमात्रशब्दार्थमाह दृक्शक्तिरेवेति प्रलयमोक्षादौ जीवानां दर्शनाख्य
चैतन्यफलोपधानं नास्तीति शक्तिपदोपादानं एवशब्दार्थमाह विशेषणापरामृष्टेति विशि
ष्यते व्यावर्त्यते द्रव्यांतरादेभिरिति विशेषणानि विशेषगुणाः वैशेषिकशास्त्रोक्ताः तैःका
लत्रयेप्यसंबद्धा इत्यर्थः तेन संयोगसंख्यापरिमाणादिसत्वेप्यक्षतिः इष्टेति लक्ष्यपदं
बुद्धिव्यावृत्तत्पायाश्च बोध्यपुरुष इति संवेदित्वाद्बुद्धेः प्रतिसंवेदी पुरुषः बुद्धेः संवेदनमर्थो
कारवृत्तिः तस्याः प्रतिसंवेदनं प्रतिध्वनिवत् प्रतिबिंबं यत्र स पुरुष इत्यर्थः बुद्धेः साक्षीतितु
पर्यवसितोर्थः एतेन प्रतिबिंबरूपयाऽऽरोपितक्रियया कलितं दर्शनकर्तृत्वं द्रष्टृत्वमित्यपि
सूचितं आत्मनो ज्ञानस्वरूपत्वं च यथा दीपः प्रकाशात्मा स्वल्पो वा यदि वा महान् ज्ञानात्मा
नं तथा विद्यात्सर्वेषु सर्वजंतुषु इत्यादिवाक्यशतानुग्रहेणावाधवतर्कानुग्रहेणात्मना
दिरूपव्यतिरेक्यादिलिंगैरनुमेयं ज्ञानाश्रयत्वकल्पने धर्मधर्मिभावापन्नवस्तुद्वयकल्प ९१
नागौरवात् अहं जानामीति प्रत्ययस्तु अहं गौर इत्यादिभ्रमगणांतःपातितया प्रामाण्यश

कास्फुटितत्वेन यथोक्तानुमानापेक्षया दुर्बल इति दिक् बुद्धिपुरुषयोर्विवेकप्रतिपादनाय तयो
रभेदभ्रमोपपादनाय च तयोर्वैरूप्यप्रतिपादकतया क्रमेण शुद्धोपीत्यादिविशेषणद्वयं व्या
चष्टे स न बुद्धेः सरूपो नात्यंतविरूप इति पारमार्थिकं सारूप्यस्याभावः शुद्धोपीत्याद्यदलार्थः प्र
तिबिंबरूपापारमार्थिकसारूप्यं च शेषदलार्थः तथा च परिणामित्वादिरूपबुद्धिसारूप्याभाव एव
शुद्धिः बुद्धिवृत्तिसारूप्यमेव च प्रत्ययानुपश्यत्वमित्याशयात् सारूप्याभावसारूप्ये क्रमेण प्रति
पादयति न तावदित्यादिना कस्मादित्यस्योत्तरं परिणामिनी हि बुद्धिरिति परिणामित्वे हेतु
र्ज्ञाताज्ञातविषयत्वादिति ज्ञातेत्याद्यंकं विवृणोति तस्याश्चेति तस्या बुद्धेर्गोहेतौ गवादि
रिति गोशब्दः शब्दवाची अतो गवादि च यादिपदाभ्यां धर्मधर्मिसामान्यपरतया धर्मधर्मि
रूपाणामशेषाणां बुद्धिविषयाणां ग्रहणं ज्ञातौ वृत्तिव्याप्यत्वादन्यथाज्ञानः दर्शयति अनुमा
पयतीत्यर्थः अयं भावः यदि बुद्धिपरिणामिनी स्यात्तदैव कदाचिद्बुद्धिः शब्दाद्याकारा भवति
कदाचिन्नेत्युपपद्यते न च पुरुषवद्बुद्धावपरिणामित्वेपि विषयस्य प्रतिबिंबनमेव विष
याकारतास्तु तत्र प्रतिबिंबकादाचित्कत्वेन ज्ञाताज्ञातविषयत्वमुपपद्यतेति वाच्यं स्वप्रमा
नादौ विषयासंनिधानेन तत्प्रतिबिंबासंभवात् एतेन बुद्धौ विषयप्रतिबिंबवचनं तत्तस्

मानाकारपरिणामसामान्येनानुमितो बुद्धेर्ग्रहणस्यानित्यत्वात्तस्याश्चार्थाकारपरिणामो नुमीयत
इति बुद्धेः परिणामित्वं दर्शयित्वा तदभावं पुरुषे दर्शयति सदा ज्ञाता इति सदा ज्ञातो विषयो बुद्धि
वृत्तिरूपो येन तस्य भावः सदाज्ञातविषयत्वं परिशेषयति अनुमापयति यदि हि पुरुषः परि
णामी स्यात्तदा ज्ञानपरिणामेन कदाचित्पुरुषस्य विषयो बुद्धिवृत्तिरज्ञातापि तिष्ठेत ततश्च
वर्त्तमानायामपि घटादिवृत्तेरज्ञानसंभवात् घटादिकं निश्चिनोमि न वेत्यादिसंशयः स्या
त् तथा योग्यानुपलब्ध्या घटादिज्ञानाभावनिश्चयश्च न स्यात् अज्ञातवृत्तिसत्तासंभवा
दिति भावः नन्वेतावता भोक्तृत्वे न परिणामो मास्तु सुखादिपरिणामाभावस्तु कथं तेना
नुमाप्यत इति चेत् उच्यते शब्दादिनिश्चयरूपस्य परिणामस्य बुद्धौ सिद्धौ न तत्कार्याणामि
च्छादीनां सुखदुःखादृष्टसंस्कारादीनां बुद्धिधर्मत्वेनैव सिद्धेः सामानाधिकरण्यप्रत्यासत्त्या
कार्यकारणभावे लाघवादिति ननु पुरुषस्यापि सदाज्ञातविषयत्वे प्रलयादौ स्वविषयस्य
बुद्धिवृत्तेरदर्शनादित्याक्षिपति कस्मादिति समाधत्ते नहीति न हि पुरुषविषयो बुद्धिवृत्तिरपि
शब्दादिवत्स्याद्भवति येन त्वग्रहणाग्रहीताग्रहीता चक्रमभेदेन भवतीत्यर्थः तथा च सम्पर्षे १०२
ते न चिदप्रतिबिंबो स्तिदृश्याभावादते किल कचिन्नाप्रतिबिंबेन किंचाद्दर्शो वर्तिष्यत इति तथा

च प्रलयादौ वृत्त्याख्यविषयाभावादेव तां न पश्यतीति भावः उपसंहरति इति सिद्धमिति परिणा
मित्ववदेव परार्थत्वापरार्थत्वरूपमपि वैधर्म्यं बुद्धिपुरुषयोर्दर्शयति किं चेति बुद्धिः परार्था
स्वामित्रस्य भोगादिसाधनं संहत्यकारित्वात् सहकारिसापेक्षव्यापारकत्वात् शय्यासनश
रीरादिवत् पुरुषश्च स्वार्थः स्वस्य च भोगादिसाधनं उक्तहेत्वभावात् यन्नैवं तन्नैवं यथात्म
वदित्यन्तरत्यर्थः बुद्धेर्हि व्यापारो विषयग्रहणादिः इन्द्रियादिसापेक्षः शय्यादीनामपि शय
नादित्याक्षिपति कस्मा। कार्यं भक्ष्यादिसापेक्षं पुरुषस्य सुखादिप्रकाशने च व्यापार एव न भ
वति स्वरूपतो नित्यत्वात् नापि सुखादिसत्त्वे तत्प्रकाशार्थं पुरुषः सहकारिणमपेक्षत इ
ति भावः बुद्ध्यादेः परार्थत्वे च श्रुतिः न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु का
माय सर्वं प्रियं भवतीत्यादि अन्यत्र श्रुतिस्त्वार्थेरतिसाधनस्य न परार्थं इत्यर्थमाह तन्न भव
चेतनस्यापि स्वामिवत्तनार्थत्वदर्शनात् पारार्थ्यमेव तु परमात्मार्थत्वमिति चेन्नाचेत
नत्वरूपवैधर्म्यान्तरमाह न च स्वाभावोऽयेति सुखदुःखमोहात्मकाश्च गुणास्तत्कार्यो नग
हृतो बुद्धिरपि तदाकारतया त्रिगुणा सत्त्वादिगुणात्मकमयीत्यनुमीयते त्रिगुणत्वाच्च यथा
दिवदचेतनेति सिद्धं गुणानां तु रूपद्रष्टा पुरुषो द्रष्टा बुद्धिसांनिध्ये न बुद्धिवृत्तिप्रतिबिंबमात्रतो

गुणत्रय्यात्मकं भवति त्रिगुणाकारपरिणामेन बुद्धिवदिति अतो न सत्त्रिगुणस्तत्त्वे चेतन इति शे
षः उपसंहरति अत इति अतो वैधर्म्यत्रयात् बुद्धिसरूपः पुरुष इत्यर्थः एतावता सूत्रद्वयमिति
व्याख्यातं ननु सर्वाभिमाननिवृत्त्यर्थं सामान्यत एव दृग्दृश्यविवेकः प्रतिपादनीयः तत्किमि
ति बुद्धिपुरुषयोरेव वैधर्म्यं प्रतिपाद्यत इति चेत् न बुद्धिरेव पुरुषस्य साक्षाद्दृश्या बुद्ध्यारूढ
तयैवान्येषां दृश्यत्वात् तस्यामेव च साक्षादभिमानस्तत्संबंधादेवान्यत्राभिमानात् मृत
देहे सुषुप्त्यवस्थायां च चैतन्याभावस्य स्पष्टत्वात् एकैकेंद्रियपातेपि चैतन्योपलब्धे
द्रिवैधर्म्यमेव पुरुषेषु प्राणानामप्यचेतनत्वस्य स्पष्टत्वात् अतो बुद्धिविवेकादेव सर्वाभि
माननिवृत्तिरित्याशयेन बुद्धिवैधर्म्यमेव पुरुषेषु प्राधान्येन प्रतिपाद्यते किं च बुद्ध्यतिरि
क्तेभ्य आत्मविवेकस्य न्यायवैशेषिकाभ्यामेव सिद्धत्वेन बुद्धितो विवेक एव सांख्ययोगयो
रसाधारणं कृत्यमिति अस्तं तद्वैरूप्यं निराकर्तुमुपपत्तिमाह सतो हीति यत इत्यस्य प
र्यायः प्रत्ययानुपश्य इत्येतद्व्याचष्टे प्रत्ययं बौद्धमिति बुद्धिवृत्तिमनुपश्यतीत्यर्थः न
नु बुद्धिद्रष्टृत्वेपि कथं नात्यंतं बुद्धिवैरूप्यं तत्राह तमनुपश्यन्निति यतस्तमनुपश्यन्नतः उ १०३
हृष्टोतदात्मापि परमार्थतो बुद्ध्यसरूपोपि तत्सरूप इव प्रकाशते तदनुकारी भवति स्फटिक

दवज्जपासरूप इत्यर्थः अर्थाकारत्वस्यैवार्थग्रहणरूपतया बुद्धिस्थले सिद्धत्वादिति भावः
प्रतिबिंबरूपेण च मिथ्यातादृप्येण न पारमार्थिकसारूप्यविरोधः यथोक्तयोर्वैरूप्यसारू
प्ययोः पंचशिखाचार्यवाक्यं प्रमाणयति तथा चोक्तमिति भोक्तृशक्तिर्बुद्धिवत्परिणामिनी न भ
वति तथा बुद्धिवत्स्वविषये संक्रांता उपरक्तापि न भवति विकारहेतुसंयोगस्यैवोपरागत्वा
त् बुद्धिविकारप्रतिबिंबेनैवोपपत्तौ पुरुषस्य विकारकल्पनावैयर्थ्यात् आभ्यां विशेषणाभ्यां
वैरूप्यं दर्शितं इदानीं सारूप्यं दर्शयितुमाह बौद्धे चिद्रूपत्वमुपपादयति परिणामिन्यर्थे इति
परिणामिनि स्वस्वार्थे विषये बुद्धौ प्रतिबिंबरूपेण संक्रांतेवोपरक्तेव सती तद्वृत्तिं विषयाधा
कारमनुपतति चेतनामिवकरोति यथा सूर्यो जलेनुपतन् जले स्पंदमिवकरोतीति तद्वत् अ
नेन बुद्धेरूपं दर्शयित्वा पुरुषस्य बुद्धिसारूप्यं दर्शयति हि यावदेवधारणी तस्यामपि भोक्तृश
क्तेर्ज्ञानवृत्तिर्ज्ञानरूपावृत्तिर्बुद्धिवृत्त्यविशिष्टेनेमा व्याख्यायत इत्यन्वयः अत्र हेतुः प्राप्तेति उपग्रहः
उपग्रहः उपरागः उक्तरीत्या प्राप्तचैतन्योपरागत्वस्या बुद्धिवृत्तेरनुकारिणी प्रतिबिंबोद्ग्राहि
णी तन्मात्रेण चेति ज्ञानवृत्तेर्विशेषणं तथा च परस्परप्रतिबिंबात् द्वयोरपि चेतनत्वसुखादि
परिणामकत्वरूपं सारूप्यमित्यर्थः आख्यायत इत्यनन्तरमिति शब्दः पूरणीयः तदनेन सूत्रे

गाज्ञो वेश्वरस्याधारणेनैव चिन्मात्रत्वमुक्तं तथा च श्रुतिस्मृती चेतामात्रः प्रतिपुरुषं क्षे
त्रज्ञ इति ज्ञानमेव परं ब्रह्म ज्ञानं वै बाधवेष्यते ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परं इ
ति ये तु वैशेषिकादयो ज्ञानाश्रयमात्मानं मन्यन्ते ते श्रुतिस्मृतिविरोधेनोपेक्षणीयाः किं
च लाघवाच्च प्रतिपुरुषमेकैकमात्रं नित्यज्ञानसिद्धौ तस्याश्रयो गौरवान्न कल्प्यते ज्ञाना
मीति प्रत्ययस्य संयोगसंबन्धेनैवोपपत्तेः यथा हि धनं तेजस्वीति प्रत्ययः संयोगसंबन्धेन
प्रमा तथैव बुद्धौ ज्ञानाख्यद्रव्यसंयोगेन ज्ञानवत्वप्रत्ययः यमेव लोकानामहमिति प्रत्ययो बा
ह्यं बुद्धिरपि भासते अनादिमिथ्याज्ञानवासनाख्यदोषस्य प्रतिबन्धमानाभावात् अतो
ऽहं जानामीत्यविदुषां प्रत्ययोऽहमंशे भ्रमो ज्ञानवत्वांशे प्रमेत्यावयोः समानमेव विदुषां तु
जानामीति प्रत्ययो सिद्ध एव परमेश्वरस्य सर्वज्ञत्वादिव्यवहारश्च लोकव्यवहारादिति अधि
कं तु सांख्यभाष्यादौ प्रोक्तमिति दिक् बुद्ध्यतिरिक्ते द्रष्टरि प्रमाणमाह सूत्रकारः तदर्थ एव दृश्यस्या
त्मा तस्य पुरुषस्यार्थः प्रयोजनं भोगापवर्गौ येनार्थः प्रयोजनं यस्य स तदर्थ इति मध्यमपदलो
पी समासः पुरुषस्य भोगापवर्गप्रयोजनकमेव दृश्यस्य स्वरूपं कार्यकारणात्मकं गुणत्रयं १०४
न स्वार्थमित्यर्थः तथा च गुणाः परार्थाः संहत्यकारित्वात् शय्यादिवदित्यनुमानेन बुद्ध्याद्यति

रिक्तस्य पुरुषाख्यस्य परस्य सिद्धिरिति भावः इदं चानुमानं पूर्वसूत्रे व्याख्यातं तदर्थ एव दृश्य
मित्येतावन्मात्रेणैव निर्वाहेऽप्यात्मपदं धात्वर्थे दर्शने तदर्थत्वात्प्रभ्रमनिरासाय प्रयुक्त
मिति तदर्थत्वे युक्तिं वदन्सूत्रं व्याचष्टे दृशिरूपस्येति यतो दृशिरूपस्य पुरुषस्य यत्कर्मैव कर्म
मे दर्शनं तद्विषयतो गतमेव वस्तु दृश्यं भवति दर्शनं च सर्ववस्तूनां प्रयोजनमिति सर्वसंमतं
अतस्तदर्थमेव दृश्यस्य गुणादेः स्वरूपं भवतीति घटतोऽस्यार्थः नहि परप्रयोजनकं वस्तु परप्रयो
जनं विना क्षणमपि स्थातुं क्षमते नित्यमनित्यं वा प्रयोजनं विना कस्यापि परार्थस्यावस्थान
दर्शनेन पुरुषार्थस्य तत्स्थितिहेतुत्वसिद्धेरिति भावः अनेन च सूत्रेण चैतन्याधीनास्ता दृश्य
स्य न तु स्वत इति सिद्धं सूत्रान्तरमवतारयितुं उपक्रमते तेनात्स्वरूपमिति ननु दृश्यस्वरूपं यदि परस्य
पुरुषस्य रूपेण दर्शनेन निमित्तेन तदर्थं प्रतिलब्धात्मकं लब्धसत्ताकं तर्हि भोगापवर्गौ येता
यां भोगापवर्गरूपे पुरुषस्यार्थे संपूर्णे कृते सति पुरुषेण न दृश्यतां इति कृत्वा स्वरूपत्यागान्ना
शोऽस्तु तौ उच्छेदोऽस्य गुणादेः प्रसक्त इत्यर्थः प्रयोजनसमाप्ता हि प्रयोजनकारिता अपगत इति धर्मा
धर्मवासनाविरत्यादिस्योच्छेदः तथा च प्रवृत्तिनिमित्तस्य नादिप्रवाहाच्छेदनिर्मोक्षयोर्दिसि
द्धांतहानिरिति पूर्वपक्षः अत्र सिद्धांतमाह न तु विनश्यतीति पश्यति कस्मादिति अत्र यत्सूत्र

रं सूत्रं पठति कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् भावप्रेकृतार्थमिति व
द्याकृतः समापितोऽर्थो यस्येति कृतार्थमेकं कंचिन्मुक्तपुरुषं प्रति गुणादिकं नष्टं प्रयोजना
करणाद्वाऽऽत्तांशस्य वन्नष्टमपि सामान्यतो न नष्टं तस्मिन्कृतार्थेऽन्यपुरुषे च तस्य साधा
रणत्वादित्यर्थः योजितं सूत्रं तात्पर्यतो व्याचष्टे कुशलमित्यादिना रूपमितीत्यंतेन कुशलं कु
शलानुमक्तं अकृतोऽर्थो येनेत्यकृतार्थ शेषं व्याख्यातप्रायं सोयं सूत्रार्थः श्रुत्याप्यनुगृहीतो
यथा अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोऽनु
शेते जहात्येनां भुक्तभोगामजोऽन्य इति तदनेन सूत्रेण प्रकृतिनित्यत्वं पुरुषबहुत्वं च प्रति
पादितं तथा पुरुषभेदात् प्रकृतेर्भेदो नास्तीत्येवं रूपं प्रकृतेरेकत्वं च प्रतिपादितं विज्ञानवा
दादिनिरसायेति ननु एवं यथा घटो कुंभकमंडलुस्थमाकाशमेकं बहुधा हि भिन्नं तथास्वा
हंसश्चकाशि योऽहमन्ये च देहेषु शरीरभेदेष्वित्येवंविधश्रुतिस्मृतिशतोक्तं सर्वात्मनामैक्यं
विरुद्धमिति चेत् न तादृशवाक्यैः प्रकरणभेदेन क्वचिद्वैधर्म्यलक्षणभेदप्रतिपादनात्
सर्वात्मनामेव वैधर्म्यज्ञाने नैवापरिणामित्वाद्युद्धाद्यभिमाननिवृत्तितो मोक्षसिद्धेः क्वचिद्वि १०५
विभागलक्षणभेदप्रतिपादनात् ततश्चैकस्यैव परमात्मनो मुख्यात्मता सिद्ध्यतीति एतच्च स

र्वं ब्रह्ममीमांसाभाष्ये श्रुतिभाष्यादिषु च प्रपंचितमस्माभिः न पुनस्तादृशवाक्यानां चात्मपर
मात्माखंडतापरत्वं संभवति बंधमोक्षानुपपत्तिरूपसत्तर्कानुग्रहेण वस्तवाभेदे भेदग्राहक
श्रुतिस्मृतिशतैर्विरोधात् आपेक्षिकं तु भेदनिर्देशात् अंशो नानाव्यपदेशात् इति ब्रह्ममी
मांसामारभ्य सर्वदर्शनसूत्रैरतिस्फुटमात्मभेदप्रतिपादनेन भेदस्यैव श्रुत्यर्थत्वावधा
रणाच्च अपि च सर्वात्मनामैक्यमात्रज्ञानान्न संसाराभिमाननिवृत्तिः संभवति एकस्मिन्नेवा
काशेऽवच्छेदभेदेन शब्दतदभाववत् एकस्मिन्नेवात्मन्युपाध्यवच्छेदेन संसारासंसारयोः सं
भवात् विवेकज्ञानापेक्षणे च तत एवाभिमाननिवृत्तेरैक्यज्ञानस्य न दृष्टद्वारा मोक्षहेतुत्वं
स्यात् नाप्यात्मैक्यज्ञानात् सर्वात्मब्रह्मोपासनाफलं संभवति साक्षात् कुक्कुरत्वादिदृष्ट्या ब्र
ह्मणो निंदापातकप्रसंगात् जडवर्गे च विभागलक्षणभेदेनोपासनायाश्रवत्परकल्पत्वे
न चेतनवर्गेऽपि तथैवोचितत्वाच्चेति तस्मात् प्रयोजनाभावात् नात्माखंडताप्रतिपादने
श्रुतिस्मृत्योस्तात्पर्यं आपेक्षिकं तु ब्रह्ममीमांसायामस्माभिरयुक्तिकं वेदांतिब्रुवमतखंडना
वसरे प्रतिपादितमिति दिक् तदेवं विशेषाविशेषेत्यादिसूत्रगणेन दृश्यपुरुषस्य स्वत एव
दर्शनशक्तेश्च बुद्धेः कारणरूपेण नित्यत्वे सिद्धे तयोः संयोगः प्रवाहरूपेणानादिरिति शास्त्रे

षुप्याख्यानमपपन्नमित्याह अतत्त्वेतिविनाशित्वेहिभावरूपाणांगुणानामनादित्वंनघटे
ततत्रअतत्कार्यबुद्धेः ततश्चबुद्धिपुरुषसंयोगस्येतिभावः बुद्धिपुरुषसंयोगस्यप्रवाह
रूपेणानादित्वेपंचशिखाचार्यसंवादमाहतथाचोक्तमिति अर्पितांगुणानांप्रकर्षैः स्वहाना
दिसंयोगादितितुगुणानित्यत्वंविनाधर्मसामान्यानांबुध्यादीनांसंयोगानादित्वंनघटत
इतिप्रतिपादनायप्रदर्शितं तदेवंप्रकाशप्रवृत्त्यादिसूत्रैः पंचविंशतितत्वान्यत्रसंक्षे
पतोरविवेकेनोक्तानिविस्तरस्तुसांख्यदर्शनेद्रष्टव्यः प्रकृतिपुरुषविवेकस्येदंमुख्यंतत्व
त्वप्रतिपादनात् अतत्रयोगस्येचेति द्रष्टृदृश्ययोः स्वरूपमुक्तंइदानींतत्संयोगस्यस्वरू
पप्रदर्शकंसूत्रमस्यापपत्तिसंयोगस्वरूपेतिद्रष्टृदृश्ययोः संयोगसामान्यंनहेयहेतुः
प्रलयमोक्षादिसाधारण्यात् अतः संयोगगतविशेषावधारणायेदंसूत्रंप्रवर्त्ततइत्यर्थः
स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः स्वशक्तिर्दृश्यंभोग्यतायोग्यत्वात् स्वामिशक्ति
र्द्रष्टाभोक्तृयोग्यत्वात् तयोः स्वरूपोपलब्धौहेतुर्यः संयोगविशेषः सएवद्रष्टृदृश्यसंयोगोत्र
हेयहेतुरुक्तइत्यर्थः विभुनाद्रष्ट्राहृश्यसंयोगसामान्यस्यसार्वकालिकत्वेनहेतुत्वादितिभा १०६
वः सचसंयोगविशेषोबुद्धिद्वारकः दृश्यबुद्धिसत्वोपाधिरूपः सर्वैर्धर्मैरितिपर्वभाष्या

दत्तोदृश्यवत्याबुद्ध्यासंयोगएवात्रसंयोगविशेषः आत्मेन्द्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिण
इत्येवंविधश्रुत्यादिभ्योलिंगदेहात्मसंयोगादेवात्मनोविषयदर्शनावगमादितिरातेनभोग्य
भोगयोग्यतैवद्रष्टृदृश्ययोरनादिः संबंधः संयोगांकुरितुल्यस्यपरिणामित्वापत्तेरितिकस्य
चित्प्रलापः सूत्रस्वरसाद्वेषः तथासतिस्वस्वामिभावः संयोगइत्येवसूत्रेचितत्वात् संयोग
स्यानादित्वेकल्पितत्वेसत्यागामिसूत्राभ्यामुत्पत्तिविनाशवचनानुपपत्तेश्च चेतनत्वाचेतनत्वा
तिरिक्तस्यप्रतिनियतस्ययोगस्यज्ञानाच्छेदकस्यानिरूपणाच्च तयोश्चमोक्षकालसाधारण्ये
नहेयाहेतुत्वात् यदिचस्वभुक्तत्वित्ववासनावत्वंप्रवाहरूपेणाचवासनायाअनादितंतदेववसं
योगइत्युच्येत तथापितादृशसंयोगस्यभाष्यवक्ष्यमाणमविद्यावासनाजन्यत्वादिकंनघटे
तैवयथाकृतसंयोगस्यागानोचित्यादिकंचेतियच्चोक्तंसंयोगेनपरिणामित्वमितितत्परिणा
मलक्षणाज्ञानात् संयोगविभागमात्रेणाकाशादौपरिणामव्यवहाराभावेनसामान्यगुण
तिरिक्तधर्मोत्पत्तिरेवपरिणामइत्युक्तत्वात् अन्यथाचप्रतिसर्गंप्रकृतिपुरुषयोः संयोगविभागो
क्तिस्वरूपयोः अपमाणेविरुध्येतां नाहेप्रतिसर्गयोयपत्तोत्पादविनाशेयपटेतोपुरुषस्यपरिणा
मप्रसंगात् यथाकृतसंयोगविभागयोरेवोत्पादादिक्रमोवित्याद्येतिदिक् सूत्रार्थविवरणेतिय

रूपइत्यादिनासौपसर्गइत्यंतेनसंप्रयुक्तइतिभवतीतिशेषः सूत्रेस्वरूपपदंचविवेकख्यातिप
र्यंतस्यदर्शनस्याभासस्यसंयोगजन्यत्वप्रतिपादनायेति इहांतेविवेकख्यातिरविप्लवाहानो
पायइतितस्यहेतुरविद्येति चागामिसूत्रद्वयपर्यालोचनेनैवसूत्रेणोपपादितइत्येतत्क्रमेणप्र
तिपादयतिदर्शनकार्यावसायादिनाकृतकृत्यस्यप्रयोजनाभावेनावस्थानासंभवेनदर्शनरूपका
र्यावसानःसंयोगइत्यतोदर्शनंद्रष्टृस्वरूपोपलब्धिर्वियोगकारणमर्थादनेनसूत्रेणोक्तमु
पपादितंतथादर्शनमदर्शनस्यप्रतिद्वंद्विविरोधीत्यतोदर्शनंसंयोगहेतुरित्यप्यर्थादुक्त
मुपपादितंतथादर्शनमदर्शनस्यप्रतिदर्शनयोर्विरोधेनविरुद्धयोरेववियोगसंयोगहेतु
भयकार्यत्वौचित्यादित्यर्थः ननुअदर्शनंचेत्संयोगकारणंतर्हिअदर्शनाभावादेवसंयोग
विनिवृत्त्यात्मकोमोक्षोभविष्यतिकथंदर्शनमपिमोक्षहेतुरुच्यतेइत्याशंक्याभावमाहना
त्रदर्शनमिति अत्रासम्यग्ज्ञानलिंदर्शनंतत्त्वज्ञानंनमोक्षकारणंगौरवात् निरोधादिभिर्व्यवधा
नेनमोक्षाव्यवहितप्राक्कालेज्ञानानियमाच्चसंभवाच्च किंतुअदर्शनस्यवक्ष्यमाणस्वरूपस्याभा
वादेवद्रष्टृदृश्यसंयोगाभावःसएवमोक्षइत्यर्थः एतेनमोक्षस्यानिमित्तिकत्वपक्षाभावविक १०७
त्वरूपेनित्यत्वंलब्धंनवैवंविवेकख्यातिरविप्लवाहानोपायइत्यागामिसूत्रविरोधोदर्शनं

वियोगस्यकारणमितिस्वोक्तविरोधश्चतत्राहदर्शनस्याभावइतिसुगमंउक्तंशास्त्रेतथाच
तथाचतत्त्वज्ञानमोक्षेप्रयोजकमात्रमिति उत्तरसूत्रेणसाधारणंसंयोगहेतुमदर्शनं
अवधारयितुमुक्तादर्शनंविकल्पयतिकिंचेदमिति किंपुनःसंयोगकारणत्वेनोक्तमद
र्शनमित्यर्थः नामेतिवाक्यालंकारेयद्यपिसंयोगोदर्शनकारणमितिसूत्रेणादर्शनस्या
नुत्पादएवसंयोगहेतुतयाप्रसक्तोनान्यःतथापितत्समनियततयाअन्येषामपिसंश
यकोट्यन्तराणिप्रदर्श्याकार्यचिंतावबोध्यंतत्रप्रथमोविकल्पःकिंगुणानामितिगुणानांसत्त्वादी
नामधिकारःकार्यारंभणसामर्थ्यंज्ञानाप्रदर्श्याकार्यविशेषजननशक्तिरित्यर्थः ततोपि
हिसंसारहेतुःसंयोगविशेषोज्ञायतइति द्वितीयंविकल्पंपरित्यज्यसर्वविकल्पेषुबंधकत्व
गुणयोगेनादर्शनशब्दोगौणःद्वितीयीयंविकल्पमाह आहोस्विदितिअदर्शनमित्यत्रदर्श
नशब्दस्यकरणसाधनत्वप्रतिपादनायदृशिरूपस्यस्वामिनोदर्शितविषयस्येतिचित्तवि
शेषणं दृशिस्वरूपायस्वामिनेदर्शितोविषयोयेनतस्येत्यर्थः उक्तमेवविवृणोतिस्वस्मिन्निति
स्वस्मिंश्चित्तेपुरुषार्थरूपेणदृश्यशब्दादिवृत्तौसत्त्वपुरुषान्यतावृत्तौचसत्यांयोदर्शनाभावस्त
न्नवत्यभावइत्यर्थः मोक्षकालीनंदर्शनाभावंव्यावर्तयितुंसत्यंत संयोगहेतुतयाचतादृ

शमदर्शनं तन्नात्र विचारणीयं प्रवृत्तेर्हि पुरुषार्थसत्ताया एवादर्शनं संयोगहेतुर्भवतीति भावः
व्यर्थेन पा द्वितीयविकल्पस्य विशेष्यभागपरित्यागमात्रेण तृतीयं विकल्पमाह किमर्थव
त्तेति सत्कार्यसिद्धे भोगविभोगापवर्गयोरव्यपदेश्ययोः स्वकारणेषु गुणेष्ववस्थानमित्यर्थः
चतुर्थविकल्पमाहाथाविद्येति पंचपर्वात्मविद्या प्रलयकाले स्वचित्तेन संहृत्य गुणेषु ली
ना वासनारूपेण भाविचित्तस्योत्पत्तिबीजमित्यर्थः तथा चाविद्यावासनैवादर्शनमि
तित्वयमेव पक्षः सिद्धान्तो भविष्यति पंचमविकल्पमाह किं स्थितीति प्रधाननिष्ठस्य
साम्यपरिणामहेतोः स्थितिसंस्कारस्य क्षये सति गतिसंस्कारस्य महदादिरूपविसदृश
परिणामहेतोरभिव्यक्तिरित्यर्थः तयैव हि प्रकृतिक्षोभद्वारा पुंप्रकृत्योः संयोगो जन्यत इ
ति तदुभयसंस्कारसद्भावे मतान्तरं प्रमाणयति यत्रेदमिति स्थित्यै गत्यै इति तादर्थ्ये चतु
र्थ्यौ एवकारौ च तयोः पश्चाद्व्याहार्यौ स्थित्यैवेति पाठे तु विशेषणे तृतीयेति तथा च प्र
धानं चेत् स्थितिमात्रेणैव वर्तेत तदा विकाराजनकत्वान्न प्रधानं स्यात् मूलकारणत्वं हि प्र
धानत्वमिति तथा गतिमात्रेण चेद्वर्तेत तदा महदादीनामपि प्रकृतिवदेव नित्यत्वापत्त्या १०८
किं कस्य मूलं स्यादिति न व्यवहारः संभवतीत्यत उभयथैव स्थितिगतिभ्यामेव प्रधान

स्यावस्थानं प्रधानव्यवहारं लभते कार्यतया न पुनरन्यथेत्यर्थः न केवलं मूलकारण एवायं
स्थितिगत्योः कालभेदेन निर्णायको विचारः किंतु कल्पितेषु विकाररूपेषु कारणान्तरेष्वपि म
हदादिष्वेष चर्चा विचारः समान इति प्रसंगादवधारयति नास्तिकानां तु वेदूपतावादमपा
कर्तुं कारणान्तरस्थापीति स च चर्चोपपाद्यते महदादिकं यदि स्थित्यैव निवत्त्यैव वर्तेत तर्हि कदा
पि घटानुत्पादनेन कारणत्वहानिः यदि च गत्यैव प्रवृत्त्यैव वर्तेत तदा मृद्घटयोर्द्वयोरेव त
त्कालतया कार्यकारणभावस्यानुपपत्तिरेवेति पुरुषात्मानं दर्शयितुं याक्षमता सा दर्श
नशक्तिः सैवादर्शनमित्यर्थः इयं च शक्तिर्विवेकख्यातिस्तत्स्यादरूपा संयोगस्य हेतुस्तथा
चोक्तं सांख्यकारिकया दृष्टाहमित्युपरमत्यन्येति पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधा
नस्य पंग्वन्धवदुभयोः संयोगस्तत्कृतः सर्ग इति चेति चेति तृतीयविकल्पस्य एवादर
सनत्वादस्य त्यागादस्य ततो भेदः प्रधानस्य दर्शनशक्तौ श्रुतिं प्रमाणयति प्रधानस्येति
कालस्तत्रणाख्यात्स्येव प्रकृतिः सप्तमं विकल्पमाह सर्वबोध्येत्यादिना अभासत इत्यन्तेन सर्व
बोध्ये समर्थोऽपि पुरुषः प्रधानप्रवृत्तेः प्राक् न पश्यतीत्येकमदर्शनं पुरुषनिष्ठं अपरं च सर्व
कार्याणां कारण उत्पादने समर्थं स्वरूपयोग्यमपि दृश्यं प्रधानं तदा त्वा प्राक् प्रधानप्रवृत्तेः

पुरुषेण न दृश्यत इति दृश्यनिष्ठमदर्शनमित्येवमुभयस्याप्यदर्शनं धर्म इत्येकस्माद्धेतोरित्य
र्थः एतदेव चात्राऽदर्शनमिति शेषः ननु ज्ञानाभावमदर्शनात्मकत्वात् कथं तेषां दर्शनं ध
र्मः स्यात् अभावस्याधिकरणस्वरूपत्वात् अव्यभिचारेण लाघवादेकतासिद्धेश्च कथं वा दृ
शिस्वरूपस्य पुरुषस्यादर्शनत्वं तेन प्रकाशरूपस्याप्रकाशरूपत्वासंभवात् इत्याशंकाऽसमा
धेर्त्तन्त्रेदमिति तत्रादर्शनद्वयमध्ये इदमेकमदर्शनं दृश्यस्वरूपभूतमपि दृश्यधर्म
त्वेन विशिष्टं भवति तत्र हेतुः पुरुषप्रत्ययापेक्षमिति पुरुषप्रत्ययं बोधमपेक्ष्य तद्विष
यतयेति यावत् अयेति तथा पुरुषस्य निर्धर्मत्वात् सदाप्रकाशरूपताद् ज्ञानात्मभूतमप्य
दर्शनं पुरुषधर्मत्वेनैव लौकिकबुद्ध्याऽवभासते तत्र हेतुः दृश्यप्रत्ययापेक्षमिति दृश्यप्र
त्ययमपेक्ष्य दृश्यगोचरप्रत्ययाभावेनेति यावत् अष्टमं विकल्पमाह दर्शनज्ञानमिति
ज्ञानं वासनारूपं तस्यापि दृश्यसंयोगहेतुत्वात् ननु भोगापवर्गरूपमनागतावस्थं द
र्शनमत्रोक्तं अर्थवत्तया पौनरुक्त्यमिति उपसंहरतीत्येवं इति शास्त्रेष्वेतेऽज्ञानभेदास्ता
न्त्रिकैरुक्तं तदित्यर्थः संयोगभेदेन सर्वेषामेवादर्शनानां हेतुत्वं सिद्धांतपक्षेऽपि वसंयोगविशे १०६
षहेतुदर्शनविशेषपरतयोत्तरसूत्रमवतारयति तत्र विकल्पेति तत्रादर्शने विकल्पबहुत्वे

भेदत्वादुक्तमेतत्पुरुषसामान्यस्य गुणान्यस्य च पुरुषार्थहेतुसंयोगसामान्यं प्रति कारणता
यां बोध्यं पक्षः प्रत्यक्चेतनस्य तन्नं बुद्धितन्नस्य स्वबुद्धिसंयोगो हेयहेतुः स्वस्वामीत्यादिप्रकृ
तसूत्रेणोक्तः तस्य हेतुरविद्या च तथैव विकल्परूपमदर्शनमेवेति सूत्रेण सहान्वयः प्रत्यक्
चेतनस्येति पाठे स्वस्वबुद्ध्युपगमणिलक्षचेतनस्येत्यर्थः अयं भावः अविद्याक्षयोत्तरमपि
जीवन्मुक्तस्य भोगार्थविषयरूपेण परिणतैर्गुणैः सह संयोग उत्पन्ने अतो नाविद्यागुण
पुरुषसंयोगसामान्ये हेतुः किं तर्हि योक्तो गुणाधिकारादिरेव स्वबुद्धिसंयोगस्तु जन्मापर
नामाऽविद्यां विना न भवतीति बुद्धिपुरुषसंयोगस्यासाधारणेनाविद्याहेतुर्भवति सैव
च बुद्धिसंयोगद्वारा द्रष्टृदृश्यसंयोगहेतुर्विच्छेद्या च भवतीत्याशयेनैसैवोत्तरसूत्रेण
सूच्यते न गुणाधिकारादिः तस्य सामान्यहेतुत्वात् एकस्य पुंसो मुक्तावपि पुरुषांतरार्थं
गुणाधिकारादितादवस्थ्यात् यदि च पुरुषेऽचिद्धेतुशक्यं तेते दिवहेयनिदानमत्र प्रतिपाद
नीयं अन्यथा कालकर्मेश्वरादीनामपि हेयहेतुसंयोगकारणतया तेषामप्यत्र प्रतिपाद्यता
पत्तेरिति तस्य हेतुरविद्या तस्य द्रष्टृदृश्यसंयोगस्य बुद्धिपुरुषसंयोगद्वारा हेतुरविद्येत्यर्थः आ
द्यप्रकारेण च सूत्रकारेणास्यार्थाभिप्राये विवृतस्येत्यस्य बुद्धिसंयोगस्येत्यर्थ उक्तः न तु साक्षादेव

द्रष्टृदृश्यसामान्यसंयोगस्यैव पूर्वसूत्रे प्रकृतत्वात् न बुद्धिमात्रसंयोगस्येति अविद्याया
अनात्मन्यात्मबुद्धिमात्रं तस्य बुद्धिसंयोगहेतुत्वात् अनित्यादौ नित्यादिबुद्धिरूपाणामवि
द्यानां वक्ष्यमाणविवेकख्यातिनाश्यत्वानुपपत्तेश्च सा चाविद्या बुद्धिसंयोगजन्मतया तत्
द्व्यवहितप्राक्काले न संभवतीत्यत आह भाष्यकारो विपर्ययेति संयोगान्तरीयाविद्यायाः स्व
चित्तेन सह तिरोहितायाः प्रधाने या वासना स्थिता तया वासितं प्रधानं तत्पुरुषसंयोगिनीं ता
दृशीमेव बुद्धिं सृजतीत्यनादित्वान्न दोषः अविद्यावासनाया बुद्धिपुरुषसंयोगहेतुत्वे प्र
क्रमाह विपर्ययेति विपर्ययजातवासनाबलात् पुरुषख्यातिरूपां कार्यनिष्ठां स्वकर्तव्य
चरमावधिं न प्राप्नोति बुद्धिरतः साधिकारतया पुनरावर्तते पुरुषेण संयुज्यते सा तु बुद्धिः
पुरुषख्यात्याख्यातिपर्यन्ता सती कार्यसमाप्तिं प्राप्नोति परवैराग्योत्पादात् ततः चरिताधि
कारा निष्पादितकार्या निवृत्ताविद्या सती संयोगाभावं बन्धस्य कारणाभावात् न पुनः पुरु
षेण संयुज्यत इत्यर्थः तथा चान्वयव्यतिरेकाभ्यां विपर्ययवासना बुद्धिपुरुषसंयोगहेतु
रिति भावः पुरुषख्यात्याच्चित्तस्य निवृत्तिरिति यदुक्तं तत्र नास्तिकाक्षेपं निराचिकीर्षुर्वैलोम्य
दर्शयति कश्चिदिति षंडकोपाख्यानेन दृष्टान्तेनोद्घाटयति आक्षिपतीत्यर्थः न पुंस ११०

काख्यानमेवाह मुग्धे इत्यादिना उत्पादयिष्यतीत्यन्तेन षंडकस्त्रीभार्यां विनष्टमिति वि
नष्टे परवैराग्येण निरुद्धं ज्ञानं चित्तनिवृत्तिरूपं मोक्षं करिष्यतीति नास्तिकस्याशय इत्यर्थः उपेक्षाय
वचनाय पूर्वाचार्यमखिन्नात्र सिद्धान्तमाह तत्रेति ईषदसमाप्त आचार्य आचार्यदेशीयः ईषदपे
क्षणीये प्रत्युत्तरदानमात्रेणाचार्यदेशीयत्वं आचार्यश्चायं प्रोक्तः आचिनोति च शास्त्रा
र्थमाचारे स्थापयत्यपि स्वयमाचरते यस्मादाचार्यस्तेन चोच्यत इति नन्विति संबोध
नेन तदुक्तं भावयति ज्ञानं न साक्षान्मोक्षहेतुरस्माभिरिष्यते किंत्वविद्याख्यादर्शननि
वृत्तितत्कार्यनिरोधयोगद्वारा तथा च विनष्टमपि ज्ञानं बुद्धिपुरुषवियोगरूपमोक्षव्यापा
रकारणं संभवत्येवेति ननु यद्ययमाचार्यदेशीयस्तर्हि किं बुद्धिचित्तादिनामकान्तःकरण
निवृत्तिर्मोक्ष एव न भवतीत्याशंकायामाह तत्र चित्तेति चित्तनिवृत्तिर्मोक्षो भवत्येव किं
तु तत्राख्यानरवास्य नास्तिकस्य बुद्धिव्यामोहोऽयमर्थः यतोऽत्रोपेक्षणीये समाधानता
देवाचार्यदेशीय उक्तवानित्यर्थः तदेवं हेयहेतुरूपं व्यूहद्वयं व्याख्यायातो हानस्य स्वरूपमव
तारयति हेयमिति निमित्तं अविद्या तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यं तस्या
अविद्याया अभावादिनाशाद्बुद्धिपुरुषसंयोगनिवृत्तिद्वारा द्रष्टृदृश्यसंयोगनिवृत्तिः दुःख

द्रष्टृदृश्यसामान्यसंयोगस्यैव पूर्वसूत्रे प्रकृतत्वात् न बुद्धिमात्रसंयोगस्येति अविद्यावा
सनात्मस्यात्मबुद्धिमात्रं तस्य बुद्धिसंयोगहेतुत्वात् अनित्यादौ नित्यादि बुद्धिरूपाणामवि
द्यानां वक्ष्यमाणाविवेकख्यातिनाश्यत्वानुपपत्तेश्च सा चाविद्या बुद्धिसंयोगजन्मतया त
दभ्यवहितप्राक्काले न संभवतीत्यत आह भाष्यकारो विपर्ययेति संयोगान्तरीयाविद्यायाः स्व
चित्तेन सह तिरुद्धायाः प्रधाने यावासनाश्रितातया वासितं प्रधानेन पुरुषसंयोगिनीं ता
दृशीमेव बुद्धिं सृजतीत्यनादित्वान्न दोषः अविद्यावासनाया बुद्धिपुरुषसंयोगहेतुत्वेष्ट
हिमाह विपर्ययेति विपर्ययजातवासनाबलात् पुरुषख्यातिरूपां कार्यनिष्ठां स्वकर्तव्य
चरमावधिं न प्राप्नोति बुद्धिरतः साधिकारत्वाय पुनरावर्तते पुरुषेण संयुज्यते सा तु बुद्धिः
पुरुषख्यातिपर्यवसाना कार्यसमाप्तिं प्राप्नोति परवैराग्योत्पादात् ततः चरिताधि
कारनिष्पादितकार्या निवृत्ताविद्या सती संयोगाख्यबंधस्य कारणाभावात् न पुनः पुरु
षेण संयुज्यत इत्यर्थः तथा चान्वयव्यतिरेकाभ्यां विपर्ययवासना बुद्धिपुरुषसंयोगहेतु
रिति भावः पुरुषख्यात्या चित्तस्य निवृत्तिरिति यदुक्तं तत्र नास्तिकाक्षेपं निराचिकीर्षुरुप ११०
दर्शयति अत्र कश्चिदिति पंढकोपाख्यानेन हसंतेनोद्घाटयति आक्षिपतीत्यर्थः न पुंस

काख्यानमेवाह मुग्धयेत्यादिना कुत्सादपि ष्यतीत्यंतेन सपंडकस्त्रीभार्यो विनष्टमित्ति वि
नष्टे परवैराग्येण निरुद्धं ज्ञानं चित्तनिवृत्तिरूपं मोक्षं करिष्यतीति नास्तिकस्याशयस्यार्थः उपेक्षाप्र
चनाय पूर्वाचार्यमुखेनात्र सिद्धांतमाह तत्रेति ईषद्धसमान आचार्य आचार्यदेशीय उपे
क्षणीये प्रत्युत्तरदानमात्रेण वा यदेशीयत्वं आचार्यस्वयोप्योक्तः आचिनोति च शास्त्रा
र्थमाचारे स्थापयत्यपि स्वयमाचरते यस्मादाचार्यस्तेन चोच्यत इति नन्विति संबोध
नेन तदुक्तं भावति ज्ञानं न साक्षान्मोक्षहेतुरस्माभिरिष्यते किंतु अविद्याख्यादर्शननि
वृत्तितत्कार्यनिरोधयोगद्वारा तथा च विनष्टमपि ज्ञानं बुद्धिपुरुषवियोगरूपमोक्षव्यापा
रकारणं संभवत्येवेति ननु यद्ययमाचार्यदेशीयस्तर्हि किं बुद्धिचित्तादिनामकांतःकरण
निवृत्तिर्मोक्ष एव न भवतीत्यरुचिमाह तत्र चित्तेति चित्तनिवृत्तिर्मोक्षो भवत्येव किं
तु तत्राप्यानखास्य नास्ति कस्य बुद्धिव्यामोहोयमर्थः इत्यतोऽत्रोपेक्षणीये समाधानत्वा
देवाचार्यदेशीय उक्त इत्यर्थः तदेवं हेयं हेतुरूपं व्यूहद्वयं व्याख्यायतेऽथ व्यूहस्य सूत्रमव
तारयति हेयमिति निमित्तं अविद्या तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यं तस्या
अविद्याया अभावादिना शा बुद्धिपुरुषसंयोगनिवृत्तिद्वारा द्रष्टृदृश्यसंयोगनिवृत्तिः दुख

हानमित्युच्यते कार्यकारणयोरभेदोपचारात् तस्य पुरुषार्थत्वायोक्तं तद्दृशेः कैवल्यमि
ति तदेव च हानं पुरुषस्य कैवल्यमित्युच्यत इत्यर्थः इममेव सूत्रार्थं भाष्यकारः प्रकारां
तरेण हृतस्येति बुद्धिपुरुषसंयोगशब्देन कार्यकारणाभेदात् द्रष्टृदृश्यसंयोगोपि व्याख्यः
प्रलयकालीनवियोगव्यावर्त्तनायात्यंतिक इति बंधनोपरमस्य विशेषणं एतद्धानमिति
पदैकेन सहान्वेति तद्दृशेः कैवल्यमित्येतद्व्याचष्टे तद्दृशेरिति तद्धानं गुणैः बुद्धिगुणैर्द्रष्टा
दिभिः पुनरसंयोगः प्रतिबिंबरूपेण संबंध इत्यर्थः स एव च दुःखभोगनिवृत्तिरूपः स्व
तः पुरुषार्थ इति भावः सूत्रस्य फलितार्थमाह दुःखेति हानमित्यंते तेन व्याख्याने कैवल्यश
ब्दार्थं तदा द्रष्टुः स्वरूपेवस्थानमिति गतसूत्रं प्रमाणयति तदेति तदा दुःखनिवृत्तौ अस्य
च हानव्यूहस्य चतुर्थपादे विस्तरेण भविष्यतीत्यत्र दिङ्मात्रेणास्य उक्तः अतः परं हानोपा
यव्यूह इत्यत्र तु चतुर्थपादस्यापि क्लिप्तत्वार्थं तं वाच्यस्तत्र चतुर्थव्यूहं प्रतिपादयन् सूत्रमवता
रयति अथेति बुद्धिसंयोगनिवृत्तिरेव साक्षाद्दुःखहानेकारणं विवेकख्यातिस्तु बुद्धिसंयो
गहेत्वविद्यानिवर्त्तकत्वेन परंपरयेति प्राप्तिशब्देन सूचितं विवेकख्यातिरविप्लवा हानो ११३
पायः साक्षात्कारनिष्ठारूपत्वलाभायाविप्राप्तिशब्देनेति विशेषणं तत्राविप्लवशब्दात

कथमेतल्लभ्यत इत्याकांक्षायामाह सात्विति विप्लवते मिथ्याज्ञानसंस्कारवशात् मिथ्याज्ञाने
नांतरांतराभिभूयत इत्यर्थो यदेति पदात् साक्षात्कारदशायां सूक्ष्मं मिथ्याज्ञानमनागता
वस्थं दग्धबीजतुल्यं तस्य विवरणं बंध्यप्रसवं बंध्यप्रसवसामर्थ्यं भवतीति तदा विधूतक्लेश
रजसः बुद्धिसत्त्वस्यात एव परवैशारद्ये वैलक्षण्ये अस्यैव विवरणं परस्यां वशीकारसंज्ञायां
परमाणुपरममहत्त्वांतोस्य वशीकार इति सूत्रोक्तायां मिथ्याप्रतिघातरूपायां वर्त्तमानस्य वि
वेकख्यातिप्रवाहो निर्मलो मिथ्याज्ञानाकलुषितो भवति अतः साविवेकख्यातिरविप्लवोच्यते
सा परसाक्षात्काररूपिणी हानोपाय इत्यर्थः केन द्वारेण हानोपाय इत्याकांक्षायामाह तत
इति ततो विवेकख्यातेः कारणात् मिथ्याज्ञानस्य सूक्ष्मरूपस्य दग्धबीजताप्राप्तिः ततश्च पु
नरप्रसव इति एवं एष विवेकख्यातिरूपश्चित्तनिवृत्त्यादिरूपमोक्षस्य पंथाः अस्य विवरणं
हानस्योपाय इत्यर्थः नन्वेवं ज्ञानादेव दुःखहानाख्यमोक्षवचनात् असंप्रज्ञातयोगस्य किं
प्रयोजनमिति चेत् न परवैराग्यजन्यासंप्रज्ञातयोगस्याप्यज्ञानद्वारतया मोक्षहेतुत्वाश्रया
दिति तस्याविवेकख्यातेरविप्लवाख्यनिष्ठायाः लक्षणमाह तस्य सप्तधा प्रांतभूमिः प्रज्ञा·
तस्याविवेकख्यातिरूपहानोपायस्य प्रांतभूमिकारूपिणी प्रज्ञा सप्तधेत्यर्थः तदेतद्व्याच

ध्येतस्येतीति तच्छब्दोक्तहानोपायस्य स्वरूपाख्यानं प्रत्युदितख्यातेरिति अस्य प्रान्तस्येति पुं
लिंगात्वपपत्तेः प्रत्याम्नायः परामर्शः नवान्नप्रत्युत्पन्नख्यातेः पुरुषस्य परामर्षे इत्यर्थः सं
भवतिपुरुषस्य पूर्वसूत्रेष्वप्रस्तुतत्वात् समस्येतद्याख्यातं गृह्णाति सप्तधेतीति अशुद्धीति
अशुद्धिविपर्ययाख्याः विघातकार्येयापादिकं च उत्तरसूत्रभाष्यात् सैवावरणरूपोम
लस्तदपगमाच्चित्तस्य प्रत्ययांतराणां विवेकख्यात्यन्येषामनुत्पादे सति परवैराग्यजानि
रोधयोगाद्व्यवच्छेदे प्रकारन्यूनता नास्तीत्यर्थः एकस्या एव प्रज्ञायाः सप्तप्रकारस्थानदशा
यां सप्तकाराप्रज्ञा विवेकिनो निष्पन्नज्ञानस्य लिंगं भवतीत्यर्थः एवकारे योगान्यवच्छेदे प्रका
रन्यूनता नास्तीत्यर्थः एकस्या एव प्रज्ञायाः सप्तप्रकारत्वमुदाहरति परेत्यादिना प्रथमं प्रका
रमाह परिज्ञातमिति परिज्ञातं साक्षात्कृतं मुमुक्षुभिर्हेयं नास्यावशिष्टं पुनर्ज्ञेयमस्तीत्य
र्थः द्वितीयं प्रकारमाह क्षीणा इति ततस्माद्धेयहेतवो विद्याकामकर्माद्यो विवेकसाक्षा
त्कारेणमनक्षीणाइत्यादिरर्थः तृतीयं प्रकारमाह साक्षात्कृतमिति ततश्चाविद्यादिक्षया
दुत्पन्नेन निरोधसमाधिना हेतुनाव्युत्थानकाले दुःखहानरूपो भावि मोक्षो मया साक्षात्
कृतः देहपातानंतरमेतादृशो मे मोक्षो भवितेति सत्त्वातीयसाक्षात्कार एव सज्जातीयांतर ११२

साक्षात्कारनाशे परिचितः असंप्रज्ञातयोगदृष्टांतेन कैवल्यमपि दृष्टप्रायमिति फलितार्थः
यथाप्रकृते निरोधसमाधौ हानसाक्षात्कारेणनपपत्तिर्वैफल्यभावादिति असंप्रज्ञातकाली
नश्च दुःखाभावो योग्यानुपलब्ध्या व्युत्थाने साक्षात् क्रियते यदिच संप्रज्ञानेपि दुःखं स्यात्
तदानुभवेनतत्तत्र स्तुतोत्थानं दुःखव्युत्थाने स्मर्यतेति अथवा निरोधसमाधिना निष्पा
द्यं हानं मोक्षो हानगोचरसंप्रज्ञानेन साक्षात्कृतमित्यर्थः चतुर्थं प्रकारमाह भावितःइति
अत्र फलं निष्पन्ना विवेकख्यातिरूपो हानोपायो भावितो निष्पादितः फलानिष्पत्त्येव सा
धनस्य सिद्धिरिति चक्रतस्कभावित इत्यादिप्रकारस्य द्वितीयस्थल एव पाठः अज्ञस्येनक्र
मोपपत्तेः एवेति एषा प्रान्तभूमिप्रज्ञाया विमोहे प्रज्ञानसमाप्त्यादिरूपा चतस्रो प्रज्ञायाः
प्रज्ञाख्यतत्त्वज्ञाननिमित्तासुसांकार्यमुक्तिः कार्याद्विमुक्तिः कर्तव्यसमाप्तिः जीवन्मुक्तिरि
त्यर्थः चित्तेति चित्तादिमुक्तिश्चित्तविमुक्तिः परममुक्तिः सापि प्रान्तभूमिप्रज्ञाया विषयः त्रि
विधा भवति चित्तविमुक्तिस्तु स्वयमेव भवति न तत्र साधनापेक्षेत्याशयेन प्रथमगुपन्या
सः तत्राद्यां चित्तविमुक्तिमाह चरिताधिकारा बुद्धिरिति समाप्तभोगापवर्गा भवति बुद्धिरित्यर्थः
इयं परवैराग्यरूपाचित्तनाशस्य धर्मभूमिकाद्वितीयामाह गुणा इति बुद्धेर्गुणाः संस्कारास्सुखदुःखा

दयः स्वकारणे सत्वादिसमष्टिगुणमयप्रकृतौ लीयमानास्तेन चित्तेन सहास्तं तत्क्षयं गच्छंति
तत्र दृष्टान्तो गिरीति गिरिशिखरकूटात् च्युताः शिला इवावस्थातुमक्षमा इत्यर्थः एषां च लिं-
गशरीरस्य विनष्टस्य च व्यवस्था द्वितीयभूमिकाः तृतीयामाह न चैषामिति न चैषां संस्कारस-
ह्वाक्षीणां पुनरुद्भवोऽस्ति पुरुषार्थसमाप्त्या प्रयोजनाभावात् इत्यत एतस्यामवस्थायां
पुरुषो बुद्ध्यादिगुणसंबंधविशेषशून्यः स्वरूपमात्रज्योतिः निर्विषयकचिज्ज्योतिः स्वरू-
पोऽमलः क्लेशोपाधिकृतमालिन्यरहितः केवली केवलेषु मुक्तेषु विभागी भवतीत्यर्थः इ-
यं चात्यंतिकफलनिष्पत्तिरूपा विदेहकैवल्यस्य चरमभूमिका इमां च सप्तविधां चित्तभूमि
भाविनीमेव जीवन्मुक्तदशायां विशुद्धचित्तो योगी साक्षात् करोतीति बोध्यं तदेवं सप्तवि-
धत्वात् सप्तप्रकारा प्रज्ञा व्याख्याता इदानीं सूत्रतात्पर्यार्थमाह एतामिति प्रज्ञा
वाभिमन्तव्या प्रज्ञामनुपश्यन्निति निरभिमन्यत इत्याशयः कुमानतानां प्रतिपादनायोक्तं बु-
द्धिवृत्तिं प्रज्ञां साक्षिभावेनैव जीवन्मुक्तः पश्यतीति न त्वभिमन्यत इत्याशयः कुशलः कल्याणः
अकल्याणबुद्धियत्नोपरित्यागादिति ज्ञानिनो जीवन्मुक्तस्य लक्षणं सूत्रेणोक्तं तत्प्रसंगात् स्वयं
परममुक्तस्य ततो विशेषमाह प्रतिप्रसव इति चित्तस्यात्यंतप्रलयेपि कुशल इत्येव भवतीत्य- ११३

ष दुःखादिभिः सत्वादिभिः सत्वादिभिश्चाकुशलगुणैरित्यंतवियोगादित्यर्थः एवकारेण जीव-
न्मुक्तदशायामपि बाधितमकुशलं तिष्ठतीत्युक्तं तत्र एवं च व्याख्यायत इत्यनेन जीवन्मु-
क्तावस्थायां गौणं कुशलत्वं व्याख्यामात्रं भवतीत्यनेन मुख्यं कुशलत्वमुच्यत इति यत्तु गीता-
यां सर्वारंभपरित्यागी गुणातीतः स उच्यत इति ज्ञानिनोपि गुणातीतत्वमुक्तं तद् गुणाभिमा-
नशून्यतामात्रं परमेश्वरस्य निर्गुणत्ववदिति अतः परं शास्त्रसमाप्तिपर्यंतं हानोपायव्यू-
हस्याशेषविशेषास्तत्प्रसंगेनैव च हानव्यूहस्य विशेषश्च व्याख्येयाः तत्रादौ विवेकख्या-
त्युपायप्रतिपादकं सूत्रं ज्ञातमवतारयति सिद्धेति सिद्धा निष्पन्ना अविप्लवेति यावत्
योगांगानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः सामान्यतो ज्ञानं श्रवणमननाभ्या-
मपि भवतीति दीप्तिपदं दीप्तिश्चात्राभ्यक्ततामतविशेषग्रहणं अत्र योगांगानुष्ठानादित्ये-
तेन वक्ष्यमाणयमादीनां योगांगत्वमपि ज्ञानांगतावदेव विवक्षितं अन्यथा तदपि बहिरं-
गं निर्बीजस्येत्यागामिसूत्रे योगांगतायां विशेषस्याप्रकृताभिधानताप्रसंगात् ननु योगां-
गानि योगसाधनानि तानि च पूर्वोक्ततया पुनर्नोक्तव्यानीति चेन्न कथं व्युत्थितचित्तोपि
योगयुक्तः स्यादित्यादिभाष्येणैव दत्तोत्तरप्रायत्वात् पूर्वपादे ह्युत्तमाधिकारिणोऽभ्यासवै-

ण्यपि एव योगयोः साधनमसक्तं तत्र मध्यमाधिकारिणां तपःस्वाध्यायेश्वरप्रणिधानान्य
पि योगसाधनानि क्रियात्वानि साधनानि एतत्पादस्यादावुक्तानि अतः परं मंदाधिकारिणा
यमादीन्यपि योगसाधनानि वक्तव्यानि ज्ञानसाधनप्रसंगेनेत्यपौनरुक्त्यं यद्यपि ज्ञानम
प्यसंप्रज्ञातयोगसाधनतयास्मिन् शास्त्रे प्रतिपादितं तथापि तद्योगसामान्येऽङ्गं न भव
ति संप्रज्ञातादेर्हेतुत्वात् अतो योगसामान्यस्य ज्ञानस्य चोभयोरेव तुल्यवदंगतयात्र यमा
दीन्यष्टावेव योगांगतया प्रतिपादयिष्यत इति सूत्रं व्याचष्टे योगांगानीति विपर्ययस्ये
ति विपर्ययशब्देन तत् कार्यं पापादिकमपि ग्राह्यं तस्याप्यशुद्धिरूपत्वात् ज्ञानमत्रयवते
पुंसः क्षयापायस्य कर्मणः यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि इति स्मृतेः नाश
श्चात्रात्यन्तता तथा तथा तनुत्वं त्वशुद्धिरपचत इत्युत्तरवाक्यात् क्लेशतनु करणार्थेष्वेषु
क्तसूत्राद्ववगतो न ज्ञाने नैव क्लेशनाश इत्यतो इति सिद्धान्तव्याघातः अन्तरोधिनीत्यत्र
सारिणो देव्याः सूक्ष्मग्राहिता गुणपुरुषेति गुणास्त्रयः सत्वादयः पुरुषश्चज्ञो वेश्वर एव विष
यः एतेन जिज्ञासामात्रद्वारा यमनियमान्तर्गतसर्वकर्मणां ज्ञानहेतुत्वं जिज्ञासानंतरं च ११४
कर्मत्यागश्च अनुत्पन्नज्ञाने नापीति वेदांतिनां मतं दुर्मनं मंतव्यं विपर्ययज्ञाननद्वारेणाप

यमनियमान्तर्गतकर्मणां ज्ञानहेतुत्वसिद्धेरिति अत एव कर्मणां सहितात् ज्ञानात् सम्यग्योगो
ऽभिजायते ज्ञानं च कर्मसहितं जायते दोषवर्जितमिति कौर्मादिषु कर्मणां ज्ञानकारणं तथा
साहित्येनानुष्ठानं सिद्धं यद्यपि विषयांतरसंचाराख्यप्रतिबंधनिवृत्तिरूपतयासंप्रज्ञा
तोपि ज्ञानकारणं तथाप्यशुद्धिक्षयद्वारा योगांगानुष्ठानमात्रमेव ज्ञानदीप्तिहेतुत्वमस्ति
न योगस्येत्यंगपदोपादानमिति ननु नानाविधाः कार्ये कारणभावदर्शनात् योगांगान्य
शुद्धिक्षयं प्रति ज्ञानं प्रति च कीदृशं कारणमित्याकांक्षायामाह योगांगानुष्ठानमशुद्धे
रिति अशुद्धेः कारणं वियोगरूपेणातिशयेनेत्यर्थः अयं भावः सत एव वस्तुनोतिशय
हेतुः कारणमव्यते असदुत्पादस्यानभ्युपगमात् तथा च सत्यैवाशुद्धिर्वियोगाख्येनाती
तावस्थारूपेणातिशयेन योगांगानां कार्यमिति एवं दृष्टान्तेपि बोध्यं विवेकख्यातेस्तु प्राप्तिका
रणमिति प्राप्तिरूपातिशयाधायकतया विवेकख्यातेः कारणमित्यर्थः प्राप्तिश्च उत्पत्तौ प्रति
बंधनिवर्तनं तत्र दृष्टान्तमाह यथेति नान्यथा कारणमिति नवैशेषिकादीनामिवोत्पत्तिका
रणं अस्मन्मते धर्मादीनां निमित्तकारणानां प्रतिबंधनिवृत्तिकारणत्वसिद्धान्तादित्याशयः
निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवदिति सूत्रे चैतत् व्यक्तं भविष्यतीति

वेकख्यातेरुत्पत्तौ च वित्तमेव कारणं स्वतन्त्रावस्थयोर्ग्रहणासामर्थ्यादिति पश्यति चैतन्नेति
उत्तरं न चैवेत्याहेति पूर्वोपाधेयगणा इति शेषः कारिकोक्तानि नव कारणानि पर्योक्तक्रममुदा
हरति तत्रेति ज्ञानस्य वृत्तिरूपस्य उत्पत्तिरूपातिशयेन मनः कारणं संभवति उपादानत्वादि
त्यर्थः आप्तिकारणे च नोत्पत्तौ साक्षात्कारणं किंतु प्रतिबंधनिवृत्तिद्वारेति घटादिषु दंडा
दीनि च पूर्वोक्तान्यपि कारणान्यप्येवप्रवेशनीयानि उत्पत्तिकारणत्वं च उपादानकारणत्वमि
ति स्थितीति भोगापवर्गरूपं पुरुषार्थसामान्यं मनसः स्थितिरूपातिशयेन कारणं भवति
पुरुषार्थसमाप्तौ मनसः स्वयमेव विलयादित्यर्थः अत्र प्राधान्येनैव मनस उदाहृतं पुरु
षार्थस्य सर्वभोग्यानामेव स्थितिहेतुत्वादिति अभिव्यक्तीति आलोको रूपज्ञानं च रूपस्या
भिव्यक्तिरूपातिशयेन कारणमित्यर्थः अभिव्यक्तिश्च बुद्धिवृत्तिः पौरुषेयबोधनं तद्बुद्धि
वृत्तौ आलोकः कारणं पौरुषेयबोधे च रूपज्ञानं बुद्धिवृत्तिरूपमिति विभागः विकारकारण
मितिरागस्य मनसो विषयांतरं स्वगोचररागादिविकाररूपातिशयेन कारणं भवतीत्यर्थः
प्रत्ययकारणमिति प्रत्ययः संप्रत्ययः प्रामाण्यनिश्चय इति यावत् तथा च पर्वते वह्निरस्ती ११५
तिज्ञापदग्निज्ञानं तस्य संप्रत्ययकारणं पर्वते धूमदर्शनमित्यर्थः यथाश्रुतेऽपि ज्ञानस्येत

त्र ज्ञानशब्दवैयर्थ्यात् आनुमानिकज्ञानस्याप्यभिव्यक्तिमध्य एव प्रवेशाद्धा प्राप्तिका
रणमिति आप्तिः प्राप्तिरित्येकार्थः एतच्चाख्यातं विभागेति एतदपि आख्यातमन्न
वियोगकारणे कारणव्यवहारो वनास्तीति चेन्न मशकार्थी धूममित्यादिव्यवहार
दर्शनात् कर्मकार्ययोरेकार्थतयाऽशेषत्वात् कर्मणो मे च कार्यत्वाच्चेति अन्यत्वकारणमि
तिरूपभेदकारणमित्यर्थः ननु विकारकारणादस्य को भेद इति चेत् उच्यते सुवर्णादेः
कटकादिरूपतात्यागेन कुंडलादिरूपतापत्त्या कारणं तत्सुवर्णादेर्विकारकारणमुच्यते त
देव च कारणं कटकादेरन्यत्वकारणमुच्यते कटकादिविनाशपूर्वकमन्येषां कुंडलादीनामु
त्पादनात् अतः कार्यभेदेनैकस्यैव वस्तुनो द्विधा कारणत्वमिति सुवर्णस्येति सुवर्णपिं
डादेरित्यर्थः सुवर्णस्य सर्वविकारानुगतत्वेन सुवर्णोन्यत्वाकरणात् अतोऽस्य विकारका
रणभेदः सुवर्णपिंडं कुंडलं करोतीत्यादिप्रत्ययश्चास्यां कारणतायां प्रमाणमिति वाऽस्याम
न्यत्वकारणमुदाहृत्यांतरमप्यन्यत्वकारणमुदाहरति एवमेकस्येति स्त्रीमनुष्यस्यत्साका
रपरिणतबुद्धिरूपस्य वस्याख्यस्य राकजातीयस्य महत्त्वादिधर्माणामन्यत्वेऽभिन्नत्वेऽप्यवि
द्यादि च तत्र यं कारणमित्यर्थः तत्र मोहः कर्त्तव्याकर्त्तव्यप्रसन्नतादुःखत्वसुखत्वेऽः खिन्नस

खिन्त्विमाध्यस्थं रागद्वेषमोहमूर्च्छना धृतिकारणमिति शरीरमिंद्रियाणामाश्रयविधया
धारकं तानि चेंद्रियाणि तस्य शरीरस्य भोगक्षेमनिर्वाहकत्वेन धारकाणि एवं पृथिव्यादीनि
महाभूतान्यासाधारणत्वेन शरीराणां धारकाणि तानि च परस्परं सर्वेषामिति तानि च महाभू
तान्यन्योन्यं सर्वेषां सर्वाणि धारकाणि आकाशं वायोर्धारकं चक्रवात्या चछिद्राकाशस्य
धारकं चक्रवात्या चछिद्राकाशस्य धारिका छिद्रस्य तत्त्वत्वात् तदाक्षिप्ततत्त्वाद्धृत एवं वाप
स्तिन्नसो धारकः तेजश्चावरणादिरूपमंतर्वर्ति वायूनां धारकमित्यादिरूपेण व्याख्येयं त
थान्नैर्योग्यो नमानुषदैवतानि च शरीराणि परस्परं धारकाणि आश्रयाश्रयिभावाभा
वेपि घृतवद्यादिभिरन्योन्यं उपकारकत्वात् देवान्भावयतानेन ते देवा भावयंतु व इति गी
तादिभ्य इत्यर्थः॥ अथैवं स्थितिकारणात् धृतिकारणस्य को भेद इति उच्यते कार्यानुप्रवे
शाप्रवेशाभ्यामवांतरभेदात् स्थितिहेतुर्हि पुरुषार्थोहारादिर्मनः शरीरादिविभक्तः संन्ने
वतानि स्थापयति धृतिहेतुस्तु शरीरादिरिंद्रियादीननुप्रविश्यैव तानि धारयतीति महा
त्मविशेष इति उपसंहरति इत्येवमिति यथायोग्यमेभिरेव कारणैरविद्याकर्मजीवेश्वर ११६
शीनां सर्वेकारणत्वप्रतिपादिकाः श्रुतिस्मृतयो व्याख्येया इत्याशयवानाह तानि च यथासं

भवमिति आधुनिकास्तु उत्पाद्यविकार्याप्यसंस्कार्यरूपं चतुर्विधकार्यमाहुस्तैस्तु नवाना
मेव कार्याणां चतुर्द्धा विभागः कृत इति प्रकृतमुपसंहरति योगांगेति सूत्रांतरमवतारयति त
त्रेति यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोष्टावंगानि॥ पूर्वपादोक्तो
ऽन्तरंगाभ्यासवैराग्यश्रद्धाप्राणायामादीनि त्रस्य पादस्यादावुक्तानि च मध्यमसाध
नानि तपःस्वाध्यायेश्वरप्रणिधानान्यत्र संनवहिरंगैरनुक्तसाधनैः सहपिंडीकृत्य योगसा
नोभयसाधनतयात्रोच्यंते इत्ययोनरुक्तं त्रिधा साधननिरूपणं तु उत्तममध्यमाधमा
धिकारिभेदात् तत्र वैराग्यस्य संतोषे प्रवेशः श्रद्धादीनां च तपआदिषु परिकर्मणां च धार
णादित्रिक इति श्रवणमननयोश्च प्रमाणविधयैवज्ञानहेतुत्वं साक्षादस्तीत्याशयेनाभ्युद्
क्षयाद्वारकेषु ज्ञानसाधनेषु न ते परिगणिते इति मंतव्यं भाष्ये यथाक्रममेषामनुष्ठानमि
ति कर्तव्यमिति शेषः अयं तु क्रमो गौण ईश्वरप्रसादादाद्युत्तरभूमिकल्पनावरभूमिषु विनियो
ग इति भाष्योक्तत्वात् अन्यथा बहिरंगांतरंगविभागप्रतिपादनवैयर्थ्यापत्तेरिति उत्तरं सू
त्रजातमवतारयति स्वरूपं चेति स्वरूपं च यथाक्रममेषामतः परं वक्ष्याम इत्यर्थः तत्राहिं
सासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः योगांगभूतां प्रकृष्यामहिंसां लक्षयति तत्राहिंसा स

वैधेहिंस्राश्रमविहितनित्यकर्माविरोधेनेतिविशेषणीयाशौचादिषु स्वदूनंतहिंसा
याश्चपरिहार्यत्वात् अतएवयोगिनांप्राणायामादिकंतत्पापक्षालनायनित्यत्तपाशाले
विधीयतइतिअहिंसायाश्चविरोधेनैवान्येसत्यादयोयमनियमाश्चअनुष्ठेयाइतिप्रतिपा
दनायतस्याःश्रेष्ठत्वमाह उत्तरेचेति तन्मूलाइतितेवमूलंप्रयोजनंयेषामितिविग्रहः अ
तोहिंसासिद्धिपरत्वंयेवशास्त्रेषुइतरेयमनियमाःप्रतिपाद्यंतेतत्सिद्धिपरत्वयैवेत्यस्यवि
वरणंतत्प्रतिपादनायेतिसत्यादिभिरहिंसासिद्ध्नोतिप्रतिपादनायेतित्यस्यार्थःतथात
दवदातरूपकरणायअहिंसानिर्मलीकरणायेवयोगिभिरुपादीयंतेनुष्ठीयंचेत्यर्थःशौ
चतपआदयसरणोचनरकादिनाहिंसाप्यंततोस्तीतिमंतव्यंतथावेत्यादिस्वागमंतथामोक्ष
धर्मेप्युक्तंयथानागपदेस्यानिपदानिपदगामिनां सर्वाण्येवापिधीयंतेपदजातानिकौंज
रेएवंसर्वमहिंसायांधर्मार्थमपिधीयतइतिसत्यंलक्षयति सत्यमितियथार्थेत्वंव्या
वष्टेयथादृष्टमितिदर्शनादीनांप्रमात्वमपिविवक्षितंभ्रांतावितिवक्ष्यमाणत्वात् अज्ञा
ननिमित्तकपापांतरवत् भ्रांतिनिमित्तकासत्यस्यापिपापत्वौचित्यात्मनश्चेति मनश्च ११८
तथातात्पर्ययुक्तमित्यर्थःतेनयदादृष्टादिविपरीतार्थबोधनेतात्पर्यंतदायथार्थोपिवा

गस्त्येवभवतियथाश्वत्थामाहतइतियुधिष्ठिरवाक्यंतत्राहिंगजविषयेवाक्यस्यसत्यत्वे
पिमतसेनसत्यत्वंदृष्टविपरीतेद्रोणपुत्रहननबोधनेतात्पर्यादितिसत्यस्योदाहर
णंसामान्यतआहयदन्येत्यादिनाइतीत्यंतेनइतिशब्दात्पूर्वेनदाप्तस्यमितिपररणोयेस
विनोदायणीतादिरूपवाक्यानांपरप्रतिपत्तिवंध्यत्वादावपिनासत्यत्वमित्यतस्तद्याव
र्त्तेनार्थेपरत्रस्वबोधसंक्रांतयइत्युक्तंवंचितानिविपरीतार्थबोधनेछ्ययाप्रयुक्ताभ्रांता
भ्रमेणप्रयुक्ताप्रतिपत्तिवंध्याअप्रसिद्धपद्यादिभिर्नबोधजननक्षमेत्यर्थःयथोक्तःस
त्यलक्षणेलोकहितत्वमपिविशेषणंदेयमित्याह एषेति एषावाक्प्रवृत्तात्तस्मणाणि
र्मितअतोयदिचरावमविषयार्थापिअभिधीयमानोस्वार्थप्राणेनादिरर्थःसाचवा
क्यथादस्युभिःसार्थगमनंपृष्टस्यसार्थगमनाभिधानंइत्यादिरूपापुण्याभासेनपुण्य
वतीयमानेनतत्रहेतुःपुण्यप्रतिरूपकेणेतिपुण्यसदृशेनेत्यर्थः कष्टंदुखात्मकंतमोन
रकमित्यर्थःसत्यंयथाभूतंयादित्यर्थःअत्रचअसत्यनिवृत्तिमात्रंसत्यशब्देनविवक्षितं
तस्यैवव्रतत्वसंभवात् असभ्यासत्यस्यवचनेपियमभंगाद्वेतिअस्तेयंलक्षयितुमभाव
स्यप्रतियोगिनिरूपणाधीननिरूपणत्वात्प्राद्वौस्तेयंलक्षयति स्तेयमितिप्रतिसमाहसावत्तेनाप

अशास्त्रपूर्वकमिति अस्तेयो योगापि स्वत्वंज्ञापनं इत्यवभाष्यते अथवास्वीकरणं मनेति
बुद्धिमात्रेणापि साधारणमिति तत्प्रतिषेधस्तन्निवृत्तिः तथाच स्पृहारूपलक्षयित्वा स्पृहा
स्पृहारूपमिति ब्रह्मचर्यं लक्षयति गुप्तेति उपस्थेन्द्रियस्येति स्वोक्तस्य विवरणमुपस्थस्येति
संयमः इत्यन्योपसर्जनमिन्द्रियसाहित्यमुपस्थस्य गार्ह्यं तेनोपस्थस्य विषये सर्वेन्द्रियसा
पारोपरम इति लक्षणं तथा चोक्तं दक्षसंहितायां ब्रह्मचर्यं सदा रक्षेदष्टधा लक्षणं पृथक्
स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च एत
न्मैथुनमष्टांगं प्रवदंति मनीषिण इति प्रकृष्टमीक्षणं प्रेक्षणं रागपूर्वकं दर्शनमित्यर्थः
अपरिग्रहं लक्षयति विषयाणामिति परिग्रहे हिंसादोषाणामस्तित्वदर्शनादिति विशे
षणं दंभाः शरूपादिनिमित्तकास्वीकरणं इति व्याप्तिनिरासायेति हिंसा वाह्यदात प्रभृतीनां
बोध्या उक्तानां यमानां विशेषप्रतिपादकं सूत्रं पूरयित्वा पठति ते त्विति जातिदेशकाल
समयानवच्छिन्नाः सार्वभौमा महाव्रतं समयः संकेतो वक्ष्यमाणनियमविशेष इति या
वत् जात्यादिभिश्चतुर्भिरनवच्छिन्नास्ते यमा यतः सार्वभौमाः सर्वास्ववस्थास्वनुगताः अतो ११८
महाव्रतमिति संज्ञिताः इत्यर्थः अन्वर्थसंज्ञा यः फलं च प्रकृष्टयोगिभिरेवमनुष्ठानमिति म

यमाहिंसादयमपमादिपदजात्यवच्छिन्नादीन्याचष्टे तत्राहिंसेति जातिर्मत्स्यत्वादिः तया
परंपरयावच्छिन्ना मत्स्याद्यतिरिक्तस्याहिंसेत्यर्थः एवमग्रेऽप्यपि परंपरयैवावच्छिन्नत्वं
बोध्यं सैव देशेति सैवाहिंसैव एवमुत्तरयोरपि त्रिभिरुपरतस्येति सांकर्यनिरासायोक्तः
त्रिभिर्जात्याद्यवच्छेदैः परंपरयाप्युपरतस्य पुरुषस्येत्यर्थः समयावच्छिन्नस्योदाहरणं यथा
ह देवेति यथा चेति यथा चेत्यर्थः अहिंसायाइवान्येषामपि यमानां जात्याद्यवच्छिन्नत्वं
मूहनीयमित्याशयः सत्यतामयो यमाह एभिरिति सार्वभौमशब्दस्यार्थमाह सर्वभूमि
ष्विति सर्वभूमिष्वित्यस्य विवरणं सर्वविषयेष्विति विषया जात्यादयो यथोक्ताः अस्यापि
विवरणं सर्वथैवेत्यादि ननु कुशलमिध्याहरणादिवैधहिंसानामपि परित्यागे नित्यकर्मवा
धेन प्रत्यवायापत्तिरिति मैवं सर्वाणि भूतानि सुखे रमंते सर्वाणि दुःखेषु तथोद्विजंति
तेषां भयोत्पादनजातखेदः कुर्यान्न कर्माणि हि जातवेद इति मोक्षधर्मादिवाक्यैर्जातवैर
सोत्पन्नात्मज्ञानस्य योगिनः ब्राह्मणस्य वाह्यकर्मत्यागानुज्ञया योगिनामेव वास्यक
र्मोकरणे प्रत्यवायान् योगिनामं तथा गृहस्थस्यैव नित्यकर्मणो मन्वादिभिर्विहितत्वाच्च
यथा मनौ एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः अनीहमानाः सततमिन्द्रियेष्वेव जु

द्भतीति अतएव च सिद्धेन बाह्याभ्यंतरकर्मणो विकल्प उक्तः बाह्यमाभ्यंतरं चेति द्विविधं क
र्म वैदिकं तयोरन्यतमत्कुर्यान्नित्यं कर्म यथाविधीति तयोश्चांतरं कर्म हिंसाद्यभावाद्योग
यरूपत्वाच्छ्रेयं गीतादिषूक्तं श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतपेत्यादिना भाष्यकृ
तश्च वैधहिंसायामपि पापहेतुत्वमग्रे प्रतिपादयिष्यति शौचादिषु चापरिहार्या हिंसा
स्यादाश्रमविहितैवेति न तया व्रतलोपः स्वाश्रमधर्माविरोधित्वेन विशेषितत्वादिति
यमान्व्याख्याय नियमान्व्याचष्टे शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः
स्थूलशरीरस्यैव बाह्यांतररूपेण द्वैविध्य बाह्यशौचं दर्शयति मृज्जलेति मेध्यं गोमूत्र
यवाग्वादि तेषां भक्षणं मेध्याभ्यवहरणं आदिशब्देनोपवासादयो ग्राह्या मानसमपि
शौचमाह आभ्यंतरमिति सत्त्वस्वभावस्य चित्तस्य मला रागद्वेषादयस्तेषां मैत्र्यादिना प्र
क्षालनं प्रसाद इति प्रागुक्तमित्यर्थः संतोषं व्याचष्टे संनिहितेति अन्यावश्यकप्राणया
त्रानिर्वाहकनिधमानसाधनादतिरिक्तस्यालिप्सेत्यर्थः द्वंद्वसहिष्णुतेति शास्त्रोक्तरीत्याति
द्वंद्वद्वंद्वसेवनमित्यर्थः द्वंद्वानाह जिघत्सेति जिघत्सा बुभुक्षा यद्यपि शीतोष्णेदिवत्परस्पर
विरुद्धत्वं बुभुक्षापिपासयोर्नास्ति तथापि मिथुनवदेव पारिभाषिकद्वंद्वतास्या स्थानमूर्ध्वावस्था ११६

नं आसनं चोपवेशनं काष्ठमौनोस्ति तथापि मिथुनवदेव पारिभाषिकमितेनापि स्वाभिप्रा
यप्रकाशनं आकारमौनं त्ववचनमात्रं एतानि शास्त्रोक्तव्रतेनैव सोढव्यानि न तु वृथे
त्याशयेनाह तानि चैवमिति स्वाध्यायव्याख्या सुकरा तज्जपस्तदर्थभावनमिति प्रथम
पादोक्तमपि ध्यानव्यावृत्त्यर्थं द्वितीयपादादावस्त्वत्र व्याख्यानमेव प्रणिधानशब्दार्थमा
ख्यति तस्मिन्परमगुरौ सर्वकर्मार्पणमिति एतच्च तत्रैव व्याख्यातं ननु च तदर्थभाव
नरूपमेव प्रणिधानमस्तु मतं न बहिरंगताया वक्ष्यमाणत्वात् ईश्वरभावनं हि ध्या
नरूपतया योगस्यांतरंगमेव तत्रयमंतरंगमिति वक्ष्यमाणसूत्रात् सर्वकर्मार्पणमे
व मुख्यतो ध्येयं न त्वीश्वरतत्त्वं कुर्यात्कर्मसम्यक्चिंतनमिति योगियाज्ञवल्क्यवा
क्यात् नाहं कर्ता सर्वमेतत् मनसैव कुरुते तथा एतद्ब्रह्मार्पणं प्रोक्तमृषिभिस्तत्त्वदर्शि
भिरिति कौमो त्वीश्वरस्त्वसामान्यतस्तद्विशेषणतामात्रेण कर्तृत्वोरिवरो व्यपे पइत्य
नोपयुक्तान्स्य योगबहिरंगतेति तदेवं सूत्रगणोक्ता यमनियमा विष्णुपुराणादिष्वपि
दर्शिताः ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहान् सेवेत योगी निष्कामो योग्यतां मनसो
नयन् स्वाध्यायशौचसंतोषतपांसि नियतात्मवान् कुर्वीत ब्रह्मणि तथा परस्मिन्प्रवणं

मनइत्यादिभिः एतेषु दशसु मध्ये ईश्वरप्रणिधानस्य मुख्यतो योगांगत्वमिति प्रति
पादनाय निर्विघ्नपरमात्मयोगहेतुत्वं तस्याह श्लोकेन शय्यासनेति ईश्वरप्रणिधा
नीतदनुग्रहात्स दैवयोगयुक्तः स्यादिति श्लोकव्याख्या यः स्वस्थः परमात्मनिष्ठः परमा
त्मार्पितकर्मणां मुख्यतस्तद्योगस्य विकल्पनौचित्यात् वितर्कजालो यो वक्ष्यमाणः स वक्ष्य
माणप्रतिपक्षभावनां विनापि नापि परिक्षीणो यस्य स तथा संसारबीजानां सं
स्कारादीनां क्षयमनुदिनमुपलभमानः तथामृतभोगस्य भागी जीवन्मुक्तिसुखानुभवि
ता एवंभूतो नित्ययुक्तः स्यादित्यर्थः न केवलमीश्वरेऽर्पितकर्मणः ईश्वरयोग एव भवति अ
पितीश्वरसाक्षात्कारद्वारा पूर्णत्वादिना जीवतत्त्वसाक्षात्कारोपीत्युक्तमेव स्मारयति य
त्रेदमुक्तमिति यत्रेश्वरयोगे ननु यमनियमयोर्मध्ये यज्ञदानाद्यवचनात् न्यूनतेति चे
त् न देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते इत्यादि
वाक्येभ्योऽन्यानुक्तकर्मणां तपस्यंतर्भावात् एवं योगिनां मंत्रयोगाऽभावदानादेरपि
तपस्येवांतर्भावः देवब्राह्मणार्थेहिंसा याज्याप्यहिंसावचनेन च यज्ञस्य योगिनां बाह्यकर्मणा १२०
मभावसिद्धिरिति तदेवं यमाः पंच नियमाश्च पंच सर्वे स्मृतिसिद्धाः प्रोक्ताः तत्र यमानामभा

वरूपतयाकालाद्यनवच्छिन्नत्वसंभवात्सार्वभौमत्वमुक्तं नियमानां तु प्रतिनियमावच्छि
न्नतया न सार्वभौमत्वं संभवति अतो नात्र महाव्रतरूपो विशेष उक्त इति यद्योक्तयोश्च य
मनियमयोर्मध्ये निवृत्तिरूपतया शमसंपादनत्वेन यमा एव परमहंसानामावश्यकाः
उदमरजादीनामप्यहिंसापालनस्य विष्णुपुराणादौ स्मरणात् न तु नियमाः प्रवृत्तिरूपत
याऽयोगांतरायत्वात् तदुक्तं भागवते यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचिदिति उक्ते
षु यमनियमेषु वक्ष्यमाणविघ्नस्य निवृत्त्युपायप्रतिपादकं सूत्रं प्रस्थापितावतारयति ए
तेषां यमनियमानामिति वितर्कबाधने प्रतिपक्षभावनं वक्ष्यमाणवितर्कैर्यमादि
बाधे प्रेक्षिते वितर्कबाधने सति वक्ष्यमाणं प्रतिपक्षभावनं कुर्यादित्यर्थः तदेतद्व्याचष्टे य
दास्येति विपरीतास्तर्काः विबाधयेयुरिति वितर्कसंज्ञा हिंसादिषु तांत्रिकी तर्कस्यात्र विशेष
णं तथा च वितर्क्यमाणो हिंसादिवितर्कः तेन बाध्यमानस्याभिमुखीकरणे प्रतिपक्षभाव
नसमं तत्र सूत्रे वक्ष्यमाणं कुर्यादित्यर्थः विपरीततर्कस्याकारमाह हनिष्यामीत्यादिनाहृतो
यंते न एवं नियमपंचकेपि स्वाध्यायमहं शौचमित्यादयो वितर्काः दृष्टव्या युक्तिसाम्यात् सू
त्रतात्पर्यार्थमाहरणमिति एवमुन्मार्गाभिमुखेन हिंसादिगतेन वितर्कज्वरेणात्यालितेन

बाध्यमानो योगी वितर्कविरोधिज्ञानविषयतया वितर्कप्रतिपक्षान् दुःखादिफलकत्वा
दीन् भावयेत् चिंतयेदित्यर्थः प्रतिपक्षभावनं व्याचष्टे घोरेष्वित्यादिना भावयेदित्यंते
न वितर्कान् हिंसादीन् अनंतदुःखफलत्वचिंतनं वाक्यतात्पर्यार्थः तत्परत्वमेव विवृणोति प
येति एवमाशेति वितर्कबाधने प्रतिपक्षभावनमित्येवमादिकं सूत्रांतरेष्वासनप्राण
यामादिसूत्रेष्वपि योजनीयं आदिशब्देनास्य सूत्रस्य व्याख्या उत्तरसूत्रं च व्याख्येयं आसना
दिषु च वितर्का आसनादिकं मा क्षम इत्यादिरूपा इति विशेषः इदानीं ये वितर्का ये वा वित
र्कस्य प्रतिपक्षा यादृशं वा तच्चिंतनं तत्त्रयमाह वितर्का हिंसादयः कृतकारितानुमोदिता
लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानंतफला इति प्रतिपक्षभावनं
हिंसादय इति वितर्काणां स्वरूपकथनं विशेषणत्रयेण तदवांतरविशेषाणां कथनं सर्व
थैव हेयत्वप्रतिपादनाय दुःखादिफलकत्वकथनं च प्रतिपक्षकथनं प्रतिपक्षान् भावये
दिति पूर्वसूत्रोपभाष्यानुपपन्ना प्रतिपक्षभावनमित्यंतकर्मधारयासंभवात् शेषेण व
भावनकथनमिति दुःखाज्ञाने अनंते फले येषामिति विग्रहः विशेषणत्रयोक्तान् विशे १२१
षान् विवृणोति तत्र हिंसेति कृतेति कृता वा कारिता वा अनुमोदिता वेत्यर्थः तत्र कृताः स्वयं नि

ष्पादिताः कारिताः कुर्विति प्रयुक्ताः अनुमोदिताः परैः क्रियमाणाः साधु साध्वित्यंगीकृताः कृतादीनाम
पि हिंसोपविशेषणोक्तं त्रैविध्यं व्याचष्टे एकैकेति लोभेनेत्यस्य व्याख्या मांसचर्मार्थेन मांसच
र्मादिप्रयोजनेन तथापकृतमनेनेत्येवं क्रोधेन तथा मोहेन यज्ञार्थे हिंसया निर्दोषो ध
र्मो भविष्यतीत्येवंरूपेणेत्यर्थः यद्यपि मृदुमध्याधिमात्रा इति हिंसादिविशेषणं सूत्रे स्थितं
यापि लोभादेर्मृदुत्वादिनैव हिंसादेर्मृदुत्वादिकमत्र विवक्षितमयेसोषपीत्याशयेन लोभा
दिविशेषणतयैव मृदुत्वादीनि व्याचष्टे लोभक्रोधमोहा इति लोभक्रोधमोहा एवैकः पुन
स्त्रिधा मृदुमध्याधिमात्रा इत्यर्थः एवमित्यादि हिंसाया इत्यंतमेकं वाक्यं मृदुमध्याधिमात्र
त्वात्तेऽपि विशेष इति पूर्वपादीयसूत्रानुसारेण यौगिकान्यपरान् विशेषान् स्वयमाह मृ
दुमध्याधिमात्रत्वात्तेऽपि त्रिविधा इति मात्राः पुनस्त्रिधेति सर्वत्र तीव्रत्वमधिमात्रता शेषं स्पष्टं
णा पुनर्नियमेति मत्स्येष्वेव हिंसेत्यादिर्नियमः एवमस्मिन्दिवसे स्थावरस्य वा जंगमस्य वान्य
तरस्यैव हिंसा नोभयोरित्यादिर्विकल्पः स्थावरजंगमयोरुभयोरेवाभवस्थया हिंसेत्यादिः
समुच्चयः इत्येवं नियमविकल्पसमुच्चयानामानंत्याद्धिंसासंख्येयभेदेत्यर्थः नियमाद्यानं
त्यहेतुः प्राणभृदिति ॥ हिंसकानां हिंस्यानां वा संख्यानयानियमादीनामनंतप्रकारत्वमित्यर्थः

एवमिति हिंसायामिवानृतादिरूपवितर्केष्वपि कृतकारितेत्यादिविभागा योजनीया इत्यर्थः
अत्राज्ञान चेति अज्ञानं संमोहः हिंसातो दुःखाज्ञाने यथा भवतस्तदाह तथा चेति तथाही
त्यर्थः वीर्याक्षेपो बलाल्लिपमनं सर्वं त्रिप्रकारहिंसनात्त्रिप्रकारमेव दुःखं हन्ता प्राप्नोति क्रमो
नुरूपफलोदयादिति प्रतिपादयति तत्र वीर्येति परस्य वीर्याक्षेपादस्य हेतुरपि चेतनम
पकरणोत्स्त्रीपुत्रधनादिकं क्षीणवीर्यं कार्याक्षमं भवति तथा परस्य शस्त्रादिना दुःखोत्पा
दनाद्धन्तापि नरकादिषु यामशस्त्रादिना दुःखमनुभवति तथा परस्य जीवितव्यपरोपण
त् प्राणवियोजनात्तु हन्तापि प्रतिक्षणं जीवितात्ययरोगादिना मरणावस्थां संमोहमयी
मापन्नो मरणमिच्छन्नपि कथंचिदेव जीवति न तु तदानीमेव वक्थं मरणं न भवति तत्राह
दुःखविपाकस्येति दुःखरूपस्य विपाकस्य प्रतिनियतजन्मादिविपाकैरेव भोग्यत्वादित्यर्थः
तदेतद्धिंसायामनृतदुःखाज्ञानफलकत्वं गीतायामप्युक्तं मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसू
यकाः तानहं द्विषतः क्रूरान्संसारेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनि
ष्विति पुत्राश्च अग्निविस्फुलिंगवत्पितुरंशाः आत्मा वै जायते पुत्र इति श्रुतेः अत ईश्वरांश १२२
जीवेषु द्वेष ईश्वरद्वेष एव किंच जीवानामप्यात्मा परमेश्वरः अतः शरीरद्वेषेण शरीरिद्वेष

वत् जीवद्वेषेण परमेश्वरस्य द्वेषो भवतीति भावः पुण्यापापगतेति पुण्यकर्मरूपस्य सबी
जस्य चित्तभूमावावपनेऽगतासहावापीत्यर्थः धान्यबीजवपने तृणबीजानां वपनवदि
ति भावः भवेदस्यापुरीति ननु अहिंसन्सर्वाणि भूतान्यन्यत्र तीर्थेभ्यः तस्माद्यज्ञे वधो
ऽवध इत्यादिश्रुतिस्मृतिभिर्वैधहिंसातिरिक्तहिंसाया एव प्रतिषेधात् कथं वैधहिंसाया
अनिष्टसाधनत्वमनुमत इति चेन्नोच्यते क्रत्वर्थत्वमिष्टसाधनत्वं वा विधेयं न पुनरनिष्टान
नुबंधित्वमपि राजन्यादिपापकर्मणां गर्भवासजन्मादिहेतुतायाः सर्वसंमतत्वात्
न च बलवदनिष्टाननुबंधित्वमपि विधेयत्वांशे शक्यतेऽनिष्टेषु पुरुषाणां बलवद्द्वेष
स्यावस्थितेः दुःखमेव सर्वं विवेकिन इत्युक्तत्वात् किंच बलवदनिष्टाननुबंधित्वस्य वि
ध्यर्थत्वेऽपि यज्ञादीनां नरकहिंसायाः सामान्यतो निषेधजनकत्वश्रुत्याविरोधः अपि वा
वैधहिंसायागस्य स्वर्गादिसाधनताबोधकविधिर्वैधहिंसायाः स्वर्गादिसाधनताबो
धकविधिभिन्नस्तु हिंसायामनर्थनिषेधे तु नाबोधकश्रुतिस्मृतीनां न स्वविरोधोऽपे
नतास संकोचः कल्प्येत अतो युक्तमुक्तं पुण्यापापगतानामपि हिंसानामनिष्टहेतुत्वं पुण्या
पापगतहिंसास्वपि युधिष्ठिरादीनां प्रायश्चित्तश्रवणाद्ययमेव सिद्धान्त उन्नीयते तस्माद्धा

स्यास्यहं तानरकेषु मंडुखलं निषिद्धं अपी धर्ममधर्मो घोरविपाकफलसंनिभमिति मार्कंडेया
दिस्मृतिभ्यः इत्यादिभ्यश्च अनंत एवस्मर्यतेपि सर्वाणि भूतानि सुखे रमंते सर्वाणि दुःखेषु न
येद्विजंति तेषां भयोत्पादनज्ञातखेदः कुर्यान्नकर्माणि हि जानन्वेद इति मोक्षधर्मादिषु
तिविषयो वध इत्यादिवाक्यं तु वधाभासतापरमिति दिक् एवमिति अनंतादिष्वप्येवं
दुःखाज्ञानफलत्वं यथासंभवमरणादिकं विहाय योज्यमित्यर्थः प्रतिपक्षभावनस्य
प्रयोजनमाह एवं वितर्काणामिति अनुगतं निपतमेवमनिष्टविपाकं वितर्काणां कार्य
मेव चिंतयन् योगी न वितर्केषु मनः प्रणिदधीत दद्यादित्यर्थः यमनियमनिष्पत्तिसूच
कानां सिद्धीनां प्रतिपादकानि सूत्राणि अवतारयति अप्रतिपक्षेति हेयाहातुमर्होऽ
वंभूता वितर्का यदास्य योगिनः प्रतिपक्षभावनातो विषयसान्निध्यकालेप्यप्रसवस्व
भावा भवंति तदा तत्कृतं वितर्कहानिः तर्कहानिकृतमैश्वर्यं यमादिनिष्पत्तिसूचकं भवती
त्यर्थः तन्निष्पत्त्यवधारणे च तत्तद्भूमिजयत्नं विहाय भूमिकांतरेषु योगी यत्नमातिष्ठेतेत्ये
तत्प्रतिपादयितुं सर्वेष्वेव योगांगेषु सिद्धिकथनं तत्र यथाक्रमं पठति अहिंसाप्रतिष्ठा १२३
यां तत्सन्निधौ वैरत्यागः प्रतिपक्षेण यदुक्त वितर्कैरसंस्पर्शप्रतिपादनं तस्योत्सत्यो तत्संनिधि

ध्यानां सर्वेप्राणिनां मार्जारमूषकादीनामन्योन्यं वैरत्यागो भवतीत्यर्थः सत्यप्रतिष्ठायां क्रि
याफलाश्रयत्वे सर्वेप्राणिनां भवतीत्यत्रापि शेषः क्रिया धर्मः तस्य फलं स्वर्गादिः तयोः
आश्रयत्वं सर्वेप्राणिनां सत्यप्रतिष्ठस्य वचनाद्भवतीत्यर्थः तदेतद्भाष्ये धार्मिकइति धार्मि
को भूयाइति वचनात्संबोध्यो धार्मिको भवतीत्यादिरर्थः अमोघेति एवं प्रकारेणास्य
योगिनो वाक्सत्या भवतीत्यर्थः अत्र वागमनसोरप्युपलक्षणं अस्तेयप्रतिष्ठायां सर्वरत्नो
पस्थानं सर्वाभ्यो दिग्भ्यो दिभ्यो रत्नोपस्थानं सर्वे रत्नोपस्थानं तदेतद्भाष्ये सर्वदिक्कानीति
ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः वीर्यं शक्तिविशेषं लक्षयतीति यस्य वीर्यस्य लाभा
त्प्रतीघातवर्जितान् गुणान् ज्ञानक्रियाशक्तीरुत्कर्षयति योगी वर्द्धयति तथा सिद्धः स्वयं ज्ञा
नी भूत्वा शिष्येषु ज्ञानाधाने समर्थश्च भवतीत्यर्थः अपरिग्रहस्थैर्ये जन्मकथंतासंबो
धः अपरोक्षेण देहेंद्रियादिसंघाते न ज्ञानहेतुः संबंधो जन्म तस्य कथंता किंप्रकारता तयोः
संबोधः साक्षात्कारो जन्मकथंतासंबोधः तथा च गतोदिताव्यपदेश्यानां जन्मनां स्वरू
पतः प्रकारतश्च जिज्ञासामात्रेण साक्षात्कारो परिग्रहस्थैर्ये भवतीत्यर्थः तदेतद्भाष्येऽ
स्य भवतीति इदसूत्रेण सहान्वेति कोहमासं कथमहमासमित्यतो तज्जन्मनः स्वरूपप्रकार

योजिज्ञासा किंस्विदित्यादिरूपं वर्त्तमानजन्मनः स्वरूपप्रकारजिज्ञासा केवा भविष्याम इत्या
दिरूपं भाविजन्मन इति एषा पूर्वापरान्तमध्याः भूतभविष्यद्वर्त्तमानकालास्त्रिवस्य योगिनः
स्वजन्मजिज्ञासोत्पन्नमात्रैव स्वरूपेण स्वविषयेण ज्ञानेन उपावर्त्तते विशिष्टा भवति ना
स्य तत्साधनापेक्षेत्यर्थः स्वतः सर्वो योग्यहरणयोग्यस्यापि चेतसो नीतादीनां स्वायस्याना
मग्रहणं परिग्रहव्यासंगदोषात् अतो परिग्रहस्थैर्ये ताः स्वरूपं प्रणिधानमात्रेणैव गच्छ
त इति भावः शौचात्स्वांगजुगुप्सा परैरसंसर्गः शौचात् शौचस्थैर्यात् अनेन सूत्रेण बाह्यशौ
चस्थैर्यस्य सिद्धिरुच्यते जुगुप्सा कुत्सा अशुचित्वदोषदर्शनं तस्याशेषतः साक्षात्का
र इति यावत् शौचात्स्वांगजुगुप्सायां युक्तिमप्याह स्वांग इति यतः एवमस्य जुगुप्सायां शौ
चमभ्यस्तं अतोऽतिशयितजुगुप्सा शौचफलं युक्तं स्याशयः जुगुप्सां विवृणोति कायेति अ
वद्यं दोषतज्ज्ञानस्य फलमाह कायानभिष्वंगीति अभिष्वंगः प्रीतिः शेषं सुगमं अतः शौच
स्य सिद्धिरूपं बकं सूत्रमवतारयति किंचेति सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयो
ग्यत्वानि च एतेषां क्रमं दर्शयति शुचेरिति क्षालितचित्तमलस्य सत्त्वशुद्धिः सत्त्वोद्रेको भव
ति ततः सौमनस्यं प्रीतिः स्वतएवानंदोऽज्ञायते तस्मिंश्चोत्पन्ने चित्तस्याविक्षेपादैकाग्र्यं तत इन्द्रिय १२४

जयः ततश्चात्मदर्शनयोग्यत्वमिति सत्त्वशुद्ध्यर्थस्य संग्रह इति इत्यादिना तत्र द्वयोक्तं शौ
चसामान्यस्य स्थैर्यात्प्राप्यत इत्यर्थः संतोषादनुत्तमः सुखलाभः॥ नास्त्युत्तमं सुखं यस्मात्
तादृशस्य सुखस्य लाभः संतोषस्थैर्यात् भवतीत्यर्थः तस्माद्ध्ययो हि संतोषः तस्माप्रतिबं
धापगमे चित्तस्य स्वाभाविकसत्त्वाधिक्यनिमित्तिकस्य सुखस्य भावनास्वतरा वाविर्भवति
न तत्सुखं विषयापेक्षेति तन्निर्विषयं शांतिसुखं नाम सुखमुच्यते तेयेशानं प्रज्ञापतेए
नंदाः स एको ब्रह्मण आनंदः श्रोत्रियस्य चाकामहतस्येत्यादिश्रुतेः ईश्वरस्य पूर्णकामत्वा
त् श्रोत्रियस्य ब्रह्मज्ञानेन कामहतत्वात् उभयोरपि वैतृष्ण्यस्य तुल्यत्वात्समानं सुखमित्याशय
:बुद्धेः सत्त्वात्मकतया सुखस्वभावत्वेन जीवेऽपि नित्यं सुखमिदमेव गीयते स्वाभाविकस्यापा
वद्रूप्यभावित्वात् तमसापिहितत्वेन च सदानभिव्यक्तत्वात् न पुनर्वृत्तिरेव सुखस्वरूपिणी
चिन्मात्रं त्वभ्युपगतिरस्मति सूत्रयुक्तिविरोधादित्युक्तत्वादिति सततोवानभिव्यक्तसुखस्यानुत्तम
त्वे स्मृतिमुदाहरति तथा चोक्तमिति कामसुखं कामेभ्यो लौकिकविषयेभ्यः सुखं दिव्यं संकल्प
मात्रोत्थविषयजं संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्यादिश्रुतेः तृष्णाक्षयसुखस्य तृष्णाक्ष
याभिव्यक्तसुखस्येत्यर्थः विदेहकैवल्ये तु सुखः बाह्यानि दुःखनिवृत्त्या गौणमिति कायेन्द्रियसि

द्धिरभ्युदिष्टपात्तपदस्य व्याचष्टे निर्वर्त्यमानमिति अभ्युद्धिरधर्मोदितामसो गुणः सेवाणिमा
दिशक्तेरावरको मलस्तमित्यर्थः अणिमादिसिद्धीर्विभूतिपादे व्याख्यास्यति शेषं सुगमं
स्वाध्यायादिष्टदेवतासंप्रयोगः संप्रयोगो दर्शनं पादे ताद्रूप्यमिच्छति सैव द्रष्टा भवतीत्यर्थः
सुगमं भाष्यं समाधिसिद्धिरीश्वरप्रणिधानात् व्याचष्टे ईश्वरेति ईश्वरेऽर्पितः सर्वभावः सर्व
व्यापारो येन तस्य समाधिसिद्धिर्योगनिष्पत्तिर्देशाद्यंतरस्थमपि ध्येयं सर्वं अवश्यमनन्यका
लेपयार्थमेव जानाति गुरुवाक्यादावपि यथास्ते भवति ततोऽस्य योगिनः प्रज्ञा समाधिका
लेपि यथार्थमेव साक्षात्करोतीत्यर्थः एवं संप्रज्ञातसिद्ध्यवसंप्रज्ञातसमाधिः स्वयमेव सि
द्ध्यतीति तत्र प्रदर्शितं न चेश्वरप्रणिधानादेव योगनिष्पत्तावितरांगवैयर्थ्यमिति वाच्यं ईश्व
रप्रणिधानस्य मोक्षमात्रनिष्पत्तिद्वारत्ववचनात् द्वारं तरेणात्वंगांतराणां समाधिसाधन
त्वसंभवात् अपि च ईश्वरप्रणिधानमेव निर्विघ्नं सर्वाण्यंगानि संपाद्य समाधिं जनयती
ति मान्यांगवैयर्थ्यं अथवान्यमानांगानीश्वरप्रणिधानद्वारा समाधिं निष्पादयंतीतरांगा
नां च स्वतो नैतादृशी शक्तिरस्तीत्याशयेनेश्वरप्रणिधानस्यैवात्र व्याख्यानतः समाधिसाधक
त्वमुक्तमिति विवहिंसात्वं तस्य संयमद्वारकतया अनावश्यकतया च वक्ष्यतीति सूत्रांतरम् १२५

वतारयति वृत्तां इति स्थिरसुखमासनं स्थिरं निश्चलं सुखकरं च यत्तदासनं आस्यतेऽनेनप्रका
रेणेत्यासनमित्यर्थः आसनस्य भेदानाह तद्यथेति तत्र पद्माद्यासनचतुष्टयस्य लक्षणं
वसिष्ठेनोक्तं अंगुष्ठौ संनिबध्नीयात् हस्ताभ्यां व्युत्क्रमेण तु ऊर्वोरुपरि विप्रेंद्र कृत्वा पादत
ले उभे पद्मासनं भवेदेतत्सर्वेषामेव पूजितं एकपादमथैकस्मिन् विन्यस्योरौ च संस्थितः
इतरस्मिंस्तथा पादं वीरासनमुदाहृतं आस्यैवाद्धे भद्रासनमथोच्यते पादगुल्फौ च वृषण
स्याधः सीवन्याः पार्श्वयोः क्षिपेत् पार्श्वपादौ च पाणिभ्यां दृढं बध्वा सुनिश्चलः भद्रासनं
भवेदेतत्सर्वव्याधिविषापहं जानूर्वोरंतरे सम्यक्कृत्वा पादतले उभे ऋजुकायः सुखा
सीनः स्वस्तिकं तत्प्रचक्षते इति इतराण्यासनानि योगप्रदीपाद्युक्तानि संक्षेपात्कथ्यंते
दंडासनं उपविश्य श्लिष्टांगुलिकौ श्लिष्टगुल्फौ भूमिश्लिष्टजंघोरुपादौ प्रसार्य दंडवच्छय
नं सोपाश्रयं योगपट्टयोगेनोपवेशनं पर्यंकं च जानुप्रसारितबाहोः शयनं क्रौंचनिष
दनादीनि क्रौंचादीनां निषण्णानां संस्थानदर्शनात्प्रत्येतव्यानि जान्वोरुपरि हस्तौ कृत्वा काय
शिरोग्रीवाणामवक्रभावेनावस्थानं समसंस्थानं स्थिरसुखं च सूत्रोपात्तं तस्य व्याख्यानं यथा
सुखमित्यादिशब्देन मायूराद्यासनानि ग्राह्याणि यावंत्यो जीवजातयस्तावंत्येवासनानीति

संक्षेपः आसनस्थैर्यस्योपायमाह प्रयत्नशैथिल्यानन्तसमापत्तिभ्यां प्रयत्नशैथिल्यस्य
द्वारमाह येन नांगेति बहुव्यापारेणेतरं चेदासनं त्रिपतेत्तदंगकंपनादासनस्थैर्येन मध्य
नीत्याशयः अनन्ते त्वेति अथवा प्रयत्नशालित्वेपि पृथिवीधारिणि स्थिरतरशेषनागे स
मापन्नं तद्धारणया तदात्मतापन्नं चित्तमासनं निष्पादयतीत्यर्थः तद्ध्यानं त्वनहास
ज्ञानीयभावनावशाद्वा अदृष्टविशेषवशाद्वेत्यन्यदेतत् आसनजतिधायां सिद्धिमाह
ततो द्वंद्वानभिघातः भाष्ये स्वगमं अमप्राप्तं प्राणायाममाह तस्मिन्सति श्वासप्रश्वास
योर्गतिविच्छेदः प्राणायामः वक्ष्यमाणचतुर्विधप्राणायामस्येदं सामान्यलक्षणं गति
विच्छेदः शास्त्रोक्तरीत्या स्वाभाविकगतेः प्रतिषेधः इत्यर्थः स च रेचकपूरककुंभकेषु स
र्वेष्वेवानुगतः नन्वेवं प्रत्येकस्यापि प्राणायामत्वापत्या त्रिभिर्मिलितैरेकः प्राणायाम इति
प्राणायामस्त्रिविधो रेचपूरककुंभकैरित्यादिवाक्योक्तं व्याहन्येतेति चेन्न त्रयाणां पौर्वा
पर्येण प्रथमाभ्यासिकानां महानुष्ठाननियमादेकत्वमवहारोपपत्तेः ननु तादृशवाक्येषु
मिलितानामेव प्राणायामत्वं विवक्षितं रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणं प्राणाया १२६
मो यमित्युक्तः सर्वैः केवलकुंभक इति वासिष्ठसंहितादौ केवलकुंभकस्यापि प्राणायामत्व

वचनादिति इदं सूत्रं व्याचष्टे सत्यासन इति यथा यमनियमयोरन्यकालकृतयोर्योगांगत्वं
नैवमासनस्य किं तु प्राणायामाद्यंगपंचकसाहित्येनेत्येतत्प्रतिपादयितुं सत्यासने इति विशे
षणं तथा च सन इति समाधिसूत्रपर्यंतं अनुवर्तनीय गीतादावासनोपयोगेनैव ध्यानादि
स्मरणादिति अत एव चासनादीनां षडंगानां स्वरानुष्ठेयत्वेनाराडुपकारकत्वं तथा तरणत्वमित्या
शयेन यमादिष्वविस्पष्टौ विधियोगउक्तौ यमनियमयोः कालांतरीयत्वं तथास्यं नवाहेरंग
त्वादिति आचमनमंत्रः प्रवेशः नन्वेवं प्रवेशनिर्गमरूपयोः श्वासप्रश्वासयोर्गतिरेवना
स्तीत्याशयेनाह उभयाभाव इति तथा च गतिशब्दार्थोऽत्र न विवक्षितः स्वाभाविकश्वा
सप्रश्वासयोः प्रतिषेधः प्राणायाम इत्येवार्थः अवांतरभेदप्रतिपादकमुत्तरसूत्रं पूरण
त्वोच्यापयतीत्याशयेनेति बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः सन्
प्राणायामो बाह्यवृत्तिराभ्यंतरवृत्तिः स्तंभवृत्तिरिति त्रिविधो रेचकपूरककुंभकभेदात् त
दुक्तं विष्णुपुराणे परस्परेणाभिभवं प्राणापानौ यदानिलौ कुरुतः सद्विधातेन तृतीयः सं
यमात्तयोरिति स च त्रिविधः प्राणायामो देशकालसंख्याभिः परिदृष्टो निर्णीतो नियमितो
भवति तदाभ्यासवशात् क्रमेण दीर्घसूक्ष्मसंज्ञको भवतीति सूत्रार्थः तदेतद्व्याचष्टे यत्रेति

विशेषाणां सामान्यनिष्ठत्वात् इयं सप्तमी यत्र प्राणायामे गतिविच्छेदः प्रश्वासपूर्वको
ऽभावः प्रश्वासेन रेचनेन गतिविच्छेदः स बाह्यो बाह्यवृत्तिः प्राणायामो रेचकनामेत्यर्थः
न च रेचनं बाह्य इत्येषा व्युत्पत्तिर्नाम्नो प्राणस्यायामः प्राणायाम इति योगाद्रेचनायामाख्याति
रोधस्य विशेष्यीकरणादिति यत्र श्वासेति यत्र श्वासेन पूरकेण गत्यभावः स आभ्यंतरः
स आभ्यंतरवृत्तिः प्राणायामः पूरकनामेत्यर्थः स्तंभवृत्तिरिति न पूरकेण गत्यभावः सति य
त्र उभयाभावः श्वासप्रश्वासयोरभावः सकृत्प्रयत्नादेवाभ्यासनिरपेक्षाद्भवति स स्तंभ
वृत्तिप्राणायामः कुंभकनामेत्यर्थः वक्ष्यमाणस्य कुंभकभेदस्य चतुर्थप्राणायामस्या
वृत्तेनायस्य सकृत्प्रयत्नादिति विशेषणं स हि प्रयत्नबाहुल्येनैव भवतीति तत्रैव प्रतिपा
दयिष्यति एकदैव बाह्याभ्यंतरप्राणविलापने दृष्टान्तमाह यथा तप्त इति द्वयोर्बाह्याभ्यं
तरदेशयोः देशकालसंख्याभिः परिदृष्ट इति विशेषणस्यायमर्थः एतावद्देशेन वा एताव
त्कालेन वा एतावन्मात्रासंख्याभिर्वावच्छिन्नो ऽयं रेचकादिः कर्त्तव्य इत्येवमवधारित इ
ति तदेतद्विभज्य व्याचष्टे त्रयोप्येत इति त्रयो रेचकपूरककुंभकाः इयानिति नासाग्रात्प्रा
देशाद्द्वादशांगुलहस्तादिपरिमितो बाह्यदेशो रेचकस्य विषयः स चेषीकातूलादिक्रियानि १२७

क्षेपः पूरकस्य च आपादतलमामस्तकमाभ्यंतरो विषयः स च पिपीलिकास्पर्शसदृशेन
स्पर्शेन निश्चेयः कुंभकस्य तु रेचकपूरकयोः बाह्याभ्यंतरदेशौ समन्वितावेव विषयावुभ
यत्रैव प्राणस्य विलयात् स च तूलस्य क्रियाया उक्तस्पर्शस्य चानुपलब्ध्या निश्चेय इति काले
नेति चतुर्निमेषावच्छिन्नस्य कालस्य चतुर्थभागः क्षणः तेषामियत्तावधारणेनावच्छिन्नाः
एतावत्क्षणैः रेचकादिः कर्त्तव्य इति नियमिता इत्यर्थः संख्याभिरिति मात्राणां द्वादशादिसं
ख्याभिरित्यर्थः यद्यपि संख्याभिरपि कालनियम एव क्रियते तथापि प्रकारभेदाद्भेदः य
त्राहिंसास्वाध्यायादिरित्यर्थः यत्र कालनियमः क्रियते स कालेन परिदृष्टः यत्र वक्ष्यमाण
मात्रासंख्याभिः कालनियमः क्रियते स संख्याभिः परिदृष्ट इति संख्यार्थं मात्रा च मार्कंडेयेनो
क्ता निमेषोन्मेषणो मात्रा तालो लघ्वक्षरं तथा प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रि
क इति निमेषादिलघ्वक्षरान्तं मात्राप्रमाणं तदेव विशिष्य दर्शयत्युत्तरार्द्धेन द्वादशमात्रिको
द्वादशगुणितोपि: कश्चन निमेषादिरयमर्थः प्राणायामस्य संख्यार्थं स्मृत इत्यर्थः एवंप्रगा
वादयोपि मात्रावसिष्ठयाज्ञवल्क्यादिभिरुक्ताः पूरकादिक्रमेण द्वादशमात्रेत्ययमधमाक्षा
सः यतः पूरकादिषु प्रत्येकं मात्रायाः संख्याया भेदो वसिष्ठसंहितायामुक्तः एवं ज्ञात्वा विधाने

तमप्रणवेन समाहितः प्राणायामत्रयं कुर्यात्पूरकुंभकरेचकैः आकृष्य श्वसनं बाह्यात् पूर
येदिडयोदरं शनैः षोडशमात्राभिरकारं तत्र संस्मरेत् मकारमूर्त्तिमत्रापि संस्मरन्प्रणवंज
पेत् धारयेत्पूरितं पश्चात् चतुःषष्ट्या तु मात्रया यावद्वा शक्यते तावत् धारणं जपसंयुतं
पूरितं रेचयेत्पश्चात् प्राणं वस्यनिलान्वितं शनैः पिंगलया पत्रद्वात्रिंशन्मात्रया पुनः ध्या
यन्नाद्याक्षरं तत्र प्रणवस्य समाहित इति अकारोकारमकाराणां मूर्त्तयो ब्रह्मविष्णुरुद्र
शिराशितमेतं पुराणयुक्तं मात्राभेदं समास्यातो भाष्यकारस्त्वाह एतावावद्भिरित्यादिना ए
तावद्भिः षोडशादिभिर्मात्राख्यैः पदार्थैर्निमेषोन्मेषणादिभिः श्वासप्रवेशः पूरकः प्रथ
मोद्घातः वायोरुद्घननं गतिनिरोध इति यावत् तथा निगृहीतस्य स्तंभितस्य वायोरेता
वद्भिश्चतुःषष्ट्यादिभिर्निमेषोन्मेषणादिभिः कुंभको द्वितीय उद्घातः एवं तृतीय उद्घातो
योद्रेचक एतावद्भिर्द्वात्रिंशदादिभिर्निमेषोन्मेषणादिभिरित्यर्थः अत्र प्रथमादिशब्दैः
पूरकादित्रये क्रमवचनात्सौत्रः पाठक्रमोनुष्ठानेनादर्तव्यः तथा च पूरककुंभकरेचका इ
त्येवौत्सर्गिकोनुष्ठानक्रमः पुराणादिषु बाहुल्येन दर्शनाच्च सर्वो महदादिक्रमवदिति प्रका
रांतरेणापि संख्यापरिदृष्टत्वमाह एवमुद्घातैरित्यादिना एवं एतावद्भिर्मात्राप्रमाणैरुद्घातैः प्राणाया १२८

मः एवं एतावद्भिर्मध्यमः प्राणायामः एवमेतावद्भिस्तीव्रः प्राणायाम इत्यपि संख्यापरिदृष्टो
भवतीत्यर्थः तदुक्तं कौर्मे मात्राद्वादशको मंदश्चतुर्विंशतिमात्रकः मध्यमः प्राणसंरोधः ष
ट्त्रिंशन्मात्रिकोत्तम इति अत्र पूरकादिविशेषावचनात् त्रिष्वपि प्राणायामेषु द्वादशद्वाद
शमात्रादिरूपैकैव संख्येत्यपि च सूत्रस्थः देशकालसंख्याभिः परिदृष्ट इत्यत्र वेच्छाविकल्प
एव नतु समुच्चयः उदाहृतवशिष्ठवाक्यादौ केवलमात्रासंख्ययापि प्राणायामदर्शनात्
समुच्चयानुष्ठाने तु फलभूमा भवत्येव भूयसि भूय इति न्यायादिति दीर्घसूक्ष्म इति संख्या
वषेत्खल्विति सबाह्याभ्यंतरत्वे भवति त्रिविधः प्राणायामः एवं देशाद्यवधारणैरभ्यस्तः
सन्दीर्घसूक्ष्मसंज्ञको भवतीत्यर्थः दीर्घश्चासौ सूक्ष्मश्चेति सान्वयसंज्ञा देशाद्यन्यतमा
नियमेनाहि प्रत्यहमभ्यस्यमानः क्रमेण कालवृद्ध्या दीर्घकालव्यापित्वेन दीर्घो भवति वायु
संचारस्यातिसूक्ष्मतमानः क्रमेण कालरूपाच्च सूक्ष्म इति यद्यप्यभ्यस्त इति सूत्रे नास्ति
तथापि दीर्घसूक्ष्मसंज्ञयार्थाक्षिप्तमेव भाष्यकारेण व्याख्यातमिति तदेवं प्राणायामस्य
रेचकपूरककुंभकाख्यविशेषत्रयमभ्यासाख्यगुणयोगेन तेषां दीर्घसूक्ष्मत्वं चोक्तं इदा
नीं केवलकुंभकरूपं प्राणायामस्य चतुर्थं विशेषमाह बाह्याभ्यंतरविषयाक्षेपी चतुर्थः बा

ह्याभ्यंतरविषयकौ वा बाह्याभ्यंतरवृत्ती पूर्वसूत्रोक्तौ रेचकपूरकौ तयोराक्षेपी अतिक्रमी ताव
तिक्रम्य तत्कालस्वरूपमेव केवलो वर्त्तत इति यावत् एवंभूतो यः प्राणायामः स चतुर्थ इत्यर्थः
अस्य च केवलकुंभक इति संज्ञा वसिष्ठवाक्याद्व्यक्तीभविष्यति पूर्वसूत्रोक्तस्तंभवृत्तिस्तुनि
यमेन रेचकपूरकयोरंतराल एव वर्त्तत इति न तदतिक्रमी रेचकपूरकविषयातिक्रमस्यापि
स्वाभाव्यविषयघटितेलक्षणमुक्तं नन्वेवं रेचकपूरकातिक्रमी स्यैवं सूत्रितं अयं च कुंभको न
रेचकपूरकदेशेन परिच्छिन्नः व्यापकत्वात् नापि कालसंख्याभ्यां परिच्छिन्नः चिरूपामासस
वत्सरादिकालस्थायित्वात् स च प्राणायामो ध्रुवस्य विष्णुपुराणे श्रूयते तस्मिन्हि तपसि प्रा
णनिरोधेन सर्वजीवप्राणनिरोधोऽभवदिति तत्रोक्तं अत एतस्य केवलकुंभकत्वमासीदि
ति अयं चतुर्थः प्राणायामः सोऽयं वसिष्ठसंहितायामुक्तः यथा प्रस्वेदजनको यस्तु प्रा
णायामो हि सोऽधमः मध्यमः कंपनात्प्रोक्त उत्थाने चोत्तमो भवेत् पूर्वं पूर्वं प्रकुर्वीत यावदुत्त
मसंभवः निश्वासोच्छ्वासकौ देहे स्वाभाविकगुणावुभौ तथापि नश्यतस्तेन प्राणायामोत्तमे
न हि तयोर्नाशे समर्थः स्यात्कर्तुं केवलकुंभकं रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणं प्राणा
यामोऽयमित्युक्तः स वै केवलकुंभकः सहिते केवले वापि कुंभके नित्यमभ्यसेत् यावत्केवलसि १२९

द्धिः स्यात्तावत्सहितमभ्यसेत् केवले कुंभके सिद्धे रेचपूरकवर्जिते। न तस्य दुर्लभं किंचित्त्रिषु
लोकेषु विद्यत इति आकाशगमनादिशक्त्याविर्भावेन कामगत्वादिकं स्यादित्यर्थः ननु तथे
स्योत्पत्तिक्रमं कथयति देशकालेपि बाह्यविषयो रेचको देशकालसंख्याभिरदो परिदृष्टः
पश्चाद्वदेशादिभिः संहैवाक्षिप्तः अतिक्रमितो भवतीति शेषः अत्र सूत्रे देशवाचको वि
षयशब्दः कालसंख्ययोरप्युपलक्षणमित्याशयः तथाभ्यंतरविषयः पूरकोपि देशादि
तिभिरदो परिदृष्टः पश्चाद्देशादिभिः संहैव सोऽप्याक्षिप्तो भवति तदुभावाक्षिप्तमुभयथा दीर्घ
सूक्ष्मो द्विविधो दीर्घसूक्ष्माच्चिरकालं देशादिभिरभ्यस्तो रेचकपूरकाविति यावत् तत्पूर्वकस्त
दुभयाक्षेपपूर्वकस्तदुभयमाक्षिपन्निति यावत् अवांतराविक्रममिकाजयात् कालक्रमे
णानुशीघ्रं उत्पद्यमान एवंभूत उभयोः श्वासप्रश्वासयोर्गतिविच्छेदश्चतुर्थः प्राणायाम
इत्यर्थः स्तंभवृत्त्याख्यतृतीयप्राणायामात् मिश्रकुंभकादस्य वैलक्षण्यमाह तृतीयस्त्विति
तृतीयलक्षणस्यभावः स्तंभवृत्तिर्विषयेणादेशेन तदुपलक्षितकालसंख्याभ्यां चानालोचितो
ऽनवधारितः सकृदारब्धोऽभ्यासबाहुल्यं विनैवोत्पद्यमानश्च भवति तथाऽस्य एव तृतीयो दे
शकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मश्च भवतीति सामान्यविशेषाभ्यां तृतीयस्य पृथक्

यमं तं चतुर्थस्य तद्विपरीततामाह चतुर्थ एव्विति चतुर्थस्तु श्वासप्रश्वासयो रेचकपूरकयो
र्देशाद्यविषयावधारणानंतरं क्रमिकमक्रमित्रपादेनोः पूरकरेचकाक्षेपपूर्वको गत्यभा
व इत्ययं चतुर्थः प्राणायाम इतरेभ्यो विशेष इत्यर्थः प्राणायामस्य चापरे सगर्भोऽगर्भादयो
विशेषाः पुराणादिषु द्रष्टव्याः जपध्यानयुतो गर्भस्त्वगर्भस्तद्विवर्जित इत्यादिवाक्यैरिति
दिक् योगिज्ञनयितव्ये प्राणायामस्याभ्यासं तत्सिद्धिसूचकमाह ततः क्षीयते प्रकाशावरण
ततः प्राणायामात्सूत्रं व्याचष्टे प्राणायामानिति विवेकज्ञानावरणीयं विवेकज्ञानावरकं
अथ वा कोपनीयेत्यादिवत् अत्रापि कर्तरि कृत्यप्रत्ययाः भव्यगेयप्रवचनीयादीनां कर्तरि
निपातनस्य दिङ्मात्रप्रदर्शनपरत्वात् कर्मेति कर्मधर्मः तस्य ज्ञानप्रतिबंधकत्वमेव ज्ञाना
वरकत्वं एतादृशं कर्म क्षीयत इत्यर्थः कर्मणो ज्ञानावरकत्वे पूर्वाचार्यवाक्यं प्रमाणयति य
त्तदाचक्षत इति यत्तत्कर्म एवमाचक्षते महामोहेनाज्ञानमयेन तत्त्वपुरेणेंद्रजालतत्त्वे
न शब्दादिविषयेणाद्यारेण प्रकाशशीलमपि बुद्धिसत्त्वमावृत्य तदेव कर्मैवाकार्ये संसारहे
तुव्यापारे एव नियुक्त इत्यर्थः दुर्बलं प्रकाशावरणक्षमं भवति तथा प्रतिक्षणं क्षीयते अ १३०
बीयते चेत्यर्थः तदुक्तं मनुना दह्यंते ध्मायमानानां धातूनां हि यथा मलाः तथेंद्रियाणां द

ह्यंते दोषाः प्राणस्य निग्रहादिति दोषाः पापानि तत्कार्यतमोमलविपर्ययो चतयः पापता
शकं कर्म पापक्षये सति यद्भवति तदाह तत इति ततः पापाख्यकारणाभावात्मलानां तमसां
तमसां तत्कार्यविपर्ययाणां चापगमे ज्ञानदीप्तिरित्यर्थः ननु तपसैव पापक्षय इत्युक्तं तर्हि
किं प्राणायामेनेति चेन्न ज्ञानावरकपापक्षये प्राणायामस्य श्रेष्ठोपायत्वात् अतएव पूर्व
पादे प्रकृष्टाधिकारिणः प्राणायाम एव साधनमुक्तं विक्षेपकतया तपोंतराभावेपि तेनैव
योगनिष्पत्तिसंभवादिति अन्यच्च भवतीत्याह किंचेति धारणासु च योग्यता मनसः प्राणा
यामाभ्यासादेवेति सूत्रेण सहान्वयः प्रच्छर्दनेत्यादिप्रथमपादीयसूत्रेण प्राणायामस्य धा
रणायोग्यतारूपा स्थितिर्हेतुतावचनादित्यर्थः एतेन तस्मिन्नपि सूत्रे पूरकादित्रयात्मकः प्रा
णायाम एवोक्त इत्यवधारणीयं प्रत्याहारसूत्रमवतारयति अथ क इति स्वविषयासंप्रयोगे
चित्तस्य स्वरूपानुकार इवेंद्रियाणां प्रत्याहारः इंद्रियविषयासंप्रयोगकाले इंद्रियाणां चित्तस्व
रूपानुकारितेव या भवति सा इंद्रियाणां प्रत्याहार इत्यर्थः जितेंद्रियस्य हि ध्यानकाले चक्षु
रादीन्यविषयेव बहवाकारेण चित्तेन तुल्याकाराणीव भवंति न त्वांतरेण विषयांतरं मन
सैकीभूय संकल्पयति तथा चित्ते निरोधोन्मुखे सति प्रयत्नांतरं विनैव निरुद्धानि भवंतीत्यत

स्यैंद्रियाणि चित्तानुकारीणीत्युच्यंते अजितेंद्रियस्य तु चक्षुरादीनि तदानीमपि रूपादि
षु मनसैव धावंति अतस्तस्मिन्चित्तमेवेंद्रियानुकारि स्यादाशयः अजितेंद्रियस्यापींद्रियाणि वि
भवंति इंद्रियाणां हि सर्वेषां यद्येकं क्षरतींद्रियं तेनास्य द्रवते प्रज्ञा दृतेः पादादिवोदकमिति
स्मृतेरित्याशयः अजितेंद्रियस्यापींद्रियाणि विषयभोगकाले चित्तानुकारीणि भवंत्येवे
ति तद्व्यावर्त्तनाय स्वविषयासंप्रयोग इत्युक्तं ध्यानकाले च बाह्यषादितत्प्रवृत्तिश्चित्तस्यै
व भवति ननु चक्षुरादीनां तेषां वृत्तदतिरिक्तवस्यभावमात्रमतोनुकार इवेत्युक्तं अन्नतए
व चपि वन्निव च चक्षुर्भ्यां पादौ संवादयन्निव चित्तेंद्रिये वपुतो ध्यायेत् तन्मूर्त्तिं विजिते
द्रिय इत्यादिस्मृतिश्च यीवशब्द एव प्रयुक्त इति तदेतद्व्याचष्टे विषयेति इवेतीत्यंतस्य प्र
त्याहार इत्यागामिना त्वयः अनुक्तस्य कार्यरूपं लक्षणमाह चित्तनिरोध इत्यादिना अपे
क्षंत इत्यंतेन चित्तस्य वृत्तिनिरोधकाले यत्स्वयमेवेंद्रियवृत्तिनिरोधो भवति इदमेव प
रमवश्यत्वं प्रत्याहारकार्यत्वात् तल्लक्षणमित्याशयः निरुद्धानि भवंतीति शेषः नेतरेंद्रिय
जयवदिति इतरे उक्तपरमवश्यत्वातिरिक्ताद्विजयस्तत्र वक्ष्यमाणो इंद्रियजयाः तेषु स
त्स्वपि स्वनिरोधार्थं प्रयत्नेंद्रियाणि प्रत्याहारादिकमपेक्षंते नैवं पद्योक्तप्रत्याहारे सतीति स्वनि १३१

रोधार्थं चित्तनिरोधातिरिक्तमपेक्षंत इत्यर्थः इंद्रियाणां चित्तानुकारं दृष्टांतेन प्रतिपादयति
यथा मधिवेत्यादिना निरुद्धानीयंते तदार्ष्टांतिके दृष्टांतोक्तो यत्त ननु त्योनिरोधः तेन व
निवेशनमुख्यं ध्यानमप्युपलक्षणीयं अन्यथा दृष्टांतदार्ष्टांतिकयोः साधर्म्यप्रदर्शनेम
नतापत्तिः एष प्रत्याहार इति पुरैषव्याख्यानं सोयं प्रत्याहारः सप्रयोजनो विष्णुपुराणेप्यु
क्तः शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित् कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः
वश्यता परमा तेन जायते निश्चलात्मनां इंद्रियाणामवश्यैस्तैर्न योगी योगसाधक इति अ
तत्र प्रत्याहार इंद्रियधर्म इति योगे प्रत्याहारस्याद्वांतरव्यापारभूतं तत्सिद्धिसूचकमाह
ततः परमवश्यतेंद्रियाणां ततः प्रत्याहारादिंद्रियाणां परमो जयो भवतीत्यर्थः तत्रपर
मजयप्रतिपादनार्थं बहुविधान् पक्षानाह शब्दादिष्वित्यादिना व्यसनशब्दार्थमाह स
क्तिरिति सक्तिः संयोगेन शास्त्रविरुद्धोपि विषयभोगे इंद्रियाणि प्रवर्त्तंते अस्यातिक्षिपतीति
व्यस्यत्येनेश्रेयस इति व्युत्पत्योति शेषः एवं तस्य तिशास्त्राविरुद्धा प्रतिपत्तिरिष्ट भेदेनोप्या
प्यरावेति पूर्वोक्ते न केचिदित्यनेनान्वयः मतांतरमाह रागाद्यभावादीति इंद्रियविषययोः संप्रयो
गो वद्यापारतंत्र्यमित्यर्थः मतांतरमाह रागद्वेषेति रागद्वेषविभिन्नकामभ्यासवद्धः स्वाभ्यास

स्यो विषयभोगस्तथेत्यर्थः तेनात्माभिमानिकस्य खड्गखम्भस्यत्वं लघं कापि कस्य खड्गखाना
योगावस्थां विना परिहारासंभव इति भावः एतेषु त्रिसूत्रेषु तरमसूत्रं चपिनैते परमा इंद्रिय
जयाः एतावन्मात्रैरिंद्रियजयस्य निरोधात् अतः सूत्रकारसंमतं परममाह चित्तैकाग्र्यादि
ति चित्तैकाग्र्याद्धेतोरिंद्रियाणां याऽप्रतिपत्तिवृत्तिनिरोधस्तद्योग्यता सा एवेंद्रजय इति जैगी
षव्य इत्यर्थः तत इति रूपं च वश्यतात तो हेतोः परमापावयतश्चित्तनिरोधेनेमादिरर्थः का
लादिव्यावर्तनाय प्रयत्नरूपमिति तथा च पूर्वसूत्रोक्तचित्तानुकारस्य फलं लक्षणं च पा
समाधौ चित्तेन सहेंद्रियाणां वृत्तिनिरोधयोग्यता सैव परमवश्यता ख्योजयो द्वेनसूत्रेणो
क्त इति एतादृशवश्यात्वाभावेनैव सौभरिप्रभृतीनां योगभ्रंशादि यं वश्यतापि योगनिष्प
त्तिहेतुः अनरावगीता यततोऽप्यपि कौन्तेय पुरुषस्य विपश्चितः इंद्रियाणि प्रमाथीनि हरं
ति प्रसभं मनः तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञाप्र
तिष्ठिता तदेवं ज्ञानसाधनमुखिनमुखिनयोगस्यापि बहिरंगानि यमादिपंचद्वारेणानि स
सिद्धीस्तत्रपादे प्रोक्तानि धारणादिचतसृणां सिद्धिबाहुल्यानुसिद्धिभिः सह तत्प्रतिपादना १३२
र्थमेव समग्रस्तृतीयपादो भविष्यति इति श्रीपातंजलभाष्यवार्त्तिके विज्ञानभिक्षुनिर्मि

ते साधननिर्देशो नाम द्वितीयः पादः योगांगेषु प्रथमे कियंति पूर्वपादे प्रोक्तानि कियंति चात्र
पद इत्यत्र नियामकं वदत्तेव क्रमप्राप्तधारणासूत्रमवतारयति उक्तानीति बहिरंगांतरंगा
त्वे त्रयाणामपि पादभेदेन निरूपणे नियामके इत्यर्थः देशबंधश्चित्तस्य धारणा यत्र देशे ध्येयो
चिंतनीयस्तत्र ध्यानाधारदेशविशेषे चित्तस्य स्थापनं तदैकाग्र्यं धारणेत्यर्थः तदेतद्भाष्य
येनाभीति मूर्ध्नि मूर्द्धस्थे ज्योतिषि इत्यादिशब्देन गारुडाद्युक्तदेशांतराणि शास्त्राणि यथागा
रुडे प्राणास्यां हृदये त्वामृतत्वीमेच तथोरसि कंठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्द्धसु
किंचित्तस्मात्परस्मिंश्च धारणा दश कीर्त्तिता इति मुखे जिह्वाग्रे किंचित्तस्मात्परस्मिन्नि
ति मूर्ध्नो उपरि बाह्यद्वादशांगुलपरिमिते देशे लिंगशरीरस्य समाप्यतावत्पर्यंतं प्रदीपशि
खावदवस्थानात् अवयवितैः स्तावत्पर्यंतमेव लिंगशरीरानुगतो ज्योतिरुपलभ्यते वाक्यानामप्यु
पलंभाच्च तदुक्तं कौर्मे शिखाग्रे द्वादशांगुलैः कस्यपित्वा पवेक तमिस्यादिनेति एतानि च ना
भ्यादीति जीवेश्वरयोर्मुख्यस्थानाम्यैव राज्ञासिंहासनवत् जीवेश्वरव्यंजकस्य लिंगशरीरस्य
मुख्यस्थानत्वात् अंतराणि धारणायाः प्रकृष्टदेशा उक्ताः आध्यात्मिकान् ध्यानदेशान्
उक्त्वा बाह्यानपि संक्षेपतस्त्वाह वा बाह्ये वा विषय इति चंद्रसूर्याग्न्यादौ ईश्वरदेवतादिध्याने

णाद्यर्थः वृत्तिमात्रेणेति वृत्तिमात्रेण न तु ध्येयवस्तुनयेत्यर्थः तेन ध्यानादिव्यावृत्तिः त
दुक्तमीश्वरगीतायां हृत्पुंडरीके नाभ्यां वा मूर्ध्नि पर्वतमस्तके एवमादिप्रदेशेषु धारणा वि
त्तबंधनं देशावस्थितमालक्ष्य बुद्धेर्या वृत्तिसंततिः वृत्त्यंतरैरसंसृष्टा तद्ध्यानं सूरयो विदुः
एकाकारः समाधिः स्याद्देशालंबनवर्जितः प्रत्ययो ह्यर्थमात्रेण योगसाधनमुत्तममिति
बंध इतीत्यंतेन देशबंधः स्याख्यायस्य तथाकार्यमुपसंहरति बंध इति ईदृशो बंधो
धारणेत्यर्थः इदं च धारणालक्षणं प्रायिकं परिच्छिन्नयोगाभिप्रायेण स्वविते यत्र प्रथ
मतरावेश्वरानुग्रहात्स्वपरिच्छिन्नतया जीवब्रह्मयोगो भवति तत्र देशालंबनधारणा
नुपयोगात् अतो धारणायामस्य द्वयिलक्षणं गारुडादावप्युक्तं यथा गारुडे प्राणायामैर्द्वा
दशभिर्यावत् कालः कृतो भवेत् तावत्कालपर्यंतं मनो ब्रह्मणि धारयेत् इत्यादि तदेव
तु धारणासामान्यलक्षणं अस्य व्याख्यानमात्रेणापि धारणायन्ते तत्र प्रत्ययैकतानता ध्यानं
भाष्यं सुगमं इदमपि ध्यानलक्षणं प्रायिकं कौर्मगारुडध्यानातिप्रायेण सर्वत्र ध्याने देश
नियमात् अतो ह्यपि गारुडे लक्षणांतरमुक्तं तस्यैव ब्रह्मणि प्रोक्तं ध्यानं द्वादश धारणेय १३३
तेन तस्यैव द्वादशप्राणायामकालेन धारितचित्तस्य द्वादशधारणाकालावच्छिन्नं चिंतनं ध्या

नमित्युक्तमित्यर्थः अनेन च पूर्वोत्तरसूत्रोक्तं विशेषलक्षणं विशेषणीयं ध्यानस्य ध्येयसमाधि
लक्षयति तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः मात्रपदस्यार्थः स्वरूपशू
न्यमित्येतेन स्वयं विवृतः तदेव ह्याचष्टे ध्यानमेवेति तदा तदेव ध्यानं ध्येयस्याकारेण
वसाक्षिणि निर्भासते न तु प्रत्ययाकारनिर्भासं विन्नस्य ध्येयस्वरूपावेशेनाहमिदं चिंत
यामीत्येवं प्रत्ययाकारवस्त्वंतरानुदयात् तदा ध्यानमेव समाधिरुच्यत इत्यर्थः ध्यानस्वरू
एवमस्तु ततः स्तावादिव्यवहारयोगः स त यावद्ध्यातृध्येयध्यानकलनावत् ध्यानं तद्रहितं
च समाधिरिति ध्यानसमाध्योर्विभागः इदं च समाधिलक्षणं पूर्वसूत्रोक्तध्यानविशेष
तयादेशघटितत्वेन परिच्छिन्नसमाध्यपायकं अतोऽर्थमात्रावभासनं चित्तमित्येव स
माधिसामान्यलक्षणं द्रष्टव्यं ईश्वरगीतावाक्ये तल्लक्षणसिद्धेः अथवा गारुडोक्तं यथा ध्या
नद्वादशपर्यंतं मनो ब्रह्मणि योजयेत् तिष्ठेत्तल्लयतो युक्तः समाधिः सोऽभिधीयत इती
ति अत्रापि सूत्रोक्तविशेषलक्षणं ध्यानद्वादशगुणितकालावच्छिन्नत्वेन विशेषणीय
मिति अस्य च समाधिरूपस्यांगस्यांगियोगतः संप्रज्ञातयोगाद्यं भेदो यदत्र चित्तारूपतया
निःशेषतो ध्येयस्य स्वरूपं न भासते अंगितत्संप्रज्ञाते साक्षात्कारोदये समाध्यविषयाऽपि

विषयाभासं तत्र इति तथा च साक्षात्कारपर्यन्तैकाग्र्यकाले संप्रज्ञातयोगः अन्यदा तु समाधि
मात्रमिति विभागः अष्टानां योगांगानां फलत्वं संप्रज्ञातयोगस्य तद्द्वारा असंप्रज्ञातयोगस्ये
ति ध्यानादित्रयस्य परिभाषासूत्रे त्रयमेकत्र संयमः अस्मिन्नेव पादे प्रोक्तत्रया
पशब्देन धारणादित्रयमेव लभ्यते भाष्यं सुगमं धारणाध्यानसमाधीनामिति नान्तत्र
सत्रे ऽन्यया संज्ञया व्यवहारो भविष्यति तेषु च प्रातिस्विकरूपेण त्रयाणामुच्चारणे ग्रन्थबाहुल्यं
स्यादित्याशयेन तन्त्रान्तरसिद्धसंज्ञाप्रतिपादकमिदं सूत्रं संयमसिद्धयोगे विस्तरतो वक्ष्यन्ते
सांप्रतं संयमस्य योगांगानां प्रयोजकं द्वारमाह तज्जयात्प्रज्ञालोकः तज्जयात्संयमस्य जयः
स्थैर्यं सात्म्यमिति यावत् तस्मात्प्रज्ञाया आलोको दीप्तिर्वृद्धिः क्रमेण भवतीत्यर्थः तदेव व्या
चष्टे तस्येति स्वोक्तं विवृणोति यथेति वैशारद्यं च अतिसूक्ष्मव्यवहिताद्यर्थानां परप्रत्यक्षी
करणसामर्थ्यमिति संयमस्यानुष्ठाने विशेषमाह तस्य भूमिषु विनियोगः तस्य संयम
स्य स्थूलादिपूर्वपूर्वभूमिकाजयानन्तरं सूक्ष्मादिषूत्तरोत्तरभूमिकासु विनियोजनं योगिना
कर्त्तव्यमित्यर्थः एतदेव व्याचष्टे भाष्यकारस्तस्येति अनन्तरव्यवहिताक्रमेण भूमिकारो १३४
हे युक्तिमाह नहीति यो न भूम्यपेक्ष्य यः धरा यस्या भूमिर्जिता येन सो जिताधरभूमिर्योगी

नहि अनन्तरभूमिमव्यवहितभूमिं विलंघ्य प्रान्तभूमिषु व्यवहितोत्तरभूमिषु संलभते
धनुर्धरादिषु स्थूलवेध्यानन्तरमेव सूक्ष्मवेध्यादिदर्शनात् सोपानारोहणादिषु च क्रमे
णैवारोहादिदर्शनात् अन्यथा अधःपातात् तदभावात् इति तत्र संयमलाभात् कुतः प्र
ज्ञालोकस्तत्तद्भूमिषु स्यादित्यर्थः तथा चोक्तं गारुडे स्थित्यर्थं मनसा पूर्वं स्थूलरूपं विचि
न्तयेत् तच्च तन्निश्चलीभूतं सूक्ष्मे पि स्थिरतां व्रजेदिति अयं च भूमिकारोहे क्रमश्चोत्सर्गि
कः कदाचिदपोद्यतेपीत्याह ईश्वरेति ईश्वरप्रसादादानेन वशीकृतप्रकृतिपुरुषवि
वेकादिभूमिकस्य तु योगिनो नाधोभूमिषु परचित्तज्ञानादिषु स्वचित्तप्रत्ययादिषु प्रत्यये
परचित्तज्ञानमित्याद्यागामिसूत्रवाच्येषु विराडादिस्थूलेषु वा संयमो युक्तः स्यात् यः प
श्यति कस्मादिति अत्रैव तदर्थस्येति अधरभूमिसंयमप्रयोजनस्योत्तरभूम्यारोहणस्ये
श्वरेणैव प्रसादेनैव गतत्वात् प्राप्तत्वादित्यर्थः ननूत्सर्गसिद्धं क्रममुल्लंघ्य प्रथममुत्तरभू
मिकासु संयमारंभ एव न युक्तः तत्कथमादौ नत्तयो घटेतेति चेन्न यं जन्मानं नाशवेवस
र्वोत्कृष्टभूमिकायोग्यमिति चित्तस्य परीक्षणीयत्वात् तत्संयमायोग्यत्वात् अस्यानभ्येवा
धरभूमिषु संयोग्यतामवधार्य चित्तस्याराणीयत्वादिति नन्वेवं अधिकारिपुरुषभेदेन

ऋषैवाधिकाक्रमभेदात् कथंस्वयोग्यो ऽधिकाक्रमो योगिभिरवधारणीय इतित
त्राहमरुयेरस्याइति उपायभ्यायोगुरुः योगवलादेवस्वयंज्ञानानोन्यथेः अत्रप्रमाणंप
छतिकथमिति उत्तरंएवंस्थमिति अप्रमत्तः सिद्धलंपटः आवश्यकब्राधवधारणा
र्थयोगांतेश्रवांतरविशेषमाहस्त्राभ्यां त्रयमंतरंगंपूर्वेभ्यः आगामिसूत्रानुरोधादत्र
संप्रज्ञातसमाधेरितिप्ररूपितात्माचष्टेतदेतदिति अत्रसंप्रज्ञातस्येत्यत्रप्रज्ञापाविशेष
णतयाज्ञानस्यांप्यंतरंगत्वमेतनापेविवक्षितं बीजसाम्यात् ज्ञानप्रकरणपाठाच्च अंतरं
गत्वेचबीजमिदंयद्योपातिरिक्तवृत्तिनिरोधरूपेसंप्रज्ञातेध्येयसंयमः साक्षादेवकारणं
विषयांतरसंवाररूपत्वात् एवंध्येयसाक्षात्कारोपिसाक्षादेवविषयांतरसंवारणरूपतो
वंधनिवृत्तिद्वाराकारणमितिप्रत्याहारांतंत्वंगपंचकंचित्तस्यैर्यद्वारेणपरंपरयैवोभयोः
कारणमिति अतएवयस्यजडभरतादेःस्वतएवप्राचीनकर्मवशाच्चित्तेसंयमयोग्यंभव
तितस्यनास्तीतरांगावश्यकत्वमित्युक्तंगारुडादिषु आसनस्थानविधयोनयोगस्यप्रसा
धकाविलंवजननाः सर्वेविस्तराः परिकीर्तिताः शिशुपालः सिद्धिमापस्मरणाभ्यासगौर
वात् इत्यादिना अतएवजडभरतादीनांसमाधिविघ्नतयावाह्यकर्मत्यागोपिश्रूयतेश्र १३५

तएवगीतायांसंयमाशक्तायैवाभ्यासकर्माद्यभिविशेषतउपदिष्टानि मय्येवमनआध
त्स्वमयिबुद्धिंनिवेशय निवसिष्यसिमय्येवअतऊर्ध्वंनसंशयः अथचित्तंसमाधातुंनश
क्नोषिमयिस्थिरं अभ्यासयोगेनततोमामिच्छाप्तुंधनंजय अभ्यासेप्यसमर्थोसिम
त्कर्मपरमोभवेत्यादिना अभ्यासश्चात्रैवसूत्रितः स्थितौयत्नोभ्यास इति तथावृत्त्यासी
नांसायामपिसमाधिविरोधेसतिगुणलोपेनगुणिनइतिन्यायसिद्धावाह्यकर्मानपेक्षो
क्ताअतएवचातीर्थंनाथनयेक्षेतिसूत्रेण पश्चविद्याचाविद्याचयस्तद्वेदोभयंसह अ
विद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुतइतिश्रुत्याज्ञानकर्मणोसाहित्यमुक्तंतत्रयोगिनो
रोत्सर्गिकंसहानुष्ठानमनेनाभिप्रेतं नतुमोक्षाख्यफलेतयोस्तुल्यवत्समुच्चयः आविगयास
त्युंतीर्त्वेत्यनेनज्ञानविघ्नवविनस्याख्यमृत्युतरणद्वारेणविद्यायाएवमोक्षहेतोपिस्यांकर्म
णउपयोगावगमात् नकेवलेनयोगेनप्राप्यतेपरमंपदं ज्ञानतकेवलेनसम्यगपवर्गफल
प्रदमित्यादिवाक्येयोगशब्दोक्तकर्मनिरपेक्षात् ज्ञानयोगादपिमोक्षसिद्धेः अंगत्वेचय
नेजन्मस्वनुष्ठितानामपिकर्मणांजडभरतादिषुसिद्धमिति एतेनउभाभ्यामेवपक्षाभ्यां
यथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यतेपरमंपदंइत्यादिवाक्यानिअंगांगिनोरे

त्योगकसहानुष्ठानपरत्वेपि वन्नमोक्षं प्रति समुच्चयबोधकानीतिदिक् तदपि बहिरंगं
निर्बीजस्य निर्बीजयोगस्यासंप्रज्ञातस्य तदपि त्रयं बहिरंगमेव विवेकख्यातिपरवैरा
ग्यद्वारकपरंपरयाहेतुत्वेनाधरपकत्वाभावादित्यर्थः एतदेवाह तदभावेभावादितिपूर्वो
क्तविदेहप्रकृतिलयानां स्वविशेषाणामौत्पत्तिकज्ञानवैराग्याणां संपन्नैरपेक्षणेनैवदे
वेदिनप्रलयादावसंप्रज्ञातोदयादित्यर्थः तथाच स्मृतिः योगनिद्रां यदा विष्णुर्जगत्येका
र्णवीकृते आस्तीर्य शेषमभजत् कल्पांते भगवान् प्रभुरित्यादिरिति तदेतत्सर्वमुक्तम
वप्रत्ययो विदेहप्रकृतिलयानामिति सूत्रेणेति ज्ञानोपायप्रसंगेनयोगांगानि विस्तर
तः प्रोक्तानि इदानीमंगभूतस्य समाधेरंगिनोस्य योगयोः स्वरूपमेदावधारणाय तत्त
द्वस्थागतानिविशेषावक्तव्याः तावत्तेवत्तयोरंगांगिनोः प्रयोजनमपि प्रतिपादितं भविष्य
तीतत्रांगसमाधितो योगद्वयस्य विशेषावधारकं सूत्रमस्यापपत्तिप्रश्नमुखेनव्याचष्टे
तिनिरोधचित्तक्षणेषु निरोधावस्थचित्तक्षणेषु योगद्वयक्षणेष्विति यावत् गुणस्वाभा
व्यस्याथिरत्वात् त्रिगुणात्मकस्य चित्तस्य निरोधक्षणेष्वपि परिणामधारावश्यकीस १३९
च परिणामः कीदृश इति प्रश्नः व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षण

चित्तान्वयो निरोधपरिणामः असंप्रज्ञातापेक्षयासंप्रज्ञातेपि व्युत्थानं तथा च व्युत्थानं निरो
धश्चयोगद्वयसाधारणावात्रयाख्यः केवलस्यासंप्रज्ञातरूपस्य निरोधस्यात्र ग्रहणेसंप्रज्ञा
तात्मनिरोधस्य परिणामाकथनात्स्वन्तापत्तेः व्युत्थानसंस्काराभिभवश्चक्रमेणह्रासोनत
दाह निरोधसंस्कारप्रादुर्भावश्च क्रमेणवृद्धिर्निरोधपरिणामो निरोधकालीनपरिणाम
: सच निरोधक्षणचित्तान्वयः प्रत्येकं निरोधक्षणेष्वेकस्मिन्नस्थिरेचित्तेन्वित इत्यर्थः एतच्च
विशेषणं योगकाले प्रतिक्षणमेतादृशपरिणामलाभाय चित्तस्थैर्यलाभाय चोक्तं चित्तधर्मि
णो धर्मपरिणामो यस्मिन्निरोधसंस्कारत्वमुपपन्नमिति प्रमेयादनाय भाष्यकारा आ
ह व्युत्थानसंस्काराश्चित्तधर्माः इति ननु वृत्तिनिरोधेनैव तत्कार्यं तया तत्संस्काराणामपि नि
रोधोभवतु तं तन्निरोधेन परं निरोधवत् अतो न यथा व्युत्थानसंस्काराभिमनापेक्षेत्याशं
कां समाधत्ते तेन ते प्रत्ययात्मका इति न प्रत्ययोपादानका अतो न ते व्युत्थानसंस्काराः प्रत्यय
निरोधेपि निरुद्धा भवंतीत्यर्थः निमित्तकारणत्वादेव प्रत्ययस्येति भावः तस्मात् प्रत्ययनिव
त्तावपि तत्संस्कारनिवृत्तिकारणं यद्यनेनापेक्ष्यत इति शेषं भाष्यं सूत्रस्याख्यैवयाख्यातप्रा
यं ननु किमर्थं निरोधसंस्कारः कस्यते इत्याकांक्षायां निरोधसंस्कारफलमाह तस्य प्रशांत

वाहितासंस्कारात् तस्य निरोधावस्थचित्तस्य प्रशान्तवाहिता निर्मलनिरोधधारावाहनं
निरोधसंस्कारबलादेव भवतीत्यर्थः अतो निरोधसंस्कारस्तत्रोद्भोधकश्चावश्यमेवस्य
इति भावः अन्वयव्यतिरेकाभ्यां कार्यकारणभावं प्रतिपादयति निरोधेत्यादिभाष्यं एतेन
ऽयं निरोधरूपयोगाङ्गकार्यः परिणामो व्याख्यातः इदानीं तद्विलक्षणं योगाङ्गं समाधिका
र्यपरिणामं दर्शयति सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः सर्वार्थताविक्षि
प्तता एकाग्रता एकमात्रविषयता तयोर्यथाक्रमं क्षयोदयौ चित्तस्य समाधिकालीनपरिणा
म इत्यर्थः अत्रापि प्रतिक्षणमित्यनुषंजनीयं युक्तिसाम्यात् तदेतद्व्याचष्टे सर्वार्थतेति स
र्वार्थताया अत्यन्तोच्छेद एकदा न भवति नापि एकाग्रताया निष्पत्तिरेकदा भवति किं तु क्र
मेणैव अतः क्षयोदयौ तिरोभावाविर्भावार्थकं तथा व्याचष्टे क्षय इत्यादिना तिरोभा
व इत्यर्थः स्वीये तत्र तिरोभावाविर्भावो बोद्धव्यो ननु सर्वार्थतैकाग्रतयोर्धर्मौ कथं
चित्तस्येत्यत आह तयोर्धर्मित्वेनानुगतं चित्तमिति तयोः सर्वार्थतैकाग्रतयोः तथा
च धर्मपरिणामोऽपि धर्मद्वारा धर्मिण एव भवतीत्यर्थः उत्तरसूत्रवक्ष्यमाणपरिणामात्
व्यावर्त्यं प्रकृतसूत्रवाच्यार्थभूतं परिणामं व्याचष्टे तदिदमिति तदिदमित्यस्य विवरणं अ १३७

नुगतमित्येतत्तथा च चित्तं स्वात्मभूतयोः स्वकार्ययोः सर्वार्थतैकाग्रतयोर्धर्मयोरपायका
लेऽनुपजनकाले चानुगतं यत्समाधीयते स समाधिपरिणाम इत्यर्थः समाहितचित्तस्य
नु परिणामः शेषसूत्रेण वक्ष्यत इति भावः इदानीं अंगसमाधावेव परिणामान्तरमुक्तप
रिणामोत्तरकालीनमाह ततः पुनः शान्तोदितौ अतीतोत्पद्यमानौ तुल्यप्रत्ययौ एकाकारस
प्रत्ययौ चित्तस्यैकाग्रतापरिणामः ततः सर्वार्थताया विशेषतः क्षये सति शान्तोदितौ अती
तोत्पद्यमानौ तुल्यप्रत्ययौ एकाकारप्रत्ययौ चित्तस्यैकाग्रताकालीनः पुनः परिणामो भवति
सजातीयत्वादेकः प्रत्ययो नश्यति अन्योऽप्युद्यत इत्येवं परिणामो भवतीत्यर्थः तदेतद्व्याच
ष्टे समाहितेति समाध्यारूढस्य चित्तस्येत्यर्थः अनेन पूर्वसूत्रोक्तचित्तात् व्यवच्छेदः कृतः तत्र
समाधीयमानचित्तस्यैव परिणामस्योक्तत्वादिति यतस्तथैव धारावाहिकएकाग्रतासंतान उ
क्तः अवधिमाह आसमाधीति भ्रेषो भ्रंशः तदेवं योगतदंगयोः परिणामरूपं वैलक्षण्यं त
योर्विवेकाय प्रदर्शितं अनयैव दिशा व्युत्थानकालीनानामपि चित्तपरिणामा व्याख्याताः इतः
परिणामत्रयसंयमादित्यागामिसूत्रोपयोग्यात्संगत्या सर्वत्रवैराग्यातिप्रत्यासनाय च चित्तव
देवान्येष्वप्यतिदेशेनैव परिणामान् व्याचष्टे सूत्रकारः एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थाप

रिणामावस्थापरिणामा व्याख्याताः धर्मैर्लक्षणैरवस्थाभिन्नपरिणामा धर्मलक्षणावस्थाप
रिणामाः एते च भाष्ये व्याख्येयाः एतेरावपरिणामा भूतेन्द्रियेषु न तु तत्त्वांतरपरिणामा इत्यसाधा
रणपरिणामो नैवात्र प्रकृत्यादिष्विति नोक्तं तेन तत्त्वांतरपरिणामवदेतेपि परिणामाः सर्वेणव प
थायोग्यं प्रकृत्यादिष्वप्यवगंतव्या तथा च भाष्यकारो वक्ष्यति एवं धर्मलक्षणावस्थापरिणा
मैः शून्यं क्षणमपि न गुणवृत्तमवतिष्ठते इत्यनेन न सर्वेषु तत्त्वेषु परिणामत्रयमिति सूत्रेप्याच
ष्टे यत्तेनेति ननु चित्तपरिणाममात्रप्रकृते सूत्रे प्रयुक्तं न तु धर्मलक्षणावस्थापरिणामा इत्याशंक्य
तद्विभागप्रदर्शनेनाप्युपक्रांतं उपक्रमते तत्र व्युत्थानेति तत्र तेषु मध्ये व्युत्थाननिरोधयोर
भिभवप्रादुर्भावावेव चित्ते धर्मिणो धर्मपरिणामः प्रथमसूत्रेणोक्तः इत्यर्थः अवस्थित
स्य धर्मिणः पूर्वधर्मतिरोभावे धर्मांतरप्रादुर्भावस्यैव धर्मपरिणामत्वमिति भावः यथा
पि प्रथमसूत्रे व्युत्थाननिरोधसंस्कारयोरेवाभिभवप्रादुर्भावावुक्तौ न व्युत्थाननि
रोधयोरपायोपजननावप्यर्थाल्लब्धाविति धर्मद्वयं गुणोभयेसमस्येतन तथा तेनैव सूत्रेणा
भिभवप्रादुर्भाववशाद्धर्मस्य लक्षणपरिणामोऽप्युक्त इत्याह लक्षणपरिणामश्चेति १३८
लक्षणपरिणामो हि अवस्थितस्य धर्मस्यानागतादिलक्षणात्यागे वर्त्तमानादिलक्षणलाभः

स चाभिभवप्रादुर्भाववचनेनैव लब्धः अतीततावर्त्तमानतयोरेवाभिभवप्रादुर्भावत्वादि
ति भावः तत्रादौ निरोधरूपस्य धर्मस्य प्रादुर्भावशब्दोक्तं लक्षणपरिणाममुदाहरतीति नि
रोधस्त्रिलक्षण इति एतस्यैव विवरणं त्रिभिरध्वभिर्युक्त इति क्रमेण संबंधाद्धस्तस्य तथाऽना
गतादि भावो ध्वेत्युच्यते तथा धर्मिणो धर्माणां चास्य संख्या वर्त्तनात्तु लक्षणशब्देन चतंत्रेप
रिभाषित इति ततः किमित्यत आह स खल्विति स खलु निरोधः प्रादुर्भावकालेऽनागतल
क्षणरूपमध्वानं हित्वेत्यादिरर्थः अत्र सत्कार्योपपत्तये धर्मपरिणामत्वोपपादनाय च
धर्मत्वमनतिक्रांत इत्युक्तं स्वरूपेणावस्थितस्यैव धर्मस्य रूपांतरप्रायरूपांतरोत्पत्तौ धर्म
परिणामस्य वहारादिति वर्तमानावस्थामितरावस्थाभ्यामद्विविव्यद र्शयति यत्रेति स्वरूपेण
र्थक्रियाकारित्वेनाभिव्यक्तिरुपलब्धिरित्यर्थः स चानागतापेक्षयाद्वितीयोध्वेति शिष्यबुद्धा
रत्नापप्रसंगादाहरणोस्येति अत्र उत्पादसद्विनाशयोः प्रतिषेधायाह न चेति निरोधक्षणए
व निरोधस्य लक्षणपरिणामं दर्शयित्वा व्युत्थानस्यापि दर्शयति तथा व्युत्थानमिति सर्वे पूर्व
वत् विशेषस्तु वर्त्तमानतां हित्वा तीततां प्राप्त इति तृतीयोध्वेति चरणं व्युत्थानकालेपि व्युत्था
ननिरोधयोर्लक्षणपरिणामो क्रमेण दर्शयति एवं पुनर्व्युत्थानमुपसंपद्यमानमिति उपसंप

धमानं ज्ञायमानं तच्चामत्तं यंतरं स्मृतीतव्यक्तेरनुमानादस्य वक्ष्यमाणत्वात् अस्मत्सर्वं पूर्वव
त् एवं पुनर्निरोध इति अत्र एवमित्यनेन तथाव्युत्थानमित्यादिवाक्योक्तनिरोधस्यात
तीताध्वप्रक्षिप्तान्निर्दिष्टाः अतो न निरोधातीतावस्थाव्युत्थानाभावरूपत्वेनेति इदं च व्युत्था
ननिरोधपरिणामवत् क्रमस्यापवर्गपर्यंतत्वे चेति संक्षेपेणाह एवं पुनर्व्युत्थानमिति व्युत्थाना
दिरित्यर्थः चित्तधर्मस्य लक्षणपरिणामं प्रदर्श्य तत्र लक्षणस्यावस्थापरिणामं तस्य प्रशांतवा
हितासंस्कारादिति सूत्रे व्याख्यातं दर्शयति तथावस्थापरिणाम इति उच्यत इति शेषः
संस्कारयोर्बलवत्त्वदुर्बलत्वे च घटस्य नवपुराणतादिवत् वृद्धिह्रासौ उत्पत्तिविनाशरूपत्वे
लक्षणपरिणामादभेदानुपपत्तेः लक्षणस्यैव नवपुराणत्वादिनाऽवस्थापरिणाम इति वक्ष्य
माणाच्च ननु द्रव्यस्येव वृद्धिह्रासौ दृष्टौ न गुणस्येति चेन्न रूपादीनामपि वृद्धिह्रासानुभवा
त् रूपभेदकल्पने च गौरवात् तदेव रूपमिदानीं प्रवृद्धमिति प्रत्यभिज्ञानुपपत्तेश्चेति तस्मा
त्संस्कारस्यादृष्टादेश्चास्ति अवस्थापरिणामः ज्ञानेच्छादिषु चोत्पत्तिविनाशानुभवात् क्षण
द्वयमात्रस्थायित्वेपि द्वितीयक्षणे वर्तमानलक्षणस्यावस्थापरिणामो भवति क्षणात्वेनि १३९
वपरिणामहेतुत्वात् अन्यथा सर्वेषां वस्तूनां प्रतिक्षणपरिणामस्य वक्ष्यमाणस्यानुपपत्तेः एते

न उत्तरवृत्तिविभुविशेषगुणस्येव ज्ञानादिनाशकत्वेनैकाग्रतादशायामपि ज्ञानस्य द्वि
क्षणस्थायित्वान्नावस्थापरिणामसंभव इत्यप्राप्तं तदेव परिणामत्रयं व्याख्याय तेषामा
धारमवस्थामाह तत्र धर्मिण इत्यादिना लक्षणानामप्यवस्थाभिरिति यद्यपि अवस्था
नामपि बाल्यादीनां लक्षणपरिणामोऽस्ति तथापि पर्योक्तक्रमेण न काप्यनुपपत्तिः ननु वर्त्त
मानलक्षणस्य नवपुराणाद्यवस्थापरिणामोऽस्तु अनागतातीतलक्षणयोस्तु कीदृशो
ऽवस्थाभेदः स्यादिति उच्यते शीघ्रभविष्यत्ताविलंबभविष्यत्तादिरूपोऽवस्थाविशेषस्तयोर
पि लक्षणयोरनुमीयते सत्त्वादिवदेव गुणत्वेन प्रतिक्षणपरिणामित्वसिद्धेरिति पर्योक्तै
स्त्रिपरिणामैः सर्ववस्तूनां परिणाममतिदिशन् वैराग्याग्निप्रज्वालनार्थं तेषां प्रतिक्ष
णपरिणामित्वं प्रदर्शयति एवं धर्मलक्षणेति तदुक्तं मनादौ घोरेऽस्मिन् द्रुतसंसारे नित्यं
ज्ञानतथातिभिः कदलीस्तंभति: सारे संसारे सारमार्गणं यः करोति स संमूढो जह्याद् बुद्बुद
संसारेति स्पंदस्य निर्भ इति गुणवृत्तं गुणानां सत्त्वादीनां व्यापारः स्वकार्ये धर्मादिपरिणामैः
क्षणमपि अस्पंदेनावतिष्ठते प्रतिक्षणं परिणमत इत्यर्थः ननु प्रतिक्षणं चांचल्ये प्र
माणं किमित्याकांक्षायामाह गुणस्वाभाव्यं त्विति शांतोहि गुणानामुपकरणानां महदादीनां

मृत्पादीनांस्वाम्यर्थंप्रतिक्षणमेनव्यापारोदृश्यतेऽतोगुणस्वभाववृत्तेवपुरुषगुणानाम
पिसत्वादीनांप्रतिक्षणप्रवृत्तौप्रमाणमुक्तंपूर्वाचार्यैरित्यर्थः गुणत्वंचपरस्पैवभोगाप
वर्गहेतुत्वमिति चित्तदृष्टांतेपरिणामत्रयंव्याख्यायदार्ष्टांतिकेपितदाख्यातमारभतेए
तेनेति धर्मधर्मिभेदादितिधर्मधर्मिभेदमाश्रित्येत्यर्थः तत्रपृथिव्यादीनांधर्मि
णांघटादिर्धर्मपरिणामः घटादीनांधर्माणांचवर्तमानातीततेलक्षणपरिणामः वर्तमा
नादिलक्षणानांचनूतनपुराणमपिवाल्यपौवनादिरवस्थापरिणामइतिः ननुकथंत्रयो
पिपरिणामाःस्युर्द्वयेरूच्यंते तेषुधर्मिषुधर्ममात्रपरिणामादिति तत्राहपरमा
र्थतस्त्वितिएकएवपरिणामत्रयोपिधर्मिपरिणामएवयतोधर्मिस्वरूपएवधर्मो
तोधर्मिपरिणामएवैषलक्षणादिपरिणामोधर्मादेरित्यवांतरभेदविभक्तइत्य
र्थः इदानींप्रतिक्षणपरिणामेक्षणिकतादिप्रसंगमपाकर्तुंपरिणामत्रयंक्रमेणप
रीक्षणीयं तत्रादौधर्मपरिणामः परीक्ष्यते तत्रधर्मस्येत्यादिना तत्रतेषुपरिणामेषुम
ध्येधर्मिणिसतएवधर्मस्यातीताद्यवस्थधर्मिणोभावान्यथात्वंधर्मान्यथात्वमेवभ १३०
वतिनद्रव्यान्यथात्वंस्वरूपान्यथात्वेहिप्रतिक्षणंपरिणामेनक्षणिकतापत्त्याप्रत्यभि

ज्ञाद्यनुपपत्तिरितिभावः सुवर्णस्यभावान्यथात्वंभाजनादिरूपधर्मोपापेक्षरुचकादिधर्मा
भिव्यक्तिरितिप्रत्यभिज्ञावलेनचसुवर्णसामान्यस्यसर्वविकारानुगतस्यसिद्धिः ननुसामा
न्यंचावयविरूपोधर्मीतिवैशेषिकाःस्कसुवर्णस्यान्यथात्वेऽवयवसंयोगनाशात्पू
र्वसुवर्णोत्पत्तिः नैषत्वेवप्रत्यभिज्ञातज्जातिविषयेति तत्रएवंसतिप्रतिक्षणमवयवोप
चयापचयाभ्यामवयवसंयोगविभागस्यावश्यकत्वेनशरीराद्यखिलवस्तूनांक्षणिक
तामत्तेर्लक्षणप्यपरिहार्यत्वात् ज्ञात्येवसर्वत्रप्रत्यभिज्ञोपपत्तौप्रत्यभिज्ञयाघटादिस्थै
र्यसिद्धिरितिस्वसिद्धांतविरोधापत्तेश्च तस्मादवयवसंयोगनाशोनद्रव्यनाशहेतुः किंतु
वस्त्रादौतणारणिमणयादिवदव्यवस्थितमेवफलवलात्कारणंकल्पनीयंत्रयवाविज्ञा
तोयोऽवयवविभागविशेषइति स्वरूपान्यथात्ववादिबौद्धधर्मपरिणामेप्रोक्तंदूष
णंनिराकर्तुंसूत्रापपत्तिश्च परस्मादृतिधर्मोधर्मेभ्योतिरिक्तोनभवतिअन्यंतमित्त्वइत्य
र्थः अन्वहेतुः परिवर्तत्वाननतिक्रमात् परिवर्तत्वस्यधर्मिणोऽनतिक्रमापत्तेः कौटस्थ्यापत्तेरि
तिपावत्रएतदेवविवृणोतिपूर्वापरेतिधर्मोयद्यन्वयीधर्मेषुस्यात्तर्हिपूर्वापरस्ववस्थावस्था
भेदेषुअननुगतनयान्यतीताद्यवस्थापामपिसत्वप्रसंगात् कौटस्थ्येनैवतिष्ठेतविवृतिशक्ति

वत् नित्यत्वकूटस्थत्वयोरेकार्थत्वात् तच्च न वाच्यमित्यर्थः परिहरति अपमदोष
इति एकांतेनेति एकांतनित्यत्वानभ्युपगमादित्यर्थः एकांतेन सर्वथा स्वरूपतो धर्मत
श्चानित्यत्वमेव कौटस्थ्यमस्माभिरभ्युपेयते तच्च चिति एकैरेव न तु धर्मरूपेणानित्य
स्य धर्मिण इत्यर्थः विकारस्यापि तत्प्रकृतेर्नित्यत्वं तौ तानागतावस्थाप्रत्यत्वमिति स्वरूप
तो धर्मतश्चानित्यानित्योभयरूपत्वं प्रपंचस्य प्रतिपादयति तदेतदिति तदेतत्त्रैलोक्यं
कार्यकारणात्मकं चतुर्विंशतितत्वानि सकार्याणीति यावत् यथायोग्यं धर्मरूपेण स्व
तश्च व्यक्तेर्वर्तमानावस्थातोऽपैति नित्यत्वप्रतिषेधात् नैवेह किंचनाग्र आसीत् असद्
वा इदमग्र आसीदित्यादिश्रुतिभिर्व्यक्ताव्यक्तात्मिकात्तस्मिन् प्रकृतिः संप्रलीयत इत्या
दिस्मृतिभिर्यत्सावयवं तदनित्यं घटादिवत् इत्याद्यनुमानैश्चेत्यर्थः नन्वेवमसंतोच्छे
दश्चास्तु तत्राह अपेतमिति अपेतं अतीतमपि प्रकृत्यादिधर्मिरूपेणातीतरूपेण चा
तिविनाशप्रतिषेधात् अत्यंतोच्छेदप्रतिषेधात् तद्धि कस्मात् सदेवेदमग्र आसी
त् इत्यत्यंतोच्छेदमाशंक्य कथमसतः सज्जायेतेति सत्त्वेव सोम्येदमग्र आसीदिति श्रुत्यानत्प्र १४१
तिषेधादित्यर्थः विनाशित्वे सत्यनादिभावत्वानुपपत्तेरिति यद्यपि सत्त्वेव निष्पन्नोऽस

छ्वार्थः परमात्मैव तदैक्षतेत्युत्तरवाक्यात् तथापि सदेकीभावे नेदमासीदिति वचनादस्य
प्रपंचस्यापि प्रलयेसत्वं सिद्धमेव एवं तद्धेदं तर्ह्यव्याकृतमासीत् तमसैवेदमावृतमासीत् तम आसी
दिदं तमोभूतमप्रज्ञातमलक्षणमित्यादिश्रुतिस्मृतयोऽप्यत्यंतोच्छेदनिषेधिका उदाहार्याः
युक्तिश्च असदुत्पादे शशशृंगाद्युत्पत्तिप्रसंगबंधमोक्षाद्यनुपपत्त्यादिरूपा व्याख्याननुस
पेतमपि वेदस्ति कथं नोपलभ्यते तत्राह संसर्गाच्चेति अस्य विकारजातस्य स्वस्वकारणेषु प्रकृत्या
दिषु संसर्गादविभागात्वात् कार्यस्य सौक्ष्म्यमव्यक्ततातस्माद्यास्यानुपलब्धेः स्थूलतापत्तौ
विकसोक्ष्यात् कारप्रतिबंधकत्वादित्यर्थः तदेवं कार्यकारणाभेदेन प्रकृत्यादीनां सर्वेषां परि
णामिनां प्रकारभेदेन नित्यानित्योभयरूपत्वमवस्थापनात्तेषां सदसद्रूपत्वं सिद्धमिति तं सद
सत्त्वमाति बाधाबाधाभ्यामिति सांख्यसूत्रानुसारेण इदमेव वज्जरगतोभावहारिकं सत्त्वं पुरा
णादिषु गीयते यच्च तैः सत्तासत्तं प्रधानमिति भाष्यकारैः प्रागुक्तं तत्पारमार्थिकसत्त्वासत्त्वाभि
प्रायेणैव तस्माभिलत्नैव व्याख्यातं एतेनानैवसन्नसन्न सदसदिति श्रुतिस्मृतिवादा अप्य
विरुद्धाः एकांतनित्यस्यैव पारमार्थिकसत्तात्वात् तच्च कूटस्थानित्यस्यैवास्मि असत्तासंपर्कर
हित्यात् ननु व्यवहारसत्तां प्रकृत्यादीनामिति इत्थमेव वन्नासद्रूपा न सद्रूपा माया नैवोभयात्मि

कासदसद्भ्यामनिर्वाच्यामिथ्याभूतासनातनीत्यादिवाक्यान्यपिसंगच्छंतेतथेतराधुनि
कवेदांतिब्रुवाणामनिर्वचनीयतावादेपितेहिमायाख्यजगत्कारणस्यापिविनाशोत्तंत
तुच्छत्वमेववापरमार्थेतरत्वमितितन्मतेचसनातनत्ववचनविरोधइतिदिक् धर्मपरिणा
मंपरीक्ष्यलक्षणपरिणामःपरीक्ष्यतेलक्षणपरिणामइति अध्वसुवर्त्तमानइतिधर्माणां
नित्यत्वमुक्तंनित्यत्वंविनाअतीतानागतलक्षणयोगासंभवात् अत्रएकैकलक्षणाभिव्यक्ति
कालेपिधर्मोलक्षणांतराभ्यांसूक्ष्माभ्यांवियुक्तोनभवतीतिसमुदायार्थःतथाचधर्माख
लक्षणान्यपिनित्यान्येवेतिनात्यंतासदुत्पत्तिसदसंतोच्छेदयोःप्रसंगइतिभावःनन्वेकलक्ष
णाभिव्यक्तिकालेलक्षणांतरयोरनुपलंभादभावएवयुक्तइत्याशंकायांतदुपलब्धिमात्र
मानिकांदर्शयति यथेतितरोषास्तुविरक्तइति रागस्यभावित्वेसतिविरक्तव्यवहारादर्शनात्
तथाचएकविषयकरागाभिव्यक्तिकालेपिविषयांतरगस्यासत्त्वमभावोनास्तिअतोरागस्य
एवलक्षणाभिव्यक्तिकालेन्ययोःसत्तासिद्धस्तुमानादित्यर्थःलक्षणपरिणामेपरोक्त
दूषणमुद्भावयतिअत्रेतिसर्वस्यानागतादेर्वर्त्तमानादिसर्वलक्षणयोगादनागतादिकमपि
वर्त्तमानंस्यादित्यध्वनांसंकरःप्रसक्तःक्रमिकत्वेचासदुत्पादप्रसंगइतिशेषः अतोवर्त्तमान १४२

मात्रलक्षणकंसर्वेपूर्वोत्तरकालयोस्तुःक्रमिकत्वेचासदुत्पादप्रसंगात्प्रतियोगित्वादेवचातीत
त्वादिव्यवहारइति तत्रादौधर्मेषुलक्षणत्रयसंबंधमेवव्यवस्थापयतिधर्माणामि
तिधर्माणांतावत् धर्मत्वंप्राक्साधितत्वात् नसाधनीयंसिद्धेचधर्मत्वेधर्माणांलक्ष
णभेदोलक्षणबहुत्वमपियुक्तंनपुनरर्द्धवैनाशिकोक्तंवर्त्तमानमात्रमेकलक्षणंयतो
नवर्त्तमानसमयमात्रेस्यधर्मस्यधर्मत्वंकिंत्वतीतादिसमयेपीतिशेषः अत्रहेतुमाहए
वंहीतियस्मात् एवंवर्त्तमानकालएवधर्मत्वेसतिसर्वमेवचित्तंनरागधर्मकंविरक्तमितिया
वत्विरक्तव्यवहारयोग्यंस्यात् क्रोधकालेरागस्यासमुदाचारात् अनाविर्भावादित्यर्थःअ
यंभावःयथायदाकदाचिद्रागसत्त्वेनभवन्मतेचित्तंरक्तमितिव्यवहारःतथायदाकदाचिद्रागा
भावेनचित्तेविरक्तमित्यपिव्यवहारःस्यादितिअतोतीतादिकालेपिरागादेश्चित्तादिधर्मता
द्धर्माणांत्रिलक्षणकत्वंसिद्धंयच्चैतैरुच्यतेअभावप्रतियोगितामात्रेणातीतादिव्यवहारइ
तितदपिहेयं असतिघटेध्वंसप्रतियोगित्वादिरूपस्यातीतत्वस्याप्यनुपपत्तेःसंयोगित्वादि
वत्प्रतियोगित्वादेरपिसंबंधिद्वयसत्त्वंविनानुपपत्तेःसदसतोःसंबंधादर्शनात् ध्वंसप्राग
भावयोरसिद्धेश्चघटोवर्त्तमानइतिवत्घटोतीतोभविष्यन्नितिप्रत्ययाभ्यांघटावस्थावि

शेषयोरेवसिद्धेः अन्यथाऽभावाभावस्याप्यतिरिक्तत्वादिप्रसंगइत्याद्यन्यदोषाः स्वयम्
ऊहनीयाइति तदेवंधर्माणांलक्षणत्रयंव्यवस्थाप्येदानींतत्सांकर्यंपरिहरतिकिंचेतित्रया
णामनागतादिलक्षणानामेकदैकस्मिन्क्षणेनिसंभवोभिव्यक्तिर्नास्तिकिंतुस्वाभिव्यंजकंदंड
चक्रादिवस्त्वंतरंननुस्यंवस्यएवंभूतस्यलक्षणस्यक्रमेणभावोभिव्यक्तिर्भवेदितिनाभिव्यक्तौ
सांकर्यमित्यपास्तमेवेत्यर्थः अव्यक्तयोर्लक्षणयोर्व्यक्तेनलक्षणेनसहनास्तिविरोधइत्यत्रपं
चशिखवाक्यंप्रमाणयतिउक्तंचेतिधर्माधनैश्वर्यादयोऽन्योन्यविरुद्धाश्चित्तस्यरूपातिशयास्तथाज्ञाना
द्यास्तथाःशांतघोरमूढाः चित्तपरिणामास्तेषामतिशयोऽभिव्यक्तिरूपोत्कटत्वमितिइदंचवा
क्यंगुणवृद्धविरोधाद्दुःखमेवसर्वमितिसूत्रेव्याख्याते उपसंहरतितस्मादिति असंकरेदृ
ष्टांतमाह यथेतिरागस्यैवेतिधर्माणांलक्षणत्रयसंबंधेउदाहृतस्यरागस्यैवेत्यर्थः क्वचिद्वि
षयेऽन्यत्रविषयांतरेऽभावःसामान्याभावइत्यर्थः दार्ष्टांतिकमाह तथालक्षणस्येतिकिं
चित्समुदाचारइत्यादिरर्थः अयंचलक्षणपरिणामोनधर्मिणः किंतुधर्माणामेवेत्येवंध
र्मपरिणामाद्विशेषमाहनधर्मीतिनन्वयंलक्षणपरिणामोलक्षणेऽस्तिनवाआद्येऽनवस्था १४३
अंत्येलक्षणपरिणामेपरिणामलक्षणासंभवः पूर्वलक्षणातीततायोलक्षणांतराभिव्य

क्तेरेवलक्षणपरिणामत्वादिति मैवंबीजांकुरवत्प्रामाणिकत्वेनास्याअनवस्थायाअदोषत्वा
त् अन्यथाधर्मस्यधर्मस्तस्यापिधर्मस्तस्यापिधर्मइत्याद्यनवस्थापातात्अपिदोषत्वापत्त्या
धर्मधर्मिभावादिरपिनसिध्येतेति अधिकंतन्निर्वितर्केतिसूत्रेप्रोक्तं तदेवंसर्वेषांधर्माणांसदै
वलक्षणत्रयसंबंधोऽस्ति अभिव्यक्तिस्तुत्रयाणांक्रमिकेतिसिद्धं स्यादेतत् लक्षणाभिव्यक्ते
रपिनित्यत्वात् कथंक्रमिकत्वंतत्क्रमिकत्वसंभवेवाकिमपराद्धंलक्षणक्रमिकत्वेन अथो
च्यतेनित्यानित्योभयरूपत्वस्योक्ततयानित्यत्वेपिसर्वकार्येष्वनित्यरूपेणक्रमःसंभवति
लक्षणानामपिक्रमश्चैव्यतएवलक्षणाभिव्यक्तिक्रमस्तुलक्षणासांकर्यायप्रकृतेप्रदर्शि
तोऽधिकस्तुनिर्विकल्पसमापत्तिसूत्रेऽस्माभिःप्रोक्तइतिदिक् लक्षणपरिणामंपरीक्ष्यावस्था
परिणामंपरीक्षितुंधर्मगतंविभागमाहतेलक्षिताइति लक्षिताव्यक्तावर्तमानाइतियाव
त् अलक्षिताअव्यक्ताअतीतानागताइतियावत् तांतांबाल्ययौवनवार्द्धक्याद्यवस्थांप्रा
प्नुवंतोऽन्योन्यत्वेनभेदेनोच्यंतेबालोयुवावृद्धइत्यादिरूपेणसचनिर्देशोऽवस्थांतरतोऽ
न्याभेदादेवनतद्रूपभेदादित्यर्थः तथाचपूर्वावस्थापायेनावस्थांतरप्राप्तिःसिद्धासै
वचावस्थापरिणामइतिभावः यद्यपितादृशोऽवस्थापरिणामोऽनागतातीतलक्षणयो

रपि पूर्वस्तन्नः तथापि वर्त्तमानलक्षणस्यैवावस्थापरिणामस्फुटमुपलभ्यत इत्याशयेन वर्त्त
मानलक्षणमालंब्यैवमुदाहृत इति धर्मिण एकत्वेपि निमित्तभेदेनान्यथाव्यवहारे दृष्टान्त
माह यथैकेति यथा एकत्वव्यंजिका रेखा स्थानविशेषो यदा बिंदुद्वयोपरि तिष्ठति तदा शत
मिदं नैकमिति व्यवह्रियते तयोरेकबिंदुलोपे च शेषो यदा बिंदूपरि तिष्ठति तदा दश
देनं शतमिति व्यवह्रियते अवशिष्टबिंदुस्थाने चैकत्वव्यंजकरेखान्तरस्थाने सति एकादशे
दं न शतमित्यर्थः दृष्टान्तान्तरमाह यथा चेति उच्यत इति पुत्रपितृभ्रातृभिर्भेदेन मातृत्वादिनि
मित्तभेदेनेति शेषः अवस्थापरिणामेपि बौद्धोक्तं दूषणमाहरति अवस्थेति अवस्था
परिणामाभ्युपगमे धर्मधर्मिलक्षणावस्थानां चतुर्णामेव कौटस्थ्यापत्तिरित्यर्थः तत्र हेतुं
पश्यति कथमिति उत्तरं अध्वनो व्यापारेण व्यवहितत्वादिति व्यापारनिमित्तेनैव सर्ववस्तु
घनागताध्वनामस्यो संव्यवहितत्वाभ्युपगमात् विभागाभ्युपगमात् न तु भावरूपेण
धर्मलक्षणयोः सदा सत्त्वस्येष्टत्वादित्यर्थः अध्वना विभागस्य व्यापारनिमित्तकत्वं विव
णोति यदा धर्म इत्यादिना तदानागतातीतत्वं तेन धर्मेण व्यापारभावाभाववाचीन करोति न १४४
करिष्यतीत्यर्थः आद्यन्तावध्वनोर्विभागस्य व्यापारनिमित्तकत्वं व्यापाराभावनिमित्तकत्वेन

परंपरयेति भावः एवं च सति पूर्वधर्मोतीतानागतयोर्धर्मान्तराभिव्यक्तिरित्येवंरूपपरिणामल
क्षणानित्यत्वमवस्थानामपि भवन्निर्वक्तव्यं न तु विनाशः अवस्थानां च नित्यत्वे किमप्य
नित्यं न स्यादित्येवं धर्मधर्म्यादिकं सर्वं जगत् कूटस्थं स्यादिति परैर्दोष उक्त इति उपहारः नित्य
त्वमात्रं तु कौटस्थ्यं किं त्वेकान्तनित्यत्वमित्याशयेन पूर्वं यदुक्तं दोषं परिहरन्ति नासौ दोष इति कौ
टस्थ्यदोषो नास्तीत्यर्थः गुणिनित्यत्वेपीति धर्मिनित्यत्वेपि धर्माणां विमर्दस्य विनाशस्य दृष्ट
त्वाद्वैचित्र्यात् वैलक्षण्यादित्यर्थः अपरिणामिनित्येनैव कौटस्थ्येन तत्स्वरूपातिरिक्तेनास्तीति
भावः गुणिनित्यत्वे विनाशो नाविनाशिनां शब्दादितन्मात्रविमर्दमुदाहरति यथेति यथेति
तद्रूपं नेति किं तदाहरणे संस्थानामिति कार्ये विनाशेनाविनाशिनां शब्दादितन्मात्राणां
पंचभूतरूपे संस्थाने धर्ममात्रमादिमत् इत्यतो विनाशीत्यर्थः एवमित्याद्यप्येवं व्या
ख्येयं लिंगं महत्तत्त्वं एवं महदहंकारादयो धर्मादयश्च विनाशेनाविनाशिनां कारणानां ध
र्ममात्राणि विनाशिनः इति बोध्यं तदेतदुक्तं वाचारंभणं विकारो नामधेयं मृत्तिके
त्येव सत्यमिति सविकारापेक्षया स्थिरमित्यर्थः तस्मिन्निति तस्मिन् धर्मे विकारसंज्ञा
परिणामसंज्ञेत्यर्थः अतो धर्मिणां परिणामित्वान्न कौटस्थ्यं सदा तु धर्मलक्षणावस्थाना

मितिभावः परिणामत्रयं विस्तरेण परीक्षितं तदिदानीं भूतेन्द्रियेषु परिणामत्रयं क्रमेण प्र
दर्शयति तत्रेदमुदाहरणमिति धर्मेत इति धर्मेण परिणामत इत्यर्थः धर्मपरिणाम
स्य स्वरूपं दर्शयति घटाकारादुत्तीति स परिणामो घटाकार इत्यर्थः नवपुराणतामितिन
वीनतानन्तरं पुराणतां प्राप्नुवन्तीत्यर्थः धर्मादीनां सर्वेषामेवावस्थात्वाविशेषेपि गो
बलीवर्दन्यायेनैवैषां तांत्रिको भेद[...]र्दृश इत्याह धर्मिणोपीति लक्षणस्य च पुराणत्वा
दिकमवस्थेति प्रायत्वादेवमोक्तएकरावेति अवस्थामात्रत्वेत्यर्थः एवमोऽप्यालक्षण
योरपि धर्मत्वाद्धर्मपरिणामोपि गोबलीवर्दन्यायेनैव बोध्यः एवपदार्थान्तरेष्वपीति
भूतान्तरेष्विन्द्रियेषु प्रकृत्यादिषु चेत्यर्थः अपरं विशेषं परिणामेषु पूर्वोक्तं स्मारयति तत्र
त इति त्रयोपि परिणामा धर्मिस्वरूपमनतिक्रान्ताः धर्मिण्येवानुगता अतो धर्मधर्म
ति दात धर्मिपरिणाम एवात्मनेकमेवेति सामान्यतो भवन्ति धर्मी लएव च सर्वोऽपि परिणा
मशब्दार्थे प्रश्नपूर्वकं व्याचष्टे अथ कोयं परिणाम इति उत्तरं अवस्थितस्येति संस्कारेपि
परिणामस्योक्तत्वात् द्रव्यस्येति धर्मिण इत्यर्थः धर्मशब्दश्चाभिनमात्रवचनः निवृत्तु १४५
त्पत्ती अतीतानागतवर्तमानतेन व धर्मोतिरिक्तो धर्मानानुभूयते यस्य धर्मादिः परिणामः सा

दिति योद्धांशंकायां धर्माद्विविक्तधर्मी सूत्रकारेण प्रतिपादयिष्यते तत्सूत्रं तत्रेति ग्रपि
व्यापठति तं त्रेति तत्र तेषु परिणामेषु त्रेषां परिणामानामिति यावत् धर्मीति सूत्रेणाह
शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी अतीतवर्तमानानागतधर्मेष्वनुपातीव
र्तमानरूपेणानुगतो धर्मीत्यर्थः अत्राव्यपदेश्यानविशेषणं धर्मधर्मिणोर्विवेकप्रद
र्शनाय तथा च वर्तमानत्वावर्तमानत्ववैधर्म्येण धर्मिणो धर्मस्य च विवेक इति भावः
धर्मशब्दार्थमाचष्टे योग्यतेति दग्धशक्तेरपि संग्रहाय योग्यतावच्छिन्नेत्युक्तं वर्तमानतास्व
रूपयोग्यतेत्यर्थः तेनातीतादिसाधारण्यलाभ एवकारो वर्तमानादिविशेषव्यवच्छेदा
र्थः शक्तित्वं चानागतत्वे तथाचायतदाह शक्तिवद्धर्मोऽपि धर्मिणो यावद्द्रव्यभाविनः
नहि शक्तिवियोगः शक्तिमतोऽस्ति शक्तिशक्तिमतोरभेदादिति भावः धर्मशब्दार्थमुक्त्वा त
स्य शान्तादित्वोपपादनाय तान् भिन्नशक्तिदशायामपि सत्तां साधयति स चेति स च धर्मः शक्ति
रूपः फलप्रसवात् तद्दानुमितान्यक्तावस्थक इत्यर्थः अकस्मिकत्वे हि मृद्येव घटः तंतुष्वेव
पट इत्यादिर्भेदः फलस्य प्रसवेन स्यात् अतोऽनादित्वे वक्तव्ये अनादित्वाच्चानन्तत्वमिति
भावः एकानेकत्ववैधर्म्येणापि धर्मधर्मिविवेकमाहरणकस्येति स च धर्म एकस्य धर्मिणो

ऽनेकोपि द्रव्य इत्यर्थः सूत्रतात्पर्यविषयं धर्माद्धर्मिणो विवेकमुपपादयितुमादौ धर्माणा
मेवान्योन्यं विवेकं प्रतिपादयति तत्रेति तेषु धर्मेषु मध्ये वर्त्तमानो धर्मो धर्म्मान्तरेभ्योव
र्त्तमानातिरिक्तधर्मेभ्यः शान्ताव्यपदेश्यरूपेभ्यो भिद्यते विविच्यते वर्त्तमानत्वाद्वर्त्तमान
त्वविधर्म्मोदिति शेषः वर्त्तमान इत्यस्य विवरणं स्वव्यापारमनुभवन्तीति नन्वेवं किं धर्मा
णामन्योन्यमत्यन्तमेव भेदो नेत्याह यदा त्विति यदा तु शान्ताव्यपदेश्यावस्था
यां धर्मः सामान्येनाभिव्यक्तविशेषराहित्येन धर्मिणोऽनुगतो विलीनो भवति तदा धर्मि
स्वरूपमात्रतयान्ववस्थानात् धर्म्यविभागादिति यावत् कोऽसौ धर्मः केन व्यापारेणाभिधे
त्वयोगाभिर्विविच्येत धर्मस्य तत्त्वलक्षणस्य वानुपलंभात् अत एव तदानीमविभागलक्ष
णाभेदोऽपि भवतीत्यर्थः एतेन च भाष्यकृतान्त्याद्वैतमपि वेदान्तोक्तं व्याख्यातप्रायं प्रलये
सर्ववस्तूनां परमात्मन्यविभागात् यथाकाशे भ्रान्तानामिति तथा च श्रुतिः यथा सर्वासाम
पां समुद्र एकायनमित्यादिना समष्टिजीवस्य तत्त्वलयं प्रदर्श्य ज्ञानाद्वैतमाह यत्र हि द्वैतमि
व भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति इदानीं शा
न्तोदिताव्यपदेश्यशब्दार्थं व्याचष्टे तत्र त्रय इति तदिदं व्याख्यायतस्य पाठक्रमात्क्रममन्त्रमं १४६

परिहर्त्तुमाह तेष्वनागतस्येति एवं वक्ष्यमाणाव्यपदेश्येनापठक्रमो नादर्तव्य इत्याह वर्त्तमानस्या
नंतराः अतीता इति पाठक्रमः कथं त्वस्य तु इत्याशयेन पृच्छति किमर्थमिति उत्तरं पूर्वपश्चिमताया
अभावादिति पूर्वपश्चिमद्वारादित्यर्थः तदेव निवर्णोति यथेति नैवमतीतस्येति वर्त्तमानो नस्यादि
ति शेषः तथा चानागतावस्थायाः प्रागभावस्थानीयायां वर्त्तमानावस्थायां हेतुत्वादतीताव
स्थानंतरं वर्त्तमावानावस्थान भवतीत्यर्थः उदिताव्यपदेश्यरूपपाठक्रमे त्वग्रेपीदमेव बीज
मिति भावः उपसंहरति तस्मादिति समनंतरः पश्चिमो लक्षणभेद इति शेषः न तु ततोऽनावस्था
गत एव वर्त्तमानस्य समनंतरः पूर्वो भवतीत्यर्थः एतेन सत्कार्यवादेऽपि पूर्वाभिव्यक्तो घटादिर्न
पुनरुत्पद्यत इति सिद्धान्तः स्मर्त्तव्यः ननु अनागतवर्त्तमानयोः कार्यकारणभाव एव किं प्रमाण
मिति चेत् अन्यथा उत्पद्यमानस्य पुनर्वर्त्तमानता स्यात् तर्हि निर्मोक्षः स्यात् विनष्टानां कारणविधा
कर्मादीनां पुनरुत्थेन मुक्तस्यापि संसारोदयसंभवात् किं च यद्यतीतोपि घटः पुनर्वर्त्तमानः
स्यात्तदा स एवायमिति यदा चित्तस्याभिज्ञायेत अतो योग्यानुपलब्ध्यातीतव्युत्पन्नत्वमनुत्पन्नं
निर्णीयते इति अत्रानागतातीतावस्थयोः प्रागभावध्वंसरूपयोः कार्योत्पादकानुत्पादकत्ववै
धर्म्यवचनात् अभिव्यक्तावस्थाया एवावान्तरभेदावनागतातीतौ ते परस्परविलक्षणे इति मंतव्यं

नन्वेवमतीतस्य पुनरनुत्पादात् अतीतसत्त्वकल्पनाव्यर्थेति चेत् न लोकानतीतादृशेस्वदेह
इत्यादिनाव्यपदेशात् सिद्धयोगिप्रत्यक्षान्यथाऽनुपपत्त्या तत्सिद्धेः विषयतत्संनिकर्षयोः प्रत्यक्षहेतु
त्वात् नचातीतार्थस्य स्मरणमेवास्त्विति वाच्यं पूर्वाननुभूतस्यापि योगिना दर्शनात् येतु योगज
धर्मस्यापि संनिकर्षत्वमिच्छंति तेषामप्यसत्यर्थे संनिकर्षानुपपत्तिः अप्रत्यक्षंप्रति संनिकर्ष
नानात्वेनाननुगमेन हेतुताग्रहानुपपत्तिश्च ज्ञानादेर्विषयतादिरूपोपि संबंधोऽसति न संभव
ति सतोरेव संबंधदर्शनात् इति प्रत्यक्षे विषयसंयोगादिरेव प्रत्यासत्तिः योगजधर्मेण वा धर्मेतम
आदिप्रतिबंधमात्रं क्रियत इति दिक् शांतोदितौ व्याख्यायाव्यपदेश्यं व्याख्यातुं पृच्छति अथा
व्यपदेश्याः क इति ये व्यापारं करिष्यंति ते व्यपदेश्या इति वक्तुं न शक्यंते अकरिष्यमाणव्यापार
कस्यापि केषांचिदनागतलक्षणस्य वस्तुनः स्वीकारादित्यतः प्रकारांतरेणाव्यपदेश्यं लक्षयति स
र्वं सर्वात्मकमिति सर्वात्मकं सर्वशक्तिकं तथा च सर्वेषु परिणामिन्यवस्थिताः सर्वविकारजन
नशक्तय एवाव्यपदेश्या इत्यर्थः ननु वर्तमानातीतावस्थयोरनुभवस्मरणे प्रमाणे अतः शक्त्या
ख्यायां त्वनागतावस्थायां किं प्रमाणमित्याकांक्षायामाह यत्रोक्तमिति अभिव्यक्तिरितीत्यतेनान्व १४७
यः यत्र सर्वं सर्वशक्तिमदित्यत्रार्थे पूर्वाचार्यैरिदं वक्ष्यमाणं प्रमाणमुक्तमित्यर्थः तच्छदोऽप्रत्य

क्षस्थितेः शक्तिमनुमापयति जलभूम्योरिति स्थावरेषु रसादिभिः मधुराम्लसुरभ्यसुरभिमृदुक
ठिनाचादिभिर्यदनंतरूपत्वं तज्जलपृथिव्योः परिणामनिमित्तकमित्यन्वयव्यतिरेकाभ्यां प्र
त्यक्षतो दृष्टं अतो जलभूमी स्थावराणि केस्थावरशक्तिमत्यौ इति भावः शक्तिं विनापि कार्य
करणेऽतिप्रसंगात् तथा जंगमेषु यद्वैश्वरूप्यं स्थावराणां परिणामनिमित्तकं दृष्टं मनुष्यादी
नां धान्यादिस्थावरकार्याणां धान्यादिविशेषे रूपादिविशेषदर्शनात् तथा स्थावराणां यद्वैश्व
रूप्यं तज्जंगमानां परिणामनिमित्तकं दृष्टं गोमयदुग्धादिभिर्धान्यवस्यकादीनां स्थावराणां
विचित्ररूपरसादिदर्शनादित्यर्थः एवमादिदृष्टांतैः सर्वेषु वस्तुषु सर्वविकारजननशक्तिः
सिद्धेत्याह इत्येवमिति यथा जलादिस्थावराद्यात्मकं एवमन्यदपि सर्वं विकारात्मकं तच्छ
क्तिमत् ननु अतीतकार्ये शक्तिमत्त्वं नास्ति भाविवस्तुनामित्यत उक्तं जात्यनुच्छेदेनेति यद्यपि
अतीतकार्यं व्यक्त्यपउच्छिन्नास्तथापि तज्जातीयस्य सर्वस्यानुच्छेदादित्यर्थः तथा च सर्वात्मक
त्वं सर्वजातीयशक्तिमत्त्वमेवात्र विवक्षितमिति भावः एतेनान्यत्रव्यस्य परिणामव्यक्तेर्नाम
न्यत्राभावेपि न नियमभंगः तज्जातीयव्यक्त्यंतरजननशक्तिमत्त्वसंभवादिति तदेतदुक्तं विष्णु
पुराणे यथा वपादपो मूलस्कंधशाखादिसंयुतः आदिबीजात्प्रभवति बीजान्यन्यानि वै ततः सं

भवंति ततस्तेभ्यो भवंत्यन्ये परे तु मातापितृलक्षणाद्द्रव्यकारणानुगतामनेशतत्वमख्यातरूना
त्सर्वज्ञायंते महदादयः संभवंति तेभ्यस्तेभ्यश्चाखिलजंतव इति यदि च सर्वत्र सर्वस
जातीयवस्तुजननशक्तिरेस्वीक्रियते तदा कथमेकस्मादेव चतुर्मुखशरीरादखिलं देवदा
नवनरपश्वादिसमुद्भवः कथं वाऽगस्त्यजाठराग्नेः समुद्रशोषणं कथं वान्नस्तविद्वुरुद्रपा
र्वती शरीरादिषु विश्वरूपदर्शनं योगिनां च स्वशरीरमनसोरनंतानि भूतय उपपद्येर
न् किं बहुनाऽपदेसंति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो
मयि सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ईक्षते योगयुक्तात्मा सर्वत्र समदर्शन
इत्यादिवाक्यैः सर्वप्राणिशरीरे सर्वजातीयवस्तूत्पादनशक्तिरूपतां विना ज्ञस्येनो
पपद्येत आर्जुनादिति भूशक्तिरूपेणावस्थितं भाविभाश्चवथादिकमेवकुत्सादि शरी
रे कालात्मके दिव्यचक्षुषा द्रष्टं योगिभिरतीतानागतमपि वेति एतेन सर्वं सर्वं भवतीत
स्मात्सर्वमभवदिति वेदस्त्वविदः सर्वभावरूपाश्चतस्रासिद्धिरूपपादितात थाज्ञी वोपाधा
वपि यान्महैश्वर्यशक्तिमत्वाज्जीवानामीश्वरत्वंप्रतिपादकश्रुतिस्मृतय उपपन्नाः तथा त १४८
एते सत्याः कामा अनृतापिधाना इति श्रुतिरपीति मंतव्यं नन्वेवं सर्वत्र सर्वजातीयशक्तं

यौकारैः कथमेकदाननाविकारोत्पत्तिः कथं वा शिलाशकलादपि नांकुरोत्पत्तिरस्मदादिशरी
रान्नु नर्मखादिवत् संकल्पमात्रेण नाखिलप्राण्युत्पत्तिरित्याशंकां परिहरति देशकालेति
देशो भूर्लोकादिः कालः कलियुगादिः आकारः संस्थानं अवयवसंयोगविशेषः निमित्तम
धर्मादिस्तैरपबंधात् प्रतिबंधात् एकदा कारणेषु न विरुद्धानामात्मभूतशक्तीनामभिव्य
क्तिर्वर्तमानलक्षणपरिणामरूपत्वे सहकारिविरहादित्यर्थः इत्यपि कश्चित् तस्यापि प्रति
बंधनिमित्तकविलंबे पर्यवसानं निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिक
वत् इत्यागमिसूत्रे सर्वेषां निमित्तकारणानां स्वतंत्राप्याः प्रकृतेः परिणामेषु प्रतिबंधनिव
र्तकतामात्रावगमादिति अतः शिलाशकलान्नांकुरोत्पत्तिरवयवसंयोगविशेषस्यांकुरोत्प
त्तिप्रतिबंधकत्वात् अस्मदादिशरीरान्नाखिलप्राण्युत्पत्तिरधर्मप्रतिबंधात् ब्रह्मांडा
दिशक्तिमतश्च यदेवाब्रह्माण्डाद्युत्पादनं विनैव प्रायशो नाशदर्शनात्सशक्तिः समस्य घट
पटादिनाशहेतुतश्चेति आधारनाशात् कदाचिन्न हि शरीरादीनां सर्पादिभाववत् परमे
श्वरादिसंकल्पतो घटादीनामपि प्रकृत्यापूरवशात् अन्यवर्षिणाखिलपरिणामो भवत्ये
व तथा चोक्तं लौकिकैरपि विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छयेति एतेन तथाहा

तेन पुरुषार्थसमाप्त्या चित्तस्यात्यंतिकलयकाले नागतदुःखमपि शक्तिरूपचित्ते न सदेव
नश्यतीत्यतो हेयं दुःखमनागतमिति सूत्रोक्तमनागतदुःखस्य हेयत्वमुपपन्नं एवं च सति
विकाराणां कविलक्षणाद्वयमपि भवति अनागतातीततारूपमिति वक्ष्यमाणं अन्यथानाग
तदुःखस्य हेयत्वानुपपत्तेः परेषामनागतदुःखस्य हानं हि सिद्धत्वान्न पुरुषार्थः अस्मिंश्चा
नागतदुःखमभावितया न घटतेति पदार्थान्व्याख्याय समग्रसूत्रार्थमाह य एतेष्वित्य
नुपाती सर्वधर्मानुपाती स्थिर इत्यर्थः तथा चाभिव्यक्तानभिव्यक्तत्वैर्धर्म्येण धर्मधर्मिणो
र्विवेक इति सूत्रतात्पर्यार्थः तदेवमन्योन्यवैधर्म्याद्धर्मेभ्योऽतिरिक्ततया धर्मी प्रसाधितः
इदानीं तदनभ्युपगमे भाष्यकारो बाधकमप्याह यस्य त्विति धर्ममात्रमित्यनेनैव क्षणि
कत्वमप्यायातमनेकक्षणस्यापि चेहि क्षणसंबंधरूपधर्मवत्त्वमेव पदार्थमात्रस्यस्या
दिति धर्ममात्रमित्यस्य विवरणं यमिति निर्द्देमिकमित्यर्थः धर्मिनिराकरणादाभ्यापि क्षणि
कविज्ञानमित्यायातं तथा च प्रथमपादोक्तमेव दूषणमाह तस्य भोगाभाव इति शेषं सुग
मं नन्वस्तु धर्मी धर्मातिरिक्तः तथाप्येकस्य धर्मिणः एक एव परिणामोऽस्तु न त्वेकस्य नानापरि १४९
णामांगीकारे सहकारिभेदकल्पनागौरवादित्याशंक्यापाद्यैकस्य धर्मिणः परिणामभेदं साध

यति एकस्य धर्मिणश्चागामिसूत्रव्याख्यमाणपरिणामत्रयसिद्धये क्रमान्यत्वं परिणामान्यत्वे
हेतुः एकस्य धर्मिणः परिणामनानात्वे क्रियाभेदो हेतुर्लिंगमित्यर्थः आशंकापूर्वकसूत्रं व्या
चष्टे एकस्येति भवतीति सिद्धांत इति शेषः हेतुत्वं प्रतिपादयितुमादौ धर्मपरिणामविषये
धर्मिणः क्रमं दर्शयति चूर्णेति एवमत्र धर्मं चूर्णमनुतिष्ठति ततः पिंडमस्वतित नश्यध
र्मादिति घटोत्पत्तौ मृद्धर्मिणः क्रमं प्रतिपाद्य घटलयेऽपि मृदः क्रममाह कपालमृत्कणमदि
ति चशब्देनान्यपरिणामिविषयेऽपि क्रमः समझीयते सर्वत्र मद्धवो मृद्धर्मिण एकत्वप्रतिपा
दनार्थः एकस्य सामान्यात्मकस्य मृद्धर्मिणोऽनंगीकारे मृदित्यनुगतप्रत्ययो न स्यादिति भावः
ननु धर्माणामेव क्रमः पौर्वापर्यात्मा संभवति न तु धर्मिण इत्याशंकायां प्रकृते क्रमं लक्षय
ति यो यस्येति यस्य धर्मिणो धर्मांतरस्य समनंतरो यो धर्मः स एव तस्य धर्मिणः क्रम इत्यर्थः
तथा च मृद्देवैव चूर्णमृत्त्वापत्त्या पिंडो भवतीत्येकः क्रमः पश्चाद्घट इत्यादिप्रकारेण मृद्धर्मि
ण एव क्रमवत्त्वमिति भावः धर्माणां क्रमस्यैवात्र विवक्षितत्वे तु तेषां क्रमनानात्वेऽप्येक
स्य धर्मिणः परिणामबहुत्वं न सिद्ध्यतीति भाष्यकाराशयः परिणामत्रयेऽपि क्रममुदाहरति
पिंडः प्रच्यवत इत्यादिना नातीतस्यास्ति क्रम इति लक्षणात लक्षणांतरप्राप्तिरूपः क्रमो नाती

तस्येत्यर्थः धर्मपरिणामस्यावस्थापरिणामे प्रतिक्षणं क्रमो न प्रत्यक्षीक्रियत इति तमनुसाध
यति घटस्याभिनवस्येति प्रांत इति शेषः साचेति साच पुराणता क्षणपरंपरानुपातिना प्रति
क्षणभिन्नेन स्वरूपसता क्रमसमन्वितेन वाभिव्यज्यमाना मवंतोचरमावस्थायां स्फुटप्रत्यक्षगो
चरतामेतीत्यर्थः पुराणताभिव्यक्तिहेतु तया प्रतिक्षणमवस्थापरिणामोनुमीयत इति शेषः
प्रतिक्षणपरिणामतापत्तिं व्यतिनदाह धर्मलक्षणाभ्यामिति विशिष्टोतिशयितः धर्मल
क्षणपरिणामयोः प्रतिक्षणमनुत्पादात् अवस्थापरिणामस्य च प्रतिक्षणमुत्पादादित्य
र्थः तथा चोक्तं मनुना घोरेस्मिन्भूतसंसारे नित्यं सततयायिनीति स्मृत्यंतरेषु च नित्यदा ह्यंग
भूतानि भवंति न भवंति च कालेनालक्ष्यवेगेन सूक्ष्मत्वान्न दृश्यत इत्यादि च पुराणे चानए
वचनविधः प्रलयः उक्तः नित्यो नैमित्तिकश्चैव प्राकृतात्यंतिकौ तथेति नित्यः प्रतिक्षणं ज्ञा
यमानः एतेन स्वप्नमायादिदृष्टांतान्यपि प्रपंचस्य क्षणभंगुरत्वेनैव श्रुतिस्मृतिष्वभिप्रेता
इति सूत्रतात्पर्यमाह तत्र तद् इति प्रतिलब्धस्वरूपाः प्राप्तसंभवा इतरथा तनेत्यर्थः ननु धर्मि
णोपि घटादेः कपालादिधर्मत्वात् कथं धर्मधर्मिणोर्भेद इति तत्राह धर्मोपीति तथा च यो
यस्य धर्मः स तस्माद्भिन्न इत्येव नियम इत्यर्थः नन्वेवं धर्मधर्मलक्षणानां परिणामभेदेक १५०

धर्मैकस्या एव प्रकृतेः सर्वे परिणामा इति भूयते इत्येषा प्रकृतिः सर्वा व्यक्ताव्यक्तस्वरूपिणी
त्यादिस्मृतिषु तत्राह यदा त्विति यदा तु परमार्थधर्मिणि प्रधानेऽभेदोपचारेण निमित्तेन स
र्वोपि धर्मः स एवाभिधीयते तदायं क्रमः एकत्वेन एकत्वेनैव प्रतीयत इत्यर्थः परमार्थ
धर्मित्वं च साक्षात्परंपरया सर्वविकारान्वयित्वं तच्च प्रधानस्यैवास्तीत्यन्ये त्वपारमार्थिका
धर्मिणश्चापेक्षिकत्वात्पयापरिणामिनां सत्यत्वं यथा वा नत्र मीमांसायां जीवानामा
त्मत्वमपारमार्थिकं तयोरपि शरीरांगदेहाद्यपेक्षिकत्वादिति भावः अत्र प्रधानस्यैव पा
रमार्थिकधर्मित्वं वदद्भिर्भाष्यकारैः परमात्मन एवातिरतिशयसत्तो नापेक्षिकात्मनश्चपार
मार्थिकसत्त्वं पारमार्थिकात्मत्वं च श्रुतिस्मृतिसिद्धमनुमतत्वाय साम्यादिति ध्येयं । तथाऽ
भेदोपचारवचनात् धर्मधर्मिणोर्भेद एव पारमार्थिकः अविभागमात्रेणाभेद इत्यभ्युक्तमि
ति तदित्थं सूत्रगणेन प्रपंचः प्रकृतिपरिणाम इति सिद्धांतितं तत्र चारंभवादिभिः सहास्माकं
धर्मधर्म्यभेदसत्कार्ययोरेव विरोधो न तु प्रपंचस्याचेतनस्य सूक्ष्मद्रव्योपादानकत्वेपि तैरभेद
प्रत्यपत्तियामकस्याविभागलक्षणस्वरूपस्यानंगीकारात् प्रागभावध्वंसयोरंगीकाराच्च ये
तु प्रपंचस्य त्वसविवर्ततावादिनस्तैः सह च नास्माकं विरोधलेशोपि विवर्त्तते मायापरिणामस्य

प्रपंचस्य परमात्मन्यतात्त्विकतापाद्यास्माभिरपीष्टत्वात् इंद्रो मायाभिः पुरुरूप ईयते बहुरूप
इवाभाति मायया बहुरूपा रमणीयोगुणो यस्यामस्माहमिति विधते इत्यादिश्रुतिस्मृतिषु
मायाविकारस्यैव परमात्मन्यध्यारोपावगमात् युक्तो बुद्धिपरिणामरजतारोपवत् बध्यत इ
ति अंशतः इत्यर्थः यदि वस्त्ववयवानामपि विवर्त्तत्वं प्रपंचस्य कश्चिद्वदेत् तदपि परमार्थाभिप्रा
येणोऽप्यतरावास्माभिः मायापेक्षया तत् कार्याणामनित्यत्वेन तामपेक्ष्य मिथ्यात्वात् वाचा
रंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादि श्रौतदृष्टांतैरेवमेवसिद्धेदिति तदेवं
चित्तपरिणामप्रसंगेन सर्ववस्तूनां भूतेंद्रियशब्दोपलक्षितानां त्रिविधः परिणामः सूत्रका
रेण प्रतिपादितः तत्र सूत्रकारैश्चित्तस्य निरोधव्युत्थानसंस्काररूपावेव परिणामौ प्रतिपा
दितौ न सर्वे इति न्यूनतातस्याः परिहाराय चित्तपरिणामात्मकान् चित्तधर्मान् शेषतः प्रकर
णसमाप्त्यवसरे दर्शयति चित्तस्य द्वय इति परिदृष्टापरिदृष्टाः प्रत्यक्षाऽप्रत्यक्षाः प्रत्ययात्म
का इति प्रत्ययो वृत्तिपरिणामविशेषो यः साक्षिणि प्रतिबिंबाधानक्षमः स च ज्ञानेच्छाकृति
सुखदुःखादिमान् प्रदीपशिखावद्रूपः परिणामविशेषः तदात्मकाः तद्रूपा इत्यर्थः व
स्तुमात्रेति परमाणु तद्रूपादिवत् प्रतिबिंबाधानाक्षमतया साक्षिण्यभासमाना इत्यर्थः १५३

तेचअपरिदृष्टाः अनुमानेनेति अनुमानेन साधिता वस्तुमात्रतया सत्ता येषां संप्रत्तानामित्यर्थः स
प्तदर्शयति निरोधेति निरोधो वृत्तिनिरोधः स संस्कारजनकत्वेन निवृत्तिपत्नवस्त्वावरूपोऽनुमीय
त इति प्रागेवोक्तं धर्मश्चादृष्टसामान्यसंभोगवैचित्र्यादनुमीयते संस्कारश्च स्मृतिहेतुतयानुमीयते
परिणामश्चित्तस्योपचयापचयादिर्वृत्त्युत्कर्षापकर्षादिभिरनुमीयते प्रतियातच्छांदोग्येस्य चंक्रम
मयं हि सोम्य मन इत्यत्र जीवनं प्राणनादिरूपप्रयत्नादिहेतुरविशेषः स सुप्तावपि श्वासप्रश्वा
साभ्यामनुमीयते चेष्टा चित्तस्य संचारः स च ज्ञानत्वप्रसंगयत्नादिहेतुभ्यां चित्तस्य चक्षुरादिदे
शसंयोगवियोगाभ्यामनुमीयते यद्यपि चित्तस्य विभुत्वं तथापि नाड्यास्वात्मयुपरमेनोपच
यापचयवच्छेत्त्रस्येवौपाधिकी क्रियाप्यस्तीति भावः शक्तिश्चनादिसामर्थ्यं तत्तत्कार्येणानु
मीयते यद्यपि कार्ययुक्तं न शक्तिः सर्वपरिणामिधर्मत्वमैयेव भवति तथापि चित्तस्याखिलधर्मप्र
संगेन चित्तगतत्वेनोक्ता पादसमाप्तिपर्यंतानि संयमसिद्धिसूत्राणि अवतारयति अत इति योगिन
इति ज्ञानसाधनानि योगांगानि विस्तरेण व्याख्यातानि योगकालीनावस्थाश्च चित्तस्य परिणा
मरूपा योगनिष्पत्त्याद्यवधारणापदर्शिताः अतः परं बुभुक्षितानां योगिभिर्जिज्ञासितानाम
मर्थानां साक्षात्कारार्थमादिसाधनसंपन्नस्य योगिनः संयमविषयमुपक्षिप्यतऽपन्न

स्यांतेऽभ्यंतरसंयमाद्यथासिद्धिर्भवतितत्सर्वंविशिष्यप्रदर्श्यतेपादसमाप्तिपर्यंतमित्यर्थः
अत्रबुभुत्सितार्थप्रतिपन्नप्रतिवचनात् तत्रादौभूतिकामैरेवैतेसंयमाःकर्तव्याःकेवलमु
मुक्षुभिस्तुसत्त्वपुरुषान्यतामात्रसंयमःकर्तव्यःपरवैराग्यायेतिसूचितं एताश्चविभूतयः
संयमसिद्धिसूचिकाश्चापिज्ञेयाःपरिणामत्रयसंयमादतीतानागतज्ञानं अस्य धर्मिणोऽत्र
यंधर्मपरिणामस्तस्यचायंलक्षणपरिणामःलक्षणस्यचायंनवपुराणावस्थापरिणामइ
त्येवमनुक्षणंयत्रवृत्तविदर्थेसंयमात्तत्साक्षात्कारेसतितदितरार्थानामपिधर्मादिपरिणा
मेष्वतीतानागतज्ञानंसंकल्पमात्रेणप्रणिधानलेशादेवभवतीत्यर्थः त्रयमविषयकसं
यमात् प्रतिनियतपदार्थांतरसाक्षात्कारश्चयोगजधर्मबलाद्भवतीतिशास्त्रप्रामाण्या
दवधार्यतेधर्मविशेषात्स्वर्गविशेषवत् तपोजन्यसिद्धिवत् भुवनज्ञानंसूर्येसंयमादिति
वक्ष्यमाणसिद्धिवच्च कश्चित्तुसमानविषयत्वानुरोधात्संयमविषययोरेवातीतानागतयोः
साक्षात्कारोभवतीत्यर्थइत्याह तन्न तदाहितत्संयमात्तज्ज्ञानमित्येवसामान्यतः सूत्रंयुज्येत सं
यमस्यस्वविषयगोचरसाक्षात्कारजनकत्वनियमात् अपिचपरिणामत्रयसाक्षात्क्रियमाणे १५२
तेष्वतीतानागतज्ञानंसंपादयतीतिभाष्येयोजनद्वयमपिस्यादिति भाष्येतेष्विति धर्मलक्ष

णावस्थापरिणामेषुसर्ववस्तुसाधारणेष्वित्यर्थः शेषंसुगमं संयमांतरस्यसिद्धिंतरमाह शब्दा
र्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानं गौरित्यादिः श
ब्दो गौरित्यादिरर्थो गौरित्यादिःप्रत्ययः तेषांवक्ष्यमाणसंकेतरूपादध्यासात्संकरोविवेका
ग्रहणंभवतिवस्तुतस्तुतेषांभेदोस्तिअतस्तेषांप्रविभागेभेदेसंयमात्साक्षात्कृतेसति
सर्वभूतानांरुताभिज्ञायंतेअयंकाकादिरिममर्थमेवंप्रतीत्यनेनशब्देनकथयतीत्येवमि
त्यद्यपिसाक्षात्कृतेसतीतिसूत्रेनास्तितथापिसंस्कारसाक्षात्करणादित्युत्तरसूत्रेणसा
क्षात्कारपर्यंतस्यैवसंयमस्यसिद्धिकथनात्सर्वत्रसूत्रेसंयमस्यसाक्षात्कारद्वारकत्वंमा
क्षेप्यं अतएवभाष्यकारोप्यनेकसूत्रेषुदर्शनार्थंसाक्षात्कारपर्यंततांसंयमस्याख्या
स्यतित्रिविधैरेवशब्दैरर्थप्रत्यययोस्तेषांशब्दानामन्योन्येवसंकरंदर्शयितुंशब्दानामेवा
दौत्रैविध्यंदर्शयतिभाष्यकारः तत्रवागितितत्रशब्दमध्येवागिंद्रियंवर्णेष्वेवप्रयोजनव
त् शब्देषुमध्येवागिंद्रियजन्यःशब्दोवर्णएवनतुभेर्यादिशब्दोनापिवाचकपदमित्यर्थः
ऽभ्यन्तरादिकृत्यधमानःशब्दोवर्णः अत्रोच्यानातिवर्णोत्तरांतरःकरःविरःसत्यातिष्ठाम्बलेच
दंतानासिकोष्ठौचतालुचेतिस्मरणात् वागिंद्रियस्यचशरीराद्बहिर्वृत्तिर्नास्तिअतोनश्रोत्रग्रा

स्ववक्ष्यमाणः शब्दो नापि तदनन्तरं श्रोत्रबुद्धिग्राह्यो वाचकः शब्दो वागिन्द्रियकार्यः श्रोत्रश्रो
त्रदेशवर्त्ति वागिन्द्रियासंबन्धेन श्रोत्रग्राह्यशब्दोत्पादकत्वासंभवादिति वागिन्द्रियकार्यः श्रो
त्रश्रोत्रदेशवर्त्तिस्वात्मस्वरूपं तदनन्तरमाह श्रोत्रं चेति ध्वनिर्नाम वागिन्द्रियसंयोगादिप्रभिहत
स्योदानवायोः परिणामभेदः येन परिणामेनोदानवायुर्वक्त्रदेहादुत्थाय शब्दव्यञ्जनाय
न् श्रोत्रं श्रोत्रं प्राप्नोति तस्य ध्वनेः परिणामभूतं वर्णो वर्णसाधारणं नादाख्यं शब्दसामा
न्यमेव श्रोत्रस्य विषयः न तद्धर्म्यपरिणामभूतं वाचकं पदमित्यर्थः स च शब्दो वर्णजातीय
त्वेन वर्ण इत्युच्यते तृतीयं शब्दमाह पदस्यानन्तरानुसंहारबुद्धिनिर्ग्राह्यमिति यथा मनीति
सिद्धान्तादाख्यानगकारादिवर्णोत्पत्ति प्रत्येकं गृहीत्वानुपश्चाद्या बुद्धिः संहरति एकत्वमापादय
ति गौरित्येकं पदमिति तया बुद्ध्या निर्ग्राह्यं वर्णेभ्योऽतिरिक्तमखण्डं एकदेवोत्पद्यमानं वक्ष्यमा
णस्फोटाख्यमिति शेषः तथा चायं तृतीयः शब्दोऽन्तःकरणस्यैव ग्राह्य इत्यर्थः तस्य हि पदस्य श्रो
त्रग्राह्यत्वेऽनुसंहारबुद्धेरन्तःकरणनिष्ठाया वैयधिकरण्ये न हेतुत्वं स्यात् तद्व्यापुत्तं सामाना
धिकरण्यस्य प्रत्यासत्त्यापातलाघवात् न चानुसंहारबुद्धिरपि श्रोत्रादेरेवास्त्विति वाच्यं अ
संभवात् वर्णानां स्थैर्ये कोपादानमानुपूर्व्यम् साचानुपूर्वी गकारोत्तरौकारादिरूपिणी नाने १५३

कवर्णोपदेशु श्रोत्रेण गृहीतुं शक्यते न्यायमविनाशित्वपा वर्णानां मिलनाभावात् एवंप
वेवर्णसंस्काराणां तत् स्मृतानां चान्तःकरणनिष्ठानोऽन्तःकारणसहकारित्वमेवोचितं अ
तः स्मृतानां वर्णानां मनसैवानुपूर्वी गृहीतुं शक्यत इति भावः ननु स्फोटाख्यः शब्दः कीदृश
ः किं कारणकः किं प्रमाणक इति अत्रोच्यते यथा बीजाङ्कुरादयो नैकावस्थाः वृक्षधर्मा क्रमिक
भ्यस्ताभ्योऽतिरिक्ताः पल्लवादिरूपशाखावस्थायामुपपत्तेऽस्यमानत्व वृक्ष एव न वृक्षान्तरमेवं
रूपेण स च बीजादिभ्यो भिन्नः भेदाभेदयोरनभवात् तथैव गकारौकारएवनैकावस्थो गौ
रित्याद्यखण्डः स्फोटशब्दः क्रमिकाभ्यो गकारादवस्थाभ्योऽतिरिक्तः आनुपूर्वीविशेषविशि
ष्टया विसर्जनीयादिरूपचरमावस्थायामुपपत्ते इदं गौरिति पदं न तु गौ इत्यादिरूपेणान
तः स्फोटपदं गकारादिवर्णेभ्यो भिन्नाभिन्नभेदाभेदयोरनभवात् स च पदाख्यः शब्दोऽर्थस्य
प्रत्यायकत्वात्स्फोट इत्युच्यते स्फोटशब्दस्य च कारणं शाकप्रयत्नजन्यो ध्वनिविशेषः प्रयत्नभेदेनो
च्चारणोपवधाने सत्येकपदव्यवहाराभावात् गौरित्येकं पदमिति प्रत्यय एव स्फोटे प्रमाणं
वर्णानामनेकत्वेन तैरेकत्वव्यवहारस्यास्येनापपत्तेः तथा प्रत्येकवर्णोदयन्यमान
स्यार्थप्रत्ययस्य हेतुत्वं च स्फोटे प्रमाणं पदि चानुपूर्वीविशिष्टसमूहस्यैकत्वादेकत्वव्यवहारः

तेनैव रूपेणार्थप्रत्ययहेतुत्वं च स्वीक्रियते तर्हि संयोगविशेषावच्छिन्नावयवसमूहादेवैव
कलशव्यवहारजलाद्याहरणयोरुपपत्त्या घटाद्यवयविमात्रोच्छेदप्रसंगः युक्तिसाम्यात् नन्वे
वं युक्तिसाम्याद्वाक्यमपि स्फोटरूपं नैवकं स्यादिति चेत् बाधकाभावेस्तीष्टत्वादितिदिक् भा
ष्यकारस्तु संक्षेपतो वर्णानां पदत्वं निराकरोति वर्ण एकैति अनेकवर्णैरेकसमयस्थित्यन
र्हत्वात् परस्परं तिरस्कृत्यानोऽसंबद्धस्वभावाः अतस्ते पदमसंस्पृश्य पदत्वमप्राप्य
अंतरावोर्थमनुपस्थाप्याविर्भूयैव क्षणान्तिरोभूता इतिकृत्वा प्रत्येकमपदस्वरूपावि
वेकिभिस्त्वं तदर्थः अत्र स्वरूपग्रहणाद्वस्यावस्थापयतोरभेदेन वर्णानां पदत्वेन निरा
कृतं ननु यदि वर्णाः पदस्वरूपा न भवंति तर्हि कथमियंतो वर्णाः क्रमविशेषावच्छिन्ना अस्या
र्थस्य वाचका इति लोकैः संकेत्यंते इत्याशंकां परिहरति वर्णः पुनरित्यादिना संकेत्यन्त इति प
र्यंतेन कत्वाव्येतः अयमर्थः यद्यपि वर्णाः पदात् भिन्नास्तथापि अवस्थावस्थितोरभेदस्या
पि सत्वादेकैकोपि वर्णः पदात्मा पदाभिन्नो भवति बीजांकुरादिरिव वृक्षाभिन्नः अतएव पद
रूपेण सर्वे पदाद्योऽभिधानायोग्यता संपन्ना अत्र हेतुमाह सहकारीति पदभावे सहकारिणि
यानि वर्णांतराणि तत्प्रतियोगित्वात् तत्संबंधित्वादनंतपदरूपताभिवापन्नो भवति इव शब्दोत्र १५४

वैश्वरूप्ययोग्यतामात्रप्रतिपादनार्थः वैश्वरूप्यप्रकारमाह पूर्वो गकारः उत्तरेणौरितिवर्णद्व
येन गण इत्यादिपदात् व्यावर्त्यते उत्तरश्च विलतेनीय: पूर्वेण गौरिति वर्णद्वयेन गौर इत्यादि
पदेभ्यो व्यावर्त्यविशेषे गौरिति स्फोटपदे खंडे तादात्म्येनावस्थापितो भवतीत्यत्र हेतोरेवं रूपा
वहवो वर्णाः क्रमानुरोधिन आनुपूर्वीविशेषसापेक्षाः पदाभेदतोर्थसंकेतेनावच्छिन्ना नि
यमिताभूत्वा सर्वाभिधानसमर्था अपि इयंतरणात्वसंख्याकारान्तेगकारादयोगावमेवो
पस्थापयंति रत्यतस्तेन प्रकारेण वर्णसमुदायेन तत्पदमेवाविवेकतः संकेत्यत इत्यन्वयः तत्र
हेतुर्वा अस्य वाचकमिति पदमेव हि वाच्यस्य वाचकमुपस्थापकं अन्यस्याः स्वरूपेण संकेते
हेतुः एतेषामित्यादि निर्मोत्तरत्यंतं यः पदाख्यो बुद्धिमात्रग्राह्यः स्फोट एतेषां वर्णानामर्थ
र्थसंकेतेनावच्छिन्नानां तथा तस्मात्सोऽध्वनिजन्यः क्रमन्यानुपूर्वीविशेषोपेषां तादृशा
नामेकोऽभिन्न इति पदस्य स्वरूपाख्यानं समाप्तो वाक्यार्थः अयं भावः यथा संयुक्तकपाल
द्वयं जलाहरणहेतुः इत्यविवेकतो बालकेभ्य उपदिश्यते यत्रादिभ्यो घटस्याः वर्त्तकानए
संभवात् ततश्च बालकः कपालाविवेकेन घटस्यैव जलाहरणहेतुत्वं गृह्णाति एवमेव स्फो
टांतरस्यावर्त्तनाय वर्णाविवेकेनैव स्फोटे संकेतोपदेशः संकेतग्रहश्च भवतीति न वर्णेषु

केतत्तानुपपत्तिरिति।त्रिविधंशब्दंप्रदर्श्येदानींतेषांमध्यात्संकेतकारणंप्रतिपादयितुंतदे
कमितिप्रतीयमइत्यनेनान्वयः अयमर्थः यद्यपितत्पदंस्फोटरूपंएकमेवनतुवर्णवदने
करीकत्वप्रमाणंएकबुद्धिविषयमितितथावक्तुरेकेनैवप्रयत्नेनध्वन्यादिद्वारेत्यादितंवर्णरूप
प्रयत्नभेदेनाप्युत्पद्यंतेतथाप्यभागंनिरंशंवर्णमाहरूववनवत्सांशःतथाक्रमंराकंदेवोत्पद्य
मानंनतुवर्णवत्क्रमेणक्रमतराभिर्हेतुभिर्वर्णभिन्नंकिंचबौद्धंबुद्धिमात्रग्राह्यंतथांत्यवर्ण
स्यप्रत्ययरूपव्यापारेणाभिव्यक्तंवर्णास्तुनैवंतथापिपरप्रतिपिपादयिषयावक्तृभिरभिधी
यमानैःश्रोतृभिश्चश्रूयमाणैर्वर्णैरेवंरूपैःसिद्धवत्परमार्थवदस्यासंप्रतिपत्त्यासंवादे
नप्रतीयतेव्यवह्रियतेनतुवर्णेभ्योभिन्नरूपेणतत्रहेतुरनादिवाग्व्यवहारवासनावशीकृ
तयालौकिकबुद्ध्येतिश्रोत्राभिधीयमानैरित्यनेनवागिंद्रियविषयवर्णविवेकःपदस्येति
श्रूयमाणैरित्यनेनश्रोत्रविषयकशब्दाविवेकःपदस्येतिबोध्यम्तदेवंत्रिविधशब्दानाम
न्योन्याध्यासात्संकरोदर्शितःइदानींत्रिविधशब्देनार्थप्रत्यययोरध्यासंप्रतिपादयितुंए
व्यवहारस्यसंकेतग्रहमूलकत्वमाहतस्येतितस्यपदस्यप्रविभागोविषयव्यवस्थासंकेत
ग्रहादेवभवतिप्रविभागमेवाहएतावतामितिएतावतोवर्णानांएवंजातीयकएवमानुपूर्वी १५५

कोऽनुसंहारेणैकत्वमेतस्यार्थस्यवाचकउपस्थापकइत्येवंरूपोविभागइत्यर्थःएकस्यार्थ
स्येतिपादेऽर्थविशेषस्येत्यर्थःसंकेतशब्दार्थमाहसंकेतस्त्वितिअध्यासःसंकेतकर्तृकृता
रोपःआरोपितोभेदइतियावत्तस्यैवचज्ञानंपदार्थोपस्थापकंतत्राधुनिकनामादिक
स्यनाव्यावर्तनायस्मृत्यात्मकइतिविषयविषयिणोरभेदात्पाणिन्यादिस्मृतेरित्यर्थःनच
कल्पिताऽभेदस्यासतःकथंसंकेतत्वमितिवाच्यंअसतस्त्वान्यथाख्यात्यनभ्युपगमेनान्यत्रसतएवाऽ
भेदस्यान्यत्रकल्पनादितिअध्यासस्यसंकेतत्वेप्रमाणमाहयोयंशब्दइत्यादिनाभगवती
त्यंतेनतुओमित्येकाक्षरंब्रह्मेत्यादिःशालिषकंतुंबीवादिमानचेद्दत्यादिर्लौकेचपदपदा
र्थयोरभेदारोपेणैवसंकेतोदृश्यतइत्यर्थः ॐमित्यादिशब्दवाच्यत्वलक्षणापंप्रमाणाभा
वात्अन्तराबकोदोषःअपरनिर्ज्जरादेवाइत्यादिनाशब्दार्थयोरारोप्यमाणाभेदरावसंकेतो
दृश्यतइतिअन्तरावेतेनानाद्यभेदारोपेणागमिनोमंत्रार्थयोरभेदोवासनामुपदिशंतिमी
मांसकास्त्वमंत्रमयीदेवतामाहुःयामुन्नसमाच्छ्रवाद्यमयोबोद्धस्तीव्रस्थाविषयत्वेन
क्तिरितितन्त्रांतरेकल्पनालाऽपाणिकीलक्षणादिसाधारणीचअपिचेश्वरमजानतोपिशब्दा
दर्थप्रत्ययोरुत्पत्तेस्तथापदपदार्थयोरभेदेनसंकेतोपिनयुज्यतेत्यादिदोषोबोध्यःइदानीम

कः संकेतबुद्धिनिमित्तकः अयाणां संकर इत्याह एवमेतदिति एवं संकेतबुद्धेः कारणात् एतेनि
विधोः शब्दार्थप्रत्ययोश्च संकीर्णो अविविक्तो तत्र संकेतग्रहणवशात् शब्दार्थयोरितरेतराध्या
सः शब्दार्थयोः प्रत्ययेन सह ऐकाकारत्वादन्योन्याध्यासः प्रसिद्ध एवेति भावः संकरं केणाह
गोरिति पदवृत्तिसाम्यशब्दादीनां तत्त्वज्ञोनाम्य इत्यर्थः वर्णध्वनिपरिणामपदानामन्योन्यसं
करवदिदानीं पदवाक्ययोस्तदर्थयोश्च संकरेणापि शब्दार्थप्रत्ययानां संकरं दर्शयति स
र्वे पदेष्वस्ति वाक्यशक्तिः पादार्थान्तरसहकारेण वाक्यभवनशक्तिः तथा च वृक्ष इत्यादिपदा
नां वृक्षोऽस्ति वृक्षः फलति वृक्षश्छिद्यत इत्यादिवाक्यैः संकरोऽविवेक इति भावः पदेषु वा
क्यशक्तिमुदाहरति वृक्ष इत्युक्ते इति वृक्ष इत्युक्ते सत्याकांक्षापूरणार्थं योग्यतादिवशाद
स्तीति शब्दो गम्यते अध्याहृयत इत्यर्थः तथा च पदे वाक्यसंकर इति भावः ननु शब्दाध्या
हारो न संभवति एकस्मिन्नेवार्थे शब्दानामानन्त्यात् शब्दविशेषानुमापकलिंगाद्यनुप
स्थितेरिति चेत् न एवं स्थपात्वयं कुलिशेनेत्युक्ते नाप्याकांक्षापूरकशब्देन वक्तृतात्पर्यविषयार्थ
बोधसंभवात् अर्थविशेषानुमानेन योग्यताकांक्षातात्पर्यादिकमेव लिंगमस्ति एतदे १५६
वाह न सत्तामिति योग्यताप्रदर्शनेनाकांक्षातात्पर्यादयोऽप्युपलक्षिताः केवलयोग्यताया

अर्थान्तरसाधारण्यात् अर्थान्तरसाधारण्यादिति योग्यताप्रदर्शनेनाकांक्षातात्पर्यादयोऽप्युपल
क्षिताः केन उदाहरणान्तरमाह न यानहीति आक्षेपोऽनुमानं नन्वेवं कारकवाचकपदानां कुत्रापि
प्रयोगो न स्यादित्यत आह नियमार्थ इति योग्यतादिभिः सर्वत्रार्थविशेषानुमानं न संभवति
अतः कारकाणां सामान्यतोऽनुमितानामपि नियमोऽर्थः कारकान्तरव्यावृत्त्यर्थं चैत्रेऽग्निना भक्ते
नमित्यादिपदे चैत्राग्निभक्तेनानां कर्तृकरणकर्मणामनुवाद इत्यर्थः इदानीमध्याहारं विना
पि पदवाक्ययोः संकरमर्थाभेदे निमित्तं दर्शयति द्वधेक्षेति छेदो धीन इति वाक्यस्यार्थे श्रो
त्रिय इति पदस्य नञ्याप्राणान् धारयतीति वाक्यस्यार्थे जीवतीति पदस्य वचनमित्यर्थः ज
न्मना ब्राह्मणो ज्ञेयः संस्काराद्द्विज उच्यते विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते इति स्मृतेः
जीवबलप्राणधारणयोरित्युक्तत्वात् तथा सत्यनाङ्गीति ननु पदाद्वाक्यार्थप्रतिपत्तिः पदादपि भवतीति तर्हि
गुरुतरस्य छेदो धीन इति वाक्यस्य वचनं कदापि न स्यादित्याशंक्याह तत्र वाक्य इति अत एव
पदवाक्ययोः संकर्यात् संशयस्य स्थले पदं वाक्येन विवरणीयमिति प्रसंगादाह तत इति यतो वाक्या
र्थेऽपि पदं भवति अतः संदेहस्थले पदमंशभेदैः वाक्येन विवरणीयमित्यर्थः आकारेणान्य
योऽप्रत्ययाद्वाक्यव्यवहरणमेव अर्थस्यादित्याह अन्ययेति भवतीति प्रयुक्तो नामाख्यातयोः सा

रूप्यान्द्रवति घटो भवति भिक्षां देहीत्यर्थद्वयसंदेहेन व धारितं पदं कथं क्रियमयं ते क्रियायां
कारके वा व्याक्रियेत प्रयुज्येत श्रोतुरर्थप्रत्ययासंभवात् तदेवमश्व इति प्रयुक्ते श्वाल्मका
र्थो घोटको वेति संशयो नामाख्यातसारूप्यात् तथाऽजापय इति प्रयुक्ते छागपाः पयः वि
हत्यात्र रूपराभाविनवान्वेत्यर्थसंशयो नामाख्यातसारूप्यादित्यर्थः तदेवं शब्दार्थप्रत्यया
नां संकरं प्रदर्श्येदानीं प्रविभागं दर्शयति श्वेत तदित्यादिना प्रत्यय श्वेतं तत्क्रियासाध्यरू
पो यो यस्य स क्रियार्थः श्वितरति एकः तथा कारकः सिद्धरूपो योर्थो यस्य स कारकार्थः श्वेत इ
ति शब्दः एतौ शब्दौ भिन्नौ एतयोरर्थस्तु क्रियाकारकरूप एकरावश्वेतगुणमात्रः एवं प्रत्य
योपि क्रियाकारकात्मक गुणाकारत्वे प्रमाणं प्रत्युत्तरिकस्मादिति उत्तरं सोयमित्यभिसंबंधा
दिति श्वेतनं पाक्रियासोयं श्वेतरूपः कारको गुणो यश्च श्वेतनतइत्यस्मात् श्वेताकारप्रत्ययः
सोयं श्वेत इत्यस्मादपि श्वेताकारप्रत्यय इत्यभेदप्रत्यभिज्ञानादित्यर्थः कथं तत्स्थं भेदेन
शब्दार्थयोः संकेत इति तत्राह एकाकारएवेति एकाकारत्वारोपरूपः प्रत्यय एव संकेतस्तस्मारो
पिताभेदएवसंकेतो न तु पारमार्थिको भेदरूप इत्यर्थः ननु शब्दार्थयोरभेदप्रत्ययेन प्रत्य १५८
भिज्ञेव कथं न बाध्यते तत्राह यस्त्विति यस्तु श्वेतोर्थः शब्दप्रत्यययोर्विषयत्वात् स्वाभिः श

ब्दादिभ्यो वृत्ताभिरवस्थाभिर्न च परिणामादिभिर्विक्रियमाणश्चायं न शब्दप्रत्यययोः सहगतो
न कालतः सहचरो वैयधिकरण्यादित्यर्थः एवं देशतो न सहचरो यतः शब्दस्याकाशे प्रत्ययो
बुद्धावर्थस्तु श्वेतगुणादिः प्रासादादिष्विति भावः एवमिति एवं शब्दोपि स्वावस्थाभिः विक्रिय
माणो नापि तयोर्बुद्ध्योः सहचरः एवं प्रत्ययोपीत्यर्थः उपसंहरति इत्यन्यथेति सूत्रार्थमुप
संहरति एवं तत्प्रविभागेति एवमन्यविषये शब्दार्थप्रत्ययेषु प्रविभागसंयमात् साक्षा
त्कारपर्यन्तात् सर्वभूतानां रुतं तदर्थं तत्प्रत्ययं च योगी जानाति योगजधर्मस्याचिंत्यशक्ति
त्वात् धर्माणां स्वसदृशफलदानस्यौत्सर्गिकत्वाच्चेत्यर्थः अस्मदादीनां च शब्दार्थप्रत्ययभे
दसाक्षात्कारोस्त्यपि तस्य साक्षात्कारस्य संयमाजन्यत्वान्न सर्वभूतरुतज्ञानं भवति संय
मस्यैव हेतुत्वं सिद्धमिति एवमुत्तरसूत्रेष्वपि यथायथमिदमेव समाधानं संस्कारसाक्षात्कर
णात् पूर्वजातिज्ञानं संस्कारसंयमेनेति सूत्रस्यादौ पूरणीयं संयमसिद्धिप्रकारणत्वात् अत्र
ज्ञानसंस्कारवद्रागादिवासना धर्माधर्मौ च गृह्याविति आह द्वयइति अमी सूक्तौक्ताः स्मृति
ज्ञानविशेषः क्लेशो रागादिरेवमविद्याऽस्मितयोः स्मृतिमध्यप्रवेशात् न चाविद्यातत्त्वरा
गादिसंभवे तत्संस्कारे प्रमाणं नास्तीति वाच्यं अविद्यास्येपि कस्य विदग्ध एव प्रीतिर्नोदग्धे

कस्य विद्वेषपरीत्यमित्यत्र वासनां विना नियामकान्तराभावेन तत्सिद्धिः तेषां द्वैविध्यं तेनाप्रत्यक्षत्व
मनात्मधर्मत्वं चाह ते इति स्मृतिसंस्कारास्तावदुपचिताः परिणामादिजीवनान्तचित्तधर्मवत्प्रत्य
क्षिभाष्याः चित्तधर्मो नत्वात्मधर्मो इत्यर्थः एतेन धर्मोऽयं प्रलयेपि चित्तएव तिष्ठतीति तेन
चित्तबीजरूपेणानित्यमित्यात्तं संस्कारसाक्षात्कारकारणं यासंयमं व्याचष्टे तेषु संयमर
ति नन्वज्ञाते संस्कारे संयमो न घटते ज्ञाते च व्यर्थ इति चेन्न शब्दानुमानाभ्यां सामान्यतो ज्ञा
ते विशेषज्ञानफलकस्य संयमस्य संभवात् संस्कारसाक्षात्कारेऽज्ञायमाने पूर्वजन्मज्ञानं भ
वतीत्यत्र युक्तिमप्याह न चेत्यादिना साक्षात्करणमित्यंते तेन देशो जन्मनो भूमिर्नगरादिः का
लो युगादिर्निमित्तं मातापित्रादिः एतेषां संस्कारविषयतया तदनुभवं विना तात्पविषयी
कृत्य संस्काराणां साक्षात्कारेण संभवति स विषयक गुणग्रहणस्य विषयोपरागेणैव ज्ञाने
ष्वादिस्थले दृष्टत्वात् अतः संस्कारसाक्षात्कारे पूर्वजन्मनां देशकालनिमित्तादिस्वाशेषवि
शिष्टानामपि साक्षात्कारो भवति विषयविधयेत्यर्थः स्वार्थं एवं चाचष्टे तदित्यमिति नचैव
ले संस्कारसाक्षात्कारात् पूर्वजातिज्ञानमेव भवति अपितु भाविजन्मज्ञानमपीत्यतिसंबंधं
स्यति परत्रापीति भाविजन्मसंस्काराणामनागतावस्थानां साक्षात्कारादिति विशेषः संस्कार १५८

साक्षात्करणात्पूर्वादिजन्मान्यशेषविशेषैर्ज्ञायन्ते इत्यत्र प्रमाणतया जैगीषव्यावट्ययोः सं
वादमवतारयति अत्रेदमाख्यानमिति अत्र पूर्वजादिज्ञानविषये महासर्गेषु प्राकृतसर्गेषु
जन्मक्रमं बाल्ययौवनवार्द्धकादिरूपं तत्परिणामक्रमं च साक्षात्कुर्वतो जैगीषव्यस्य तारकं
सर्वविषयकमित्यागामिसूत्रलक्षणीयं विवेकजं ज्ञानमुदभूत् अथानंतरं तमाहवट्य
नामा योगी लिंगशरीरमात्रविहारी परीक्षार्थं तत्र धरणेर्निर्माणकायं धृत्वा पप्रच्छेत्यर्थः भव्य
त्वात्कुशलत्वादनभिभूतबुद्धिसत्त्वेनेत्यस्याधिकं किमुपलब्धमित्यनेनान्वयः पप्रच्छेति भव्य
त्वाख्यजीवनस्तत्पनेतरेन्द्राकाशादिगमनासंभवादिति संपश्यतादुपभुंजानेन देवतामनु
ष्येषु ज्ञायमानेनेत्यनेन वनकथ सुखमुपभुंजानेत्युपलक्षितं सुखदुःखयोर्मध्ये त्वया
किं बहुलमिति पृष्टः स दुःखबहुलत्वप्रतिपादनाय सर्वमेव दुःखमित्याह दशस्विति अनुभू
तं सुखमिति शेषः सुखस्यापि बहुदुःखत्वं गुणवृत्तिविरोधाद्वेत्यनेनोक्तं प्रधानवशित्वं स्व
रूपाप्रकृतितियोक्तत्वं तत्कार्यत्वात्तदपरोक्षपर्यं सुखं तथा संतोषसुखं संतोषोऽयं स्वाभा
विकं सुखं प्रधानवशित्वेन हि कामसमाप्ताविषये अलंप्रत्ययरूपं चेतस्त्वाख्यं संतोषमत्या
धवित्तस्य स्वाभाविकं सुखमभिव्यज्यत इति कैवल्यापेक्षायाः दुःखरूपपादयति बुद्धिसत्त्वस्येति

बुद्धिसत्वस्याप्यधर्मः संतोषाख्योऽन्यप्रत्ययः त्रिगुणः सत्वादिगुणत्रयवान् सत्वादित्रिगुण
बोऽन्यप्रत्ययो बुद्धिपरिणामो हेयपक्षे दुःखपक्षे समस्तो मधुविषसंपृक्तान्नवदित्यर्थः केवल
स्य च सुखत्वेऽस्मात्प्रतिकूलदुःखनिवृत्तिरूपमोक्षे सुखं दुःखसुखास्य प्रवृत्तिमोक्षणाल्लेपरि
भाषणात् निरुपाधिप्रियत्वस्य च सुखत्वाच्चेति यथा वान्तरे केवलस्य सुखशब्दो दुःखनिवृत्त्या
दिपरतया निर्णीतः एवं श्रुतिस्मृत्योरपि निर्णयः सर्वशास्त्रेष्वेकरूपव्यवहारो विस्मादिति न
त्वेवं रूपे संतोषसुखस्यानुत्तमत्वं श्रुतिस्मृत्युक्तमुपपद्येत तन्नाह दुःखरूपरतिदुःखसाधा
रणतया दुःखरूपस्य ज्ञानेऽस्यान्तर्वेधकरत्वहेतुरतः दृष्टादृष्टेश्वररूपो यः सम्प्रज्ञातारूढे ज्ञ
स्यापगमात्सत्वे चैवपि कुदुःखाकलुषितं त्वबाध्यमस्य यथा बुद्धिस्यापि सर्वे यामैवाद
कलंपि प्रियमिदं संतोषोऽस्यं प्रधानवशित्वमलकं सुखमुक्तशास्त्रेष्वित्यर्थः प्रत्ययस्य परचि
त्तज्ञानं व्याचष्टे प्रत्ययपरतिप्रत्ययस्य रागादिमत्याः स्वकीयचित्तवृत्तेः संयमेनाश्रयादिरू
पैरशेषविशेषैः साक्षात्करणात्ततस्तस्माच्चित्तात् परस्य भिन्नस्य चित्तान्तरस्याप्यशेषवि
शेषतो ज्ञानं संयमान्ते भवतीत्यर्थः ननु यथा संस्कारसाक्षात्कारे तद्विषयदेशादिक १५८
मपि साक्षात्क्रियते किमेवं चित्तान्तरसाक्षात्कारे तद्विषयोऽपि नियमेन साक्षात्क्रियते न वेति

जिज्ञासायामाह न च सालंबनमिति तत्परचित्तज्ञानं सालंबनं न नियमेन भवति तस्य पर
चित्तालंबनस्य संयमविषयेन स्वचित्तेनाविषयीकरणादित्यर्थः तत्प्रतिपादकं शास्त्रं भा
वाच्चेत्यपि बोध्यं न च सालंबनमित्युक्तं विवृणोति वक्तुमिति तस्येत्यादिहेतुं विवृणोति पर
चित्तस्येति उपसंहरति परप्रत्ययेति तस्मात्परप्रत्ययमात्रयोगी चित्तस्यालंबनीभूतेन तत्परचि
त्तस्यालंबनमपीति तदर्थार्थः कायरूपसंयमात् तद्ग्राह्यशक्तिस्तंभे चक्षुःप्रकाशासंप्रयो
गेऽन्तर्द्धानं कायस्येति स्वशरीरस्य रूपे संयमादशेषविशेषतः कारणादिभिः साक्षात्कृते तस
तिसंकस्य मात्रेण स्वकीयरूपस्य दृश्यताशक्तिं परचक्षुःसंयोगयोग्यतां प्रतिबध्नाति तत
श्च परचक्षुःप्रकाशेऽसत्क्रियसौ रत्नं योगः तदन्तर्द्धानमभ्युपघते योगिनः दिवान्धेनेव केनाप्यसौ
न दृश्यत इत्यर्थः सूत्राकारस्य न्यूनतां परिहरति एतेनेति एतेन रूपान्तर्द्धानेन शास्त्रान्तरसिद्धं
शब्दाद्यन्तर्द्धानमप्युपलक्षितं वेदितव्यमित्यर्थः यदा कायस्य शब्दस्पर्शरसगन्धसंयमात्तेषां
ग्राह्यशक्तिस्तंभो भवति तदा श्रोत्रादिसंनिकर्षप्रतिबंधाद्योगिनः शब्दादिकं बधिरादिनेव
केनापि न श्रूयत इति भावः सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा
आचष्टेऽत्रायुरिति आयुःकरकर्मज्ञानादेव सह्यसूढिति रूपाभ्यामपरान्तस्य मरणस्य ज्ञानं

भवतीत्यतः कर्मणो विशेषणमायुर्विपाकमिति सोपक्रमं तावद्वेगेन फलदातृ यथाक्लिका
लीनप्रज्ञास्तु नालिपो वननार्द्रकाद्यवस्थानां दृष्टिपिनारंभकमायुष्करकर्मेति निरुपक्रमं चमं
दवेगेन फलदातृ यथा सप्तादिकालीनप्रज्ञास्तु वा सर्पो वनाद्यवस्थानं विलंबेन आरंभकमा
युःकरं कर्मेति तथा च सोपक्रमस्य साक्षात्करणात् शीघ्रमरणस्य ज्ञानं निरुपक्रमस्य साक्षा
त्करणात् च विलंबेन मरणस्य ज्ञानं भवतीति विभागः सोपक्रमनिरुपक्रम कर्मणोर्दृष्टांत
माह तत्र यथेत्यादिना वितानितं विस्तारितं ह्रसीयसा स्वल्पेन यथाक्रमं समयोरपरं दृष्टांत
रूपमाह यथा चाग्निरित्यादिना कक्षे तृणे क्षेपीयसा शीघ्रेण॥ उपसंहरति तदैकेति जन्मांत
रभोगस्य कर्मणो ज्ञानं वर्तमानदेहस्यापरांतज्ञाने हेतुरत उक्तमैकभविकमिति मनुष्यमान
कर्मभिः संदेहैकभविकमित्यर्थः सूत्रार्थमाह तत्सोपक्रमादिति एकभविकायुष्करकर्मसंयमा
त्सोपक्रमादिरूपविशेषावधारणे सति पूर्वोक्तापेक्षयाप्यपरांतस्य मरणस्य शीघ्रत्वाशी
घ्रत्वादिरूपविशेषज्ञानं भवतीत्यरिष्टेभ्यो वेत्यर्थः अरिष्टज्ञानस्यापीदं फलमिति सूत्रे प्रसंगादेवो
क्तं संयमसिद्धौ नामेवप्रकृतत्वात् अरिष्टानि मरणचिह्नानि तानि च योगो नाम समाध्यवधाना
र्थमत्र व्याख्येयानि तानि त्र्याचष्टे त्रिविधमिति पिहितकर्णः स्वदेहांतर्घोषं वह्निज्वलनशब्द १६०

वद्रूपविशेषं न शृणोतीत्येकमरिष्टमाध्यात्मिकमाधिभौतिकं यमपुरुषादिना आभामिते च स्वर्गसिद्धि
करणात्स्वं पश्यतीत्यपरं तस्मात्यपि विविधास्परिष्टानि वसिष्ठमार्कंडेयादिभिरुक्ता
नि दिनमाससंवत्सरादिभेदैर्मरणचिह्नानि तानि संक्षेपतस्त्याह विपरीतं वा सर्वमिति सर्वं
श्वासप्रश्वासादिकमिति अनेन वात्यारिष्टेन वेत्यर्थः मैत्र्यादिषु बलानि मैत्र्यादिषु संयमा
त् बलानि अबंध्यानि वीर्याणि भवंति परेषु मैत्र्याद्यर्थप्रयत्नो विफलो न भवतीति यावत्
त् तदेतद्याचष्टे मैत्री करुणेति मैत्र्यादित्रयविषयिण्यस्तिस्रो भावनाः संयमा भवंति तत्र
सुखितेषु मैत्री एवं स्वरूपा एवमादि साधनिकेष्वर्थविशेषे मैत्रीं भावयित्वा साक्षात्कृत
वद्याख्यातमैत्रीबलं लभत इत्यर्थः एवं करुणामुदितयोरपि व्याख्येयं यद्यपि भावनाश
ब्दः सूत्रे नास्ति तथापि तं तंत्रानुसारेण व्याख्यातः प्रथमपादोक्तभावनाया एवात्र
अस्यासुत्पादनार्थमिति भ्रमो मा भूदित्येतदर्थं प्रकृते तंत्रांतरीयभावनाशब्दस्यार्थं स्वय
माह भावनासमाधिरिति भाव्यते फलमनेनेति व्युत्पत्त्या भावनाचिंतनयोरेकार्थत्वादिति भावः
भावः ध्यानधारणयोः संग्रहाय पुनराह यः स संयम इति यः स पूर्वसूत्रेषु प्रक्रांतस्त्यर्थः
भावनाशब्दोक्तसमाधिना ध्यानधारणयोरपि ग्रहणं तंत्रांतर इति भावः भावनातः समाधि

रितिपाठेतत्त्वतःसूत्रात्पूर्वोचार्योक्तादृत्तभावनासमाधिरेवेत्यर्थःबलशब्दंविवृण्वानःसूत्रा
र्थमुपसंहरतितत्तोबलानीतिमनुप्रथमपादोक्तोपेक्षाकथंमैत्र्यादिष्वित्यत्रादिशब्देनसंग्र
हीतात्राहपापशीलेष्वितिपापशीलेषुमैत्र्यादिसूत्रत्राहरूपंउपेक्षामात्रंनतुतस्याभाव
रूपिण्यामुपेक्षायांप्रतियोगितत्वातिरिक्तःकश्चनविशेषोस्तियस्यसाक्षात्कारार्थंभावनास्या
दतश्चतस्यामुपेक्षायांनास्तिसमाधिःसंयमोपेक्षितइत्यर्थःशेषंसुगमंबलेषुहस्तिबला
दीनिहस्त्यादिबलेषुसंयमाद्धस्त्यादिबलानिभवंतीत्यर्थःभाष्यंसुगमंप्रवृत्त्यालोकन्यासा
त्सूक्ष्मव्यवहितविप्रकृष्टज्ञानंव्यवहितमावृतंविप्रकृष्टंदूरवर्तिव्याचष्टेज्योतिष्मतीतिज्योति
ष्मतीबुद्धिपुरुषान्यतरसाक्षात्काररूपिणीमनसःप्रवृत्तिःप्रथमपादोक्तातस्यायआलोक
स्तत्कालीनोयःसत्त्वप्रकाशस्तंयोगीसूक्ष्माद्यर्थेष्वविन्यस्यचतमर्थंसाक्षात्करोतीत्यर्थःअ
त्रन्यासमात्रवचनात्तेषुसंयमापेक्षानास्तिवक्ष्यमाणसमाधिनाघटदर्शनवद्विशुद्धसत्त्वप्रति
संधानमात्रेणैवसूक्ष्मादिसाक्षात्कारोभवतीतिभावःपरंपरयाबुद्ध्यादिविषयकसंयमस्या
प्यत्वेनैवचास्याःसिद्धेःसंयमसिद्धिमध्येनिवेचनमितिभुवनज्ञानंसूर्येसंयमात्भुवन
शब्दार्थंव्याचष्टेतत्प्रस्तारइत्यादिनाभुवनविस्तारःकथ्यतइतिशेषःतत्रचवक्तानुंसूर्येसंदेशाख १६१

लोकेषुवक्तव्येष्वादौसप्तलोकानाहसप्तलोकाइतिसप्तलोकान्विभजतेतत्रेतित्रवीचिर्नामनरक
विशेषःसर्वलोकानामधस्थानंतदारभ्यमेरुपृष्ठपर्यंतंभूर्लोकःमेरुपृष्ठमारभ्यमेरुपृष्ठोप
लक्षितभूर्लोकस्योपरिध्रुवपर्यंतंभुवर्लोकःतदुपरिक्रमेणपंचविधःस्वर्लोकःएतेनत्रिलोक्य
वस्थापिदर्शितापंचानांसामान्यतःस्वर्लोकत्वेमैक्यात्पंचानामवांतरभेदानाहमाहेंद्रइत्यादिना
माहेंद्रोलोकःस्वरितिनामकोभूर्भुवर्लोकापेक्षयातृतीयःएवमग्रेत्रापिक्रमयुक्तमेणसप्तलोका
नांसंग्रहश्लोकंपठतिब्राह्मइतिजनस्तादित्रिभूमिकोब्रह्मलोकःततोधःप्रजापतिलोकोमाहान्
महरितिनामाततोधःस्वरितिनामाइंद्रलोकःततोधस्तारालोकोद्यौरितिभुवइतिचोच्यतेतदध
श्चप्रजानांमनुष्याणांलोकोभूरितिनामेत्यर्थःइदानींपृथिव्याअधःस्थितान्सप्तनरकान्भूर्लोकां
शतयाप्रतिपादयतितत्रेतितत्रभूर्लोकेसर्वेनरकाधःस्थितादवीचिनरकादुपर्युपरिस्थिताःम
णमहानरकभूमयोघनादीनोतमोनामानोभ्याधारामहाकालादिसंज्ञकाःसंतीत्यर्थःघनाःशि
लाशकलादयःपार्थिवपदार्थाःतमश्चांधकारःअत्रमहानरकशब्दादन्येप्युपनरकाःकुंभीपाका
दयोऽनंतास्तत्रैवसंतीतिप्रतिपादितेदुःखवेदनाःदुःखभोगिनःआक्षिप्यगृहीत्वाभूरादिसप्तलो
कान्वक्तुंमहातलादीनन्यान्सप्तलोकानांहततोमहीतितताचोचेरध्यइत्यर्थःतदेवंचतुर्दशलोकाभ

वंतीतिस्तुवपति भूमिरियमपमीतिन्नप्रम्भमेरपमीत्ववचनात्सर्वाध्वंस्थितात्माहातलाद्
पर्यपरिच्छमेणसप्तपातालानीस्वर्गांतमंसंक्षेपतप्रत्देशलोकानुक्ताविस्तरेणविवक्षु
रादौभूर्लोकस्यविस्तारमाहसप्तद्वीपेतितस्यएजंतेतिपूर्वादिप्रदक्षिणक्रमेणोत्पादिः दक्षिण
भागाकाशस्यवैरप्यप्रभाम्याप्तनापावक्ष्यमाणत्वात्श्वेतोरजनवर्णः स्वच्छः स्फटिकप्रतिवि
बोन्द्राहीकुरुंउकंस्वर्णवर्णः पुष्पविशेषः दक्षिणेतिन्नस्यसुमेरोरुपरिदक्षिणपार्श्वे जंबूनामा
वृक्षः यतोयन्नामात्रयंलवणोदधिवेष्टितो जंबूद्वीपो जंबूद्वीपनामेत्यर्थः तस्येतिनिरंतरंसू
र्येणप्रदक्षिणीकरणात्तस्यसुमेरोरवच्छेदभेदेनएत्निदिनेसंपक्तमिवसद्विवर्त्तेनेभ्रमतितु
यातस्यमेरोरुत्तरदिशिनीलाद्यास्त्रयः पर्वताः प्रत्येकंद्विसहस्रयोजनविस्ताराश्लिष्टंतितेवा
मककारोषत्रीणिवर्षाणिप्रत्येकंनवयोजनसहस्रविस्तराणितत्रनीलगिरिर्मेरुलग्नः नील
स्योत्तरेरम्यणकंश्वेतस्योत्तरेहिरण्मयंश्रृंगवतउत्तरेसमुद्रपर्यंतमुत्तराः कुरवइत्यर्थः दक्षिण
दिश्ययिसंनिवेशएवंबोध्यः सुमेरोः प्राचीनाइतिमेरोः पूर्वदिशितत्संयुक्तोमाल्यवान्पर्वतः तमे
वसीमानंकृत्वासमुद्रपर्यंतंभद्राश्वनामदेशः तत्रभद्राश्वनामकमेववर्षएवंमेरोः पश्चिमद
दिशितत्संयुक्तंगंधमादनसीमानः समुद्रपर्यंताः केतुमालनामदेशाः वर्षंचैकमेवकेतुमाल १६२

संज्ञकमित्यर्थः मध्यइतिछत्राकारस्यसुमेरोरधोभागेवर्षमिलावृतंचतुर्दिक्षुचपर्वताश्छत्र
पार्श्वेस्यावरणवासदवमेरुपार्श्वेष्वेवसंसक्ताइतितदेवंजंबूद्वीपस्यनववर्षाणिप्रोक्तानियथे
तैः सहसमग्रंजंबूद्वीपस्यपरिमाणमाहतदेतदितितदेतज्जंबूद्वीपाख्यंस्थानंयोजनशतसह
स्रमितंतत्रतत्रसुमेरोश्चतुर्दिक्षुपंचाशत्पंचाशद्योजनसहस्रेणव्यूढं संक्षिप्तंपरिसंख्यात
मित्यर्थः सुमेरुस्तद्द्वापेतिशेषः सुमेरोः परिमाणंचविष्णुपुराणेप्रोक्तंचतुरशीतिसाहस्रयोज
नैरस्योच्छ्रयः प्रविष्टः षोडशाधस्ताद्द्वात्रिंशन्मूर्ध्निविस्तृतः मूलेषोडशसाहस्रोविस्तारस्तस्यसर्व
तः मेरोश्चतुर्दिशस्तत्रनवसाहस्रविस्तृतंइलावृतंमहाभागचत्वा[illegible]त्रपर्वताइति एतेनमेरो
पार्श्वद्वयेइलावृतस्याष्टादशसाहस्रतयालक्षप्रमाणताजंबूद्वीपस्यसिद्धेतिजंबूद्वीपस्यवेष्ट
नंलवणसमुद्रमाहसवत्विति यत्रजंबूद्वीपंसमावृत्यलक्षयोजनविस्तृतः मैत्रेयवलयाका
रस्थितः क्षारोदधिर्बहिरितिविष्णुपुराणात्समुद्रस्यद्वीपद्विगुणत्वेपार्श्वद्वयेनबोध्यंततोद्विगुणा
इतिजंबूद्वीपाद्द्विगुणः शाकद्वीपइत्यर्थः शाकाच्चद्विगुणः कुशद्वीपः एवंक्रमेणवृद्धिः समुद्रा
श्चेतिस्वस्वद्वीपापेक्षयाद्विगुणाः समुद्राणांविशेषणान्यथेत्यादिसर्षपराशिवम्नध्येकिंचि
न्मान्नोच्छ्रिताः मध्येतरंगबाहुल्यात्तत्याकृतद्वयस्थितेविचित्रशैलैरवतंसकस्यैः सहिताः तथाइ

क्षुरसादितस्योदकाइत्यर्थः सप्तद्वीपानां समुद्रादिसहितानां मिलित्वा परिमाणमाह समेतिएते
सप्तद्वीपाः समुद्रैः सहिताः सप्तसमुद्राद्बहिः स्थितेन लोकालोकपर्वतेन परिवृत्ताः पंचाशद्योजन
कोटिपरिमिता इत्यर्थः लोकालोकमपि सहिता इत्यपि बोध्यं समग्रभूगोलस्यैव पंचाशत्कोटिपरि
मितत्वस्य पुराणेष्ववगमादिति तदेवैतदिति तदेतत्सर्वं भूगोलकं सप्रतिष्ठितमसंकीर्णं पंचाशत्को
टिपरिमितस्यांडस्य मध्ये व्यवस्थितं इदं च शतकोटिविस्तारमंडं सप्तावरणसहितमपि प्रकृते
रण्वरणइत्यर्थः तदुक्तं विष्णुपुराणे प्रकृतिं प्रकृष्य अंडानां तु सहस्राणां सहस्राण्ययुतानि च ई
दृशानां तथा तत्र कोटिकोटिशतानि चेति सौरे च ब्रह्मांडमेतत्सकलं ब्रह्मणः क्षेत्रमुच्यते क्षे
त्रज्ञमरणो प्रोक्तो विरिंचिश्च प्रजापतिः सहस्रकोट्यः संति ब्रह्मांडानि पृथग्विधाः ब्रह्माणो
हरयो रुद्रास्तत्र तत्र व्यवस्थिताः आज्ञया देवदेवस्य महादेवस्य शूलिनः ब्रह्मांडानामसंख्यानां
ब्रह्मा विष्णुर्महेश्वरः यस्या पुत्रापुत्रांशांशास्तत्र स विस्तु हरात्मनो ऽब्दे वै प्रलये हेतुर्महादेव इति
श्रुतिरिति नारदीये च सृष्टिस्थित्यंतकरणो ब्रह्मविष्णुमहेश्वरः यस्या पुत्रापुत्रांशांशास्तत्र
लेत्याभिधीयते इति न चास्मिन्वाक्ये परमात्मांशत्वमेवांडशरीरिणो गम्यते नतु प्रकृत्यंशत्वं ब्रह्मा
ण्डांडस्येति वाच्यं शक्तिशक्तिमतोरंशांशिभावेन शक्तेरप्यंशांशिभावसिद्धेः अग्निविस्फुलिंगा १६३

दिष्वग्नौलक्ष्यांतेषु तथा दर्शनात् मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं तस्यावयवभूतै
स्तु व्याप्तं सर्वमिदं जगदिति श्रुतेश्चेति इदानीं तत्तल्लोकवासिनो देवादीन्क्रमपतितत्रपा
ताल इति देवनिकायाः देवसमूहा असुरादयश्च प्रतिवसंतीत्यर्थः देवाश्च मनुष्याश्च देवम
नुष्या भूर्लोकस्यानुक्ता भुवर्लोकस्यानाह ग्रहनक्षत्रेति नक्षत्राण्यश्विन्यादिसप्तविंशतिः
इतराणि क्षुद्रज्योतींषि तारकाः एते ग्रहादयः सर्वोपरिस्थिते मेढिकाष्ठवन्निश्चलतया स्थि
ते ध्रुवतारा बद्धा वसंज्ञके ज्योतिर्विशेषे वायुरज्ज्वावद्धा गगनरेखवहलिकतस्य चक्रवायोः प्रतिनि
यतसंचारेण कालविशेषैरबद्धगगनगाः सुमेरोरुपर्युपरिभावेन संनिविष्टा भुवर्लोके भ्राम्यं
तीत्यर्थः नन्वेवं सुमेरोरुपरि ज्योतिर्मंडलस्य भ्रमणे कथं मेरुणा ज्योतिश्चक्रावरणेन रात्रिं
दिनव्यवस्थेति चेन्न वक्ष्यमाणस्य वंध्यवधानवत् मेरोरेकपार्श्वस्थस्य सूर्यादेः पार्श्वांतरेण व्यव
धानसंभवादिति स्वर्लोकस्यानाह मार्हेद्रेति त्रिदशादयो देवानां जातिभेदाः कल्पायुषः क
ल्पो ब्रह्मणो दिनं तदायुषाः संकल्पमात्रेणाकर्तुं क्षमाः संकल्पसिद्धाः वृंदारकाः देवाः औपपा
दिकदेहाः पित्रोः संयोगं विना क्षणमात्रेणोत्पाद्यमानशरीरा इत्यर्थः महर्लोकस्यानाह मह
तीति महाभूतानां परिणामने स्वतंत्राः ध्यानाहारा ध्यानतरावतृप्ताः जनलोकस्यानाह ब्रह्म

महति भूतेंद्रियवशिन इति इंद्रियाणां परिणामत्वेन स्वातंत्र्यं पूर्वापेक्षयैषामधिकं द्विगुणेति
द्विगुणं द्विगुणात्पूर्वस्मादुत्तरमधिकमायुरेषामिति तथा ब्रह्मपुरोहितानामायुः कल्पसहस्रात्पू
र्वोक्तात् द्विगुणं तदुत्तरस्य तत् द्विगुणमेवं क्रमेण वृद्धिरित्यर्थः तपोलोकस्थानाह द्वितीय इति
तेभ्य इति भूतेंद्रिययोः प्रकृतेरहंकारस्यापि वशिन इति पूर्वापेक्षयैषामाधिक्यं अत्राहंका
रेणांतःकरणसामान्यग्रहणं एतेन स्वविषयान्यपरोक्षं निर्माणे विज्ञोपादानादौ समर्था इति द्वि
गुणोत्तिपूर्वानुसारेणाक्षेप्यं ऊर्ध्वरेतस इति मैथुनाद्युपरतत्वादूर्ध्वमेव रेतो येषां ते सूक्ष्माणि भू
त्वागच्छंतीति न स्वपत्नीसंभोगाभावादेषां ते तथा ऊर्ध्वसत्यलोकादौ ज्ञानमप्रतिहतं शक्तिरेषां
ते तथा अधोलोके च नावृत्तं ज्ञानविषयो येषां ते तथेत्यर्थः सत्यलोकस्थानाह तृतीय इति ब्र
ह्मणश्चतुर्णां साधारणनिर्विशेषणमाह अकृतेति न कृतो भवनन्यासो गृहनिर्माणं येषां ते त
थात्मन्येवात्मनि गृहे प्रतिष्ठन्तीति स्वप्रतिष्ठा आत्मावासाः उपर्युपरिस्थिता इति अच्युता
नामुपरिस्थिताः प्रधानवशाः एवं क्रमेणेत्यर्थः तथा च सत्यलोकेऽप्यवांतरलोकभेदाः संती
त्यायाते प्रधानवशिनः मूलप्रकृतौ स्वतंत्राः ईश्वरादिपाणिक्यपुराः तेषां चतुर्णां संज्ञाभेदमवां १६४
तरविशेषेणाह तत्राच्युता इति अच्युतसंज्ञकाः सवितर्कयोगेन वर्तिनः प्रधानवासादयोऽप्य

वंश्याख्याः तेऽपि चत्वारोऽपि त्रैलोक्यमध्ये च तद्देशमवतरणमध्यमावतिष्ठंति न ब्रह्माण्डाद्बहि
रित्यर्थः नन्वेवमंडस्य सर्वजीवसाधारणत्वात् कथं ब्रह्मांडसंज्ञेत्याकांक्षायामाह तत्र एव इति
न एते सप्तलोकाः अवांतरं च तद्देशाभिन्नाः सर्वेऽप्यादिपुरुषस्य ब्रह्मणो लोका हिरण्यग
र्भस्य लिंगदेहेन सर्वलोकव्यापनात् पिता पुत्रवदेकांशिभेदेन सर्वजीवानां ब्रह्माभेदा इति
भावः ननु असंप्रज्ञातस्य खिन्नोऽपि यो विदेहप्रकृतिलयौ भवप्रत्ययो विदेहप्रकृतिलयानामि
ति सूत्रोक्तौ तपोलोके कथं नोक्तः तत्राह विदेहेति तेषां मुक्तप्रायत्वादीश्वरकोटित्वाच्च ब्रह्मा
ण्डस्यांतर्बहिः स्वातंत्र्येणाप्यापारतया स्थितेन ते लोकमध्ये लोकवासिजनमध्ये गणिता इत्य
र्थः तदेवं संक्षेपतो भुवनत्राद्यर्थं व्याख्याय सूत्रवाक्यार्थमाह एतद्योगिनेति सूर्यद्वारे सं
यमं कृत्वा योगिनेत्यमुं भुवनं साक्षात्करणीयं अन्यत्र योगिनां लोकांतरदर्शने न द्वारनियमः परितस्तु
न्नीयते सूर्यद्वारं च ब्रह्मलोकद्वारं अतः तस्य पौनःपुन्यं सत्यादिप्रधानविनियोग इति तत्राविनि
होते यथा भास्करस्यैवं तेन सह ऊर्ध्वं अत्राक्रमंत इति श्रुतौ सूर्यद्वारेण ते विरजाः प्रयांति यत्रा
मृतः स पुरुषो ह्यव्ययात्मेति श्रुतौ च तन्नाड्यस्तत्र व्याख्यातत्वात् अनंता रश्मयस्तस्य
दीपवद्यः स्थितो हृदि । ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमंडलं ब्रह्मलोकमतिक्रम्य तेन याति

परं गतिमिति स्मरणाच्चेति न केवलं सूर्यद्वारसंयमस्यैव भुवनज्ञानफलं किंतु योगशास्त्रो
क्तसंयमांतरस्यापीत्यतोऽगच्छपाथेऽन्यत्रसंयमेनापि समग्रभुवनसाक्षात्कारणोप
मित्युपदिशति ततोन्यत्रापीति ततः सूर्यद्वारादन्यत्रापि एवं संयमेत्तावदभ्यसेत्तयावदिदंभु
वनं दृष्टं भवेदित्यर्थः चंद्रे ताराव्यूहज्ञानं भाष्यं सुगमं ध्रुवे तद्गतिज्ञानं ताराः स्वरूपाणि ज्ञात्वैव
तासां गतिज्ञानं संभवतीत्याशयेन भाष्ये तदनूक्तं ताराव्यूहज्ञानानंतरमित्यर्थः शेषं भा
ष्यं सुगमं तस्मिन्नेव प्रसंगे योगशास्त्रांतरोक्तान् भुवनलोकस्थवस्त्वंतरसंयमात् सिद्धिस्वयं
पश्यति ऊर्ध्वेति ऊर्ध्वविमानेष्वादित्यादिरूपेषु कृतः साक्षात्कारपर्यंतः संयमो येन स तानि वि
मानानि रथान् ज्ञानीयादित्यर्थः ननु विमाने संयमस्यैव विमानसाक्षात्कारसिद्धिरुक्ता सा
क्षात्कारपर्यंतस्यैव संयमस्य सर्वत्र सिद्धिकथनात् संयमानां स्वस्वविषयसाक्षात्कारहेतुता
याः सामान्यत एव सिद्धत्वाच्च नाभिचक्रे कायव्यूहज्ञानं शरीरमध्यवर्तिनाभिकंदरूपे चक्रे
कदलीफलवदाद्यावृत्त्यंते पत्तः शाखापत्रवादिवच्छिरः पादादिकमवयवज्ञानं ऊर्ध्वमध्य.
ख्याविर्भवति तस्मिन्नाभिचक्रे संयमात् साक्षात्कृते कायस्थपदार्थव्यूहं जानाति पित्तत्वगसृ
गादिरूपं साक्षात्क्रियत इत्यर्थः भाष्ये वाताद्यमिति मुक्तस्य मज्जा वाद्येति रक्तमादिरेषां सप्तानां १६५

क्रमः विन्यासः शरीरसंस्थानं। कंठकूपे क्षुत्पिपासानिवृत्तिः। तंतोरधस्तादिति ग्रंथेनोपरि
छिद्रं वारितं कूपादधउरसी स्थागमिति भाष्यस्योचउरः पर्यंतत्वं कंठकूपस्य लक्ष्यते तथा च जि
ह्वाधःस्थस्य तंतोर्मूलादारभ्य उरः पर्यंतं छिद्रं कंठकूपः कूपाकारच्छिद्रमिति तत्रेति तस्मि
न्प्रदेशे संयमादशेषविशेषतः साक्षात्कृते सति क्षुत्पिपासानिवृत्तिरूपा सिद्धिर्भवती
त्यर्थः एवंविधेषु च संयमेषु भावनाप्रकारो योगशास्त्रविशेषान्गुरुमुखाच्च प्रत्येतव्यः
कूर्मनाड्यां स्थैर्यं कूर्माकारेति कुंडलिनसर्पवदवस्थितं तया कूर्माकारं हृदयपुंडरीकाख्यं
नाडीचक्रं तत्र कृतसंयमो योगी स्थिरपदं स्थैर्यं चित्तवृत्तिं लभत इत्यर्थः नाड्याः कूर्माकारत्वे
दृष्टांतद्वयं यथा सर्पो गोधा वेति कुंडलिन इति शेषः मूर्द्धज्योतिषि सिद्धदर्शनं शिर इति शि
रः कपालमध्ये तः छिद्रं छिद्रस्यांतः प्रभास्वरं स्वप्रकाशकं ज्योतिरस्तीत्यादिरर्थः शिरः कपा
लमध्ये छिद्रं प्रभास्वरत्वाज्ज्योतिरिति प्रामादिकपाठेप्ययमेवार्थो लक्षणया कार्यः शेषं सुग
मं प्रातिभाद्वा सर्वं प्रातिभमिति प्रातिभं स्वप्रतिभोत्थं अन्यानौपदेशिकं ज्ञानं संसारतरणोपा
यत्वात् तारकमिति तारकं सर्वविषयमिति सूत्रे व्याख्यास्यते तच्च विवेकजस्य वक्ष्यमाणस्य
सार्वज्ञस्य पूर्वलिंगं तत्र दृष्टांतो यथा सूर्योदयस्य पूर्वलिंगं प्रभेति तेन चा प्रातिभज्ञानेन सर्वं

पूर्वोक्तेष्वतीतानागतादिसिद्धपर्यंतं योगीजानातिपूर्वोक्तात्संयमात् विनापीत्यर्थः तेने
त्येतद्विवृणोति प्रातिभस्य ज्ञानस्योत्पत्त्याविति द्वारांतरापेक्षा नास्तीति भावः यद्यपि तारकं
सर्वविषयमित्यागामिसूत्रे विवेकजज्ञानमेव प्रातिभं तारकं वक्ष्याख्यास्यते तथाप्यत्र प्रा
तिभादिति हेतुत्ववचनात् विवेकजज्ञानस्य पूर्वरूपमेव लक्षणया प्रातिभस्यापि क्षणान
क्रमादिसंयमजन्यात्तया वक्ष्यमाणत्वेनाउक्तसिद्धेरपि परंपरयासंयमसिद्धत्वादिति सं
यमस्य स्वसिद्ध्य उक्ता इदानीं संयमस्य सत्त्वपुरुषान्यताख्यातिरूपां मुख्यां सिद्धिं विवक्षुर
द्वौ तत्संयमहेतुभूतायाश्चित्तसंविदः कारणमाह हृदये चित्तसंवित् हृदयपद्मं व्याचष्टे य
दिदमिति अस्मिन् ब्रह्मणः परमात्मनो जीवस्य च पुरे शरीरे यदिदं दहरस्वगर्तं पुंडरीकाका
रं ब्रह्मणो वेश्म तत्र विज्ञानं विज्ञानवृत्तिकमंतःकरणं ब्रह्मणः सिंहासनकसंतिष्ठतित्र
तस्मिन् हृदयाख्ये वेश्मनि संयमाच्चित्तसाक्षात्कारो भवतीत्यर्थः चित्ते ज्ञाते चित्ताद्वि
वेकेनात्मसाक्षात्कारो भवतीति क्रमानुसारेणाह सत्त्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्यया
विशेषो भोगः परार्थात्स्वार्थसंयमात्पुरुषज्ञानं सत्त्वाधिकारात्सत्त्वं बुद्धिः परार्थादिति पंचमी १६६
चात्यपदमध्याहृत्य व्याकरिष्यति तयोश्च बुद्धिपुरुषयोरत्यंतविधर्मिणोः प्रत्ययाविवेको भो

गस्वार्थः तयोः प्रत्यययोर्मध्ये परार्थाद्विविक्तेन स्वार्थेन पौरुषेयप्रत्यये संयमात् साक्षात्कृते सति
स्वयमेव परिणामाद्यशेषविशेषैः पुरुषस्य साक्षात्कारो भवति नादृशसंयमाभावे इत्यर्थः यद्यपि
पौरुषेयः प्रत्ययः पुरुषातिरिक्तो न भवति तथापि दृश्योपरागेण परिच्छिन्नांश एव प्रत्ययः कृत्स्नाद्वि
त पुरुषस्त्वपरिच्छिन्नो महाकाशवत् इत्यनयोर्भेदः इत्यतः प्रत्ययसाक्षात्कारपर्यंतसंयमस्यापरि
च्छिन्नत्वाद्यंशमात्राधिक्येन फलं पुरुषसाक्षात्कार उक्त इति नन्वत्र सूत्रे भोगलक्षणस्य किंप्रयोजन
मिति चेत् उच्यते भोगरूपेणैव बुद्धिपुरुषधर्मयोरविवेकात् धर्मिणोः सांकर्यमतो भोगमध्यस्थव
तद्धर्मयोर्विवेकाय संयमः कार्य इति प्रतिपादयितुमत्र तेन सूत्रेण भोगोपि लक्षितः तदेतत् व्या
ख्यातुमादावत्यंतराद्वस्यामित्रेतमर्थं प्रकटयति बुद्धिसत्त्वमित्यादिना अयमर्थः नकेवलं तेवास्वा
धाकारवुद्ध्यासहासंकीर्णः पुरुषोपि तु यद्बुद्धिसत्त्वं प्रख्याशीलं तत्पासमानसत्त्वाधीनवृत्तिकेरज
स्तमसी अभिभूय सत्त्वपुरुषान्यतासाक्षात्काररूपेण परिणतं भवति तस्माच्च तस्मादपि प्रकृ
ष्टज्ञानैश्वर्यानंदादिमयात् बुद्धिसत्त्वादात्माकारतयात्मकल्पात्परिणामिनोत्यंतविधर्मा पुरुषो
विशुद्धः परिणामशून्योऽन्यश्चितिमात्ररूप इति अत्यंतशब्दार्थं व्याख्याय भोगप्रतिपादकं
सूत्रार्थं व्याचष्टे तयोरिति तयोर्बुद्धिपुरुषयोरत्यंतविधर्मयोरपि प्रत्ययाविशेषप्रत्ययवोर्विनि

व्यावहारं भोगः अगृहीतविवेको प्रत्ययावित्ति यावत् अयमप्यविवेको बुद्धिधर्म इति स्मर्तव्यं
तत्र बुद्धेः प्रत्ययः सुखादिमती विषयाकारवृत्तिः पुरुषस्य च प्रत्ययो बुद्धिवृत्तिप्रतिबिंबावच्छिन्न
श्चैतन्यांशः सुखाद्यात्मकशब्दाद्यनुभवनामा तयोरविवेके हेतमाह पुरुषस्य दर्शितविषयत्वा
दितियतो बुद्ध्या पुरुषे प्रतिबिंबमर्पितं तत्तो तयोः स्फटिकयोरिव धर्मसंकरापत्तेरविवेक इत्यर्थः
तथा च स्मर्यते शुद्धोप्यात्मा तिसामीप्याद्दृश्यधर्मान् पश्यतिधान् कर्तृत्वभोक्तृत्वसुखात्म
नित्यात्स्ववीक्षितान् जीवोविहरितीक्षित्वा स्फुटभिन्नानपि स्वतः नेमात्वेसंतरात्मान् सुखस
क्तोमसोस्मि वेत्ति स्फुटभिन्नानपि इमानयान जीवईक्षित्वा स्वस्मात् बहिरिति सन्नवेत्तियतई
क्षणात्स्य चानुपपत्त्या सोंतरा सन्मान् प्रतिबिंबितान् तत्र दृष्ट्वांतो मसुखलग्नामसोस्मि वेत्यर्थः प
रार्थादित्याद्युत्तरांईसंयमसिद्धिप्रदर्शकं व्याचष्टे स भोगप्रत्यय इत्यादिना ज्ञापन इत्यंतेन सोऽवि
भागापन्नउभयात्मको भोगाख्यः प्रत्ययः सत्त्वस्यांशः परार्थत्वात्परप्रयोजनकत्वात् दृश्यः पक्ष
तस्मात्सत्त्वादन्यो विशिष्टस्वार्थः परस्य बुद्ध्यादेरदृश्यः साक्षात्तद्रूपश्चैतन्यमात्रः पौरुषेयः
प्रत्ययांशः प्रत्ययो भोगाख्यः तत्र पयो कृ विवेकेन संयमात्साक्षात्कारपर्यंतात् पुरुषसाक्षा
त्कारो भवतीत्यर्थः अत्रात्मपदाध्याहारः कृतः नवेवैतत्सूत्रेण भोगापवर्गो व्यपि व्याख्यातौ १६

स्वयं च मुख्य एव भोगो विविक्तप्रत्ययद्वयात्मको लोकव्यवहारसिद्धः विवेकस्य हेतुरिति परकीयसु
खादिसाक्षात्कारइव स्वीयसुखादिसाक्षात्कारेपि भोगव्यवहारयोग्यात् सोयं भोगोऽविवेकप्रा
धान्येन कुत्रचिद्बुद्धेरेवेत्यप्युच्यते तथा व्यवहारयोग्यात् सोयं भोगोंशभेदेनोभयोरेव भवति
तत्रैष गौणो भोगः सांख्ये प्रोक्तः चिदवसानो भोग इति स च पुरुषस्यैव न बुद्धेः पुरुषोस्ति भो
क्तृभावादिति सांख्यवाक्यात् अन्यस्तु विपाकांतर्गतो भोगः शब्दाद्याकारवृत्तिः स च बुद्धेरेव
तावेतौ भोगापवर्गौ बुद्धावेव वर्तमानाविति भाष्यात् सहितफलस्य भोक्तेति तत्र तत्र भा
ष्यकृता विपाकफलस्य सुखदुःखादेर्भोगांतरवचनाच्चेति स्मर्तव्यं ननु पुरुषज्ञानं भवती
त्युक्तं तत्पुरुषज्ञानं किं बुद्धिसत्त्वस्य भवति किं वा पुरुषस्य नाद्ये बुद्धेरपि चेतनत्वापत्तिश्चोक्त
परादृश्यत्वानुपपत्तिश्च तथा नेमं तत्परं पतिसपश्यते तानि इत्यादिवाक्यशतविरोधश्चांत्ये
ऽपि स्वस्य स्वज्ञेयत्वेन कर्मकर्तृविरोधसंदेहवस्वज्ञानप्रसंगश्च पुरुषस्यापरिणामिचिन्मात्रत्वा
दिति ताभिमांशंकांपरिहरति न च पुरुषेति पुरुषाकारप्रत्ययेन बुद्धिसत्त्वधर्मेण पुरुषो न दृश्य
तेन भास्यते तस्य जडत्वात् अपि तु पुरुष एव तं प्रत्ययं स्वस्वरूपाकारं पश्यति बुध्यारूढमा
त्मानं पश्यतीत्यर्थः स्वस्मिन्प्रतिबिंबितमिति शेषः तथा च स्वप्रतिबिंबितस्वाकारबुद्धिवृत्तिद

शेनमेव पुरुषस्य पुरुषज्ञानं यथा स्वप्रतिबिंबितघटाकारबुद्धिदर्शनमेव पुरुषस्य घटदर्शन
मिति न चात्र कर्मकर्तृविरोधः कर्मकर्तृविरोधो हि स्वस्मिन् स्वसंबंधानुपपत्तिरन्यथात्मप्रका
शसंबंधस्यैव प्रकाश्यतारूपत्वात् अनुभवप्राप्तेरेकार्यत्वाद्युक्तश्च संबंध एकस्मिन्नपि वि
षयप्रतिबिंबाख्यस्वरूपभेदेनोपपद्यत इत्यस्य चैवमपि परस्य भवेत् क्लिष्टफलभागित्वरूपं कर्मल
क्षणं पुरुषे न घटत इति चेन्न विशिष्टाविशिष्टरूपेणाज्ञातज्ञेययोर्भेदसत्त्वात् आत्माकाश्व
त्यच बुद्धिगुणत्वसंभवात् पुरुषकल्पना व्यर्थेति वाच्यं अनवस्थादिदोषैः सूत्रेण निरस्यत्वा
दिति यत्तु आधुनिकवेदांतिब्रुवानुसारेण स्मदीयोपि कश्चित् आत्मनो ज्ञेयत्वाभावमेव वद
ति तत्र प्राक्तनसूत्रभाष्यविरोधादुपेक्षणीयं स्वप्रकाशत्वं चात्मनः स्वज्ञेयत्वमेव चेतना
त्मा स्वंवेदनरूपादिश्रुत्यनुसारात् शब्दस्य योगार्थपरित्यागानौचित्याच्च बुद्ध्यादिजडवत्त्वा
वज्ञेनितैवसंभवाच्चेत्यादिकं ब्रह्ममीमांसायां प्रतिपादितमस्माभिः यदपि वृत्तिव्याप्यत्वमात्म
नोभ्युपेत्य फलव्याप्यत्वं वेदांतिब्रुवैः परिकल्प्यते तदपि मोहादेव फलव्याप्यत्वस्य सामान्यतो व्यव
हारहेतुतायाः क्लृप्तत्वेन चैतन्यस्य फलव्याप्यतां विना चैतन्यव्यवहारानुपपत्तेः अस्य घटादि १९०
व्यवहारस्यापि वृत्तिव्याप्यत्वेनैवोपपत्तौ विश्वप्रकाशकतया चैतन्यकल्पनावैयर्थ्यात् यतो वा

चो निवर्तंते अप्राप्य मनसा सहेत्यादिवाक्यानि च लौकिकमनआदिवृत्त्यगोचरत्वमेव प्रतिपाद
यंति मनसैवानुद्रष्टव्यमित्यादिश्रुत्यंतरात् अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ
जहातीत्यादिश्रुत्या योगिमनोविषयत्वावगमाच्च न तु फलव्याप्यत्वं निराकुर्वंति मनआदीनां जड
त्वेन फलानाधारत्वात् फलं विना शास्त्रादीनां ब्रह्मणि प्रमाणत्वादिदोषासंभवादिति दिक् पुरु
षस्यैव स्वज्ञातृत्वमित्यत्र श्रुतिं प्रमाणयति विज्ञातारमात्मानं लोको विजानीयात् इत्यर्थः यद्वा मो
क्षतयाप्युक्तमिति ईश्वरगीताशेषः आत्मा यदि न नित्यज्ञानरूपस्तर्हि केन ज्ञानांतरेण वि
ज्ञातारमात्मानं लोको विजानीयात् इत्यर्थः यद्वा मोक्षकाले बुद्ध्यादिविलयात् केन करणेन त
दानीं विज्ञातारमात्मानं पुरुषो विजानीयादित्यर्थः अत्र हि श्रुतौ करणेन पुरुषस्यैव स्वज्ञेय
त्वमवगम्यते अज्ञेयत्वे च विज्ञातारं केन विजानीयादित्येवोच्येतेति इयं श्रुतिः पुरुषस्य सर्वदै
वाज्ञेयत्वं वदतीति कश्चित्तन्न यतो न प्रेत्य संज्ञास्तीति यत्नेवाक्योपात्तवत्त्वेन मोक्षकाले ज्ञा
नस्वरूपोपि पुरुषो न जानातीत्युक्तं अखिलदुःखभोगनिवृत्तिरूपपरमपुरुषार्थे मोक्षे प्रदर्शयि
तुं तत्र विरोधं दृष्ट्वा मैत्रेय्यास्तद्विरोधपरिहारायैवेदं वाक्यं प्रवर्तते न तु पुरुषस्याज्ञेय
त्वप्रदर्शनाय अप्रकृताभिधानप्रसंगादिति ननु भवन्मतेपि परज्ञेयत्वेन रूपं मैत्रेय्याः सं

कापगच्छतीति चेन्न यत्रत्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति पूर्वश्रुत्यैव विरोधस्य परि
हृतत्वात् स्वयंज्ञानस्वरूपोऽपि सर्वकरणविलयात् मोक्षकाले किमपि न विजानातीति तत्र
चेमेत्तेप्याऽदाविदाशंक्येत मोक्षकाले ऽनभिव्यक्तत्वात्तथात्मज्ञानस्वरूप एवमास्त्विति तत्रो
त्तरवाक्यं प्रवर्त्तते येनेदं सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयादि
तिश्रुत्यात्मापदि ज्ञानस्वरूपो न भवतीति तद्विषयकज्ञानांतरकल्पने ऽनवस्थादिकमिति श्रुतेरा
शयः स्वार्थसंयमेन पुरुषसाक्षात्कारे जाते सति तल्लिंगरूपाणि विवेकजज्ञानस्य च पू
र्वरूपाणि प्रातिभादयः सिद्धयो भवंति ताश्च पुरुषैकाग्रतापरिपंथित्वेनासंप्रज्ञातयोगविघ्न
भूता एवेति प्रतिपादयितुमादौ ताः प्रदर्शयति ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता
जायंते ततः पुरुषसाक्षात्कारात् मनस्त्वादीनां प्रातिभादिसंज्ञिकाः सिद्धयः सामर्थ्यविशेष
रूपा भवंति यस्मात्सामर्थ्यान्मनस्त्वादिष्वव्यवहितादिज्ञानं भवतीत्यर्थः अत्र कश्चित्तत इति
तच्छब्देन पुरुषज्ञानं न परामृश्यते तद्दर्शनयत्स्यमोक्तत्वात् इत्यागामिसूत्रभाष्ये पुरुषदर्शनप्र
तिबंधकत्ववचनादपि तु स्वार्थसंयम एव परामृश्यते तथा च पूर्वसूत्रोक्तसंयमस्यैवेदं पुरु १६९
षज्ञानात्प्राक्तनं सिद्ध्यंतरमिति तन्न एतत्सूत्राः पुरुषज्ञानरूपसिद्धेरुक्ततया चकारणाभावेनासि

द्ध्यंतराकांक्षाविरहात् पुरुषज्ञानस्यैव समव्यवहितयोग्यत्वेन परामर्शौचित्याच्च अतस्तत् शब्देना
त्र पुरुषज्ञानस्यैव परामर्शः पुरुषसाक्षात्काररूपपुरुषैकाग्रताप्रत्यनीकतया तु भाष्यकारः प्रा
तिभादेरसंप्रज्ञातसमाधावेवोपसर्गत्वं वक्ष्यतीति प्रातिभादिशक्तीः स्वकार्यैर्लक्षयति भाष्य
कारः प्रातिभादिति प्रतिभा उपदेशादिनैरपेक्ष्येण सूक्ष्मादीनां मानसं यथार्थज्ञानं तत्सामर्थ्यं
प्रातिभं एवं श्रावणाद्यपि व्याख्येयं वेदनाद्याः संज्ञास्त्वक्चक्षूरसनघ्राणानां सामर्थ्येषुवो
ध्याः नित्यमिति क्रमतो नां विनापि ज्ञायंत इत्यर्थः समाधौ विघ्नरूपास्वेतास्वुपेक्षां कृत्वा पुरुष
दर्शनाभ्यास एव कर्तव्य इत्येतत्प्रतिपादयितुमाह ते समाधावुपसर्गा व्युत्थाने सिद्धयः ते प्रा
तिभादयः समाधिनिष्पन्ना असंप्रज्ञातरूपायां उपसर्गा अंतराया अतो व्युत्थानापेक्षयैवेते
सिद्धयः पुरुषार्थोपयुक्ता इत्यर्थः भाष्ये तद्दर्शनेति तस्य समाहितस्य यद्दर्शनं पुरुषैकाग्र्यं तत्प्रतिबंध
कत्वादित्यर्थः तदेवं ज्ञानादिरूपाः संयमसिद्धीः प्रदर्श्य क्रियादिरूपाश्चापि विभूतीः संयमफ
लान्याह सूत्रजातेन बंधकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः बंध
पदार्थमाह लोलीभूतस्येति चंचलस्वभावस्याप्रतिष्ठस्यैकत्रानवस्थितस्यापि मनसो
धर्माधर्मवशाद्विशरीरे या प्रतिष्ठा तत्ता न हेतुः संबंधविशेषः संबंध इत्यर्थः संयमसिद्धिर्वा

पपादनापाहृतस्येति तस्यकर्मणः शेषिसंभावनेदृढबंधनात्समनंतासमाधिसामान्यवस्था
स्त्वतोऽर्थः तथाचप्रागुक्तेकर्मबंधनान्निष्क्रम्यपततीति प्रचारेतिअनयानाड्याएवंप्रकारेण
चित्तंशरीरेप्रविशतिनिर्गच्छतिचेत्यादिविशेषेणतद्गतिसाक्षात्कारःप्रचारसंवेदनं तदपिस
माधिसामान्यादेवभवतीत्यर्थः सूत्रवाक्यार्थमाह कर्मेतिकर्मबंधक्षयात्तन्निमित्तकस्य
निर्गमप्रतिबंधसंयोगविशेषस्यक्षयादित्यर्थः शेषंसुगमं योगशास्त्रोक्तसंयमविशेषे
णोदानजयात्सिद्धिमाह उदानजयाज्जलपंककंटकादिष्वसंगउत्क्रांतिश्च॥ उदानंविवेचयि
तुंप्राणादीन्पंचैवस्वरूपतोवांतरभेदतश्चप्रतिपादयति समस्तेतिजीवनंनामसर्वेंद्रिया
णांवृत्तिःप्राणनापानादिरूपेत्यर्थः अंतरिंद्रियशब्देनस्थूलसूक्ष्मोभयपरतयाकरणमात्रग
हणे समस्तशब्दोपिसामान्यवचनः सामान्यकरणवृत्तिःप्राणाद्यावायवःपंचेतिसांख्यदर्शना
त् तेनसप्तमीवक्ष्यमाणपरमेपिप्राणादिवृत्तयोजीवनयोनिप्रयत्नवशादंतःकरणस्यैवभवं
तिनिद्रावृत्तिवदितिनैवंचित्तमात्रस्यैवस्वापेप्राणादिवृत्तिकल्पमसिद्धितिवाच्यंचक्षुराद्यु
पचयापचयाभ्यामपिप्राणानामनुपचयापचयदर्शनात् अन्यथावासुषुप्तेपींद्रियाणांज्ञानकर्म
लक्षणवृत्त्योरेवप्रतिषेधात्प्राणनादिवृत्तिसत्त्वेप्यक्षतिः ननुवाह्यवायुभिरंतःप्राणानांस

मानलक्षणत्वाद्वायुसंस्थानविशेषाएवप्राणाःसंतुकिमर्थंकरणानामपिवायुतुल्यःक्रिया
दिःकल्प्यतइतिचेन्न प्राणाच्छ्रद्धांखंवायुरित्यादिश्रुतिषुवायोःप्राणकार्यत्वश्रवणात् नवा
युक्तिविपर्ययपदेशादितिवाच्यंतस्यवायुतत्संचाराभ्यामतिरिक्तस्यप्राणोपधारणाच्छ्रुतिस्मृ
त्यनुगृहीतायुक्तिश्चात्रास्तियदिकरणप्राणौभिन्नौस्यातांतदाकरणवियोगेपिमृतदेहवत्क
दाचित्प्राणस्यापितिष्ठेरन् किंचांतःकरणस्यप्राणस्यशोकादिनाप्राणस्यकंपादिदृश्यतेतत्तस्या
धवात्सामानाधिकरण्येनैवकार्यकारणभावोयुक्तःअन्यधर्मेणान्यपरिणामेतिप्रसंगात् अ
दृष्टकल्पनापत्तेश्चअपिचलिंगशरीरस्यदेहद्वयलयावंधनरावकर्मादीनांहेतुत्वंकल्प्यते
नतुवायुबंधनेपिगौरवात् उदराग्रादिवायवस्तुजीवदेहपरित्यागदर्शनाद्वायुगतत्वेनासा
द्विकल्पनायांचातिगौरवादिति लिंगशरीरस्योर्ध्वाधःसंचारउत्पद्यमानेनवायुनासहावि
वेकात्तत्तावःपिंडवत्प्राणोपिवायुव्यवहारःअनेनैवव्यवहारेणसांख्यैपिप्राणाद्यावा
यवःपंचेत्युक्तंअपिचश्रुतिस्मृत्योःकरणप्राणयोःभेदव्यवहारोवृत्तिभेदादेवमंतव्यःऊर्ध्वा
धोगतिलक्षणःकरणानांपरिणामभेदाःप्राणइत्युच्यंते तत्रचवायुरधिष्ठात्रीदेवतास्य
र्थश्चक्षुर्वीतःप्राणइत्यादिश्रुतेः ज्ञानादिहेतुपरिणामास्तुकरणान्युच्यंतेइतिविभागःअ

त्तोदेवदत्तयज्ञदत्तभेदादपि स्तुपेत्यस्त्ररितिवत् वायुः प्राणादीति व्यवहारोपपत्तेरिति कश्चित्तस्य
त्रप्राणादिनीवनशब्दाभ्यां प्राणानादिनामकवायुक्रियाविशेषहेतुः प्रयत्नभेद एवोक्तः
सवकरणानिचरतिभाष्यार्थमाह तत्रविवरणभाष्ये प्राणादीनां गत्यादिवचनस्य विरोधा
त् अत्रापि सांख्यकारिकायां समनोमात्सेकवाक्यत्वोचित्याच्च वायोः प्राणत्वस्य क्वापि दर्शनेस्य
त्रकारानुक्तत्वाच्च अन्तरावयलिंगशरीरमध्ये प्राणानां गणयंते करणोऽप्रवेशादिति तस्येति त
स्य करणसामान्यस्य साधारणी क्रियां पंचतयी क्रियोपलक्षितपरिणामभेदः पंचतयस्त्य
र्थः समनयनादिति समनयनरूपं नाडीषु रसानां नयनात् समानः अस्यवृत्तेरपान्नाभिपर्य
न्तं वृत्तिः अपैति मलं पुरीषं अन्नपानादिति ऊर्ध्वगतिप्रदत्वात् रसादेरूर्ध्वनयनाच्च उदानः अ
स्य च मुखनासिकादिकमारभ्य ब्रह्मरंध्रपर्यंतं वृत्तिः व्याप्नोति सर्वदेहं व्यापिवृत्तिकोपलवत्क
मेहितुर्व्यानः ननु सर्वेषां वृत्तिभेदात् कथं पंचप्राणा रूप्यंते तत्राहुरेषामिति प्राणो वदश्रा
ति पिबति ते तेवान्येषां धारणी भवतीति स्वैवेनेषां प्राणो मुख्यः अतो मुख्यस्य नामादिभिर्गौ
णानां व्यवहारो राजानुगतेषु राजव्यवहारवदिति भावः तदेवमुदानं व्याख्यायस्तत्त्वं व्याचष्टे १७१
उदानजयादिति उत्क्रमणसंयमादस्य संयमाद्वोदानवायोः स्वायत्ततायां सत्यां जलपंककंटकादौ

नामुपरि संचरतोपि तेषु संगो भवति तेर्विकारहेतुः संयोगो न भवति तथा अर्चिरादिमार्गेण गमना
पत्वेच्छयोत्क्रान्तिर्भवतीत्यर्थः प्रसंगादाह तामिति तामूर्ध्वमुत्क्रान्तिं उदानवशित्वं विना न लभ्य
ते इत्युदानजयोस्यादित्यर्थः समानजयाज्ज्वलनं संयमविशेषजात् समानजयात् ज्वलनं भवती
त्यर्थः भाष्ये उपध्मानं उत्तेजनं कृत्वा ज्वलति स योगी वस्त्वशरीरं दहतीत्यर्थः श्रोत्राकाशयोः संबं
धसंयमाद्दिव्यं श्रोत्रं श्रोत्राकाशयोः शब्दाद्यर्थं तत्र प्रमाणं च दर्शयति सर्वश्रोत्राणामिति पंच
धीन्द्रियाणि अहंकारिकाण्येव नभौतिकानीन्द्रियाणि प्रकाशात्मकत्वात् प्रकाशात्मकं तःकर
णोपादानकत्वस्यैवौचित्यात् तथाप्याकाशाश्रितत्वादाकाशप्रतिष्ठत्वं यथान्नाश्रितत्वादन्नमय
त्वात् मनसोन्नमयत्वमिति एतेनान्येषामपीन्द्रियाणां भौतिकत्वं श्रुतिस्मृत्यादिषु व्याख्यातं तत्तद्भूतसं
सृष्टं तदिन्द्रियोपस्य तत्तद्भूतेभ्य एव तत्तदिन्द्रियाभिव्यक्तेः अत एव दिगाकाशाकाशादीनि पृथि
वीपर्यंतानि पंच श्रोत्रादिदेवताः अयं तद्यति शब्दानां चाकाशोपादानत्वमेवाशितयाव श्रोत्र
शब्दयोराश्रयत्वमाकाशमित्यर्थः श्रोत्राणां माकाशाश्रयत्वे युक्तो चार्थसंगतिमाह यथोक्तमिति
कालभेदेन तत्स्थदेशानिश्रवणेषु तानानि येषां प्रसां तेषामेकं श्रुतित्वमेकदेशावछिन्नश्रोत्र
कत्वेन तत्कालेभवतीत्यर्थः संबेकोदेशआकाशमेवेति भावः अतिरोपमस्याणमय्याहतेक्षेतदिति

तद्वैनेत् श्रोत्रं शब्दश्चाकाशस्य लिंगमनुमापकं नहि स्पर्शमिंद्रियमनाश्रयं स्यात् महेत्तिंग घ
वत् कर्णशष्कुलीवत् तस्याधारो लोकोत्तरगमनादिकाले कर्णशष्कुल्यभावात् कर्णविवरपिधा
नेपि शब्दश्रवणप्रसंगाच्च न च विवरपिधाने सति शब्दाश्रवणं श्रोत्रेनागच्छतीति वाच्यमित्यादिव
त्कर्णच्छिद्रस्य द्रव्याणामपि शब्दागमनाप्रतिबंधकत्वात् नापि मूर्त्तस्य माधारः भावानभ्युपग
मात् अभावस्य भावाधारत्वासंभवाच्च नापि कर्णशष्कुल्यवच्छिन्नः पुरुषादिराधारः विवरपिधा
नेपि तदवच्छेदे न चैतस्याभिव्यक्तपुरुषादेरनावृततया शब्दग्रहणप्रसंगात् तस्मात्पिधानयो
ग्यमेकं द्रव्यं श्रोत्राधारतयापेक्षितं तच्च परिशेषात् कर्णशष्कुल्यवच्छिन्नं नभ एवं श्रोत्रगोल
कतयासिद्धमिति भावः शब्दाधारतायामप्येवं परिशेषः कर्त्तव्यः तथाहि अवकाशस्य शब्दका
रणत्वं तावत्सर्वसिद्धं अवकाशश्चानावरणाभावमात्रं अभावस्य भावानाधारत्वात् अन्यथा
सर्ववस्तूनामभावमात्रत्वापत्तेः नापि पुरुषादिः तेषां स्वस्वव्यापारापत्तेनावकाशासं
भवात् आवृततयाभिमतदेशेपि शब्दाद्युत्पत्तिप्रसंगात् नापि वायुः द्रव्यांतरप्रेरितेपि वेरावादीना
पुसंयोगेन शब्दप्रसंगात् न चाच्छिद्रवायुसंयोगोपि शब्दकारणं तथा सति संयोगाधारतयाच्छिद्र ६०२
व्यास्य द्रव्यत्वसिद्धौ तस्यैव शब्दाश्रयत्वं युक्तं शब्दोत्पत्तावकाशस्यैवाधिकस्योपयोगदर्शनादिति

तस्मादावरणापेततयाकाशद्रव्यं सिद्धमिति अनावरणं चाकाशस्य लिंगं पर्वोवार्योरुक्तमित्या
ह अनावरणं चेति अनावरणमवकाशः यदि हि अवकाशरूपमाकाशं न स्यात् तदा मूर्त्तद्र
व्येषु स्यात्स्यादिषं तस्मिन् जलादिप्रवेशो नोपपद्येत अथाभावरूपावकाशस्तर्हि भावस्यामा
वाश्रितत्वनियमेनाकाशसिद्धिः अस्याभिरभावानभ्युपगमाच्च अन्नादिभावकोशोनसंभ
वति आवरणासंभवादित्युक्तमिति आकाशस्य विभुत्वमपि प्रसंगात्साधयति तद्येति म
र्त्तत्वं परिच्छिन्नत्वं अनावरणमनावृतत्वं असमानदेशत्वमिति यावत् तथा चान्यत्र यथा
वीजजलादिस्य लेमूर्त्तस्य परिच्छिन्नस्य मूर्त्तांतरासमानदेशत्वदर्शनात् घटादिसमानदेशक
स्याकाशस्य विभुत्वं सिद्धमिति आकाशस्य परिच्छिन्नत्वे मूर्त्तयोः समानदेशताविरोधादित्यर्थ
ः क्वाचित्कस्तु तथा मूर्त्तस्यापीत्यपि शब्दः प्रामादिकः असर्वासंभवात् आकाशस्य विभुत्वे चा
काशवत्सर्वगतमूर्त्तिमत्प्रतिरुत्सादयः प्रमाणमिति तन्वाकाशस्य विभुत्वे कथं कार्यत्वं व्य
तिकर्त्तेवागामि भाष्येप्याकाशपरमाणुकथनमिति चेत् उच्यते आकाशांशस्तंतुः करणवत् वैशेषि
कानां व्यपि स्यादिव वा कार्यकेरणरूपेणाद्विविधं तत्र कारणाकाशं तमोगुणविशेषत्वेनम्र
द्धिपते तदानीमाकाशतामसेज्ञ शब्दादिविशेषगुणाभावात् कारणाप्यपि स्यादिवत् तच्च कारणा

काशंगुणंतत्र संयमाद्यं सदंशात्तस्माद्देशाद्व्यज्ञानतयोत्पाद्येहरूपेण परिणमते श्रोत्रं द्विविधमत
मंत्यनेशतो द्विविधरूपेणतत आकाशसंघातेन पृथिवीवदेषमहाभूताकाशमहंकारापेक्षयापरि
च्छिन्नंवायोरावरणमस्यघतइतिएतेनांतःकरणेन्तिरपिव्याख्याता इत्यमपिश्रुतिस्मृतिप्रसि
द्धप्रकृतेःकार्यकारणाहसत्त्वमवगंतव्यं आकाशंप्रत्याश्रयश्रोत्रंप्रमाणंप्रदर्शयति शब्दग्र
हणानुमितमितितदेवविवृणोतिबाधिर्यइति एतेनचक्षुरादिष्वप्यन्वयव्यतिरेकौप्रमाणमिति
सूचितं अंतःकरणेतस्मत्याद्यन्वयव्यतिरेकौप्रमाणमिति इदानींसत्त्वंयोगपतिश्रोत्रेतिसंबं
धश्रात्मामितिव्याख्यातः उपलक्षणंचैततत्त्वग्वातयोश्चक्षुस्तेजसोरसनोदकयोर्घ्राणपृ
थिव्योःसंबंधसंयमाद्दिव्यंत्वगादीन्यपिबोध्यं दिव्यत्वंचतन्मात्रादिसूक्ष्मगोचरसंयमनैरपे
क्ष्येणस्वभावादेवतन्मात्रादिरूपसूक्ष्मशब्दादिग्राहकत्वमिति कायाकाशयोःसंबंधसंयमा
त् लघुतूलसमापत्तेश्चाकाशगमनं चकारेणविकल्पार्थकः कीदृशःसंबंध इत्याकांक्षाया
माह यत्रेतिपत्रासनादौशरीरंतिष्ठतितत्रशरीरावच्छेदेनाप्याकाशंतिष्ठतितत्रहेतुः तथाका
शस्यावकाशदातृत्वादिति अतःकायस्याकाशेनसंबंधः प्राप्तिरूपोव्यापनमितियावदित्य
र्थः तत्रेतितत्रसंबंधे कृतसंयमः तत्संबंधंजित्वासाक्षात्कृत्यस्वेच्छाधीनंकृत्वालघुर्भवती १७३

त्यागामिनान्वयोभविष्यति द्वितीयहेतुंव्याचष्टे लघुष्वित्यादिना जितसंबंध इत्यनेनसमा
पत्तितत्स्यात द्ब्रजनतोजितसंबंधः स्वापत्तीकृतकायाकाशसंबंध इत्यर्थः आकाशगता
वुपायद्वयस्यधारणंक्रममाह लघुरित्यादिना प्रथमंलघुर्भवति ततोऽलघुतयाजलेपृथि
व्यामिवपद्भ्यांसंचरतीत्यादिः क्रम इत्यर्थः सुगमम न्यत् बहिरकल्पितावृत्तिर्महाविदेहाततः
प्रकाशावरणक्षयः योगशास्त्रोक्तसंयमविशेषात् वक्ष्यमाणाबहिरकल्पितावृत्तिर्महाविदे
हाख्यासिद्धिर्भवतिततश्चसत्त्वप्रकाशावरणभंग इत्यर्थः महाविदेहाव्याख्यातुंआदौसामा
न्यविदेहामाह शरीरादितिमनसोबहिर्वृत्तिलाभोअस्वशरीरस्येवबहिर्वर्त्तनांसंकल्पादिव
शतासाचबहिरधिष्ठानरूपाधारणाविदेहासामान्यमित्यर्थः धारणेतिचतांनिकींसंज्ञांत
स्याभ्यंतरभेदमाह सायदीति शरीरनिरपेक्षेतिस्वकशरीर इत्यर्थः अनपायिपरशरीरएवे
शोलिंगदेहस्यभवतीतिप्रसंगादाहयथेति ततइत्यादिसूत्रावयवंव्याचष्टे ततश्चेति क्लेशे
तिक्लेशाश्चकर्मचविपाकत्रयंचपदज्ञस्तमोमूलकंसत्त्वस्यावरकं तस्यचसमूलस्यक्षयोभव
तीत्यर्थः तेषांक्षयेचनिरावरणंयोगिनश्चित्तंस्वेच्छयाविहरतिविजानातिचेतिचशब्दः स्वो
क्तपरशरीरावेशंसमुच्चिनोति तदेवंपरिणामत्रयसंयमादित्यारभ्योद्ध्वांवचनविषयकसंयमा

नोज्ञानक्रियारूपाः सिद्धय उक्ता इदानीं वितर्कविचारेत्यादिसूत्रैः ग्राह्यसमापत्तयः प्रकृतेषु ग्रही
तृग्रहणग्राह्येषु ये संयमास्तेषां सिद्धयो वक्तव्याः तत्र ग्रहीतृग्रहणयोः ग्राह्यनिरूपणाधीनत्वादादौ
ग्राह्यविषयकसंयमस्य सिद्धिमाह स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः स्थूलं च
स्वरूपं च सूक्ष्मं चान्वयश्चार्थवत्त्वं चेति स्थूलसूक्ष्मान्वयार्थवत्त्वानि तेषु संयमात्साक्षात्का
रपर्यन्तात् तत्तद्रूपाणां जयो वशवर्त्तिता भवतीत्यर्थः स्थूलं व्याचष्टे तत्रेति सामान्यविशेषस
मूहरूपाणां पृथिव्यादिपंचभूतानामेकदेशाः शब्दादयो विशेषा धर्मधर्म्यभेदात् तदुक्तं
पदार्थो वक्ष्यमाणैराकारादिभिर्धर्मैः सह स्थूलशब्देन शास्त्रे परिभाषिता इत्यर्थः नन्वाश्रया
वर्त्तेनापि विशेषपदं ते च विशेषाः षड्जगान्धारादयः शीतोष्णादयो नीलपीतादयो मधुराम्ला
दयः सुरभिदुर्गन्धादयश्चेति एते हि नामकर्मभिरवान्तरं विभज्यन्त इति विशेषाः आकारादय
श्च धर्माः पृथिव्यादीनां कणभक्षशास्त्रे परिपठिताः यथा आकारो गौरवं रौक्ष्यं वरणं स्थैर्यमेव
च वृत्तिभेदः क्षमा कार्श्यं काठिन्यं सर्वभोग्यता स्नेहः सौक्ष्म्यं प्रभा शौक्ल्यं मार्दवं गौरवं च यत्
शैत्यं रक्षा पवित्रत्वं संधानं चौदका गुणाः ऊर्ध्वभाक् पाचकं दग्धृ पावकं लघु भास्वरं प्रध्वंस्यो
जस्वि वै तेजः पूर्वाभ्यां भिन्नलक्षणं तिर्यग्यानं पवित्रत्वमाक्षेपो नोदनं बलं चलमच्छायता चौ १७४

रौक्ष्यं वायोर्धर्माः पृथग्विधाः सर्वतोगतिरव्यूहोऽविष्टंभश्चेति ते त्रयः आकाशधर्मा व्याख्याताः पूर्वेभ्यो
वैलक्षण्या इति आकारोऽवयवसंस्थानं वृत्तिः सर्वभूतधारता भेदो विदारणं क्षमा सहिष्णुता धा
रणसामर्थ्यमिति यावत् रक्षा आवरणादिना रक्षकत्वं आक्षेपः पातनं सर्वतोगतिर्विभुत्वं अव्यू
हः सर्वपदार्थानां प्रविरलीकरणं अविष्टंभोऽवकाश इति प्रथमं रूपमिति सूत्रोक्तपंचरूपेष्वप
रमित्यर्थः स्थूलं व्याख्याय स्वरूपं व्याचष्टे द्वितीयं रूपमिति स्वसामान्यं स्वस्वसामान्यमिति
साधारणलक्षणं कस्य किं सामान्यं तद्दर्शयति मूर्त्तिर्भूमिरित्यादिना मूर्त्तिः सांसिद्धिकं काठिन्य
तद्योग्यता पृथिवीत्वजातिः कार्यरूपेणाकारस्याप्यनेकत्वादिति अत्र सामान्यविशेषयोरभे
प्रतिपादनाय मूर्त्तिर्भूमिरित्याद्यभेदनिर्देशः कस्य विशेषस्येदं सामान्यमित्याकांक्षायामाह
अस्येति शब्दादयः पूर्वोक्ताः स्थूलतारमंदादिभेदेन सामान्यस्य जातेरेकदेशा व्यावर्त्तकतया
विशेषा इत्यर्थः अत्र पूर्वाचार्यसंवादमाह आह तथा चोक्तमिति एकजातिसमन्वितानामेषां
पृथिव्यादीनां शब्दादिधर्ममात्रेण व्यावृत्तिः सजातीयेतरादित्यर्थः एकजातिसमन्वितानामि
ति समूहे समूहिव्यपदेशाभिप्रायेण प्रयोगः येतु वैशेषिकाः सामान्यविशेषयोरन्यमेव द्रव्यं म
न्यन्ते न तयोरभेदमपि तन्मतात् द्विविधस्वसिद्धान्तं दर्शयति सामान्येति अत्र दर्शने सामान्यवि

शेषयोः समूहो द्रव्यं अतिरिक्तावयव्यभ्युपगमेपि तयोरभेदस्याप्यभ्युपगमात् अन्यथा घटो
महत् तंतुः पटः शुक्लः पटद्रूपादिभेदप्रत्ययानुपपत्तिरित्यर्थः ननु समूहमात्रस्य द्रव्यत्वे वनस्या
पि कद्रव्यत्वापत्तिरित्याशंकां परिहर्तुमादौ समूहस्य द्वैविध्यमाह द्विष्ठो हीति द्वाभ्यां प्रकाराभ्यां ति
ष्ठतीति द्विष्ठः तत्रैकं प्रकारमाह प्रत्यस्तमितेति प्रत्यस्तमितः शब्देनानुपस्थापितो भेदो वांतरवि
भागो येषां अवयवानां तादृशेष्ववयवेष्वनुगत इत्यर्थः तस्योदाहरणं चतुष्कमाह शरीरमिति
आद्यं द्वयमेकद्रव्यरूपस्य समूहस्योदाहरणं अंत्यद्वयमनेकद्रव्यरूपसमूहस्येति भेदः पृथा
दीनविशिष्टस्यातिरिक्तत्वाभिप्रायेणावयवानुगतत्वमुपपादनीयं द्वितीयं समूहस्य प्रकारमा
ह शब्देनोपात्तेति अस्योदाहरणं उभय इति अत्रोभयशब्दवाच्यस्य समूहस्यावांतरभेदो दे
वमनुष्यशब्दाभ्यामुपात्तो बहुवचनाभ्यां च तयोरप्यनेकभेदा उपात्ता इति शब्देनोपात्तभे
दत्वे संक्षेपात्स्वयमाह समूहस्य देवा इति भागो भेदः ताभ्यां भेदाभ्यां सर्वेति स च द्विविधोपि
समूहो भेदाभेदाभ्यां प्रयोक्तुमिविवक्षितो भवति आम्राणां वनमिति षष्ठ्या भेदेन आम्रव
नमिति च कर्मधारयाद भेदेन विवक्षा एवमन्यत्रापि तथा च समूहसमूहिनो र्भेदाभेदौ स्त इ
तिप्रतिपादितं स पुनरिति स द्विविधोपि समूहः पुनर्द्विविधो भवतीति द्वैविध्यमेवाह युतेति हलि १७५

कादिष्वपि सयुक्ततया संबद्धतया सिद्धा अवयवा यस्य समूहस्य यथा वनादेः स तथा अयुतेति अ
युतसिद्धावयवः समूहः संघातस्तस्य विवरणं शरीरमित्यादि लौकिकेषु संयुततया एकीभावेने
व सिद्धा अवयवा यस्य समूहस्य शरीरवृक्षादेः स तथेत्यर्थः परमाणुरिति परमाणूनामपि पंच
तत्वादितन्मात्रात्समूहता या वक्ष्यमाणत्वादिति भावः तदेवं समूहभेदान्प्रदर्श्य तेष्ववयवि
द्रव्यरूपे समूहे विशिष्याव धारयति अयुतेति संयोगविशेषावच्छिन्नेष्ववयवविशेषेष्वनु
गतः सामान्यविशेषसमुदायत्वमात्रमिति उपसंहारो ऽवयव्याख्यं द्रव्यमित्यर्थः अवयवसा
धारणं तु सामान्यतो द्रव्यलक्षणं सामान्यविशेषसमुदायत्वमात्रमिति उपसंहरति एत
त्स्वरूपमित्युक्तमिति एतत्सामान्यं स्वरूपशब्देन परिभाषितमित्यर्थः स्वरूपपरिभाषावशि
ष्टतामात्रेण विशेषात्यागमापापितयान्द्रव्यस्य स्वरूपाणीति यत्तु पूर्वपादे स्थूलस्वरूपेण
कीकृत्यावयविद्रव्यमेव वितर्कानुगतयोगस्य विषयः स्थूलमित्युक्तं तल्लौकिकं स्थूलव्यवहा
रानुसारेण अत्र तु तांत्रिकव्यवहारेण तस्यैव द्विधा विभागः एवमेव विचारानुगतविषयस्य
सूक्ष्मस्यै बाह्यसूक्ष्मादित्रैविध्यं वक्ष्यतीति द्रष्टव्यं स्वरूपं व्याख्याय सूक्ष्मं व्याख्यां नयष्कृति
अथेति एषां भूतानां उपादानमात्रमिति तत्र सूक्ष्मपरिभाषाबीजमाह भूतकारणमितिसा

क्षात् कारणत्वमेव हि सूक्ष्मत्वमत्र विवक्षितमित्याशयः अत कारणत्वप्रकारं दर्शयति तस्येति
तस्य भूतस्य एकस्वरूपो वयवः परमाणुः सोपि च घटादिवदेव सावयवः अन्यथास्य स्थूलत्वा
नुपपत्तेः शांतघोरमूढत्वरूपविशेषानुपपत्तेश्च इत्येवमित्यतः सर्वतन्मात्राण्येव भूतकारणा
नि अवयवांतरासंभवादित्यर्थः उपसंहरति एतत्तत्तोयमिति एतत्तन्मात्रं तत्त्वोयं भूतानांरूप
मित्यर्थः अन्वयाख्यं चतुर्थं रूपमाचष्टे अथेति अथानंतरमुच्यत इति शेषः त्रिविधा गुणाः
वान्वयशब्देनोक्ताः तत्र हेतुः कार्यस्वभावानुपातिन इति कार्यरूपोपश्लेषो भावः स्वात्मकः
परार्थः तत्रानुगतान्वयार्थ इत्यर्थः ननु भूतेषु प्रख्याशीलस्य सत्त्वस्यानुगमे किं प्रमाणमि
ति चेदनुभव एव हि सोयम् न रसादिभूतयोन्वयव्यतिरेकौ चेति प्रतीतिः प्रकाशात्मकत्वपासानि
कानि हि भूतान्यक्षरादीनि अन्नस्य वासुपचयापचयाभ्यामुपचयोपचयवंति वस्यं तेन्नतः
वपित्यादिभूतेषु मनन्मात्रादिकं तदुपष्टंभकसत्त्वं वानुगतमित्युत्तीयत इति पंचमं रूपमाह अथे
षामिति गुणेषु चवर्त्तमानं यद्भोगापवर्गार्थत्वं भोगविवेकख्यातिरूपं तदेवं पंचमं रूपमर्थवत्वा
ख्यमित्यर्थः नन्वेवं गुणेषु वर्त्तमानमर्थवत्त्वं कथं भूतानां रूपं स्यात्तत्राह गुणास्तन्मात्रेति नन १७६
भोगापवर्गौ शब्दाद्युपलब्धिविवेकख्याती ते चांतःकरणवर्त्तिने न साक्षात्संबंधिति चेन्न अस्म

नागतावस्थायां वासनारूपेणानागतयोरपि भूतकाले गुणेष्वेवावस्थानात् कारणात्मनैवोक्तार्थेष्व
नुगतयोरभिव्यक्तेरिति पंचरूपाणि व्याख्याय सूत्रवाक्यार्थमाह तेष्विति तेषु स्वरूपदर्शनं वसंयमस्य
जय इहेतन्निर्देशः तत्र जयो वशीकारो गुणेष्वेवावस्थानात् कारणात्मनैवोक्तार्थेष्वनुगतयोरभिव्यक्ते
रिति पंचरूपाणि भूतेषु इदानीमुत्पन्नेषु इदानीं तनिषु स्थूलभूतेष्वित्यर्थः तन्मात्रादिषु पंचरूप
त्वाभावात् इदानीं भूतेष्विति उक्तं स्वरूपदर्शनं च संयमस्य जय इहेतन्निर्देशः तत्र जयो वशीकारः तत्र
पंचेति एकैकमात्ररूपजये हि गौणो भूतजयः साकल्येन जयादिति भावः वशीकारमेव कार्यद्वारा
लक्षयति तज्जयादिति भूतप्रकृतयो भूतकारणानि त्रिगुणात्मकपुरुषार्थपर्यंतानीत्यर्थः ननु त
न्मात्राण्येव केवलानि गुणपुरुषार्थयोरपि संयमेन साक्षात्कृतत्वादिति भूतजयस्य फलं प्रतिपाद
यति ततोणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च तत्र त्रिषु मध्ये अणिमाद्यष्टसिद्धीर्व्याच
ष्टे अणिमेति स्वेच्छया परमाणुपरिमाणशरीरो भवतीति तदणिमा लघुत्वमात्रेण तूलादिवदवयवा
पचयेन सौक्ष्म्यं देहस्य भवति भूतप्रकृतिवशित्वादिति एवं सर्वत्र अणिमाद्यष्टशक्तिगणिताः
अणिमा महिमा चैव लघिमा प्राप्तिरिन्द्रियैः प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता गुणेष्वसंगो व
शिता यत्र कामस्तदवस्यतीति लघिमानमाह लघुरिति गुरुतरशरीरो योपीकात् तूलवल्लघुर्भवतीत्यर्थः

स्पृशतीति। भूमिष्ठ एवेति शेषः अवयवोपचयेनांगुलिदैर्घ्यादिति एताभ्यतस्तः स्थूलसंयम
सिद्धयः स्वरूपसंयमस्य सिद्धिमाह प्राकाम्यमिति इच्छानभिघात इति तस्यामिच्छायां नास्य रूपं
भूतस्य रूपैर्मूर्त्यादिभिर्विहन्यते भूतस्वरूपाणां जितत्वादित्यर्थः तस्योदाहरणं भूमाविति उन्मज्जु
ति जलमिव भूमिमद्धे यो तिष्ठति निमज्जति जल इव भूमौ प्रविशति चेत्येवमादिः प्राकाम्यमित्य
र्थः सूक्ष्मसंयमस्य सिद्धिमाह वशित्वमिति भूतभौतिकेष्विति भूतेषु पृथिव्यादिषु भौतिकेषु तत्
कार्येषु समस्तमहाभूतेषु वृक्षांडादिषु चेति व्याप्तिपं जगद्व्यापारवन्तुमिति वेदान्तसूत्रेण सि
द्धेष्वादिसर्गसामर्थ्याभाववचनादिति वशी भवति स्वेच्छया परिणामने समर्थो भवति तत्कारण
तत्कारणविजयात् तथा तेषामवश्योपि भवति रागादिनेत्यर्थः अन्वयसंयमस्य सिद्धिमाह ई
शित्वमिति तेषामिति तेषां भूतानां तत्कारणद्वारकोत्पत्तिविनाशयोर्व्यूहाव्यूहसंस्थानविशेषेच
समर्थो भवति भूतानां मूलप्रकृतिविजयादित्यर्थः अर्थवत्त्वसंयमस्य सिद्धिमाह यत्रेति यत्र
कामावसायित्वमिति तान्त्रिकी परिभाषा पुराणेष्वप्येवमवगन्तव्या भूतप्रकृतीनां गुणानां मात्रा
दीनामवस्थानं परिणामविशेषः विजितार्थसंबंधो हि योगी यच्च यदर्थतयाय संकल्पय
ति तत्तद्वस्तु तदर्थकमेव भवति विषमप्यमृतस्यार्थे संकल्प्य भोजयन्जीवयतीत्यर्थः सत्याकरो १३७

तीति नन्वेवं योगी जगदपि नेतः कुर्यात् धर्ममप्यधर्ममित्यव्यवस्थैव स्यादित्याशंक्याह नच
शक्तोपीति यद्वेयद्वेयोगिव्यवहारानुसारी वयोगी व्यवहारतिक्रमव्यानत्तत्वविरोधेनव्य
वहारसंभवात् विरोधमवदर्शयति अन्यस्येति पूर्वेषां तथा भूतेषु पश्चाद्भवेषु वसकलसादि
तिषाकार्थः तथा च श्रुतिः धाता यथापूर्वमकल्पयदिति स्वनियमपालनार्थं अतर्योमिणा
तथैव सिद्धः प्रेयत इति दूषणस्य उपसंहरति इत्यष्टावैश्वर्याणीति अणिमाद्यष्टसिद्धिव्याख्याप
रणायैव प्राकाम्यमत्र भाष्यकारैः कथितं नत्वत्रसूत्रे प्राकाम्यमणिमादिमध्ये विवक्षितं त
द्धर्मानभिघात इत्यनेनैव प्राकाम्यग्रहणेन च यो नरुक्तापत्तिरिति कायसंपदित्यादिसूत्रं प्रसि
द्धाष्टसिद्धिरूपविवेचनानपेक्षया केवलां कायसंपदं सूत्रकारो विवृणोतीति रूपलावण्यसंहन
नत्वानि कायसंपत् यतस्येच संहननं प्रहारोपस्येति वज्रवत्तिविडो दृढः संघातो यस्येति वायज्ञ
संहननः भाष्यस्थं गमं गाह्य संयमस्य सिद्धय उक्ताः ग्रहणसंयमस्य सिद्धीराह ग्रहणस्वरूपास्मि
तान्वयार्थवत्वसंयमादिंद्रियजयः ग्रहणं च स्वरूपं चास्मिता चान्वयश्चार्थवत्वं चेतेषु संयमात्सा
क्षात्कारव्यतेतात् तत्तद्रूपाणामिंद्रियाणां जयो भवतीत्यर्थः ग्रहणं व्याचष्टे सामान्येति वृत्तिरालोचनं
विषयाकारपरिणामविशेषः चिंतावधारणाभिमानसंशयरूपादंतःकरणानामसाधारणावृत्ति

च तच्छब्दादिलक्षणो दर्शनस्पर्शनादिना मायद्यपि सोपि स्मरणाद्यन्तरेणैव नांतःकरणस्यैव त
थापि चक्षुराद्युपष्टंभेनैव भवतीति कृत्वा दर्शनादि चक्षुरादीनामच्यते तथा चोक्तं सांख्ये सांतःक
रणा बुद्धिः सर्वं विषयमवगाहते यस्मात् तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणीति ननु आलोच
नशब्दार्थो निर्विकल्पकज्ञानं चक्षुरादिमात्रवृत्त्यैवेति कल्पनीयं एवं सति चक्षुरादिनेन्द्रियैर्विशिष्टस्या
पि ग्रहणं भवात् सर्ववृत्तीनां चित्तनिष्ठत्वस्य भाष्ये प्रोक्तत्वाच्च येन बौद्धा विशेषस्य मनोमात्रगोचर
त्वमभ्युपगम्येंद्रियवृत्तिं सामान्यमात्रविषयिणीमाहुस्तान् प्रत्याचष्टे न चेति न च न त इंद्रियं सा
मान्यमात्रेण ग्रहणमाकारो रूपं यस्य तथाभवतीत्यर्थः तत्र हेतुः कथमित्यादि स विषयगतो
विशेष इंद्रियेणानालोचितः कथं मनसानुव्यवसीयेत यस्येत मनसो बहिरस्वातंत्र्यात् अस्मदा
चक्षुराद्यगोचरार्थानामपि मनसा विशेषग्रहणप्रसंगादित्यर्थः इंद्रियाणां द्वितीयरूपमाह स्वरू
पमिति प्रकाशात्मनो बुद्धिसत्त्वस्य कार्यायेः यतसिद्धावयवभेदाः सात्त्विकाहंकाररूपास्तेष्व
नुगतः सामान्यविशेषरूपयोः समूहो द्रव्यमिंद्रियमित्यर्थः तत्र विशेषाः ग्रहणरूपानीलपीता
द्याकाराः परिणामभेदाः सामान्यं च चक्षुष्ट्वादीति ननु यदि सत्त्वदत्रापि स्वरूपे केवलं सामान्यमे
वोक्तं तस्य ग्रहणरूपत्वप्रयमस्वस्याप्यन्नैव प्रवेशापत्तेरिति चेत् सत्यं सामान्यप्राधान्येनैवस्व १८०

रूपमत्रापि विवक्षितं तथापि भूतवदिंद्रियस्यापि सामान्यविशेषाभ्यामत्यंतभेदस्य प्रतिषेधा
येव समुदायो द्रव्यमित्युक्तं तेषां तृतीयं रूपमिति तेषामिंद्रियाणां तृतीयं रूपमस्मितापदशब्देनोक्तो
हंकारः तत्राभिमानात्मवृत्तिभ्रमनिरासाय अस्मितालक्षण इति विशेषणं अस्मितावृत्तिक इ
त्यर्थः ननु कथमहंकार इंद्रियाणां रूपमित्याकांक्षायामाह तस्येति यथा तन्मात्रस्य सामान्य
स्य भूतानि विशेषास्तथा अहंकारस्य सामान्यस्य चक्षुरादीनि विशेषाः कार्यत्वात् अतस्तदिंद्रियेष्वनु
गततया अहंकार इंद्रियाणां रूपं भूतानां तन्मात्रवदिति भावः इंद्रियाणां चतुर्थरूपमाहवत
र्थमिति महत्तत्त्वस्यापि चतुर्थरूपमध्ये प्रवेशाय व्यवसायात्मका इति गुणानां विशेषणं व्य
वसायात्मबुद्धिरूपेण परिणतास्तद्विशिष्टा इत्यर्थः एतेन पूर्वोक्ते भूतजयसूत्रेप्यन्वयाख्यच
तुर्थरूपमध्ये महदहंकारयोः प्रवेश इत्युक्ते पंयुक्तिसाम्यादिति येषामिति साहंकाराणि सां
तःकरणानि पंचमं रूपमाह गुणेष्विति इंद्रियप्रकृतिगुणेष्वित्यर्थः सूत्रवाक्यार्थव्याख्येयं च
त्वि नियथाक्रमं ग्रहणादिक्रमेण संयमः कार्य इति शेषः ततश्च तत्र तत्र जयं कृत्वा पंचरूपजया
त्सर्वरूपैरिंद्रियजयस्तद्वशीकारो भवतीत्यर्थः ततश्च वत्सानुसारिण्य इव गावोऽस्य संकल्पानुवि
धायिन्य इंद्रियप्रकृतयो भवंतीति शेषः इंद्रियजयात्सिद्धीराह ततो मनोजवित्वं विकरणभावः प्र

धानजयश्च व्याचष्टे कायस्येति अनुत्तमो मनोवच्छीघ्रतरो कर्मेन्द्रियवृत्तिविजयाद्भवति विक
रणभावस्य स्वरूपमाह विदेहानामिति स्थूलदेहसंपर्करहितानामित्यर्थः इन्द्रियाणामिति क
रणसामान्योपलक्षणं विकरणभावशब्दस्य योगार्थमाह अभिप्रेतेति अभिप्रेतकालदेशविषया
पेक्षस्तदपरिणामी यत्र च देशादिषु वृत्तिलाभं इच्छति तेन तत्रैव भवतीत्यर्थः तथा च विकरणभावो
विकीर्णतास्वभावोऽप्यायितेति यावत् एवं विकरणभावोपपन्ना योगिनस्तत्र स्थाने स्थाने वि
देहा इत्युक्ताः सर्वासां व्यक्तिभेदेनानन्तानां भूतेन्द्रियप्रकृतीनां सत्वादिगुणानां तद्विकाराणां च
सर्वेषां स्वेच्छयानुविधाने प्रधानजय इत्यर्थः ननु भूतप्रकृतिजयो भूतजयो वाक्यमिन्द्रियज
यादिति चेत् न भूतजयस्य पूर्वभूमिकायामेव तयोर्जितत्वे नोत्तरभूमिकायामेकीकृत्य सं
यकथनादिति एत एव च प्रधानजयिनः पूर्वस्यां नैस्याने प्रकृतिलया इत्युक्ताः प्रकृत्यासंहैकृता
गता इति प्रकृतिलयाः प्रकृतिवशिनः एतास्तिस्त्र इति अत्र सिद्धिर्विशेषाणामेव मधुप्रतीकसं
ज्ञावगमादायोगभूमिवत्तद्वपस्य प्रयोगेवपश्चाद्दृश्यमाणत्वाद्वयोगभूमेर्मधुप्रतीकसंज्ञेति क
स्यचिद्व्याख्यानमयोग्यमूलकत्वादुपेक्षणीयं ततरतिसौ त्रयसंख्यावष्टे एताश्चेति न विन्द्रियजये १७८
कुर्यं प्रकृतिमहदहंकाराणां जय इति चेन्न इन्द्रियरूपेष्वेति मद्रूपत्रयत्वात्तेषामिति तदेवं त्वाद्यस

हणसंयमयोः सिद्धिमुक्त्वा गृहीतृसंयमस्य सिद्धिमाह सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठा
तृत्वं सर्वज्ञातृत्वं च मात्रशब्देन संयमरूपा ख्यातिर्लभ्यते तथा सत्त्वपुरुषान्यतासंयमस्य धर्मधर्म्यभेदा
त् तद्वतश्चित्तस्य सर्वभावेषु प्रकृतितत्कार्यपुरुषेषु च स्वामिवदधिष्ठातृत्वं स्वेच्छया विनियोक्तृत्वं देहवद्भ
वति तथा प्रकृतिपुरुषादि सर्वज्ञातृत्वं च भवतीत्यर्थः अत्रापि संयमः साक्षात्कारपर्यंतो ध्येयः संय
मनिष्पत्तेरेव सिद्धिहेतुत्वात् ननु परार्थात्स्वार्थसंयमादिति सूत्रोक्तसंयमतोऽस्य को भेदः येन तत्र पुरु
षज्ञानं सिद्धिरत्र चाधिष्ठातृत्वं सिद्धिरिति सिद्धिभेदः स्यात् उच्यते तत्र पौरुषेयप्रत्यये स्वाधारभव
रूपे परिच्छिन्नतया च संयम उक्तो न तु अपरिच्छिन्ने पुरुषे अत्र तु तेन संयमेन ज्ञाते परिपूर्णे पुरुषे बु
द्धिविवेकसंयम उच्यते इति विशेष इति ननु सत्त्वेति विशेषणं न मनुचितं गुणपुरुषान्यतेत्यस्यैव
वक्तुमुचितमिति चेत् न रजस्तमोभ्यां पुरुषे साक्षादविवेकाभावात् बुद्धिसत्त्वाविवेकद्वारैव देहेन्द्रि
यादिष्वविवेकात् स्वप्नवाधियोग्यस्या सचेतने देहेन्द्रियविवेकस्य योगारंभकाल एव सालवे
ण्यमध्यत्त्वाच्चेति तदिदमत्र व्याचष्टे निर्धूतेति परवैशारद्यं परमस्वच्छता अतिसूक्ष्मवस्तुप्रति
बिंबोद्ग्रहणसामर्थ्यमिति यावत् परमवशीकारसंज्ञाया च परमाणुपरममहत्त्वान्तोऽस्य वशीकार इत्यु
क्तरूपेण प्रतिष्ठस्य रूपप्रतिष्ठस्य सर्वभावाधिष्ठातृत्वं विवृणोति सर्वात्मान इति सर्वात्मान इत्य

स्यविवरणं अवसानमव्यवसेयात्मका इतिकरणात्तद्विषयात्मका इत्यर्थः अशेषबद्धस्येति संकल्प
मात्रेण पुरुषैः संयुक्ता असंयुक्ता अशेषभोग्यवस्त्वाकारेण परिणतार्हत्वोपतिष्ठंते योगिनं
तत्त्वहेतुगर्भं विशेषणं स्वामिवंद्वेत्तृत्वमिति यतो लोभोक्तृत्वात्प्रेरकः अतस्तं अयस्कांतलोह
वदुपतिष्ठंतइत्यर्थः यद्यपतौ सो स्वामी ईश्वरः क्षेत्रज्ञश्च परिणामद्वेत्ताणि गुणादीनि प्रवर्त्ते
यत्नि परिणामनप्रकारैर्जानातिचेत्यर्थः यद्यपि सर्वे पुरुषाः सर्वगुणानामविशेषेण स्वामिन
स्तथापि मायादिप्रतिबंधात्सर्वे गुणा न सर्वदा सर्वपुरुषान् भोग्यत्वेनोपतिष्ठंत इति भावः त
थाच श्रुतिः सयदि पितृलोककामः संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्यादिरिति क्लिष्टे ऐश्वर्येह
योसिद्धिं व्याख्याय ज्ञानैश्वर्यरूपां व्याचष्टे सर्वज्ञातृत्वमिति सर्वात्मनां सर्वपुरुषाणां बद्धम
क्तेश्वराणां शांतादिरूपधर्मविशिष्टगुणानां नाचैकदैव ज्ञानं सर्वज्ञातृत्वमित्यर्थः तस्य संज्ञा
विवेकजमिति विवेकेन जायमानं यथा यथा विशोकाख्या इति यावत् अथवा प्रकृतिपुरुषविवेक
ज्ञायमानमित्यर्थः सान्वयं संज्ञेति विशोकसंज्ञायामन्वर्थतामाह यां प्राप्येति क्षीणक्लेश
बंधनत्वात् शोकस्य नुत्पत्तेति भावः सर्वसिद्धिमूर्ध्नि विवेकख्यातिरूपसंप्रमस्यपरवैराग्यद्वारा १८०
मोक्षाख्यं सिद्धांतरमाह तद्वैराग्यादपि दोषबीजक्षये कैवल्यं अपिशब्दः कैवल्यमिमनेनान्वेति

तथाच विवेकख्यातिनिष्ठात एव विवेकख्यातेरेतस्याय योक्ता सिद्धौ च वैराग्ये सति असंप्रज्ञात
योगेन दुःखदोषस्य बीजनामखिलवासनाकर्मणां चित्तेन सह लये सति पुरुषस्य कैवल्यं पुन
र्गुणासंयोगरूपमपि भवतीत्यर्थः वैराग्यप्रकारमाह मदेति क्लेशकर्मक्षयरूपकर्तव्यसमा
प्तौ यदा योगिन एवं भवति एवं विचारो भवति एवं शब्दार्थमाह सत्त्वस्येत्यादिना सत्त्वादिनो
संनिवेशप्रकारणमुक्तो कैवल्ये पुरुषार्थे प्रतिपाद्यतिरावमस्येत्यादिना मभे त्तइत्संतेनम
नभुंक्तइतिवचनात भोगाभावरात्रपुरुषार्थइति स्मर्तव्यं दुःखाभावस्तु परंपरया पुरुषार्थइ
तिभावः इदानीस्त्रार्थमाचष्टे तद्वैषामिति तन् तदायदेस्तुक्तेनान्वयः तदा परवैराग्यावस्था
यां संस्कारस्वरूपाणां दुःखबीजगुणानां सत्त्वादिगुणस्थानां कार्यावस्थामनसि क्लेशादेरूपेणाभिव्य
क्तिस्वभावकानां चरितार्थानां समाप्तपुरुषार्थानां प्रतिप्रसवे मनसा सह लये सति पुरुषस्या
संनिकोगुणवियोगः कैवल्यमभवतीत्यर्थः मोक्षेण पुरुषस्य परिणामनपायं करोतीति तदेति
कैवल्याख्यसिद्ध्यर्थेनो योगिनोपयोक्त वैराग्यवद्दवसाधनांतरमाह अथवा संप्रति कैवल्य
संगत कैवल्यसाधने प्रवृत्तस्य योगिनस्तत्र स्वरूपसंभवे तन्निराकरणप्रकारमाह स्थान्युपनिमं
त्रणे [illegible]संगस्मयाकरणं पुनरनिष्टप्रसंगात् स्थानिनः स्वर्गादिलोकाधिकारिणो देवा इंद्रादयः तेषां

स्वर्गलोकेनयज्ञ्यायोगिनोनिमंत्रणेसतितत्रसंगः प्रीतिः स्मयश्चदेवानांप्रार्थनेनात्मनिकृ
तार्थताभिमानइत्यर्थः तत्रयस्यांभूमिकायांस्मयपयोरकरणमुपायः संगेस्मयेनकाक्षतिस्तत्रा
हसंगस्मयाभ्यांपुनरपिसंसारप्रसंगात् संगः प्रीतिः स्मयश्चदेवानांप्रार्थनेनात्मनिकृतार्थता
भिमानइत्यर्थः तत्रयस्यांभूमिकायांस्थान्युपनिमंत्रणंभवतितांवक्तुंयोगिनांभूमिकाच
तुष्टयमाहचत्वारइति प्रथमकल्पिकस्यस्वरूपमाह तत्राभ्यासीतिप्रवृत्तमात्रंनतुनिष्प
न्नंज्योतिर्ज्ञानंयस्य ततयासवितर्कादिरूपापरप्रत्यक्षवान् ऋतंभरप्रज्ञइत्यर्थः मधुभू
मिकस्यस्वरूपमाहऋतंभरेतिऋतंसत्यमेवबिभर्तीतितस्यापरप्रत्यक्षमेवऋतंतराम
ज्ञात्रपिवक्षितासाचपरिशेषात्निर्वितर्करूपाभूमिकैवतदुत्तरभूमिकानांततीयादावेवा
नभोवादितिप्रज्ञाज्योतिषःस्वरूपमाहभूतेतिऋतंभरप्रज्ञातोस्यविशेषमाह सर्वेष्विति सर्वे
षुभावितेष्वस्यादितेषुनिर्वितर्कादियोगेषुकृतारक्षारूपोवंध्योयेनस तथातथाभावनायेषुउ
त्पादनीयेषुविशोकादिसिद्ध्यादिषुसंप्रज्ञातपर्वतेषुविहितसाधनवानित्यर्थः अतिक्रांत
भावनीयस्यस्वरूपमाह चतुर्थइतिचित्तप्रतिसर्गोऽसंप्रज्ञातसमाधिनाचित्तविलयमात्रक १८१
र्तव्यमवशिष्यतइत्यर्थः प्रज्ञाज्योतिषोस्यविशेषमाह सप्तविधेतिप्रज्ञाज्ञानेतिशेषः उक्तास

योगभूमिषुस्थान्युपनिमंत्रणस्यभूमिमर्यादांप्रतितत्रेतिप्रथमभूमिकायांतावन्महेन्द्रादी
नामेतादृशानुग्रहएवनभवतिततोयचतुर्थभूमिकयोस्तुदेवादयउपेक्षणीयाएवभवंतिअ
तोमधुभूमिकायांद्वितीयायामेवनिमंत्रणंभवतीत्याशयः साक्षात्कुर्वतःस्वस्यैवमधुमती
भूमिकाजातेत्यनुभवतःअनेनभूमिनिष्पत्तिरुक्तानिष्पन्नमधुभूमिकस्येत्यर्थः उपनिमंत्र
णप्रकारमाहभोइहेत्यादिनादेवानांप्रियमिष्टंतेनसंगस्मयाकरणंप्राचष्टे एवमभिधीयमा
नइतिसंगदोषान्विषयप्रीतिजान्दोषान्दोषाविंतनप्रकारमाहघोरेष्वित्यादिनाकुपोमी
संतेनसंगंत्यक्त्वायत्कर्तव्यंतदाहस्वस्तीत्यादिनाभावयेत् कुर्यात्स्मयंविवरणेनाहतत्कार
णदोषमाहएवमहमितिनभावयिष्यतिनचिंतयिष्यतियत्नोपचर्य्यः यत्नप्रतीकार्यः संगस्य
स्मयाकरणस्यफलमाह एवमस्येति सर्वज्ञत्वेपिवैराग्यान्मोक्षइत्युक्तं यदिवैराग्यस्तिष्ठतितदा
तद्रागानिवृत्तयेपूर्ववत्सर्वज्ञतालाघवंसंयमांतरमाह क्षणेत तत्क्रमयोःसंयमाद्विवेकजंज्ञानं
विवेकात्पूर्वसूत्रोक्तात्सत्त्वपुरुषान्यताख्यात् ज्ञायमानंविवेकजंज्ञानंइतरस्मावृत्ततयाक
वैवल्यनामशेषविशेषैःसाक्षात्करणमितियावत् ततक्षण तत्क्रमयोःसंयमादपिभवतीत्य
र्थः प्रतिक्षणंसर्ववस्तुपरिणामतेऽन्यतःक्षणेषुतत्क्रमेषुचसंयमेनसाक्षात्कारेसतिसर्ववस्तु

नांसर्वपरिणामतत्क्रमयोरपिज्ञानात् सर्वस्यवस्तुनोविवेकेनज्ञानंभवतीतिभावःयद्यपिञ्च
पिणाद्ःसूत्रेनास्तितथापितत्स्वविवेकजंज्ञानमित्यागामिभाष्यगम्यःक्षणशब्दार्थंदृष्टांते
नप्रतिपादयतियथेतियथालोष्टादेर्भिद्यमानस्ययस्मिन्नवयवेपरिमाणापकर्षकाष्ठालोप
कर्षावधिःसत्वादिगुणविशेषःपरमाणुःएवंकालस्यापकर्षावधिभूतोऽवयवविशेषःपूर्वा
परांशशून्यस्तस्यैवःक्षणस्यलक्षणांतरमाहयावतावेतिजह्यादित्यनेनैकंलक्षणंसंपद्यतेति
चलक्षणांतरंआरम्भावयवपर्यन्तअवयविद्रव्यस्यदेशसंयोगवडक्षणोनापिकदाचिद्भवति
अवयवानांक्रमेणसंचारादित्युक्तंपरमाणुरितिअनवयविनोदेशस्यक्रिययाअनेकक्षणेन
ज्ञातिनंदेशसंयोगादिकंत्यावर्त्तयितुंचलितइत्युक्तंअत्रदृष्टान्तादिनापरसूत्रेणचसाक्षादेवाचा
र्येणपरमाणुवचनात् वैशेषिकोक्तपरमाणवोव्यस्माभिरभ्युपगम्यन्तेतेचास्मद्दर्शनेगुणश
ब्दवाच्याइत्येवविशेषःनचानेकात्मकपृथिव्यादिभूतपरमाणुरेवात्रवाक्येपरमाणुशब्दार्थो
युक्तःअत्रभूतसूक्ष्मविशेषस्याप्रकृततयाद्रव्यशब्दस्यविशेषपरत्वेप्रमाणाभावात् सावयव
स्यपृथिव्यादिपरमाणोर्निरवयवकालपरिमाणेदृष्टान्तत्वानुपपत्तेश्चनचप्रकृतेरणुपरि १८२
माणसिद्धिःपरंपरयापृथिव्यादिभावापन्नानांगुणानांपरिमाणाकांक्षायांसायंवैशेषिकसिद्धा

णुपरिमाणस्यैवग्रहणौचित्यात्स्वशास्त्रानुक्ततयापरोक्तमविरोधिचेतिन्यायेनपरोक्तपरि
माणस्यैवादर्तव्यत्वात् नचास्मद्दर्शनेगुणस्यप्रकृतेर्विभुत्वमेवावगम्यतइतिवाच्यंअंतः
करणाकाशहेतुगुणानांविभुत्वेनतदुपपत्तेःसर्वगुणानांविभुत्वेसत्याद्यपरिणामहेतुक्षो
भसंयोगाद्यसंभवादितितस्मात्सिद्धमणुपरिमाणाअपिगुणाःसन्तीतितेषुपृथ्वीत्वव्यं
जकगंधाद्यनंगीकारेणास्मात्सिद्धमणुत्वेपृथिवीत्वादिकंनास्तीतिविशेषइति क्षणव्याख्या
यत्क्रमंव्याचष्टेतत्प्रवाहेतितेषांक्षणानांयःप्रवाहःउत्तरोत्तरभावेनावस्थानंतस्याविरल
त्वक्रमइत्यर्थःइदानींक्षणातिरिक्तःकालोनास्तिमुहूर्तादिरूपोमहाकालपर्यन्तइतिप्रसंगा
त्स्वशास्त्रसिद्धांतमवधारयति क्षणतत्क्रमयोरितिक्षणेषुतत्क्रमेषुचाव्यवहितानंतर्यरूपे
ऽवस्तुभूतःसमाहारेमिलनंनास्तिअतोमुहूर्ताहोरात्राद्योबुद्धिकल्पितसमाहाराणेत्यर्थः
नन्वेवंस्थूलकालाभावेकथंलोकानांतद्यापिबुद्धिरितितत्रविकल्पेनयास्मायतेसखल्व
यमिति नन्वेवंक्षणोपिविकल्पमात्रोभवतुकालव्यवहारविशेषात्क्षणव्यवहारस्यचपरमा
णुक्रियादिभ्यःअवसंभवादितितत्राह क्षणस्तिति क्षणस्त्वसौवस्तुकोटौप्रविष्टःयतः
क्रमावलम्ब्यंक्रमेणलक्ष्यतेआश्रीयतेक्षणस्यप्रतियोग्यनुयोगिघटितत्वात्क्रमस्येत्यर्थः

तत्रहेतुमाह क्रमश्चेति क्रमोह्यानन्तर्यरूपइत्यर्थः ननुयः क्षणो वस्तुभूतः सकिंस्वरूपइत्याकां
क्षायामाह तंकालेति तस्य च कालस्य क्षणद्व्यावस्थापिरूप्यान्तरेभ्योविभाग इतिभावः कालनि
त्यत्वश्रुतिस्मृतयस्तु प्रवाहरूपकालपराः स च क्षणसमूहः कालः सत्त्वादीनां द्रव्यरूपः परिणामवि
शेषः इति बौद्धमतात्त्वास्माकमयंविशेषो यदस्माभिर्धर्मिग्राहकप्रमाणबलात् क्षणएवास्थिर
ष्यते क्षणस्थैर्येप्रत्यभिज्ञाद्यभावात् नक्षणातिरिक्तः क्षणिकः पदार्थः कश्चिदिष्यते तैस्तु क्ष
णमात्रस्थाय्येवपदार्थः सर्वइष्यतइति तच्चस्थाने निराकृतं कार्यकारणभावस्यानुपपत्त्या
दिभिरिति तदस्मिन् शास्त्रे क्षणएवकालइति सिद्धान्तः कालोऽत्रनाभ्युपगम्यतइति कस्यचि
त्सूत्रापस्तु भाष्यार्थो विवेकमूलइति यत्तु पूर्वदेशसंयोगाद्यवच्छिन्नः परमाणुक्रियादिरेवक्ष
णः कालस्तु तदतिरिक्तो नित्यइति वैशेषिकास्त्वाहुः तत्र विशिष्टस्यातिरेकानतिरेकयोरुभयो
रुभयतःपाशात् अतिरेके स्वसिद्धान्तविरोधात् अस्मन्मतप्रवेशाच्च अस्माभिस्तादृशस्यैवगुण
परिणामस्य क्षणत्ववचनात् अनतिरेके विशेषणविशेष्यतत्संबंधानां त्रयाणामपिस्थिरत्वेन
क्षणव्यवहारजननाक्षमत्वात् नित्यकालेऽपि च प्रमाणं नास्ति इदानीमित्याद्यखिलव्यवहारा
णां खंडकालमात्रविषयकत्वात् कार्यकारणभावादीनामपि क्षणघटितत्वादिति एतेननित्या १८३

दिगुपाधिभिरेवसंभवात् सामान्यतः कालदिग्व्यवहारसत्त्वेऽपि आकाशादिवन्नोपपद्यते
अत्र अप्रयाप्यपृथिवीजलतेजआदिभिरुपाधिभिर्देशाद्यतिरिक्तपदार्थः स्यादिति कालाद्यवि
शेषपर्यंविशेषः यत्कालः क्षणरूप इष्यते दिक्तु सर्वथैव नेष्यत इति शास्त्रे दिक्सामान्यव्य
वहारस्तु पूर्वपश्चिमतनियामकोपाध्यवच्छिन्नाकाशेन चोर्ध्वास्थितयाधारत्वेन देशव्यवहा
रवदिति अतएव श्रुत्यादिषु कुत्रचिदाकाशाद्युत्पत्तौ क्वचिच्च दिशः श्रोत्रमिति वचनमप्यन्यो
न्यविरुद्धं दिगाकाशयोरेकत्वादितिदिक् क्षणतत् क्रमयोर्नास्ति वस्तुसमाहारइति यत्ता
दुक्तं तत्र पंचयति नचेत्यादिना नास्तितत्समाहारइत्यंतेन सहभावाभ्युपगमेऽपि क्रमो
नसंभवतीत्याह क्रमश्चेति असंभवमेवेदमाह पूर्वस्मादिति तस्मात्सदैववर्तमानस्तु
क्षणः सएकएवक्षणोऽस्ति यतिनपूर्वोत्तरक्षणाइत्यन्तो नास्तितयोः क्षणतत्क्रमयोर्वास्त
वंमिलनंमुहूर्त्तादिरूपमित्यर्थः वक्ष्यमाणोपपादकमादौ वक्ति येनेत्यादिना सर्वैर्धर्मो
इत्यंतेन पिण्डनभूतभाविनः क्षणास्ते सर्वेऽपि सर्ववस्तुपरिणामाधारएकदेवनार्थकाप
दर्शनतः क्षणपर्यायकालत्वेनैव परिणामहेतुत्वादित्यतः तरपादे क्षणप्रतियोगीत्याद्युत्तरस्तु
त्रैकाल्येपाः तेनहेतुनाएकैकेन क्षणेन कृत्स्नोलोकः परिणाममनुभवतियाप्नोति यतः त

त्क्षणोपारूढाः सर्वे एकक्षणोपारूढाः पदार्था इत्यर्थः ततः किमित्यत आह तयोः क्षणेति ततश्चे
ति ततश्च क्षणतत्क्रमसाक्षात्कारादखिलपरिणामतत्क्रमसाक्षात्कारद्वारा सर्ववस्तु
नामन्योन्यव्यावर्तनपास्वरूपावधारणं भवतीति सूत्रार्थ उक्तः उत्तरसूत्रमवतारयति तस्ये
ति तस्य विवेकज्ञानस्य सर्वविषयकस्यापि व्युत्पादनापरकमुदाहरणमुपन्यस्यत इत्य
र्थः जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः जातिलक्षणदेशैरन्यतानव
च्छेदात् भेदावधारणस्यासंभवात् ततो विवेकज्ञानादेव प्रतिपत्तिर्विवेकेन साक्षात्कारः यो
रुभयोर्भवतीत्यर्थः तत्रादौ जात्यान्यतानवच्छेदस्यासंकीर्णमुदाहरणमाह तुल्ययोर्देशेति
कालभेदेन समानदेशस्य यो द्विसमानरूपयोर्गोगवयपयोर्भेदो जातिभेदादेवानुमातुं
शक्यत इति अत्र वडवाणवे नातिसारूप्याद्वयोर्लक्षितः सारूप्याधिक्याद्वडवेति लक्ष
णेनान्यत्वावच्छेदनस्यासंकीर्णोदाहरणमाह तुल्यदेशेति लाक्षणमभिव्यक्तो धर्मभेदः दे
शेनान्यत्वावच्छेदनस्यासंकीर्णोदाहरणमाह द्वयोरिति देशभेदप्रकारमाह पूर्वमिदमुत्त
रमितीति इदानीं जात्यादिभिरन्यतानुमानेन संभवति नादृशविवेकजज्ञानस्यासंकीर्ण
मुदाहरणमाह यदा त्विति यदा तु पूर्वदेशस्थितमामलकं विषयान्तरव्यग्रस्य ज्ञातुर्विवकं करि १८४

ष्यतो योगिन उत्तरस्मिन् देश उपावर्तनेन संवादस्थप्यते देवादिना तदा द्वयोरामलकयोरेकदेशत्वे सति
पूर्वदेशोपलक्षितमिदमुत्तरदेशोपलक्षितं चेदमिति विवेकानुपपत्तिः आमलकयोर्जात्यादित्रि
कसाम्यात् असंदिग्धतत्त्वज्ञानं चोद्देश्यमित्यत उक्तं सूत्रकारेण ततो विवेकजज्ञानात्प्रतिपत्तिरिती
त्यर्थः ननु क्षणतत्क्रमयोः संयमात् कथमामलकयोर्विवेकजज्ञानमिति पृच्छति कथमिति उ
त्तरं पूर्वेति आमलकस्य क्षणेन सह वर्तत इति आमलकसहक्षणः चैत्रसहोदरवदितिवत् एवं
विधः पूर्वोदयः आमलकान्तरेण सहक्षणादुत्तरदेशाद्भिन्नः अतः स्वदेशक्षणप्राप्यात्ते आ
मलके भिन्ने एकस्य एकदा विरुद्धदेशसंबन्धासंभवादिति एवं तयोर्भेदं प्रसाध्यैकदेशसंबंध
दशायां विवेकग्रहणोपायमाह अन्येति अन्ययोर्भिन्नयोः पूर्वोत्तरदेशसंबंधस्तत्क्षणयोरनु
भवः साक्षात्कारस्त्वामलकयोरन्यत्वे हेतुर्थो तो विवेकग्रहकारणमित्यर्थः अत्र चोदाहरणे
क्षणसंयमादेव विवेकजज्ञानं दर्शितं एतदनुसारेण क्षणक्रमसंयमादपि विवेकजज्ञानस्यो
दाहरणमुन्नेयमितिभावः तदा यावद्विनिक्षणव्यापकनिष्ठयोर्व्यापकनिष्ठता विवेकज्ञानं क्षण
क्रमसाक्षात्कारं विना न संभवति अतः क्षणक्रमसंयमस्तत्कारणमिति एतेनैव स्थूलदृष्ट्या
नेन परमसूक्ष्मेष्वपि क्षणतत्क्रमानुभवात् विवेकज्ञानमनुमेयमित्याह एतेनेति तुल्यजातिल

क्षणादेशस्य परमाणुसामान्यस्यास्मिन्नन्यत्वप्रत्ययो विवेकप्रत्ययः पूर्वयोः परमाणुदेशसा
हित्यक्षणयोः साक्षात्करणात् ईश्वरस्यप्रकृत्यादिभेदेनाभ्यासीयोगिनो भवतीत्यन्वयः तत्र
हेतुरुक्त उत्तरस्यपरमाणोरित्यादिना यत उत्तरस्य परमाणोः पूर्वदेशावयत्योत्तरस्य स्वदेश
प्राप्तिः पूर्वस्य स्वदेशप्राप्तितो भिन्नातयोः सहक्षणाभेदात्साहित्यक्षणयोर्भिन्नत्वादित्यर्थः त
देवत्रांत्यादिभेदात् देशसंबंधक्षणभेदाच्च तस्य योरन्यत्वाप्रत्ययं प्रतिपाद्य परमतेप्येतस्
मान्नमिति प्रतिपादयितं तन्मतमाह अपरेत्विति अपरे वैशेषिका वदंति नित्यद्रव्यवृत्तयो
त्यविशेषा इति अंत्याः प्रलयकालस्थाः सर्वेषु स्वात्मसु सर्वेषु तत्सजातिलक्षणादेशसाम्ये
विभाजककालान्तरासंभवे न विशेषमात्रमाकथ्यन भेदकः पदार्थो वक्तव्ये वाच्यः तथा च परमाणवा
दिष्वपि सर्वान्यतामत्ययं करोतीति तेषां मतेऽपि तत्रापीति तन्मतेऽपि देशादीनां योगिषु
द्विगप्यक्षणानां भेदोऽप्यशवादीनामन्यत्वे हेतुरस्ये वेतिसमानमित्यर्थः मूर्तिः संस्थानं
व्यवधिः व्यवहितता एतद्वयमधिकमस्मोक्तं जातय इति यतो मूर्तिव्यवधिजात्यादिर्नित्यद्रव्ये
ष्वप्यस्ति भेदकः अतः परैरुक्तं प्रलयपर्यन्तं सर्वेषु नित्यद्रव्येषु विशेषपदार्थो नास्ति मूर्तिव्य १८५
वधिजातिभ्यो भेदे न तिरेकेण व्यावर्तकस्याभावात् तैरेव व्यावर्तकव्यवहारोपपत्तेरिति वाक्ये

णयआचार्यो भेदेनातिप्रसङ्ग इत्यर्थः ननु वार्षगण्यमते सत्त्वपुरुषेषु मूर्त्याद्यभावात्कथं विभाग
व्यवहारः स्यादिति चेन्न बुद्ध्यवस्थापायिमूर्त्यादयः स्थितास्तेषां नश्वरत्वावस्थायामपि योगिभि
रेषमात्रत्वान्न्योन्यभेदव्यवहारः स्वगतसूक्ष्मकार्यभेदात् यथोक्तक्षणभेदादिभ्यश्चेति अ
तो वार्षगण्यमतस्याप्रतिषेधादिदमेव स्वमतमिति मंतव्यं विवेकजज्ञानस्यैकविषयं प्रद
र्श्य दानीं संदेतुकां विवेकजज्ञानस्य मोक्षोपयोगितामाह तारकं सर्वविषयं सर्वथाविषयमक्र
मं चेति विवेकजं ज्ञानं इति शब्दो हेत्वर्थे यतो विवेकजं ज्ञानं सर्वविषयादिरूपमतः सर्वज्ञेयसाक्षा
त्कारेण उक्तवैराग्यद्वारा संसारतारकं भवतीत्यर्थः एतेन विवेकजज्ञानस्येदं लक्षणं बोध्यं अत
एवानेन लक्षणेन सत्त्वपुरुषान्यताख्यातिजन्यसर्वज्ञता यान्यपि संग्रहानन्तसूत्रे सापि विवेक
जज्ञानशब्देन भाष्यकारैरुक्तेति तत्र भाष्यकारः प्रत्येकं विशेषणानि व्याचष्टे तारकशब्दस्या
योपतिलब्धमर्थमाह तारकमिति ति लौकिकसामग्रीविना स्वप्रार्थज्ञानसामर्थ्ये सत्त्वपुरुषा
न्यतासंयमक्षणतत्क्रमसंयमाभ्यां उद्बोधितं प्रतिभातदुपं स्वप्रतिभोत्थं तदेव हि संसारतारकं
घटते अतो यथाप्रतिभोत्थं न तारकशब्दार्थः प्रतिभोत्थत्वे युक्तिमाह अनौपदेशिकमिति
न हि सर्वथा सर्वविषयकं ज्ञानं शाब्दं भवितुं युज्यते शब्दस्य सामान्यमात्रविषयकत्वात् परिच्छिन्न

विषयीकत्वाच्चेति सर्वविषयमित्यत्र सर्वशब्दोऽसंकुचित इत्याह सर्वविषयमिति सर्वविषयक
त्ववचनादित्यर्थः अतीतेति अतीतादिरूपं सर्वमित्यन्वयः सर्वथेत्यस्यार्थः पर्यायैः स्वगतविशेषैः
सर्वधर्मैः शेषैः विषयीकरोतीत्यर्थः नास्ति क्रमः यौगपद्येन चक्षुषाम इत्यक्रमं अक्रमं तत्विशेष
णं लब्धं वाक्यतात्पर्यमाह एकक्षणोपारूढमित्यादिना अतो हेत्वात्पर्यो बुद्धिवृत्ताविति विवेक
जज्ञानस्याखिलसिद्धांतेनिवेचनस्य बीजमाह एतदिति परिपूर्णशब्दार्थं स्वयमेव व्याचष्टे अस्यैवां
श इति अस्यैव संपूर्णस्य विवेकजज्ञानस्यांशो योगप्रदीपः कुत इत्याकांक्षायामाह मधुमती
ति स्थान्युपनिमंत्रणसूत्रे ऋतंभरप्रज्ञाख्यद्वितीयभूमौ योगी मधुभूमिक इत्युक्तं सैव च भू
मिकान्तमधुमतीति निर्दिष्टा तामारभ्य सप्तधा प्रान्तभूमिप्रज्ञेति पूर्वोक्तं संप्रज्ञातसमाधिप
र्यंतभूमिका ज्ञातं योगप्रदीप इत्यर्थः नहि भूमिष्ठा विवेकजज्ञानविषयैकदेशप्रकाशकत्वा
न्नांश इति भावः नन्वसवितर्कादिरूपायास्तथा परिणामत्रयसंयमादिरूपायाश्च संप्रज्ञातयोगभू
मयः पूर्वोक्ताः कथं योगप्रदीपतया विवेकजज्ञानांशतया च न निर्दिष्टा इति चेन्न योगवद्धिकत्वा
वि न तेषामत्यल्पत्वस्याविवक्षितत्वात् प्रकृष्टभूमितया योगप्रदीपानामासामंशत्वेनैव चकथना
त्तस्मभूमीनामंशांशत्वमपि प्राप्तमिति भावः विष्णुपुराणेच सर्वेषामेवेतरज्ञानानां प्रदीपतस्यव १८६

विवक्षया तस्या विवेकजज्ञानस्य स्वरूपं तत्लाल्पं प्रोक्तं अंधंतम इवाज्ञानं दीपवच्चेंद्रियोद्भवं यथासू
र्यस्तथाज्ञानं यद्विप्रर्षे विवेकजमितीइंद्रियोद्भवमित्यन्येषामपि ज्ञानानामुपलक्षणं नन्वेवंसं
यमानां सिद्धिरूपा विभूतयोऽतीतानागतज्ञानाद्याविवेकजज्ञानांता ज्ञानक्रियैश्वर्यरूपा
विस्तरेणोक्ताः तत्रायं संशयः किमेतासां विभूतीनां अनंतरमेव मोक्षो भवति आहोस्विदेत
द्व्यतिरेकेणापीति तत्र निर्णायकं तयोरसूत्रमवतारयति प्राप्तविवेकेति सूत्रेण सहाश्रयः
विवेकजज्ञानान्मोक्तमसिद्ध्यपेक्षयैवस्तरामितरसिध्यनपेक्षा कैवल्य इति भाष्याशयः
सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यं बुद्धिसत्वस्य पुरुषेणसहसमानायदा शुद्धिर्वक्ष्यमाणरू
पाविवेकसाक्षात्कारोभवतितदैवमोक्षोनतत्रसिध्यपेक्षेत्यर्थः कृविदितिशब्दः सूत्रान्तेति
ष्ठति सच हानोपायव्यूहसमाप्तिसूचनार्थः शुद्धिसाम्येहेतुः स्वरूपतश्च व्याचष्टे यदेति
निर्धूतोरजस्तमोद्भमरूपोमलोयस्य तत्तथा अत एव विवेकख्यातिमात्रेऽत्राधिकारः कृतेन्यता
यस्य मतसिद्ध्यादौ ततश्च तत्र दग्धान्यनागतक्लेशरूपाणि विपाकाख्यसंसारबीजानि य
ततथा एवं यदा बुद्धिसत्वं भवति तदा शुद्धा पुरुषस्य सरूपमिवतत् भवति अनेन शुद्धिसा
म्ये हेतुः बुद्धेर्दुःखाद्यात्मकत्वान्नात्यंतशुद्धिसाम्यं कदापीत्येतत्प्रतिपादनायेवशब्दप्रयोगय

स्मिन्नंशे साम्यं तदाह पुरुषस्येति बुद्धिधर्मत्वात् स्वरूपे उपचरितमात्रस्य प्रत्ययाविशेषात्मभो
गस्याभावः पुरुषस्य शुद्धिः बुद्धिधर्मत्वादपि जीवन्मुक्तदशायां विवेकित्वेन तादृशो भोगो ना
स्तीति शुद्धिसाम्यमित्यर्थः अत्र साक्षितामात्ररूपभोगस्यावर्तमानायोपचरितेऽप्यंशे पुरुषस्य
प्रत्ययाविशेषरूप एव हि भोग उपचरितः अविवेकस्योपाधिधर्मत्वात् चिदवसानतारूप
स्तु सांख्यसूत्रोक्तो भोगः स्वत इति तथा च साक्षी निरभिमानेनैव चित्तस्य निरभिमानत्वमेव
मोक्षहेतुर्नैश्वर्यादिकमिति पर्यवसितोऽर्थः एतस्यामिति एतस्यां शुद्धिसाम्यावस्थायां जाता
यां प्रारब्धप्रतिबंधनिवृत्त्यनंतरं कैवल्यं भवतीश्वरानीश्वरयोः साधारण्येनेत्यर्थः स्वतंत्र
ज्ञानक्रियाशक्तिमत्त्वेनेश्वरः ज्ञाने पुनरिति ज्ञानान्तरे काप्यपेक्षा नास्तीत्यर्थः ननु विवेकसाक्षा
त्कारहेतौ सत्त्वसंयमे सत्यवश्यमेव सार्वज्ञ्यादिकं भविष्यति तत्कथमनीश्वरस्य कैव
ल्यत इति चेत् न संयमे सत्यपि कामनां विना सिद्ध्यनुत्पत्तेः योगे सत्यपि स्वर्गानुत्पत्तिवत् किं
च यमनियमाद्यंगवैगुण्यादपि सिद्ध्यनियमः तादृशांगवैगुण्येऽप्यभिमाननिवृत्त्याख्यदृष्ट
द्वारा कदाचिन्मोक्षः संभवत्येवेति ननु चेत् कैवल्ये सिद्ध्यपेक्षा नास्ति तर्हि किमर्थं मोक्षाख्यहा १८७
नस्योपायमध्ये सिद्धीनां कथनमित्याशंकायामाह सत्त्वशुद्धिद्वारेणेति सत्त्वस्य बुद्धिसत्त्वस्य शु

द्धिवैराग्यादितद्द्वारेण मोक्षोपयोगीत्ययमतिशेषः ऐश्वर्यं क्रियाशक्तिरणिमादि ज्ञानं विवेकज्ञा
नान्तमयकांतं प्रोक्तसूत्रजातेन परमार्थतस्तु सत्त्वपुरुषान्यताज्ञानादेवाज्ञाननिवृत्त्यादि
द्वारा कैवल्यमित्यर्थः अत्र चरिताधिकारा इत्यादिना कैवल्यस्वरूपमुक्तं कैवल्ये पुरुषार्थमाह
तदेति तदा स्वदुःखमोहात्मकसत्त्वादिगुणादर्शनेऽपि तज्ज्योतिर्वियोगात्स्वरूपमात्रज्योति
रतो दुःखादिप्रतिबिंबरूपमलरहितः सन् केवलो भवति केवलेषु मुक्तेषु नित्यमुक्त ईश्वरेण वा
विभागं गच्छतीत्यर्थः तथा च दुःखभोगनिवृत्तिरेव पुरुषार्थ इति व्याख्यातानि हानोपायस्य
विवेकख्यातेः साधनानि योगस्यांगानि यमादीनि सिद्धीनि इति श्रीपातंजलभाष्यवार्ति
के श्रीविज्ञानभिक्षुनिर्मिते विभूतिपादस्तृतीयः अथ चतुर्थपादः हानोपायांतव्यूहत्रयम
तिविस्तरतः पादद्वयेन व्याख्याय हानं तत्स्वरूपतः एव तत्र संक्षेपादुक्तं न तु तस्याशेषविशेषरू
पो व्यूह इत्यतो हानविस्तारार्थं चतुर्थपादारंभः तत्रादौ कैवल्ययोग्यं चित्तं निर्धारयितुं पंचप्रका
रसिद्धिमाह अनेनैव प्रसंगेन जन्मादिसिद्ध्यपेक्षया योगसमाधिसिद्धेरुत्कर्षोऽपि सेत्स्यति
जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः जन्मना सिद्धीर्यो वक्ष्ये देहान्तरितेति शरीरेण कर्मणा दे
वादिदेहान्तरे जन्ममात्रेण भवंती अणिमादिसिद्धिर्जन्मजेत्यर्थः औषधिजसिद्धिमाह औषधि

भिरिति असुरभवनेषु रसायनं यदोषधिद्रव्यं तदुपस्खवेप्येवमादिः सिद्धिरोषधिभिरित्यर्थः असु
रभवनेष्विति प्रायिकाभिप्रायेणोक्तं अत्राप्योषधीभिः स्वनलोदिसिद्धीनां भावात् शेषं सुगमं
पंचविधसिद्धिसाधारणोपायस्य पादो विचारितः सिद्धिप्रकारे स्मिन्नेव प्रसंगे किंचिद्भिः सूत्रैः प्रति
पादनीयः तत्रादौ निर्माणकायनिर्माणेंद्रिययोरुत्पत्तिप्रकारप्रतिपादकं सूत्रं पूरयितुमुत्थाप
यति तत्र कायेति निर्माणचित्तोत्पत्तिप्रकारस्य सूत्रांतरेण वक्ष्यमाणत्वादत्र कायेंद्रिययोरेव
ग्रहणं जात्यंतरपरिणामः प्रकृत्यापूरात् मानुष्यादिजातिरूपः परिणामः स प्रकृत्यापूराद्भ
वति न तु संकल्पमात्रादित्यर्थः मनुष्यादिजातिरूपेणापूर्वं परिणामस्य स्थितानां कायेंद्रियाणां
कामरूपतादृशां यो देवतिर्यगादिजातिपरिणामः स प्रकृत्यापूराद्भवति न तु संकल्पमात्रा
दित्यर्थः इति व्याख्यानांतरं अणिमादिरूपपरिमाणविशेषप्रकृत्यपगमादित्यपि बोध्यं अ
त्र च जात्यंतरशब्देन योगिनां गजतुरगादिदेहभवं तथा कायपक्षप्रकृत्यः हादिक्रमपितावद्वे आप
रशब्देनापि प्रकृतीनां संहननमपि ग्राह्यं कायव्यूहे च प्रकृतिः एकधा भवति त्रिधा भवति पंच
धा शतं दश सैकैकश्च सहस्राणि च निर्यातीत्यादिरिति प्रकृत्यापूरं हेतुं वदन् सूत्रं व्याचष्टे १०८
पूर्वपरिणामेति यतो लोके वल्मीकादीनां क्षुद्रपरिणामापायेतदुत्तरमहापरिणामोसतिर्भवतप्र

कृतीनामनुप्रवेशाद्भवतीति दृष्टं अतो योगीश्वरादीनामपि देहेंद्रिययोः परिणामांतरकाले ध
र्मादिसापेक्षाः कायेंद्रियप्रकृतयः स्वंस्वं विकारमनुगृह्णंति स्वस्वजातीयांशापादिप्रकृति उपकुर्वं
ति आपूरेणानुप्रवेशेनेत्यर्थः तत्र कायप्रकृतिः पंचभूतानि इंद्रियप्रकृतिश्चास्मितेति दृष्टं च
लोके तृणराशिनिक्षिप्तस्य वह्निकणस्य क्षणादेव प्रकृत्यापूरेण गगनव्यापी परिणामविशेष इ
ति एतेन वामनाद्यवतारादीनां क्षणादेव त्रिभुवनव्यापित्वविश्वरूपत्वादिकमार्कंडेयादि
भ्यो विष्णुना मायाप्रदर्शनं च प्रकृत्यापूरेण तडिन्मालायामिव क्षणभंगुरेणेति व्याख्यातं अग
स्त्यादीनां समुद्रपानादिकं च तोयादिप्रकृत्यपसरणेनेति व्याख्येयं एवमेव विश्वं परमेश्वरस्य
मायेति गीयते ऐंद्रजालिकवत् क्षणेनैव प्रकृत्यापूरणापसारणादिभिर्जगदस्य यथेप्सितमुत्पादयि
तुं विलापयितुं च परमेश्वरः संकल्पमात्रेण शक्नोतीति सूक्ष्मदृष्ट्या तत्प्रतिक्षणं तथा करोत्येवेति
प्रकृतिस्वातंत्र्यसिद्धांतहानिः न्यायसक्षणं तथा करोत्येवेति यथैवं तयोगेनोभगवन्नर्पमिति
दिक् ननु योगजधर्मैर्बलात् प्रकृतयस्त्राकृष्यंत इति प्रकृतिस्वातंत्र्यसिद्धांतहानिः न्यायसपदि
पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्यादिश्रुतेरपि प्रकृतिस्वातंत्र्यहानि
रित्याशंकायामाह निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् व्याचष्टे नहीति

धर्मादिरूपाणां निमित्तानां प्रकृत्यपेरकत्वे पतिमाह नकार्येणेति परतंत्रं स्वतंत्रस्य प्रवर्तकमयु
क्तमित्यर्थः किंचाकाशे दृष्टाणामनारंभिकाप्यवक्षणामणूनां क्रियासवेसमनानचतत्र धर्मा
धर्मौ वा कारणं कस्यापि भोगाहेतुत्वात् नापि तत्रेश्वरादिसंकल्पादिः कारणं गौरवात् अत्रेति
रंतराणुक्रियाद्युपपत्तये ज्ञाघवेन गुणत्वेनैव लाभात्ततः प्रवृत्तिकारणत्वात् प्रकृतिस्वातंत्र्यं
सिद्धं अपि च कदाचिद्दंडचक्रादिकं विनापि योगिसंकल्पादेव घटोत्पत्तेरादिसर्गे चेश्वरसं
कल्पेन बीजांतराणि विनैव सर्वाणि बीजानि उत्पद्येतरिति परस्परव्यभिचारान्निमित्तानां नता
त्कारणत्वसंभवः तणारणीमण्यादिषु चाग्न्यादिषु चाग्न्यादिकारणत्वेऽन्योन्यव्यभिचारो लो
कसिद्ध एवास्ति अतः सहकार्यप्रयुक्ता प्रकृतिरेव परिणामे कारणं स्वतंत्रेतिसिद्धं ननु प्रकृति
स्वातंत्र्ये केन प्रकारेण तर्हि धर्मेश्वरयोगिसंकल्पादीनां प्रकृतिपरिणामहेतुत्वमितिपृ
च्छति कथं तर्हीति सूत्रार्द्धेनोत्तरमाह वरणभेदस्तु ततः क्षेत्रिकवदिति अपांपूरणोत्र आम्रः
प्ररणात् केदारान्तरस्य विशेषणं सममित्यादिकं अपकर्षति क्षिपति प्रावरणमालवालते स्व
स्वविकारमिति स्वस्वसजातीयं विकारं व्याप्नुवंतीति विकारप्रसूतीनां परिणामान्तरमित्यर्थः प्र १८६
कृतकार्येद्विपप्रकृत्यभिप्रायेणोक्तं गुणाद्गुणान्तरमासाद्य वर्ततोऽपि बोध्यं क्रियावदारंभकसं

योगोपि प्रकृतेः स्वत एव भवतीत्यपि तैर्नैव दृष्टांतेन प्रतिपादयति यथा चेति ननु प्रकृतिप्र
वृत्ताविति संयोगविशेषे पीति बोध्यं तथा चाधर्मादिप्रतिबंधवतिद्वारेणैव धर्मादिः परिणा
मे कारणमिति सिद्धं अयं भावः यथा संस्कार एव स्मृतिहेतुः सदृशादृष्टचिंतादयस्तु तद्गत
तया संस्कारस्योद्बोधकमात्राः उद्बोधश्च निद्रादिदोषरूपावरणभंगः तथैव प्रकृतिरेव जगत्का
रणं कालकर्मेश्वरादयस्तु प्रकृतेः कार्यजननशक्त्युद्बोधकाः तत्र धर्माधर्मौ स्वविरुद्धधर्मेत
ररूपावरणभंगेनोद्बोधकौ ईश्वरस्तु साम्यपरिणामादिरूपाखिलावरणभंगेनोद्बोधकः का
लादयस्तु धर्माद्युद्बोधकतया द्वारादयस्तु कार्यान्तराभिव्यक्तिप्रतिबंधकतयेत्येवं यथायो
ग्यमूहनीयं एतदेव निमित्तकारणानीति गीयते अव्यभिचारात्तु संयोगस्य समवायिकारण
त्वमिष्यत एव द्वारत्वात्तु न तेन प्रकृतेः स्वातंत्र्यहानिरिति धर्मेणाधर्मरूपप्रतिबंधापसा
धारणद्वारा कार्येद्विपपरिणामे निमित्तत्वे उदाहरणमाह अत्र नंदीति नंदीनामा मनुष्य ईश्व
रो जात इति नंदीश्वरः एवं नहुषाजगरेपि व्याख्येयः सिद्धादीनां कार्येद्विपपरिणामश्चिंतितः इ
दानीं सिद्धानां चित्तपरिणामनिर्णायकं सूत्रमवतारयति यदेति एकमनस्का निर्मातृमनोमा
त्रेणो व्यवहारभाजः अनेकमनस्काः निर्मातृमनोतिरिक्तमात्तिस्विकमनोभाजः निर्माणचि

त्वास्मितामात्रात् स्वसंकल्पेन निर्मितचित्तानि निर्माणचित्तान्युच्यंते तानि बहूनि निर्माण
देहसमसंख्यानि भवंति तेषां कारणमाह अस्मितामात्रादिति अहंकारादित्यर्थः मात्रशब्दे
नमानोव्यावृत्तिः संकल्पमात्रेण मनसो निमित्तमात्रत्वादिति अत्र चित्तशब्दो मनोमात्रवा
ची अहंकारप्रकृतिकत्ववचनात् बुध्यहंकाराबपि त्वनेके स्वप्रकृतिप्रधानवध्यापरादु
र्वंतीति प्रत्येतव्यं युक्तिसाम्यादिति भाष्ये चित्तानि शरीराणीत्यर्थः शेषसूत्रं व्याख्यातं
ननु निर्माणचित्तस्यैकस्यैव प्रदीपवद्विसारितया कायव्यूहेषु वृत्तिसंभवात् किमर्थं देहभे
देनांतःकरणभेदोऽभ्युपगम्यते नहि नैय्यायिकानामिवास्माकं अंतःकरणभेदं नैकदानव
हितनानाशरीराधिष्ठानं न संभवेदिति अत्रोच्यते समाधियोगयोर्ज्ञानाज्ञानयोश्चैकदे
कस्मिंश्चित्ते विरोधेन चित्तभेदः सिध्यति अतएव सर्वज्ञस्यापि विष्णोः स्वसंकल्पनिर्मितचि
त्तभेदेन रामशरीरे किंचित्कालमज्ञानमुपपन्नमिति यदा तु योगिनो विभेदात्ते स्वदेहान्निर्मि
तेषु देहेंद्रियसंघातेषु अनेकेषु योजयति तदा पुनः सुतरामेवानेकांतःकरणमपेक्षत इति
कदाचित्तु योगिनामेकांतःकरणेनैव नानादेहेषु व्यवहारं न निराकुर्मः स्वतंत्रेच्छस्य नियंतुम
शक्यत्वादिति अथैवं सत्यात्मनानात्वकल्पनाप्यर्था चित्तभेदेनैव ज्ञानाज्ञानाद्युपपत्तेरिति

मेवं सति तन्निरोधादीनामौपाधिकत्वेनाविरोधेपि विषयानुभवाननुभवयोः स्वप्रतिबिं
बितदुःखभोगतदभावयोर्बंधमोक्षयोश्च सांकर्येण तन्निष्ठयोर्विरोधेनैवात्मनानात्वसि
द्धेरिति दिक् यदेतच्छरीरभेदेन नानाचित्तैर्विरुद्धनानाकार्यकारित्वं योगिनां स्मर्यते एकस्तु
प्रभुशक्तात्मा वै बहुधा भवतीश्वरः भूत्वा यस्मात्तु बहुधा भवत्येकः पुनस्तु सः तस्माच्च मनसो
भेदा जायंते चैन एव हि एकधा स द्विधा चैव त्रिधा च बहुधा पुनः योगीश्वरः शरीराणि क
रोति विकरोति च प्राप्नुयाद्विषयान् कैश्चित् कैश्चिदुग्रं तपश्चरेत् संहरेच्च पुनस्तानि सूर्यो
रश्मिगणानिवेति अनेकचित्तनिर्माणेपि विशेषमाह प्रवृत्तिभेदे प्रयोजकं चित्तमेकम
नेकेषां व्याचष्टे बहूनामिति तेषां बहूनां कथमेकचित्ताभिप्रायानुसारिणी प्रवृत्तिः स्यादित्या
शयेन योगी पूर्वं सिद्धं यच्चित्तं तदेव सर्वचित्तानां प्रयोजकं निर्मिमीते नियामकं करोति तत्तु
चित्ताभिप्रायात् तेषां प्रवाहात् चित्तानां प्रवृत्तिरित्यर्थः ऐश्वर्यनिर्वाहार्थे अनेकचित्तेषु तयो
गिनिच्छयाधिष्ठितमेकं चित्तं तेषामुत्पत्तिस्थितिसंहारं करोतीति अत्र च प्रमाणं प्रागेव दर्शितं
संहरेच्च पुनस्तानि सूर्यो रश्मिगणानिवेति एतेन विस्फारादीनामंशावतारा अपि व्याख्याताः
तेषु ह्यात्मन एकत्वेपि अंशांशिव्यवहारः उपध्योरंशांशिभावेनौपाधिकः न पुनरितरजी

वेधिवस्वत एवेति तदेवमुक्तेषु पंचसु सिद्धचित्तेषु मध्ये ऽपवर्गयोग्यचित्तमवधारयति त
त्रध्यानजमनाशयं ध्यानजं ध्यानसंभूतं चाशयाः क्लेशकर्मवासनाः न संत्यस्मिन्नि
त्यनाशयं ध्यानसिद्धं चित्तमेवानाशयं भवति योगिनैव ज्ञानोत्पत्त्या वासनोच्छेदसंभवा
त् न मंत्रादिभिरित्यर्थः व्याचष्टे पंचविधमिति निर्माणचित्तमत्र निर्माणरूपचित्तेन न
तिर्मीयमाणं चित्तं तस्य सिद्धकार्यत्वेन सिद्धत्वानियमात् अनाशयमित्यस्यार्थमाह तत्रै
वेति रागादेः प्रवृत्तिर्यस्मात्संस्कारात्स रागादिप्रवृत्त्याशयस्तस्यैव नास्तीत्यनाशयमित्य
र्थः अनाशयत्वस्य किं प्रयोजनमित्याकांक्षायामाह नात इति संबंध उत्पत्तिः ततश्चापुन
र्जन्मरूपो मोक्ष इति शेषः पापपुण्यानुत्पत्तौ हेतुमाह क्षीणक्लेशत्वादिति दग्धक्लेशकर्म
वासनत्वादित्यर्थः अदृष्टोत्पत्तावप्यदृष्टान्तरं कारणं अदृष्टरूपस्य कर्माशयस्य कार्यमा
त्रे हेतुत्वात् तत्रेति निर्द्धारणसप्तम्यर्थमाह इतरेषामिति मंत्रादिसिद्धचित्तानामित्यर्थः अ
त्रैव हेतुपरतयोत्तरसूत्रमवतारयति यत इति कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषां
योगिनो निष्पन्नयोगस्य क्षीणक्लेशस्य कर्मकायादिव्यापारो ऽशुक्लाकृष्णः पुण्यपापाहेतुः
इतरेषामयोगिनां जन्मादिसिद्धानामपि त्रिविधं यथायोग्यं कर्म शुक्लकृष्णयोः प्रत्येकसमु

च्चयाभ्यां त्रिविधमित्यर्थः तदेतद्व्याचष्टे चतुष्पादिति कर्मसामान्यं चतुरंशकमित्यर्थः क्रमेण
निर्दिशति कृष्णेति कृष्णा दुःखफलदा तमोवर्धकत्वात् शुक्लकृष्णा सुखदुःखफलदा रजो
वर्धकत्वात् शुक्ला सुखफलदा सत्ववर्धकत्वात् अशुक्लाकृष्णा च सुखदुःखफलशून्या गु
णाहेतुत्वादिति अशुक्लाकृष्णयोः सुखदुःखफलस्यैव प्रतिषेधेन योगिकर्मणामपि
सत्वशुद्धिः फलं न निराक्रियते न च ज्ञानेनैव सत्वशुद्ध्याद्यः पापक्षयो भविष्यतीति वा
च्यं तथापि कर्मणामपि ज्ञानांगतया सत्वशुद्धिहेतुत्वात् आत्मक्रीड आत्मरतिः क्रिया
वानेष ब्रह्मविदां वरिष्ठ इति साहित्यश्रुतेः कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि योगिनः
कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धय इति स्मृतेश्च अन्यथा वसिष्ठादीनां ज्ञानिनां कर्मानुपपत्ते
श्च न च लोकसंग्रहार्थं तेषां कर्म लोकसंग्रहस्य स्वतोऽपुरुषार्थतया कैवल्यहेतुसत्वशुद्धि
द्वारैव पर्यवसानादिति चतुर्विधं कर्म क्रमेणोदाहरति दुरात्मनां पापिनां बहिः साधनसा
ध्येति इहेन्द्रियमनोभ्यो बहिर्यानि साधनानि तत्साध्येत्यर्थः अज्ञानां सकामानामित्य
र्थो लभ्यते ज्ञानिनां निष्कामानां कर्मसामान्यमेवाशुक्लाकृष्णमिति वक्ष्यमाणात् ननु बहिः
साधनसाध्यानामपि वेदोक्तयागादीनां कृष्णसंकरस्तत्राह तत्रपरेति बहिर्योगोपकरणसं

पादेनेपिपीलिकादीनामप्यंतमोऽपरिहार्यापीडाभवतीत्यस्तितत्रपापकर्माशयः देवता
दीनामाराधनादिना अनुग्रहात् पुंण्यकर्माशयस्तुप्रसिद्धएवेतिसांकर्यमित्यर्थः अंत
र्यागरूपायांशुक्लायायासांकर्यबीजमाह साहीति संन्यासिनामिति संन्यासस्त्यागः अभि
मानफलयोस्त्यागिनामित्यर्थः कायेनेत्येवमत्कर्मेतियत्नंक्रियतेर्ज्जुनसंगंत्यक्त्वाफलंचै
वसत्यागःसात्विकोमतइत्यादिस्मृतेः ननुसंन्यासाभिमानत्यागोऽविद्यादिक्लेशसत्वेते
षां नपिधर्माधर्मौदयात् क्लेशक्षयेचरदेहस्यादिकर्मणामप्यशुक्लाकृष्णत्वाच्चेतिसं
न्यासिकर्मणामशुक्लाकृष्णत्वेहेतुमाह क्षीणक्लेशानामिति क्लेशमूलःकर्माशयः इत्युक्त
त्वादितिभावः चरमदेहानामितिस्वरूपाख्यानं स्वोक्तसंन्यासिनामितिहेतुविवरणं वा नः सू
त्रंव्याचष्टे तत्रेति तत्रचतुर्विधकर्ममध्ये योगिनएवाशुक्लमकृष्णंचकर्मफलत्यागात्
अहंकरोमीत्यस्वीकाराच्चेत्यर्थः विहितंहिकामनायांसत्यामेवस्वर्गादिफलंददातिविहि
तंनिषिद्धंनोभयमप्युपादानाख्यातिमानेसत्येवफलंददातीतिभावः त्यक्त्वाकर्मफलासं
गंनित्यतृप्तोनिराश्रयः कर्मण्यभिप्रवृत्तोपिनैवकिंचित्करोतिसः यस्यनाहंकृतोभावोबुद्धि
र्यस्यनलिप्यते हत्वापिसइमान् लोकान्नहंतिननिबध्यतेइतिशास्त्रमत्रप्रमाणं ननुतिष्ठतु

योगिनांकर्मतथापिवासनानामभिव्यक्त्यादिनापिकदाचिन्मोक्षःस्यादितिकिमर्थंनियमेनध्या
नजस्यानाशयचित्तस्यापेक्षेत्यतआह ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां
ततइतिपदंव्याख्यायतद्विपाकानुगुणानामेवेतिगृहीत्वाव्याचष्टे यज्जातीयस्येति कर्मवि
पाकमनुशेरतइति अनुकुर्वंतितन्मुखनिरीक्षकाइतियावत् विपच्यमानंफलोन्मुखं च
चोविचारः वहुजन्मव्यवहितानामपिवासनानामभिव्यक्तिंकर्मफलान्यथानुपपत्तिप्रमा
णोनसाधयति जातिदेशकालव्यवहितानामप्यानंतर्य्यंस्मृतिसंस्कारयोरेकरूपत्वात् जा
त्यादिभिर्व्यवहितानामपिवासनानामानंतर्येऽव्यवहितवत् कार्यकारित्वंघटतिअन्यथा
कर्मफलानुपपत्तेः स्मृतिसंस्कारयोरेकरूपत्वादित्यर्थः एकरूपत्वमेकाकारत्वमिति तत्रा
दौमाव्यवायोज्जात्यादिव्यवहितत्वमुदाहरन्नेवानंतर्यकारणंप्रदर्शयति वृषेत्यादिना आ
रंभएवांजनस्यापेक्षणात् उदयपदंतथाचवृषदंशविपाकारंभः स्वव्यंजकेनैवाभिव्यक्तो
वर्तमानावस्थोभवति नतुपूर्वदेहत्यागमात्रेणमृदितिमेवेतिनियमः अतःसयदिजातिशता
दिव्यवधानेनव्यंजकंप्राप्यउदियात् तदाद्रागित्येवशीघ्रंपूर्वप्राप्तवृषदंशविपाकेनजनिता
न्संस्कारान्गृहीत्वैवव्यक्तोभवतिव्यवहितानामपिवासनानांसदृशकर्मसंपत्त्यादिसत

आनंतर्यमेवार्थाद्भवतीत्यर्थः सादृश्यं चात्रैकजातीयफलकत्वं अभिव्यंजकनिमित्तस्य वि
वरणं निमित्तीभूतमिति प्रकृतेरेवोपादानत्वादिति भावः आनंतर्ये तत् कारणं व्याख्या
यतत्र प्रमाणं पृच्छति कुत इति कुतः प्रमाणादित्यर्थः सूत्रावयवेनोत्तरमाह स्मृतिसंस्कार
योरिति ननु मनुष्यजन्मन्येवाप्यवहितेषु वर्षदेशवासनास्तत्राह यथानुभवा इति नन्वे
वं सति मनुष्यवासनायेव वर्षदंशविपाकोऽभवत्वमवहितत्वादिति तत्राह तेचेति ते च सं
स्काराः कर्माशयानुरूपा एवापेक्षितार्थाः इत्यर्थः नन्वेवमपि मानुष्यसंस्कारादेव वर्षदंशवि
पाकनिर्वाहिका स्मृतिरस्तु तथापि कर्माशयानुरूपस्मृतिहेतुत्वेन कर्मानुरूपोपपत्तिरिति
तत्राह यथेति एकरूपत्वं प्रसाध्य सूत्रतात्पर्यार्थं व्याचष्टे इति जातीति ननु सजातीयवा
सनैव चेद्विपाकनिर्वाहिका तर्ह्येकविपाककालेऽवश्यमुत्पादेन पूर्वसंस्कारनाशात्
कथं पुनरन्यजातीयं विपाकान्तरमित्याशयेनोक्तं स्मृतेश्च पुनः संस्कार इति परमार्थतस्तु
स्मृतेर्न संस्कारनाशकत्वं इत्यपि पूर्वोक्तं स्मृतेश्च स्मृतिसंस्काराः स्मृतिहेतुसंस्काराः कर्मा
शयवृत्तिलाभात् कर्माशयोद्बोध्यादिति नन्वेवं सकलजन्मार्थेभ्यो वासनास्वीकारे
नवस्थाप्रसंग इत्याशंकामपाकरोति तासामनादित्वं चाशिषो नित्यत्वात् व्याचष्टे तासामि

ति नित्यत्वात्प्रतिजन्मनियतत्वादित्यर्थः अनादित्वं च प्रवाहरूपेणाबोध्यं यद्यप्याशीर्नित्य
तया तद्धेतुवासनाया एवानादित्वं सिद्ध्यति न तु भोगहेतुवासनानां तथापि तत्रानवस्था
याः प्रामाणिकत्वेनादोषत्वेन दृष्टान्ततया तासामप्यनादित्वमनुमेयमित्याशयः नन्वस्मो
क्ष वदि यमाशीः क्रिन्तस्य स्वाभाविकी एव भवतु तत्राह येयमिति आशीर्नित्यत्वेन तद्वास
नानादित्वेन चाशिषः स्वाभाविकत्वेनाप्युक्तिं पृच्छति कस्मादिति तत्राद्याशीर्नित्यत्वेन
वासनानादित्वं यथासिध्यति तदाह जातेति जातमात्रो नु मातापास्मर्यो बालको यदि
पूर्वजन्मन्यनुभूतमरणधर्मकः स्यात् तदा कथं तस्य द्वेषतत्कारणमरणदुःखस्मरणाभ्या
मेवोत्पाद्यो मरणत्रासोऽपयोक्ताशीरूपः संभवेत् पूर्वं पूर्वभवीयमरणदुःखवासनां
विनेति शेषः अस्वाभाविकत्वे नुपपत्तिमाह न चेति नापि स्वाभाविकं वस्तु निमित्तमपे
क्षं भवति भयरूपा तथा चोक्ताशीः खड्गप्रहारदर्शनादिनिमित्तमपेक्षते अन्यदानुपप
त्तेरतो न स्वाभाविकीति शेषः सूत्रतात्पर्यं शिष्यावधारणायोपसंहरति तस्मादनादीति
निमित्तं विपाकोन्मुखं कर्मप्रतिलभ्याऽऽहोत्वा मत्ववासनावान्मनादित्वं तदा भवेत् यदि
तदा प्रपंचितं नित्यं स्यात् प्रतिशरीरं च भिन्नं न स्यात् तदेनत नयं प्रकृत्यतिरिक्तस्य सर्व

स्यकार्यत्वाभ्युपगमात् अणुमहच्छरीरयोः परिणामभेदेन भेदवच्छरीरस्य परिमाणाच्चि
त्तस्यापि भेदसिद्धेश्चेति तत्रादौ सांख्यपरिमाणमाह घटेति प्रतिपुरुषं सर्वशरीरसाधार
णमेकैकमेव चित्तं तथापि घटप्रासादस्थस्वल्पमहद्दीपप्रभेदेन प्रदीपवत्स्वल्पमहच्छरी
रभेदेन चित्तं स्वल्पं महत्परिमाणं भवति न चानित्यत्वमपि तस्य प्रदीपपरमाणुवदेव
द्रष्टव्यं तच्च परमाणुतस्य सूक्ष्मावस्थायां प्रकृतेः सत्त्वरूपांशविशेषतां प्राप्नोतीति तत्
प्रकृतिपुरुषातिरिक्तस्यानित्यत्वेति भावः एवमपरे सांख्या आहुरित्यर्थः ननु विभुत्वे चि
त्तं कथं नेष्यत इत्याकांक्षायामाह तथा चेति तथा चाणुत्वस्यापि संभवात् पूर्वापरसर्ग
योरंतरप्रलयेऽभावो लयः संभवति तथा संसारः संसरणं इहलोकपरलोकसंचारश्च
सन्निपत्वात्संभवति विभुत्वे चैतदुभयं न घटत इत्यर्थः स्वशास्त्रसिद्धांतमाह वृत्तिरेवेति
विभ्वाकाशवच्चित्तं प्रतिनियतपुरुषभोग्यत्वात् पुरुषभेदेनानंतं च चित्ताकाशं चिदाका
शमाकाशं च तृतीयकं द्वाभ्यां शून्यतमं विद्धि चिदाकाशं वरानने इत्यादिभिः शास्त्रेषु
चित्तविभुत्वावगमात् अस्य चापरिच्छिन्नत्वे सतीश्वरोपाधेरपि परिच्छिन्नत्वापत्तेरीश्व
रस्य विभुत्वश्रुतिस्मृतियुक्तिविरोधात् यथा तु वैशेषिकानैय्यायिकाश्चाकाशस्य विभुत्वे

त्यस्यापि श्रोत्रादिरूपेण कार्यत्वं देहेन सह गमनादिकं चौपाधिकं तथाभ्युपगच्छंतीति तथैव विभु
नित्यं नानाजीवचित्तानां मलिनदर्पणवदविद्याकामकर्मावृतप्रकाशशक्तीनां मंदप्रकाशस्व
भावानां वा भास्वरसत्त्वान्तरोपष्टंभाज्ज्ञानादिहेतुः परिणामविशेषः सर्गादौ जायते कार्योपा
धिरयं जीवः कारणोपाधिरीश्वर इति श्रुतेः स एव परिणामः स्वल्पमहच्छरीरभेदेन संकोचवि
काशशीलो भवतीत्ययमेव भावार्थः पतंजलिरभ्युपगच्छतीत्यर्थः अत्र च वृत्तिः प्रदीपशिखाव
द्रूपः परिणाम इति प्रागेवोक्तं न तु क्षणाद्यवस्थायां जाता नेच्छादिगुणाः सर्गाद्युत्पन्नचित्त
स्य प्राकृतप्रलयपर्यंतावस्थानस्येहलोकपरलोकगमनादिश्रवणादिभिरस्यावतेश्च
रपराद्याकारैर्वान्येषां ज्ञानशब्दवाच्येति तदेवं वैशेषिकाणामाकाशवत् अस्माकं चित्तम
पि नित्यानित्योभयरूपमिति सिद्धं विशेषस्त्वयं यत्तैराकाशस्य श्रोत्ररूपेण जन्यता कर्णशष्
कुल्यौपाधिकीष्यते अस्माभिस्तु गुणांतरसंभेदात् यथाधेरेव महदादिरूपेण प्रकृत्याख्य
सूक्ष्मचित्तस्य परिणाम इष्यत इति एतेन विभुनित्यत्वे व्याकाशस्य कार्यत्वमपि व्याख्यातं
शब्दादिहेतुपरिणामविशेषरूपेण कार्यत्वं श्रुतिस्मृतिसिद्धं विरोधाभावादिति दिक् येतु वै
शेषिकाश्चित्तं अणवेव सर्वदाभ्युपगच्छंतीति तन्मते एकदा पंचेंद्रियैः पंचवृत्त्यनुपपत्तिः चक्षुः

श्रोत्रादेर्विरुद्धदेशत्वयाञ्चलोस्तदुभयसंबंधस्य शब्दानैश्चित्यात् इत्यादीनि दूषणानि ऊ
ह्यानि: यद्यपज्ञानानुत्पत्तिर्मनसोलिंगमितिन्यायसूत्रेवसद्भावसर्वज्ञत्वाभावएवमनन्ता
त्मकरणेलिंगत्वेनोपन्यस्तोनत्वेकदेंद्रियद्वयस्यभावः हेत्वसिद्धिदोषापत्तेरितिद्रष्टव्यंसंको
चविकाशयोः कारणमाह तच्चेति तच्चसंकोचविकाशनं धर्मो धर्मादिरूपनिमित्तापेक्षया
भवति अनादित्वाच्चात्मनांयोऽयमप्यत्रइति ननु धर्मादेरेव चेच्चित्तवृत्तिविकाशस्तर्हिरागे
णादिधर्मेस्तुतिदानादिभिरेवज्ञानादिसंभवेदुष्करयागापेक्षानपेक्षेत्याशंक्याह निमि
त्तंचेति अभिवादनादीति आदिशब्देननिंदापरस्वादानाविक्रमादीन्यधर्मसाधनान्यपि
गृहीतानि श्रद्धादीनि श्रद्धादयः पर्वव्याख्याताः श्रद्धावीर्यस्मृतिसमाधिप्रज्ञाः तद्विपरी
ताश्चाश्रद्धादयस्तदर्थः ननुश्रद्धादिमात्रस्य धर्मनिवर्तकत्वेकिंप्रमाणं तत्राह तथाचोक्त
मितिविहारत्वमपलसाध्याः निष्पापधर्मनिर्वर्तोहेतुः बाह्येसाधनेति बाह्यसाधनानि
रपेक्षस्वभावादित्यर्थः तपोरिति तपोऽत्रबाह्याध्यात्मिकयोर्मध्येमानसंकर्मवलीयः य
तोमानसंकर्मज्ञानंवैराग्यस्यतपासर्वातिशायीत्यर्थः निरतिशयत्वमुदाहरति दंडकारण्यं
चेति दंडकदेशस्तद्राज्ञिकोपान्वितेनऋषिणाशिलावृष्ट्याजनशून्यंचकार अन्यत्सुगमं

तथाचश्रद्धादिसाधनत्वमेवयोगधर्मोयथावितविकाशसाधनंतथाबाह्यधर्मइतियो
गधर्मस्यापेक्षेति तदुक्तंयाज्ञवल्क्येन सर्वधर्मान्परित्यज्यमोक्षधर्मसमाश्रयेत् सर्वे
धर्माःसदोषाःस्युःपुनरावृत्तिकारकाः इतिइज्याध्ययनदानानितपःस्वाध्यायकर्मचअ
यंतुपरमोधर्मोयद्योगेनात्मदर्शनमितिच गीतायामपिराघातेमिहिताबांद्वेबुद्धिर्योगे
त्विमांशृणु स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयादिति यतश्चमानसंकर्मैवबलीयो
ऽतएवजडभरतादेःसमाधिनिष्ठत्वेवक्ष्यते सर्वविज्ञानसंपन्नःसर्वशास्त्रार्थतत्ववि
त् अपश्यत्सवमेवात्मानंप्रकृतेःपरम् नययावगुरुप्रोक्तंकृतोपनयनःश्रुतिं नदद
र्शचकर्माणिशास्त्राणिजगृहेनचयःतादिनेति तदेवंमोक्षयोग्यचित्तेनतत्संगोनेतरचित्तस्य
बंधप्रकारश्चदर्शितःपुरुषेचित्तद्वारकबंधस्यस्वाभाविकत्वेमोक्षासंभवात् कर्मवास
नादिमत्त्वकल्पितत्वादुच्छेदनीमोक्षोपपद्यतइति इदानींमोक्षोपपत्तयेऽनाद्यसंख्यानामपि
वासनानामनंतानांउच्छेदउपपाद्यतेहेतुफलाश्रयालंबनैःसंगृहीतत्वादेषामभावेतदभावः
वासनाहेतुःसंसारचक्रंतस्यापिहेतुरविद्यैषाततःविद्येवहेतुरर्थादित्याह हेतुरित्यादिना
इत्येषहेतुरित्यंतेनहेतुःसंसारचक्रमित्यन्वयःसंसारचक्रस्याज्ञानकर्मवासनाहेतुत्वेहेतुग

र्मविशेषणं प्रवर्तमिदं षडरमिति धर्माधर्मसुखदुःखरागद्वेषरूपेणारषट्केनाविद्यादंडप्रे
रितेन भ्रामितं भवतीत्यतो वासनाहेतुरित्यर्थः कुलालचक्रस्य हि दंडेन शलाकाप्रेरणोद्भू
तवेगाख्यः संस्कारो भवति येन कियत्कालं स्वयमपि भ्रमति तद्वदेव भ्रामितं संसारचक्रं वा
सनाहेतुरिति भावः चक्रप्रवर्तकं दंडमाह अस्य चेति नेत्री भ्रामिका तथा च सर्ववासनोद
ये विषये मूलकारणं अविद्याक्षये च विहितनिषिद्धकर्मणां सत्त्वेपि संसारचक्रभ्रमणान्न
वासनोदय इत्याशयः हेतुमुपसंहरति इत्येव हेतुरिति अविद्या हेतुर्वासनाया इत्यर्थः
फलाभावे कारणाभावः फलाभावकालेपि कारणस्य सत्त्वादित्यत्विति यं पुरुषार्थमुद्दिश्य ध
र्माद्युत्पन्नं तदेव वासनानामपि फलं कर्मवासनयोरन्योन्यसहकारित्वादित्यर्थः ननु फले
न कथं कारणस्य निमित्तरूपः संग्रहः कथं वा फलाभावे कारणाभावः फलाभावकालेपि कारण
स्य सत्त्वादित्याशंकायामाह नह्यपूर्वोपजन इति अपूर्वस्य सत उपजनो जन्मादि नास्तीत्यर्थः
तथा च सत्कार्यस्वीकारेणानागतावस्थफलेन प्राप्तो वर्तमानहेतुर्भवति भावः आश्रय
माह मनस्त्विति साधिकारं पुरुषार्थवत् अन्त्यप्रलये वासनासत्त्वस्यानुरोधेन वासना
श्रयमनसो नित्यत्वमभिप्रेत्य साधिकारमिति विशेषणं अस्य अधिकारसमाप्तौ मन एव न

तिष्ठतीति विशेषणं स्वर्थमिति आलंबनमाह यदिति सुखमिति मोक्षकाले कामिनीरूपादी
नां रागवासनाव्यंजकानां सत्त्वेपि आलंबनाभावोपपादनाय अभिमुखमिति विशेषणं तथा
च सन्निकृष्टं वासनाव्यंजकमत्रालंबनमित्यर्थः हेत्वादीन् सामान्योपसंहारव्याख्यार्थमाह एत
मिति संगृहीताः व्याप्ता अतएषामभावेऽत्यंतोच्छेदे विदेहमुक्तिसमये तदाश्रयाणां तन्नि
यतानां वासनानामत्यंतोच्छेद इत्यर्थः तथा च वासनानामनादित्वेपि मोक्षः संभवतीत्याश
यः सत्कार्याभ्युपगमात् वासनानामत्यंतोच्छेदो न संभवतीति शंकायामुत्तरसूत्रमवतार
यति नास्तीति द्रव्यात्वेन संभवंत्यो वस्तुत्वेन तिष्ठंत्यः अतीतानागतं स्वरूपतोस्त्यध्वभे
दाद्धर्माणां भवेदप्ययं दोषो यदि स्वरूपापायो वासनानामस्माभिरुच्येत किंत्वत्यंतानी
ततामात्रं यतोतीतानागतं वस्तु स्वरूपतोस्ति न त्वेकदा विरुद्धमानानां धर्माणां कथमे
कत्र समावेशस्तत्राह अध्वभेदाद्धर्माणामिति भिन्नाध्वकत्वादविरोध इत्यर्थः वर्तमान
लक्षणानामेव धर्माणामेकदा विरोध इति भावः अतीतानागतयोः स्वरूपानपायेप्र
माणं दर्शयति भाष्यकारः भविष्यदिति भविष्यंती व्यक्तिरभिव्यक्तिर्यस्य तथा त्वयमिति
त्वयमप्येतद्वस्तुस्वरूपसत् यतो योगिनां प्रत्यक्षज्ञानस्य ज्ञेयं विषयः अत्र तर्कमाह यदि

चेति नेदमिति शशशृंगादीनां ज्ञानाद्दर्शनादिति भावः तथा चोक्तं ब्रह्ममीमांसासूत्रेण ना
भाव उपलब्धेरिति ननु शुक्तिरजतादिवत् बुद्धिपरिणामविशेषरूपयोगजधर्मादिजन्यो
ऽतीतादिस्थले साक्षिज्ञानविषयोऽस्त्विति चेन्न योगिनामपूर्वानुभूतातीतादेः कालान्तरेपि
प्रत्यभिज्ञायमानत्वात् बाधकाभावेपि वस्तूनां बुद्धिमात्रत्वे वर्तमानावस्थवस्तूनामपि बु
द्धिमात्रताप्रसंगाच्च नचानुपलंभो बाधकः योगिप्रत्यक्षसिद्धस्य सौक्ष्म्येणानुपलंभोप
पत्तेः तथा च सांख्यसूत्रं सौक्ष्म्यात्तदनुपलब्धिरिति नन्वतीतानागतावस्थायां नास्तीति प्रत्ययो
बाधक इति मैवं योगिप्रत्यक्षेण लौकिकप्रत्यक्षस्य बाधनात् इदानीं घटोऽतीत इत्यादिप्र
तीतिबलात् नास्तीति प्रत्ययस्यातीतत्वादिविषयकत्वाच्चेति अतीतानागतसत्त्वस्वीकारे
बीजान्तरमाह किं चेति भोगभागीयस्य भोगसाधनस्य निरूपाख्यमसत् तदुद्देशेनेत्यस्य
विवरणं तेन निमित्तेनेति कुशलो निपुणः कुशलो योगी अनागते साक्षात्कृते तद्वर्तमानत्वाप
पत्तये यथार्जुनः कृष्णशरीरे कालात्मके भीष्मादिप्रवेशं भाविनं दृष्ट्वा युद्धे प्रवर्तत इति नन्वेवं
कारणव्यापारो विफलः कार्यस्य नित्यत्वादित्याशंकां परिहरन्नेव परमते दूषणान्तरमाह सतश्चे
ति तथा चाव्यक्तावस्थायाः सतो वर्तमानतायां कारणव्यापारसाफल्यं दृष्टं च कारणव्यापारेणाभि

दवाभिव्यज्यत इति यथा पाषाणेषु सत्तामेव प्रतिमापद्मादीनां लौकिकव्यापारेणाभिव्यक्तिमा
त्रमिति तदुक्तं वासिष्ठे सुषुप्तावस्थया चक्रपद्मरेखाः शिलोदरे यथा स्थिता चितेरंतस्तथेयं
जगदावलीति चैतन्ये च जगदावली प्रकृतिपुरुषयोस्तप्तायःपिंडवदविवेकेन प्रकृतिद्वारो
पासनार्थो श्रुतिस्मृत्योरुच्यते सर्वकर्तृत्वसत्यसंकल्पत्वादिवत् अन्यथा गगनेवायोरिवा
धारत्वमसंगेनैव चैतन्ये जगत उच्यत इति ननु तथापि कारणनित्यत्वेनातीताद्यवस्था
दपि कारणात्सदैव कार्याभिव्यक्तिः स्यात् तत्राह सिद्धमिति सिद्धं वर्तमानमेव निमित्तमिमा
दिरर्थः सतः कार्यस्योत्पत्तौ कारणवैफल्यशंकानिरासायोक्तविशेषानुग्रहणमिति परमतं नि
षेधति नापूर्वेति अतो नापूर्वमुत्पाद्यतीत्यर्थः अपूर्वोत्पादने च शशशृंगाद्यपि कारण
व्यापाराद् उपपद्येत उत्पत्तेः प्राक् शशशृंगादिभ्यो घटादीनां वैलक्षण्याभावादिति अधि
कं तु प्रागुक्तं अध्वभेदादिति सूत्रावयवं व्याचष्टे धर्मी चानेकेति अतो न विरोध इत्याह न
चेति अभिव्यक्तिरूपेण विशेषेणैव धर्माणां विरोधो न स्वरूपत इति वाक्यार्थः द्रव्यतः स्व
क्रियाकारित्वेन प्रकृतिरूपं तदैति उत्तरं स्विन्नेचेति व्यंग्येन भाविव्यक्तिकेन वर्तमानस्यैवे
त्यादिरध्वनोरित्यंत उपसंहारः षष्ठी चात्र सप्तम्यर्थे ननु तथाप्येकाध्वसमये परध्वाभावा

दृष्टस्येवसनकार्यहानिरित्याशंकायामाह एकस्यवाध्वनइति एतच्चएतेनभर्तेद्वियेषि
त्यादिसूत्रेसम्यगुपपादितमस्माभिरिति अभ्युत्वा अप्युषित्वात्रयाणामध्वनांलक्षणा
नामिति नदेवंमोक्षयोग्यंचिंतितंतदन्यचिंतानांवंधप्रकारउक्तस्तस्यचमोक्षानुपपत्तिःप
रिहृताइतःपरंमोक्षकारणस्यविवेकज्ञानाख्यसम्यक्ज्ञानस्यविषयोलक्षणादिकंचाति
विस्तरेणप्रतिपादनीयंविशेषदर्शनइत्यादिसूत्रत्रयपर्यन्तैःसूत्रैःतत्रचादौसदसत्त्ववैध
र्म्येणकार्यकारणयोर्विवेकंसम्यक्ज्ञानविषयैकदेशंदर्शयति तेव्यक्तसूक्ष्मागुणात्मा
नःतेधर्माःयद्यपिनित्यास्तथापिकालभेदेनव्यक्ताःसूक्ष्मावाभवंतसर्वेएवगुणात्मा
नःसत्त्वादिगुणमात्रस्वरूपाएवभवंतिसदावर्तमानत्वेनगुणाएवतदपेक्षयासत्यार
त्यर्थःव्याचष्टेःखल्विति अत्रसूक्ष्माण्यात्मानइत्यस्यानंतरंषडविशेषाइतिपाठःक्वचिन्निष्ठ
तिसमयामादिकत्वाडुपेक्षणीयःसर्वविकाराणामेवगुणात्मकत्वस्यवक्तव्यतयाषड्विव
शेषमात्रनिर्देशानौचित्यादिति अयमर्थःतेधर्माव्यक्तस्वरूपाःसूक्ष्मस्वरूपाश्चमहदादि
घटपर्यन्ताःपरमार्थतोगुणात्मानोगुणरूपेणैवसंतोननत्स्वरूपेणपतःसर्वमिदंधर्मजातं
सत्त्वादीनांसन्निवेशःसंयोगस्तद्विशेषमात्रंतद्विलयेविलयात् तद्वर्तमानतायांवर्तमान.

त्वानुनिपतमितितदुक्तं आद्यंतयोर्यदसत्तोस्तितदेवमध्येइतित्रिगुणात्मकमायैवजगत
स्मार्थइतिच अपारमार्थिकत्वंचानित्यतामात्ररूपासत्त्वं अन्यथासत्कार्यादिप्रतिपादकसू
त्रादिविरोधात् अत्रावयवसंयोगातिरिक्तोधर्मोनास्तीतितभाष्यार्थः अवयविद्रव्यस्या
तिरिक्तस्यस्थानेस्थानेव्यवस्थापितत्वादिति उक्तार्थेशास्त्रंप्रमाणयति तथाचेति परमं
पारमार्थिकंनित्यमितियावत् मायेवलौकिकमायावत् क्षणभंगुरं अतःस्तत्तुच्छंआसं
ततुच्छंअससारंस्थिरंशाभावादिति अत्रसशब्देनपरिणामितयायणानामपितुच्छत्वं
सूचितं गुणाएवपरिणामितयाच्चरुपनित्यापेक्षयातद्व्याःगुणकार्यतद्वयमानगुणा
पेक्षयापितुच्छं अतःस्वतच्छमिति यद्यपिमायाशब्दोमिथ्यावस्तुनोकारणेमुख्यःमायां
तप्रकृतिविंद्यादितिश्रुतेःविश्वस्यबीजंपरमास्मिमायेतिस्मृतेश्चमायात्वंहिमचानिकारे
णव्यामोहकत्वंतच्चप्रकृतावेवमुख्यंप्रकृत्यासर्वमेवेदंजगदंधीकृतंविभोरिति जगन्मो
हात्मकंविद्धिअव्यक्तंव्यक्तसंज्ञकमितिभारतात् तथापिकार्यकारणमेदाभावादुःका
र्येपिप्रयुक्तःदैवीह्येषागुणमयीममामायादुरत्ययाइत्यादाविवेति मंतव्यं नन्वेवंप्रपंचो
पिप्रकृत्यारब्धत्वान्मायाकार्यत्वान्मायैव अस्यथाभवयोनिर्महद्ब्रह्मतस्मिन गर्भंदधाम्य

हं मूलमायाभिधानं तत्साक्षात्किमेपितिष्ठति इति केचिन्मोदिषमस्तद्विशेषणवैयर्थ्यात् त
त् कथमिव शब्दः प्रपञ्च इति मैवं लौकिकस्यैव दृष्टान्तादेरेवात्र दृष्टान्तत्वेनेव शब्दो दिव्यादि
ति प्रपंचस्य मूलकारणमात्रत्वे श्रुतिरपि वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्य
मित्यादिरुदाहर्तव्या तथा हि सुवर्णमपि शिबिका दारुसंघातो रचनास्थिति संस्थि
तः सन्निविष्टतां तथाभिषेकतत्र देशिविकल्पया एवं छत्रशालाकादिषु यथा चोपपद्यतां बु
ज्ञातं च्छत्रमित्येव तस्या यत्स्वपि तथा मयीत्यादि एवंविधेषु च वाक्येषु विकारणाम निरूपण
येव विवेकवैराग्ययोस्तात्पर्ये न तु कार्यस्वरूपे कार्यकारणभाव प्रतिपादकवाक्यविरोधा
त् न च तदनुवादमात्रं महदादिसृष्टेर्लौकिकप्रमाणानधिगतत्वेन अनुवादासंभवात्
प्रमाणान्तरसत्त्वे च तन्नेन सहापि विरोधस्यासाम्यत्वात् किंच सर्वविकारस्य मिथ्यात्वे प्रमाण
स्यापि मिथ्यात्वनिश्चयेन श्रुतिप्रमाणान्यत्वेपि कारणत्वाभिमतत्वस्यादोषन: संशयः स्या
त् प्रामाण्यसंशयाहितापे संशयादिवदितिदिक् सूत्रान्तरमवतारयति: यदेति यदि सर्वे विका
राः अनेकगुणमात्राः तदा कथमेकं शब्दतन्मात्रं एकं चक्षुरिति लोकशास्त्रयोर्व्यवहार इति शंका
या अर्थः तत्र सिद्धान्तसूत्रं परिणामैकत्वाद्वस्तुतत्वं परिणामस्यैकत्वाद्वस्तूनां गुणानां तत्त्व

मिति योजना परमार्थतो नानात्वेपि व्यावहारिक्रगुणानित्येन परिणामरूपेण वस्तूनां गुणानामेक
त्वव्यवहार इत्यर्थः अतएव श्रुतिर्व्यावहारिकस्य साम्यावयविन एकस्यावयवविभागे सति नाना
त्वमिव पारमार्थिकमतत्ववती यदग्नेरोहितंरूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्य अ
पागादग्नेरग्नित्वं त्रीणिरूपाणीत्येव सत्यमिति परिणामस्यैकत्वे भाष्यकारो दर्शयति प्रख्ये
ति महत्तत्त्वकार्यां सात्त्विकान्तःकरणरूपेण परिणतानां बाह्यकरणाभावेन श्रोत्रमित्येकः
परिणाम इत्यर्थः तेन महदहंकाररूपेणापि परिणामैकत्वकथनात् न स्यूनता अत्र श्रोत्र
शब्देनास्यान्यपि ज्ञानेन्द्रियोपलक्षणीयानि गृह्यान्तकानामिति तामसान्तःकरणरूपेण
परिणतानामित्यर्थः अत्र शब्दः इति शब्दतन्मात्ररूपं द्रव्यं मूर्तिसमानजातीयानामित्यणा
मिभाष्येणद्रव्यत्वलाभात् एतदपि रसादितन्मात्राणामुपलक्षणं एकं कर्मात्मकानां रजसान्तः
करणरूपेणपरिणतानां करणान्तरभावेन एकः परिणामो वागादीन्द्रियमित्यपि बोध्यं अतः प
रंस्थूलभूतरूपेणैकं परिणामं दर्शयति शब्दादीनामिति मूर्तिः काठिन्यं पृथिवी त्वमित्यावत्
म सोसजातीयानां शब्दादितन्मात्राणामेकः परिणामः पृथिवी परमाणुः स्थूलपृथिव्याः प
रमसूक्ष्मावस्थेत्यर्थः इदं चाग्रे प्रतिपादयिष्यामः अपरे पसूक्ष्मशब्देनेसांख्यप्रोक्तः सूक्ष्मामाता

पि तज्जातीयसहकृतभूतैस्तिष्ठा विशेषाः स्युरित्यत्र पंचपरमाणुर्वैशेषिकैस्त्रसरेणुशब्देनोच्य
ते तस्मादिस्थूलस्य स्वपृथिव्याः परमसूक्ष्मत्वात्पृथिवीपरमाणुरिति गुणेषु पृथिवीत्वादि
व्यवहाराभावेनाणुत्वेपि न पृथिव्याद्यणुव्यवहार इति तस्य च पार्थिवपरमाणोर्निरवयवत्व
भ्रमनिरासाय पंचतन्मात्राण्येवावयवा यस्याह तन्मात्रावयव इति बहुव्रीहिविग्रहः महाभू
तादिरूपपरिणामेष्वप्येकत्वं दर्शयति तेषामिति एवमिति एवंभूतानंतरेष्वपि जलादिषु म
हादिजातीयानि जलत्वतेजस्त्ववायुत्वाकाशत्वजातीयानि तन्मात्राणि गृहीत्वा सामान्य
ज्ञातीयानामनेकेषां धर्मे भूत एकविकारं भूत उपपादनीय इत्यर्थः तद्यथा गंधत
न्मात्रं वर्जयित्वा चतसृणां तन्मात्राणां स्नेहजातीयानां एकः परिणामो जलपरमाणुस्तेषां च म
हाजलादिः एवं गंधरसौ वर्जयित्वा त्रयाणां सजातीयानां त्रितन्मात्राणां तेजोणुस्तेभ्यो म
हातेजआदि एवं गंधरसरूपाणां वर्जनात् द्वाभ्यां वाय्वणुस्तेभ्यो महावाय्वादिः एवं शब्दत
न्मात्रादहंकारांशसहकृतादाकाशाणुस्तस्माद् व्योममहाकाशादिरिति इदमत्रावधेयं शब्दादीनां
मूर्तिसजातीयानामित्यादिवाक्यादत्रदर्शनेः पंसिद्धान्तः शब्दादितन्मात्रपंचके काठिन्यस्ने
हादिस्वंग्याः पृथिवीत्वादिजातयः संति तत्र पृथिवीजातीयैः शब्दादिगंधांतपंचतन्मात्रैः पृ

थिवीपरमाणुरारभ्यते पृथिव्यां पंचगुणोपलंभात् एवं जलजातीयैः शब्दादिरसपर्यंतैश्च
तुस्तन्मात्रैर्जलपरमाणुः एवं तेजोजातीयैः शब्दादिरूपांतैस्त्रितन्मात्रैस्तैजसः परमाणुः ए
वं वायुजातीयाभ्यां शब्दस्पर्शतन्मात्राभ्यां वायुपरमाणुः एवमाकाशजातीयाच्छब्दतन्मा
त्रादहंकारसहकृतादाकाशाणुर्जायते एवं परमाणुगणोत्पत्त्यनंतरं तेभ्य एवाकाशादिक्रमे
ण पंचमहाभूतान्युत्पद्यंते भूतेभ्योप्याकाशादिक्रमेण महाभूतोत्पत्तिसिद्धेरिति समानतंत्र
सायेनच सांख्येयोप्ययमेव सिद्धान्त उन्नीयते विष्णुपुराणादौ तु शब्दतन्मात्रादाकाशमा
काशात्स्पर्शतन्मात्रं तस्माद्वायुरेवं क्रमेण सृष्टिः स्मर्यते यथा विष्णुपुराणे ऽहंकारस्यानं
तरं यथा प्रधानेन महान् महता स तथावृतः भूतादिस्तु विकुर्वाणः सर्गं तन्मात्रिकं ततः
ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणं शब्दमात्रं तदाकाशं भूतादिः स समावृणोत्
आकाशस्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः इ
त्यादिक्रमेण पंचभूतसृष्टिरुक्ता तस्यायमर्थः सोहंकारो महता वृतः आवृतः य
था पृथिवी जलेनावृता भवति तद्वत् ततो महत्तावरणात् द्वाभ्यां मिलित्वा भूतादिस्ता
मसाहंकारः तन्मात्रिकं सर्गं तन्मात्राणां सृष्टिं ससर्ज चकारेत्यनंतरं स एव भूतादिः शब्द

तन्मात्रात्सत्वाधिक्योपात् शब्दगुणकमाकाशंसंजातमित्यनुषज्यते तथा चाहंकारशब्दतन्मा
त्राभ्यांमिलित्वाऽऽकाशःसमुत्पन्न न तत्तन्मात्रांतरमपेक्ष्य तदितिसिद्धं तच्च शब्दगुणकमाका
शंभूतादिनाहंकारेणपरितंभूत्वास्पर्शमात्रंससर्ज अत्रचाकाशेहंकारस्यापिकारणत्व
वचनादपरभूतचतुष्टयेपितत्तन्मात्राणामहंकारसहितानामेवहेतुत्वमवगम्यतेप्रतिभा
स्यात् एतत्सूचनायैवभूतादिशब्देनाहंकारोपन्यासः ततश्चस्पर्शतन्मात्रात् बलवान्
महावायुरभवदिति एवंक्रमेणतन्मात्राधिक्येन तेजआदिभूतजन्योत्पत्तिवाक्यान्य
पितत्रव्याख्येयानि कार्यकारणयोर्विवेकप्रकारः प्रदर्शितः इदानीमनयोःकार्यकारण
रूपंसर्ववस्त्वसत् चित्कल्पितमात्रंस्वप्नवदिति पक्षाहुस्तान्निषिध्यचितनद्वयोर्विवे
कप्रकारंदर्शयिष्यतिसूत्रकारः तत्सूत्रमवतारयितुमुपक्रमते नास्पर्थइतिविज्ञानवा
दिनआहुः बाह्यवस्तुनःप्रतीतिमात्रसत्तापरमार्थतस्तुगुणावातत्परिणामोवात्मनोता
दिकंवाकिमपिनास्ति ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः नमुमुक्षुर्नवैमुक्तइत्ये
षापरमार्थता यथाद्यःस्वप्नेभातीवनैवसन्तीति तथाजाग्रदवस्थायांभूतानिचनसं
तीत्यादिश्रुतिस्मृतिपरंपरयैवबाह्यवस्तुनिराकरणात् तथायुक्तिरप्यस्ति स्वप्नादौता

वत् विषयंविनापिज्ञानमुभयवादिसिद्धमनुभवविषयत्वंविनाहिविषयःपरैरपिनस्वी
क्रियते अतउभयवादिसिद्धेनज्ञानेनैवस्वप्नादिवत्सर्वव्यवहारोपपत्तौज्ञानातिरिक्तार्थ
कल्पनेगौरवमितितामिमांयुक्तिंप्रदर्शयन् स्वमतमुपन्यस्यति नास्पर्थइत्यादिना विज्ञा
नविरहचरोविज्ञानाभावकालीनोऽर्थउभयसिद्धोनास्तिज्ञानंतुअर्थाभावकालीनंस्वप्ना
दौकल्पितमुभयवादिसिद्धमित्यनयादिशाएतद्युक्तिमार्गेणायंवस्तुस्वरूपमसत्यंमनुप
नुवतेपदस्तावयन्नुवतइत्यंतंविवृणोतिज्ञानेत्यादिना आहुरित्यंतेनदिक्शब्दसूचितान्य
पराभिप्रेतयुक्त्यादयःप्रदर्शिताः तथापुत्रावत्तराणिचसहोपलंभनियमादभेदोनीलतद्धि
योःभेदश्चभ्रांतिविज्ञानैर्दृश्येतेन्दाविवाद्वयइत्यादीनि तन्मतेस्वप्नादौतिएवकरोतितेत
येति तेविज्ञानवादिनएवास्तंतरस्यपंः तन्नहेतुमाह प्रत्यपस्थितमित्यादिनास्फुरित्यंतेन
अस्यार्थः इदंसर्वंवस्तुस्वमाहात्म्येनसन्निकर्षादिनैवोपस्थितेनतदोषादिनास्वप्नवदसं
तवाध्यादर्शनात् अतःकथंवस्तुस्वरूपंगृहीत्वापिप्रमाणरूपेणस्वप्नज्ञानरूपदृष्टान्तब
लेनतदेववस्तुस्वरूपमपलपंतःश्रद्धेयवचनाःस्युःतेषांज्ञानस्यापिभ्रमत्वेनतद्धकास
यथार्थवासार्थज्ञानाजन्यत्वात् तद्वाक्यार्थस्यापलापाच्च तद्वाक्यस्याश्रद्धेयत्वादित्यर्थः नहि

जाग्रज्ज्ञानस्य स्वप्नदृष्टांतेन विषयापलापे क्रियमाणे स्वाभिमतस्यापि क्षणिकविज्ञानस्याविष
यः सन्निरूप्यमभ्युपगंतुं शक्यते प्रामाणिकैरित्यतस्त एव नास्तिकाः न पुनरर्थो नास्तीति
भावः एतेनाधुनिकानां दृष्टिसृष्टिवादिनां वेदान्तिब्रुवाणामपि मतं प्रत्युक्तं नास्तिकत्वयोपे
क्षणीयं स्वप्नादिदृष्टान्तेन श्रीहर्षादीनामसत्खंडनेन च वेदान्तज्ञानतज्ज्ञस्यज्ञानयोर
पि भ्रमत्वापत्त्या वेदान्तप्रामाण्यासिद्धौ तत्प्रतिपाद्यब्रह्मासिद्धिप्रसंगादिति नन्वनुभवस्व
रूपस्यात्मनः स्वप्रकाशत्वात् न तत्र प्रमाणापेक्षेति चेत् न तथा सति वेदांतश्रवणवैय
र्थ्यापत्तेः अथापरोक्षत्वसिद्धितोपत्वभ्रमनिरासाय श्रवणापेक्षेति चेन्न अप्रमाणीभूते
न वेदान्तेनापरोक्षत्वाद्यभावस्यासिध्यापत्तेः ननु श्रुत्या स्वार्थे बोधिते सति पश्चात्तद्बाधेप्य
क्षतिः श्रुतिप्रवृत्तेः प्राक्तस्याबाधितमेव सर्वमिति मैवं श्रुतिप्रामाण्यग्राहकानुमानादी
नामप्यप्रामाण्ये स्वप्रमाणीभूतोबाधितो च श्रुति उत्पादितज्ञानामपि प्रामाण्यसंशयाद्धि
तः स्वार्थसंशयः कथं नाजागलस्तनवत् विफलो बुधोदिति दिक् विज्ञानवादे दूषणांतरमाह त
योतरस्तन्मतमवतारयति कुतश्चेति चशब्दो हेत्वंतरे बुनोपीत्यर्थः वस्तुसाम्ये चित्तभेदात्तयो
र्विभक्तः पंथाः एकस्मिन्नेव विषये चित्तान्तरवियोगे चित्तान्तरासंवेदनदर्शनात्तयोः स्थितार्थयो

स्थितार्थयोर्विभक्तः पृथगेव पंथाः स्वरूपभेदोन्यथा नत्वर्थो विरुद्धधर्मद्वयरूपमेकानेकात्मरूपमि
त्यर्थः क्षणिकविज्ञानपक्षे परेषां चित्तमित्यतः चित्तभेदेनैव विज्ञानभेदो पर्यवसिद्ध इति भावः
तत्रादौ भाष्यकारोऽनुभवबलात् हेतुं साधयति बहुविज्ञानालंबनीभूतमेकं वस्तु साधारणमि
ति प्रत्यभिज्ञासिद्धमिति शेषः सोयमनुमाने तर्कं मार्गे दर्शयति नवकल्पितत्वादिना प्रतिपक्षमित्यं
तेन नैकेति न एकमात्रापुरुषविज्ञानात्मकं तथानानेकपुरुषोपचितात्मकं अपितु स्वप्रति
पक्षमित्यंतेन नैकेति न एकमात्रापपुरुषचित्तात्मकं तरेक्षैवस्वातंत्र्येलोकस्थितमित्यर्थः सि
द्धहेतुं योजयितुं पृच्छति कथमिति उत्तरं वस्तीति आदावेकपुरुषोपचित्तकल्पितत्वानुपप
त्तिमवक्तंहेतुनाप्रतिपादयति धर्मापेक्षमिति पुरुषभेदेन कस्मिन्नेव योषिद्वस्तुनि धर्मेवि
भिन्नात्सर्वे ज्ञानं सत्त्ववतो सुखाकारं वृत्तिर्भवति अधर्मनिमित्तात् दुःखं मत्तो सुखाकारवृत्तिर
त्येवमादिरूपेवेक्षितं भेदोस्तितस्मात् कस्यपुरुषस्य चित्तेन तत् कल्पितं स्यात् न कस्यापीत्यर्थः
न त्वियं भवत्वनेकपुरुषचित्तपरिकल्पितमिति द्वितीयः पक्षः तत्राह न चान्येति नाप्यन्यपु
रुषविज्ञानमेकं न वस्तु नान्यस्य चित्तः परागः संभवति परस्व प्रत्यवरेणात् नान्य दिन्याय्यः तर्के
प्रदर्शयति तान्यचनवेर्ष्ये तस्मादिति व्याख्या ग्राहकाणां भेदेन वैषम्येणाभिन्नयोरित्यर्थः ननु वि

नातिरिक्तार्थवादिनां अर्थस्य स्थिरत्वान्निरंतरमेव तद्रूपं ज्ञानं भवति कथं वा राकारावार्थः
स्वप्नादिभेदभिन्नासु व्यक्तिषु हेतुः स्यात् न स्थविरलक्षणात् कारणात् कार्यभेदो घटत इत्या
शंकायामाह सांख्यपक्ष इति सांख्यानुसारिमते सुखदुःखमोहात्मकं भवति वस्तु चित्तं च
तत्स्वभावमतो धर्मादिनिमित्तवशात् सुखाद्यन्यमेव चित्ते वस्तु तत्तदप्यतरति तत्सवेदज्ञा
नं तथा धर्मादिनिमित्तानुरूपं सुखाद्यात्मकमन्यं प्रति सुखात्मकत्वेन वस्तु हेतुर्भ
वतीति कारणतावच्छेदकभेदान्न द्वितीयोपि दोष इत्यर्थः बौद्धवादान्तरनिरासकसूत्राव
तारयति तं न तत्तमनुपपन्नस्येति केचिदाहुरिति केचिदाहुः अस्तु ज्ञानाभिन्नोर्थः तथापि
ज्ञानसमकालीन एवास्तु अन्यदा प्रमाणाभावात् अयोगश्च ज्ञानसहभूरेवार्थो भोग्य
त्वात् सुखादिवदिति अत्र सुखदृष्टान्तस्य मनेनैव अभावात् अयोगश्चापि ज्ञानसहभूरेवा
र्थोस्मन्मते सुखस्यापि विषये स्थिरत्वात् रागद्वेषादिश्च भयसिद्धो दृष्टान्त इति अर्थस्य ज्ञा
नसहभावित्वे नयत् सिध्यति तदाह तदेतदपेति तेचदेतेनानुमानेन विषयस्य पुरुषान्तर
साधारण्यं बाध्यमानाज्ञानपूर्वोत्तरक्षणेषु विषयधर्मपदपंतीत्यर्थः ततश्चानन्तररूपमा
नतयान मोक्षसिद्धिरिति भावः तत्रापरं सूत्रमिदं न चैकचित्ततंत्रं वस्तु तदप्रमाणकं तदा

किं स्यात् यत्पार्थस्य ज्ञानातिरिक्तत्वेप्येकचित्तमात्रालीतित्वज्ञानमेवार्थ. चित्तं तत्तं तत्तन्नियतं तथाचना
पि वस्तु एकज्ञाननियतमिति प्रतिज्ञा तत्र हेतुः तदित्यादि तदा तर्हि तत्प्रसिद्धप्रमाणकं वस्तु किं स्या
त् चित्ताप्यये कुत्र विलीयेत न कुत्रापीत्यतो वस्तु स्थिरमिति शेषः अयं भावः यदि चित्तस्य का
रणे विलीयत इत्युच्यते तदा घटादिरूपार्थानां लाघवात् चित्ताभेदापत्त्या विज्ञानवादिमततएव
प्रवेशः नत्वद्दूषितं यदि च मृदादिषु एतेन तदा विनाशकारणं कोशापोपरिदृष्टस्य मद्दूरपात्ता
देरेव नाशकारणत्वेन चित्तनाशसमकालं घटादिवस्तुनाशानुपपत्तिरिति हेतुपदस्येमव
र्थं भाष्यकारस्त्वाह एकेति एकचित्तनियतं चेद्वस्तु स्यात् तदा तच्चित्ते विषयान्तरसंचारिणि ति
रुद्धे वा सति अस्य स्वरूपमेव तद्वस्तु अन्तस्तदानीं तत्किं स्यात् शेषमस्वरूपत्वे हेतुः अप्रमाणक
मित्यस्य विवरणं केनचिदगृहीतस्वभावकमिति सत्यमाक्षिकं परपति संबध्यमानचेतः वि
तेन समकालमाविर्भावित्वात् कुत उत्पद्येत न कुतोपीत्यर्थः एवंवदयं भावः यदि चित्तस्य कार
णादेवोत्पत्तिरुच्यते तदा चित्ताभेद एव स्यात् यदि च बाह्यकारणात् भेदाद्भिन्नत्वाभिचार्यपि स्या
त् स्वतंत्रकारणेनोत्पादनात् परिदृष्टानां दंडचक्रादीनामेव कारणत्वेन चित्ते न चित्तस्याभिचारसि
द्धेरिति बाधकान्तरमाह ये चास्येति अस्यार्थस्याप्रमाणस्याप्रतीयमानत्वे चपक्षाघंश

स्तेप्यप्रामाणिकत्वादसंतः स्युः एवंच पच्छाद्यभावेनोदराभावसिद्धावुदरं प्रतीयमानमपि न गृ
ह्येत तस्यापतयेति शेषः उदरस्य पच्छादिव्याप्यत्वात् पच्छाद्यभावेनोदराभावसिद्धेरिति भावः
परमतमपाकृत्य स्वमतमुपपत्त्योपसंहरति तस्मादिति उभयत्र स्वतन्त्रशब्दोऽन्योन्य
नैरपेक्ष्यवाची यथा भोग इति वियोगश्चानुपलब्धिर्मोक्ष इति शेषः चित्ततदर्थयोर्विवेकप्रका
रो दर्शितः इदानीं ज्ञाताज्ञातविषयत्वसदाज्ञातविषयत्वाभ्यां चित्तात्मनोर्विवेकप्रकारमाह सू
त्राभ्यां अस्यैव चमोक्षहेतज्ञानविषयस्य विवेकस्योपोद्घातसंगत्या कार्यकारणयोर्भि
नार्थयोरनिवेशः पूर्वं दर्शितः यावद्धि कार्यभिन्नं कारणं न सिध्यति न तावद्धि कारणा
त्पाच्चित्तस्थिरं सिध्यति येन ज्ञाताज्ञातविषयत्वं चित्तस्य स्यात् यावद्धा चित्तार्थयोर्भेदो
पि न सिध्यति न तावदपि चित्तस्य ज्ञाताज्ञातविषयत्वं सिध्यति ततः सूत्रे ज्ञाताज्ञातवि
षयत्वसदाज्ञातविषयत्वाभ्यां चित्तात्मनोर्विवेक इति भावः तदुपरागापेक्षित्वाच्चित्तस्य व
स्तु ज्ञाताज्ञातं ५ चित्तस्य कालभेदेन ज्ञातमज्ञातं च वस्तु भवति कुतः अर्थाकारतारूपो
परागसापेक्षत्वात् अर्थज्ञान इति शेषः अतो ज्ञाताज्ञातविषयतया चित्तं परिणाम्येवे
ति भावः नन्वर्थाकारतातिरिक्तं किं बुद्धेर्ज्ञानमस्ति यत्तस्या अपेक्ष्योच्यत इति चेन्न भवत्प्र

काशवत्सत्त्वस्यापि रूपप्रकाशोऽस्ति सत्त्वप्राधान्यात्तोऽनुभवसिद्धः तस्यैवास्याकारावच्छिन्नस्य
बुद्धिधर्मज्ञानत्वान्नत्वादिति उपरागकारणप्रदर्शनपूर्वकं सूत्रं व्याचष्टे अयस्कान्तेति अयस्कां
तमणिवदक्रिया एव विषया अयोवत् क्रियाणी। ते चित्तं स्वमहिम्नाकृष्य स्वस्मिन् संयोज्य तदुप
रंजयति स्वाकाराकारयंतीति तिलाक्षारस्रवत्स्लो अतो येन विषयेण परक्तं यच्चित्तं स विषयस्तस्य
ज्ञात इत्यर्थः इतरश्चाज्ञात इत्यर्थः यद्यपि चित्तस्य जडत्वात्तत्राभंचेतनस्यैव ज्ञानत्वात् तस्य वपो
रुषेयत्वात् उभयत्र ज्ञानकस्य नैगौरवात् सत्त्वस्य प्रकाशरूपता च प्रतिबिंबग्रहणक्षमनैर्मल्यमा
त्रं तथापि तत्रापि व्यवहारतो बुद्धिसत्त्वप्रकाशोऽपि ज्ञानशब्देनोक्तः सत्तता यर्थे विषयं पुरुषं द्वेध
म्योतरं हेयातायविवेकस्य च बीजं चित्तस्य वदर्शयति वस्तु इति अतो ज्ञाताज्ञातवस्तुकत्वात्सदा
नुपपद्यमाचित्तस्योपरागरम्यपरिणामः सिद्ध इत्यर्थः घटादीनामपि साक्षात् पुरुषविषयत्वे पुरुष
स्यापि ज्ञाताज्ञातविषयत्वं स्यादित्याशयेन परस्पिभोन्तरसूत्रमवतारयति यस्यतिति सदाज्ञाताश्चि
त्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामात् यस्य तु तदेव विषयोपरक्तमेव चित्तं विषयो नास्यत अनस्त
स्यतत्प्रभोश्चित्तसाक्षिणः पुरुषस्य विषयाश्चित्तवृत्तयः सदा ज्ञाताः पुरुषस्यापरिणामादित्यर्थः परि
णामित्वे हि कदाचित्पुरुषस्योध्यायत्या विद्यमानापि चित्तवृत्तिर्न ज्ञायेत तदा च तस्यापि ज्ञाताज्ञातो

मयरूपत्वेऽप्यहं सुखी न वाऽदुःखी न वेच्छामि न वेत्यादिसंशयः स्यात् एतादृशश्च संशयो न दृश्यते
अतो वृत्तेरज्ञातता नास्ति तत्प्रभुपुरुषोऽपरिणामी स्यापात् ननु पुरुषस्यापरिणामित्वस्य
व्यवस्थापने किमिति सांख्ययोगयोराग्रह इति चेत् अणुपदिदि पुरुषस्य ज्ञानादिलक्षण
धर्मः कदाचन मोक्षे नश्येत् तदा अपवर्गेण शादिव्य नन् मोक्षो न परमपुरुषार्थः स्यादिति अपि
न स्यात् बुद्धिवृत्तिरेव पुरुषस्य विषय इति तथ्यं अत एव पुरुषो विषयीति सत्त्वं च विषयः स्मृतद्
स्मृतगीतायां तिलमित्यमेन सत्त्वाख्याया बुद्धिवृत्तेरेव पुरुषविषयत्वमुक्तं सूत्रे तावत् विषयं चि
त्तद्विषय्ये भाष्यकारस्त्वाह यदीति भाष्यं सुगमं ननु यदि चित्तमेव पुरुषस्य विषयस्तर्हि शब्दादि
प्रकाशः कथं स्यात् चित्तस्याचेतनत्वेन विषयतामात्रेण प्रकाशासंभवादिति चेन्न चित्तारूढत
येव शब्दादीनां पुरुषे भानादिति ननु सर्वसंबद्धत्वाविशेषेऽपि चित्तमेव पुरुषस्य विषयो नान्यद्
इत्यत्र का युक्तिरिति चेच्छृणु अर्थाकारतैव विषयविषयिभावो न तु संयोगमात्रं अतीन्द्रियेषु संयोग
सत्त्वेऽपि चित्तविषयत्वाभावात् सा चार्थाकारता प्रतिबिंबरूपैव पुरुषे स्वीकार्या स्वतोऽपरिणामित्व
स्य साधितत्वात् अतः पुरुषे प्रतिबिंबसमर्पणसामर्थ्यं वृत्तिमत्त्व चित्तस्यैव फलबलात् कल्प्यते
यथा जलादौ प्रतिबिंबनसामर्थ्ये रूपवत् स्थूलद्रव्यस्यैवेति तदेताभ्यां सूत्राभ्यां चित्तविधर्मतया

चित्तनिष्ठमेव न तु पुरुषनिष्ठमिति तातिरिक्तो मोक्षभागी पुरुषः प्रतिपादितः आभ्यां च सूत्राभ्यामज्ञान
मिच्छादिविकारजातं च चित्तनिष्ठमेव न तु पुरुषनिष्ठमित्यवगंतव्यं ननु पुरुषस्य सदा ज्ञातविषय
त्वेन ज्ञानपरिणामो मा भूत् इच्छासुखादिपरिणामे तु किं बाधकमिति चेच्छृणु पुरुषस्य सदा ज्ञातवि
षयत्वसिद्धेर्लाघवाच्चित्तकारास्वरूपमेकैकमेवात्मद्रव्यं सिध्यति न तु अज्ञानस्य चित्तधर्म
तयाऽज्ञानकार्यं धर्मादिकं तत् कार्यं चेच्छासुखादिकमपि चित्तस्यैव सामानाधिकरण्यप्रत्यासत्तेर्
लाघवादिति भावः चित्तस्यैव स्वग्राहकतया सदा ज्ञातविषयकत्वं चित्तभोक्तुरसिद्धमित्याशंका
निरासकं सूत्रांतरमवतारयति स्यादाशंकेति वैनाशिकानां चित्तात्मवादिनामिति शेषः चित्त
मेव स्वस्य विषयस्य च प्रकाशकं अग्निवदिष्यतामतमपरिणामिनात्मनेत्याशंका वैनाशिका
नां स्यादित्यर्थः अत्राग्निचित्तयोः साधारण्यं प्रकाशकत्वं अखंडोपाधिप्रकाश इति व्यवहारहेतुः
स्वाभासतारूपसाम्येऽप्यवैशम्यो यः तेनाग्निचेतनयोरेकरूपप्रकाशाभावेऽपि न क्षतिः न चाध
क्तिस्तयोरपि आत्मनि नाग्न्यदित्यादिदृष्टान्तानुपपत्तिरिति तात्पर्यमाशंकां सूत्रेण परिहर
ति न तत्स्वाभासं दृश्यत्वात् व्याचष्टे यथेतराणीति अंतःकरणान्यैवारब्धित्वमित्यमनइत्युक्तेनार
भ्यान्तरीयं प्रयोगः चित्तं न स्वाभासं स्वगोचरवस्तुभावकाले न स्वप्रकाशं दृश्यत्वात् इंद्रियवत्

रिवदिति तथा चस्वगोचरव्यवसायकालेविवितभानार्थंपुरुषः सिध्यतीतिभावः वृत्तिनानार्थेति
पमेनवृत्तिकस्तेनेचनवस्थोऽस्तुत्र कारए वव क्ष्यति स्वप्रकाश्यत्वे च पुरुषे प्रसिद्धं पुरुषस्य स्वज्ञे
यतायाः प्रागुक्तत्वेन व्यभिचारः स्यादतः साध्ये कालादर्यं तेऽत्र प्रादौ च स्वभासत्वमेव नास्तीति
वक्ष्यति अतो न तत्रापि व्यभिचारः दृष्यते च सर्वेदैवस्वप्रकाश्यत्वाभावोऽस्तीति अत्र च कर्मक
र्तृविरोधो विपक्षबाधकस्तर्कः कर्मकर्तृविरोधे च स्वस्मिन् स्वसंयोगानुपपत्तिस्तर्कः तथा
च वक्ष्यति प्रकाशाश्रयं प्रकाश्यप्रकाशसंयोगो दृष्टो न स्वरूपेऽस्ति संयोग इति तथा परसम
वेतक्रियाफलभागित्वरूपकर्मत्वं न क्रियाश्रये कर्तरि संभवतीति आधुनिकवेदान्तिब्रुवास्तु
चित्तादिकं न दृष्टदृश्यत्वादित्येवं प्रयुंजते यदा पुरुषस्य कर्मकर्तृविरोधादृश्यत्व बनेभवतिपु
रुषगोचरस्य व्यवहारः स्वरूपसत्तैव पुरुषेण भवति प्रकाशगोचरव्यवहारे प्रकाशान्तरान
पेक्षा दर्शनादित्याहुः तन्न चिन्तनतावप्येवं परैर्दृश्यत्वस्य स्तवचतयाचित्तातिरिक्तपुरु
षसिद्ध्यनुपपत्तेः वृत्तिगोचरव्यवहारस्यापि स्वरूपसत्तायत्तस्यैव चतुरश्रमत्वात् प्रकाशगो
चरव्यवहारमात्रे प्रकाशानपेक्षेस्येवदृष्टत्वं न व चित्तं वा पुरुषो वेति नकश्चन विशेषः अ
पि च स्वप्रकाशं निरंजनमिच्छतिस्यात् स्वप्रकाशत्वमप्यदृश्यत्वे सति पुरुषस्य पर्याप्त

त्तेनोपपद्येत योगिकार्थस्यागात् किंच पुरुषनिष्ठफलाजनकत्वेनाकतमाकारचित्तवृत्तिः प्रमाणमेव
तस्यादित्यादिदोषप्रसक्तिरिति कर्मकर्तृविरोधस्तु पुरुषस्य ज्ञेयत्वेपि नास्ति चेतनप्रतिबिंबित
बुद्धिवृत्तिव्याप्यत्वरूपस्यैव ज्ञेयत्वस्य घटादिवदेव बुद्धिवृत्त्याप्यरूपोदृश्यो दर्पणादृश्यमुखवत्के
वलस्तु दृश्येति प्रकारभेदात्कथं कर्मकर्तृविरोधः इतिदिक् कर्मकर्तृविरोधस्तु बौद्धमतएव भवतिवि
ज्ञानातिरिक्तद्रष्टुरनभ्युपगमेन करणान्तरानभ्युपगमेन च द्रष्टरि स्वात्मन्येव स्वप्रतिबिंबादेरनुपप
त्तिरिक्तद्रष्टृति चित्तस्य स्वाभासत्वेऽग्निवदिति परोक्तदृष्टान्तस्यासिद्धिमाह नचाग्निरत्रेति अ
त्र स्वाभासत्वे नच्याग्निरितिपद्यग्निः पर्वेतमस्यापि हि तः यथादात्मानं प्रकाशयतीति कुवि
दृष्टं स्यात्तदाग्नेः स्वप्रकाश्यत्वं पुरुषस्येव सिद्ध्येत् तदेव तु नास्तीत्यर्थः ननु पुरुषोऽपि प्रकाश
स्वरूप एव सर्वदा तमस्तु बुद्धिवृत्तेरेव प्रतिबंधकमिति चेत्सत्यं तथापि बुद्धिवृत्त्यात्मकरणा
भावकाले स्वात्मानं मविषयीकृत्य करणकाले विषयीकरोतीत्यप्रसग्नितो विशेषोस्ये
वाग्नेः स्वप्रकाश्यतः प्रकाशस्वरूपत्वादिस्याम्येपि पुरुषः स्वप्रकाश्यो नाग्निरिति न केवलं प्रमा
णाभावादेवाग्नेः स्वप्रकाश्यत्वाभावोऽपितु प्रकाश्यत्वव्यवहारकारणाभावादपीत्याह प्रकाश
श्रयमिति प्रकाशो न प्रकाश्यत्वव्यवहारः अस्य च प्रकाशसंयोगस्यैव प्रकाश्यत्वरूपत्वात्

पातस्य संयोगजन्यत्वानुपपत्तिरिति संयोगे प्रतिबिंबाधारणासंबंधो यदि चाग्नौ सा स्यादेवस्य
प्रतिबिंबादिरिष्यते तदा दृष्टविरोध इति भावः अग्निः स्वप्रकाशत्वेन प्रकाशांतरनैरपेक्ष्येण स्वतं
एव प्रकाशरूपत्वेपि यदपरस्य प्रकाशसंबंधादेव प्रकाशं तेनाग्निदृष्टांतेन च ईदृशमेव स्वप्रकाशत्वं
पुरुषस्य शास्त्रे प्रतिपाद्यते चित्ताद्विवेकापन्नितस्य हि प्रकाशः पुरुषोपाधिक एवन्नप्रसिद्धत्वन
दिति यत्तु अनिद्यत्वे तस्य परोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वमिति आधुनिकवेदांतिब्रुवाणां प्रलप
नं तत्प्रागेव निराकृतं विस्तरस्तु ब्रह्ममीमांसायामयोति दिक् नन्वेवमप्रकाश्यत्वरूपमेव
स्वाभासत्वं चित्तस्यास्माभिरभ्युपेयं तथा चाग्निदृष्टांतउपपन्नः स्यात्तत्राह किंचेति शब्द
र्थः स्वाभासशब्दार्थः संभवतीति शेषः एवं च सतीदं दूषणमित्याह स्वबुद्धिप्रचारेत्यादिना
बुद्धेः प्रचारो वृत्तिः तस्याः संवेदनात् क्रोधाद्यनुभवात् तद्वानादयं सत्त्वानां प्राणिनां प्र
वृत्तिर्दृश्यते तत्तस्वबुध्यग्रहणे युक्तं न भवतीति बुद्धेर्ग्राह्यत्वमवश्यं वक्तव्यमित्यर्थः नन्वहं
क्रुद्ध इत्यादिप्रत्यये पुरुषस्यानंगीकारादिति यद्यप्यादौपिग्रहणात् स्वाभासत्वं न स्यादिति चे
त्सत्यं अग्राह्यत्वरूपस्य स्वाभासत्वस्य पुरुषेप्यनंगीकारादिति यद्यप्यादौ क्रोधादीनां स्वरू
पतो निर्विकल्पस्य एव बोधः पौरुषेयो भवति क्रुद्धोहमित्यादिस्तु अहंकारस्यैव वृत्तिः पुरुषस्यांश

त्वात् कूटस्थतया बुद्धिवृत्त्याकारातिरिक्ताकारासंभवाच्च तथापि पौरुषेयेण क्रोधनिर्विकल्पे
न जनिता क्रुद्धोहमिति यांतःकरणस्य विशिष्टवृत्तिस्तत्साक्षिको बोधः अत्र तद्ग्राह्यत्वेनैवात्र चि
त्तस्याग्राह्यत्वं प्रतिषिध्यते क्रोधादीनां पौरुषेयनिर्विकल्पकस्य शब्दागोचरत्वेनोपन्यस्तुम
शक्यत्वात् पुरुषसाधकं तु चित्ताग्रहणं वृत्तिगोचरतायामन्यनिर्विकल्पकधारायाः स्वीकारे
नवस्थापत्तेः अज्ञातवृत्तिस्वीकारे च क्रुद्धोहं न वेत्यादिसंशयाद्यापत्तेः क्रोधादिगोचरनिस
र्विकल्पकैकज्ञानस्वीकारे च विशिष्टप्रत्यक्षसामग्र्या बलवत्याः प्रतिबंधात्संशयाद्यभावः
संप्रज्ञातयोगेपि वृत्तिः स्वरूपतो भासतएवेत्यभ्युपेयमिति चित्तस्य स्वाभासतावादिमते
तन्मतमालंब्यैवास्य दूषणमाह एकसमये चोभयानवधारणं सूत्रार्थमाह नचेत्यादिना
युक्तमित्यंतेन न च नाप्येकस्मिन्नुत्पत्तिक्षणे स्वपरावधारणं युक्तं पूर्वं सतएव प्रत्यक्ष
गोचरत्वात् स्वस्य च प्रागसत्त्वादित्यर्थः नन्वेवं स्वोत्पत्त्यनंतरं स्वग्रहणमस्तु तत्राह क्षणिके
ति क्षणिकवादिमते यावस्तुनउत्पत्तिः सैव क्रिया तस्य कार्यं सैव च तस्य कर्त्रादिकारकवर्गः
तन्मते सर्ववस्तूत्पत्तिमात्रफलकं निर्हेतुकं स्वयमेव भवतीति सिद्धांतः तथा चोक्तं भूतिर्ये
षां क्रिया सैव कारकं सैव चोच्यत इति अतउत्पत्त्यनंतरं चित्तस्य स्वग्रहणाख्यक्रियायां न संभ

वतीत्यर्थः अस्मन्मतेपि शब्दबुद्धिकर्मणां विरम्यव्यापाराभावादेकस्यावनेर्द्विरर्थग्राहकत्वं
नसंभवतीतिभावः उत्तरसूत्रमवतारयति स्यान्मतिरिति मतिरभ्युपगमः ननुस्वाभा
सशब्देनस्वसंतानभास्यत्वंएकत्वंतथा चस्वरसेनविनाशस्वभावेननिरुद्धंतथमपिचि
त्तमुत्तरोत्तरमुत्पन्नेनचित्तांतरेणग्राह्यमित्यभ्युपगमः स्यादितिकर्मकर्तृविरोधादिदोषइत्य
र्थः तत्रसिद्धांतसूत्रं चित्तांतरदृश्ये बुद्धिबुद्धेरतिप्रसंगः स्मृतिसंकरश्च वृत्तिरूपचित्तांतरेण
वृत्तिरूपचित्तेदृश्येभ्युपगम्यमानेतबुद्धिबुद्धेर्वृत्तिवृत्तेरतिप्रसंगोऽनवस्थाएतद्व्याचष्टेऽन
वस्थेति बुद्धिबुद्धिश्चित्तगोचरंचित्तंपरेषांव्यतिरिक्तचित्ताभावेनवृत्तिचित्तयोःपर्यायत्वात्त
दुक्तेपमनवस्थासर्वमेवचित्तंगृहीतव्यमितिनियमाभावादितिचेन्न वृत्तेरज्ञातसत्ता
ङ्गीकारेज्ञानमस्तिनवेत्यादिसंशयापत्तेः योग्यानुपलब्ध्याज्ञानाद्यभावप्रत्यक्षानुपपत्तेश्च
किंचमाभवत्वनवस्थावृत्तिगोचराणांवृत्तिकल्पनागौरवंतत्परिहार्यमेवमस्माभिर्लो
पवेतनस्यकल्पवृत्तिगोचरैकविभुज्ञानकल्पनादिति एतेनचित्तनित्यत्वाभ्युपगमिनामपिमा
पवेशेषिकाणामुत्तरोत्तरज्ञानेनपूर्वज्ञानग्रहणकल्पनापरास्ता अनवस्थागौरवाभ्यामि
तिमंतव्यं अतिप्रसंगंव्याख्यायस्मृतिसंकरंव्याचष्टेः स्मृतिसंकरवस्थागौरवाभ्यामितिमंतव्यं

श्चेति बुद्धिबुद्धेरितिशेषः संकरशब्दार्थमाह यावंत इति विषयानुभवकालेज्ञानधाराज्ञा
नेतिविषयस्मृतिकालेपि अनंतानांतज्ज्ञानानांस्मृतिरेकदैवभविष्यतिघटोमयाज्ञा
तोघटज्ञानंततज्ज्ञानंचेत्येवमनंताकारः सोयंस्मृतिसंकरः प्राप्तइत्यर्थः अस्मन्मतेचयो
गिपबोधस्यतिसततपातिविकल्पमात्रात्तथाचनस्मृतिहेतुत्वमिति नन्वेतादृशसंकरेको
दोषइतितत्राह तत्संकरश्चेति संकराभ्युपगमेचघटोमयाज्ञातइत्येकमात्राकारस्मृत्यनुभ
वोनस्यादित्यर्थः अन्यान्यपिदूषणानिसूचयन्नास्तिकमतंतिरस्करोति एवंबुद्धेति सर्वबंध
मोक्षधर्माधर्मादिव्यवस्थादिकं तदेवंचित्तादिभिन्नमोक्षोव्यवस्थापितः चित्तस्यचस्वाभा
सत्वंनिराकृतं इदानींपरेषामिष्टोक्तात्मतत्त्वावधारणस्यस्वाभ्युपगमविरोधेनाप्यसा
यतामाह नैवेति भोक्तृस्वरूपंतस्यापेनसंगच्छतेस्यापहृद्धाइत्यर्थः तेषांविज्ञानवादश्रूय
वादश्चेतिमध्यमनद्वयंतत्राद्यौविज्ञानवादिनांक्षणिकज्ञानस्वाभ्युपगमविरोधात्साप
विरुद्धार्थदर्शयतिकेचिदिति सत्वमात्रंक्षणिकविज्ञानरूपंचित्तमात्रंपरिकल्प्यस्वीकृत्य
तस्यैवमोक्षंवदंतिआश्रितसत्वविशेषोपरत्वात् सांसारिकान् पंचस्कंधान् हित्वा अस्मा
न्नपंचस्कंधान् प्रकोस्मन् भवतीतितत्रापितदवस्थाभ्युपगमात् पुनस्तस्येतिनिचयेपो

यस्येत्यर्थः अत्रोप्यपविरुद्धास्त इति पंचस्कंधाश्च विज्ञानवेदनासंज्ञारूपसंस्काराख्याः क्षित
स्यैव शाखाभेदाननुचितान्भिन्नाः तत्र विज्ञानं विषयानुभवः वेदना दुःखं संज्ञा रूपे शब्दार्थो
वित्तिपावत् संस्कारो वासना एतेषामपि सुखादीनां प्रवेश इत्यखिलं वस्तु चित्तमेवेति शून्य
वादिप्याह तथेति तथामेके चित्तस्कंधानां महन्निर्वेदापमहानिर्वेदाख्य वैराग्यापायुनर्जन्म
रूपप्रशांतये चजीवन्मुक्तस्य गुरोरंतिके ब्रह्मचर्यं त्रासानाभ्यासं साक्षात्कारपर्यंतं करिष्यामीअ
काशिष्यतामापन्नानास्तिकगुरूपदेशात् सत्वस्याहं शब्दार्थस्यापि सन्नामपलपन्ति शून्य
वादिनो भवंतिरत्यर्थः तेपिस्यापविरुद्धा भो हु: सत्वस्यापलापेन स्वाभिप्रेतस्य मोक्षस्या
हं शब्दार्थस्य ब्रह्मचर्यादीनां वासनास्वीकारात् सेयमद्वैस्यविस्मृतिः कथंमूरान्नलक्षपंतो
ति एतेनाधुनिकवेदान्तिब्रुवान्अपि स्यापविरुद्धा मंतव्याः तेपि हि मोक्षाय यं गुरुमपास
ना ब्रह्मातिरिक्तं सर्वस्तिरज्जतवदत्यंतं तुच्छमिति गुरूपदेशान्मोक्षतत्साधनादिकमेवा
पलपंतीति अपि चोपदेशानंतरमहं तसाक्षात्कारस्य मननादिसाधनाधनत्वानाभ्युप
गमोपितेषां नस्याप्यः अप्रसन्नोपदेशेन फलं तत्साधनेषु सर्वेष्वेवाविश्वासात् अश्रद्धयोक्त
तेनापि फलानुदयाच्च किंबहुनास्मदादिप्रामाण्यबाधनेन ज्ञानप्रामाण्यसंशयाद्याहितैः सं

२

शयो योगं तेषिब्रह्मणि स्यात् न च स्वप्रकाशत्वात् ब्रह्मणि न प्रमाणापेक्षेति वाच्यं प्रकाशात
स्तस्यतत्सिद्धौ कर्मकर्तृविरोधादिति सांख्यसूत्रोक्तदोषात् स्वाभ्युपगमतश्श्रवणादिवैयर्थ्या
पत्तेश्च मोक्षसाधनविषयस्य विवेकस्यास्वप्रकाशत्वाच्च यत्तु अत्र घटत्वेपि तत्पक्षस्य व्यवहारयो
ग्यत्वं स्वप्रकाशत्वमिति प्रलपनं तत् शशशृंगवन्मंतव्यं वेदनस्य व्यवहारं प्रति सामानाधिकर
ण्येनैव हेतुत्वात् द्रव्यत्वादिकृतिविरोधाच्चेति सेयमतिनास्तिकता इत्थं तेपि बहिर्मुखानां पतिमा
निनामिति आधुनिकानां वेदान्तेविवर्तवादो यथा यथा विचार्यते तथा तथा स्यापविरोधेन नास्ति
कतासेतव्यद्धिदीर्यतेस्वमते तु नास्य यं स्यापविरोधः मोक्षभागिनोहं शब्दार्थस्य भोक्तुः स्थिर
स्य स्वीकारादित्याह सांख्ययोगादयस्त्विति आदिशब्देन ब्रह्ममीमांसादयोग्राह्याः प्रकृत्यावादा
:प्रवादाः स्वशब्देनाहं स्वमात्मेत्यादिशब्दजातेन नन्वस्य: कथमस्यात्माहमित्यादिवृत्तिगोच
रः स्यात्तत्राह चित्तस्य स्वामिनमिति स्वामी ह्यात्मा लोके व्यवह्रियते पचापोति पदार्दतैरुत्यादिशाले
चेति तस्य परिणामित्वितिपयेष्व वितियोक्त्वाभावात् कथं स्वामित्वं तत्राह भोक्तारमिति अत्र च स्वतोपि
पुरुषस्य भोगोस्तीत्यवधारणीयं प्रकृतेरुपपतये चित्तस्य स्वाभासत्वे विरुद्धं तं इदानीं सदा ज्ञातत्वा
तवतयस्तत्र भोः पुरुषस्यापरिणामादिति सूत्रस्योपपादकं सूत्रमनेनैव प्रसंगेनोपस्थापयति क

यमिति नन्वपरिणामित्वेविषयेसंचाराभावात्तदाकारपरिणामाभावात्कथंचित्ज्ज्ञातत्वरूपचि
तभोक्तृत्वंपुरुषस्यस्यात् चितस्यलोहियथादिविषयग्रहणंचितस्यसंचारात्तदाकारपरिणामाद्भवेष
मित्यर्थः तत्रसिद्धान्तसूत्रं चितेरप्रतिसंक्रमायास्तदाकारापत्तौस्वबुद्धिसंवेदनं अप्रतिसंचाराया
अपिचितेःस्वीयबुद्धिवृत्तिदर्शनंबुद्धिवृत्तिदर्शनंबुद्धिवृत्त्याकारतापत्त्यैवभवतीत्यर्थः अयं
भावःज्ञातुःसंचारोनसाक्षादेवज्ञानेहेतुःकिंत्वर्थाकारताहेतुःसन्निकर्षद्वारा अस्यपाश्चप्रा
दौमनःसंचाराभावेनार्थभानायोगात् अतोविभुत्वेनैवसर्वत्रसन्निकृष्टस्यात्मनःसंचारो
नापेक्ष्यतइति आपत्तिग्रहणंचपुरुषस्यपारमार्थिकाकारप्रतिषेधार्थंयथाहिविषया
सन्निकर्षकालेपिस्वयादौनभ्रान्ताप्रागन्याचितस्यतदाकारःपरिणामइष्यतेनैवंपुरुषस्य
चितत्वस्यभावेपितन्मात्रेभवतियेनपुरुषेपित्वस्याकारःपरिणामइष्येत किंतुस्फटिकेसन्नि
कृष्टजपालोहित्यस्येवचित्तवृत्तेःप्रतिबिंबमेवतादृशवारिष्यते उभयत्राकाराश्वपरिणामक
त्वेनैगौरवात् स्फटिकदर्पणादेःस्वप्रतिबिंबितवस्तुप्रकाशकत्वस्यसिद्धत्वाच्चेतितदिदंवृत्ति
बिंबितमेवतत्त्वाकारापत्तिरित्युक्तंसूत्रकारेणेतिभाष्यकारःपुरुषस्यवृत्त्याकारतांप्रतिपाद
यितुमादौबुद्धेःस्वरूपमाह अपरिणामिनीति भोक्तृशक्तिःपुरुषाख्यापरिणामिनी अतोनापि

गतिमतीततोनस्वप्रज्ञागतोक्तिस्यैवपुरुषस्यज्ञानंसंभवतिकिंतवतिस्वरूपपरिणामि
न्यर्थेवित्तिःप्रतिसंक्रान्तेवप्रतिबिंबरूपेणसंचरितेवसतीतद्वृत्तिमनुपततितद्वृत्तिंचेतनव
त्करोतीत्यर्थः अहंयथाहिघटमहंजानामीतिबुद्धिवृत्त्यनुपपत्तिःबुद्धिरनहंत्वात् अचेतनत्वा
च्चेत्पुनरसूत्रेवक्ष्यति अथाविवेकादेवतादृशीबुद्धिवृत्तिरितिचेत्सत्यंतथाप्यविवेककारणप्र
तिबिंबमन्तरेणःदोषांतराभावाततथाचेतनभानार्थमपिवृत्तौतत्प्रतिबिंबःकल्प्यतेबुध्या
रूढतयैवशब्दादिवदात्मनोपिभानादिति इदमेवप्रतिबिंबबुद्धेश्छायापत्तिरित्युच्यते
तथाबुद्धेरर्थाकारतावत् आत्माकारतेत्यप्युच्यत इतिमंतव्यं यथापिघटाद्याकारपरिणाम
वदात्माकारपरिणामएवबुद्धेर्भवतितथापिप्रतिबिंबतुल्यतयासएवप्रतिबिंबमप्युच्यते
बुद्धेरूपंप्रदर्श्यपुरुषस्यतदाकारतापत्तिंदर्शयति तस्यांश्चेति हिरण्योत्रावधारणोतस्याम
पिचितेर्ज्ञानरूपावृत्तिर्बुद्धिवृत्त्यविशिष्टेवेत्याख्यायतेभ्यवह्रियते तत्रहेतुः प्राप्तेत्यादि प्राप्त
श्चैतन्योपग्रहश्चैतन्यप्रतिबिंबयेनएतादृशंरूपंयस्याबुद्धिवृत्तेस्तदनुकारिमात्रतयातत्
प्रतिबिंबाधारतामात्रेणेत्यर्थः द्रष्टादृशिमात्र इतिसूत्रेपीदमेवचाकंभाष्यकारैः प्रमाण
विनोपन्यस्तं वृत्तिसारूप्यमितरत्रेत्यत्राप्येतदुक्तमितिस्मर्तव्यं नजानाम्यहंबुद्धेरहंभोतो

हमित्यादिरूपतावृत्तेरेवेति प्रागेवोक्तं तर्हि निर्विकल्पकस्य वृत्तिबोधस्य स्वरूपं कीदृशमिति उच्यते यादृशं ज्ञानं क्रोधादिवृत्तीनां रूपं तादृशमेव बिंबप्रतिबिंबोद्ग्रहणात् तदेव वृत्तिबोधस्वरूपे स च वृत्तिबोधो वस्तुविवेके न जानामीति वस्तुतस्तु विषयएव भवति ज्ञानवृत्तिबोधादिशब्दानां पर्यायत्वादिति एकाकारतापत्तावागममपि प्रमाणयति तथा चोक्तमिति न पातालमित्यादेरयमर्थः गुहाहितं गह्वरेष्ठं पुराणमित्यादिश्रुतिस्मृतिषु यस्यां गुहायां गुह्यं शाश्वतं ब्रह्म स्वांशांशभेदात् आत्मसामान्यं निहितं संगुप्तं इति गीयते सा गुहा न पातालादि किंतु ब्रह्मवस्त्वविशिष्टां बुद्धिवृत्तिमेव कवयः पंडिताः प्रपंतीति अविशिष्टता च परस्परं प्रतिबिंबनादुभयोरेव विषयाकारत्वेन साम्यमित्युक्तं अतो विविच्य ग्रहणयोग्यतयाऽवस्थितिरेषात्मनः संगोपनं बुद्धाविति श्लोकतात्पर्यार्थः तदेतदेकाकारत्वमादित्यपुराणेप्युक्तं नित्यः सर्वगतो ह्यात्मा बुद्धिसन्निधिसत्तया यथा यथा भवेत् बुद्धिरात्मा तद्वदिहेष्यते इति ननु भवतु चित्तेः स्वबुद्धिसंवेदनं शब्दादिसंवेदनं तु कथं भवेत् बुद्धिवच्छब्दादीनामपि चित्तौ प्रतिबिंबनसामर्थ्ये मोक्षकालेप्येवं सर्वार्थभानप्रसंगात् कथं वा चित्तेः स्वसंवेदनं उक्तानवस्थापत्तिवत् पुरुषेपि समानेत्याशंकानिरासायोत्तरसूत्रं प्रवर्त्यते तत्सूत्रं भाष्यका

रः प्रकारान्तरेणाप्युपपादयति अतश्चेति अतो बुद्धिपुरुषयोर्वैधर्म्येणाभावाद्वक्ष्यमाणानुपपत्तेश्चेति पाठ एतत् आगामिसूत्रप्रतिपाद्यं अग्रे क्रियत इत्यर्थः चकारोस्मदुक्तप्रयोजनसमुच्चयार्थः द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थमिति सूत्रं गृहीतृग्रहणग्राह्याकारपुरुषस्यार्थो भोग्यात्मस्मिन्निति सर्वार्थं अयं घट इत्यनंतरं घटमहं जानामीति बुद्धेर्व्यवसायस्य ग्रहीतृग्रहणग्राह्याकारस्यायं घट इति वृत्तिवदेव साक्षिभास्यस्य भानप्रयोगदर्शनात् सर्वार्थत्वे हेतुः द्रष्टृदृश्योपरक्तमिति द्रष्टृदृश्योभयाकारमित्यर्थः बाधकं विना सन्निकृष्टवस्त्वाकारतास्वाभाव्यस्य चित्ते सर्वसंमतत्वादिति भावः तथा च बुद्धिसंवेदनमेव बुद्धिस्थस्य शब्दादेः स्वस्य च संवेदनं यद्धि शब्दादिपुरुषोभयाकारा बुद्धिवृत्तिः पुरुषे प्रतिबिंबिता भासते इदमेव शब्दादेः पुरुषस्य च दृश्यत्वं बुद्धेर्दृश्यत्ववदितो न पुरुषदर्शनार्थं द्रष्ट्रंतरापेक्षा नापि कर्मकर्तृविरोधः श्रोतः करणद्वारत्वादिति भावः एतेन सर्वार्थत्वेन भाष्यकारोक्तं बुद्धिपुरुषयोरविशिष्टाकारत्वमपि सिद्धं बुद्धेः पुरुषाकारतातिरेकेण पुरुषवत्त्वासंभवात् पुरुषस्य च बुध्याकारतायाश्च पूर्वसूत्रेणोक्तत्वादिति वेद्यत्वाभ्युपगमानुपपत्त्यापत्तिं व्यपति ननु बुद्धौ पुरुषोपरागं प्रतिपादयत्समग्रसूत्रं व्याचष्टे मनो हीति उपरक्तं तदाकारं अन्यथा ग्रहणानुपपत्तेः युक्तिपूर्वकं द्रष्टुपरागमाह

तत्स्वरूपं चेति तत्र मनः स्वयमपि पुरुषस्य विषयत्वात् स्वीयं चैतन्यलक्षणवृत्तिविशिष्टं च पु
रुषेण विषयिणा संबद्धं स्वाकारितं सन्निकर्षस्य ग्रहणहेतुत्वात् बुद्धिवृत्तौ च पुरुषस्यासंग
स्य प्रतिबिंबवृत्तिरेकेणानित्यसन्निकर्षासंभवादिति तस्मादेतच्चित्तमेवोभयोपरक्तत्वाश
ब्दादिविषयरूपेण विषयिपुरुषरूपेण च निर्भासते साक्षिणि प्रतिबिंबितं सदिति विषयविष
यविषयिनिर्भासं तत्र हेतुः चेतनाचेतनस्वरूपापन्नं तदाकारं एतदेव विवृणोति विषयात्म
कमप्यविषयात्मकमिवेति अचेतनमपि चेतनमिवेति इवशब्दार्थे दृष्टांतेनाह स्फटिकमणिक
ल्पमिति यथा एक एव स्फटिकमणिः पार्श्वद्वयस्थयोर्जवेन्द्रनीलयोः प्रतिबिंबमात्स्वीयरूपे
ण सहत्रिरूप इव भातीति एवं चित्तमपि विषयात्मनोः प्रतिबिंबानात् ग्रहीतृग्रहणग्राह्यात्म
करूपत्रयवद्विभाति अतः सर्वार्थमित्युच्यत इत्यर्थः चित्तमेवेत्येवकारेणान्येषां सन्निकर्ष
सत्त्वेप्याकारग्रहणसामर्थ्यं नास्तीत्युक्तं अत्र च स्फटिकदृष्टांतेन सर्वांशे बुद्धेः स्वार्थाकारपरि
णामस्यैव स्वप्रानुरोधेन ष्टत्वात् स्फटिके च प्रतिबिंबमात्रस्य स्वीकारात् किंतु तत्तद्वस्तुसन्नि
कर्षेण तत्तद्रूपतया प्रतीयमानतामात्रांशे स्फटिकस्य दृष्टांत इति मंतव्यं यदेतदुक्तं चित्त
स्य द्रष्टृदृश्यसारूप्यं इदमेव भवबीजाविवेकस्य कारणमिति प्रतिपादयति तदनेनेति ये

विद्वास्यार्थवादिनश्चित्तातिरिक्तचेतनानभ्युपगंतारो वैनाशिकाः अपरे विज्ञानवादिनः लो
कायत इति लोकः तदुक्तं विज्ञानवादिभिः अभिन्नोपि हि बुद्ध्यात्मा विपर्यासितदर्शनैः ग्राह्यग्रा
हकसंवित्तिभेदवानिव लक्ष्यत इति तेषां च वादिनामयं भावः चित्तस्य चेतनवद्रूपतास्वीकृता
तस्येत्थं पुरुषेण वा स्यार्थेन वा अनादिवासनावशात् स्वत एव चित्तस्यानंतपरिणामस्वीका
रसंभवात् दृश्यस्य दृग्भिरूपतावदिति अनुक्तेपायस्वनेन तेषु समाधानमाह अस्ति हीति
इत्यंतं बीजमित्यर्थः एतेन यदाधुनिकावेदांतिब्रुवा आहुः विषयदोषात् करणदोषाद्वा चैत
न्ये भ्रमो न भवति विषयदोषयोर्भ्रममात्रकल्पितत्वेन भ्रमात् पूर्वं तयोरभावात् अपि त्वनि
र्वचनीयाविद्यामात्रादिति तद्रूपं चैतन्येपि चित्तवदेव सकलवस्तुप्रविविचेन सारूप्यस्यैव
विषयगतदोषस्य प्रपंचारोपहेतुतासंभवात् सर्ववस्तूनां भ्रममात्रकल्पितत्वस्य चासिद्धेः
शुक्तिरजतादिस्थले हि तु तं सारूप्यदोषेणैवाध्यासोपपत्तावध्यासहेतुतया तदभिप्रेतान
घविद्याया कल्पनानवकाशाच्चेति तत्रादौ विज्ञानवादिनं बोधयति समाधीत्यादिना स्व
मवधार्यत इत्यंतेन भ्रमस्य लेशे यायस्य चित्तमात्रतायाः अस्माभिरप्यभ्युपगमात् समा
धिप्रज्ञायां प्रज्ञेयः इत्युक्तमर्थे स्यसत्यत्वलाभाय तथा चायमर्थः विवादगोचरोर्थश्चित्तप्रति

बिंबितो योनुभूयते स तत्तस्य चितस्याकारत्वं नीभूतत्वाच्चित्ताद्रूपः तत्र हेतुः स चेदिति स चेदर्थाञ्चि
त्ताकारमात्रं स्यात् कथं तर्हि प्रज्ञयैव प्रज्ञाकारो गृह्येत कर्मकर्तृविरोधात् पुरुषस्यानंगीका
रात् पुरुषप्रज्ञया पुरुषसिद्धिरर्थप्रज्ञयान्यार्थस्यापि सिध्येच्चित्तादिति अतो विज्ञानातिरि
क्तो विज्ञेयोर्थः सिद्धः अनयैव युक्त्या पुरुषानभ्युपगन्तारं बाह्यार्थवादिनमपि बोधयति
तस्मादिति तस्मात्प्रज्ञारूपस्य प्रज्ञाग्राह्यत्वाभावादेव प्रज्ञायां प्रतिबिंबीभूतः प्रतिबिंब
रूपेण ज्ञातो योज्ञानाकारेण गृह्यते स पुरुष इत्यपि सिद्धमित्यर्थः ननु स्वमग्रहीत्वेवस
स्य प्रज्ञारूपं गृह्णातु आकाशगतहलोपि शब्दवदिति चेन्न शब्दवत् केवलस्याकारस्याग्रह
णात् अयं घट इति ज्ञानमभूदित्यादिरूपेण रूपादिवद्धर्मिपुरस्कारेणैवाकारानुभवादि
ति ननु कर्मकर्तृविरोधः सूत्रकारेणैवोक्तो न तु तस्याभासमित्यनेनातो भाष्यकारस्य यो
नरुक्तमिति मैवं तत्र चितस्य चितग्राह्यत्वं निराकृतं अत्र चिताकारस्य चितग्राह्यत्वं निरा
क्रियत इति विशेषादिति पुरुषचित्तदर्शनोपयोगप्रकारे विवेकज्ञानमेव तत्त्वज्ञानमिति
वेदान्तोक्तोपासनादिव्यावृत्त्यर्थं नास्तिकादिज्ञाननिरसनार्थं चावधारयति एवं ग्रहीतृति
ग्रहीत्रादित्रितयं परस्परविजातीयतया विभजन्ति विवेचयन्ति त एव सम्यग्दर्शिनः तै

रेव पुरुषो लब्धः अन्ये तु भ्रान्ता इत्यर्थः तथा च श्रुतिः यन्मनसा न मनुते येनाहुर्मनो मतं
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्य
त्परमस्तीत्यादिः स्मृतिश्च अव्यक्ताद्ये विशेषान्ते विकारेस्मिंश्च वर्तिते चेतनाचेतनान्यत्व
ज्ञानेन ज्ञानमुच्यत इत्यादि आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वं वासुदेवः सर्वमित्यादिश्रुतिस्मृ
तयस्तु शक्तिमदाद्यभेदेनैवोपासनार्थं प्रवर्तन्त इति न तद्विरोधः एतेन जीवात्मप्रकर
णेष्वात्मैक्यश्रुतीनामवैधर्म्यलक्षणाभेदेन विवेकपरतात्पर्यमिति द्रष्टव्यं विवे
कज्ञानस्यैव सम्यग्ज्ञानतया मोक्षहेतुत्ववचनात् परमात्मप्रकरणे तु जीवादपि वि
वेकेन परमात्मन एकस्यैवात्मत्वेनात्पर्यमिति मन्तव्यं द्वितीयपादे विवेकख्यातिरवि
प्लवा हानोपाय इत्येवोक्तं अत्र तु विवेकज्ञानस्यैव सम्यग्ज्ञानत्वोपपादनेन मोक्षहेतु
त्वं प्रभाषितं विवेकस्वरूपं च परीक्ष्यत इति विवेकः चित्तादात्मविवेके हेत्वन्तरं प्रदर्शकतया
सूत्रमवतारयति इतश्चेति इतश्च चित्तातिरिक्तः पुरुष इति शेषः तदसंख्येयवासनाभिश्चि
त्रमपि परार्थं संहत्यकारित्वात् यद्युक्तं चितस्य सर्वात्मकत्वांगीकारे संख्यवासनावशात्
स्वत एव चितस्यापि परिणामोस्तु किं पुरुषेणेति तत्राप तदसंख्येयवासनाभिश्चि

चित्तमपि परार्थं परस्यात्मनस्य भोगापवर्गार्थैव विनाशितो न स्यात्तं परिणामित्वं वा क्षमते संहत्य
कारिपदार्थानां लोके परमात्मार्थत्वदर्शनादित्यर्थः तथा च पुरुषार्थत्वमापत्तौ चित्तविलये न
मोक्षोपपत्तिरित्यत्रापि सूत्रतात्पर्यं सूत्रं व्याचष्टे तदेतदिति भोगापवर्गार्थं सुखादिसाक्षा
त्कारविवेकसाक्षात्कारार्थं संहत्यकारित्वात् इतरसाहाय्येनार्थक्रियाकारित्वात् गृहवदि
ति गृहं हि शयनादिकार्यमास्तरणशरीरादिसाहाय्येनैव करोति पुरुषस्तु निःसंगचैतन्यरूप
तया चैतन्यार्थेनात्मसमपेक्षते न्यस्माच्चार्थक्रिया पुरुषस्य नास्तीति सत्त्वसंहत्यकारित्वाश
यः यत्संघातपरार्थ्यादिति सांख्यप्रोक्तं तत्र संहननमारम्भकसंयोगो निवक्षितः स चाव
यवावयव्यभेदात् शय्यासनगृहादिषु सत्त्वादिषु चास्ति न तु पुरुष इति ननु चित्तं संहत्यापि
करिष्यति स्वार्थमपि भविष्यति कः खलु विपक्षे बाधकस्तर्क इत्याकांक्षायामाह संहत्यका
रित्वेति न सुखचित्तमिति सुखचित्तं भोगचित्तं न सुखार्थं न चित्तस्य भोगार्थं तथा तत्त्वज्ञा
नचित्तमपवर्गचित्तं न चित्तस्यापवर्गार्थं चित्तस्य भोगापवर्गयोरपि कार्यतया स्वार्थकत्वनि
यमेनानवस्थाप्रसंगात् यत् कार्यं तत् स्वार्थकमिति हि सर्वसंमतं तस्मात्तच्छिन्नस्यैव तदुभयम
पि परार्थमित्यर्थः पुरुषस्य च भोगापवर्गौ स्वरूपचैतन्यरूपतया न कार्यौ इति नानवस्थाप्र

रूपार्थत्वेनादिनामिति भावः पुरुषस्य भोगो हि सुखादिसाक्षात्कारः अपवर्गश्च विवेकख्यातिसाक्षा
त्कारो वा स्वरूपावस्थानं वा सर्वथैवं चेतस्य मात्रत्वं च परिणामित्वान्निर्धर्मत्वाच्चेति ननु परार्थता
मात्रेण न पुरुषसिद्धिर्विनाशादीनामपि परत्वसंभवात् विनाशार्थमेवोत्पत्तेः परैरभ्युपगमादि
त्याशंकायामाह यश्चेति भोगापवर्गार्थवानेवात्र परः साध्ये प्रविष्टः अतो न सामान्येन केनचि
त्परेण सिद्धसाधनमर्थान्तरं वेत्यर्थः स्वातंत्र्येण त्रिगुणात्मकचित्तस्य भोगार्थकतया परमभिप्रेतं सि
द्धसाधनमपाकरोति यस्तु किंचिदिति स्वरूपेणात्मरूपेण भोक्तृतयेति यावत् यश्चेति यस्त्वसौ
विशेषः पुरुषाख्यः परः स कूटस्थनित्यत्वात् न संहत्यकारीति न तस्य परार्थत्वापत्त्यानवस्थितिरि
त्यर्थः तदेवं बुद्धिपुरुषविषयाणां विवेकं प्रदर्श्य तज्ज्ञानादायं मोक्षमार्गं प्रतिपादयति वि
शेषदर्शिन आत्मभावभावनाविनिवृत्तिः॥ आत्मानमेयात्मकस्याखिलप्रपंचस्य तत्त्वायःपिं
डवदेकीभावापन्नस्य योऽक्तप्रकारैरन्योन्यविशेषदर्शिनो विवेकसाक्षात्कारिणः चित्तस्यात्मभा
वभावना स्वसत्तानिज्ञासा कोऽहमासमित्यादिरूपा भाष्यमाख्येयात् तस्याभयशोकप्रवृत्तिति
वत्पाघनर्थहेतोर्निवृत्तिरेवायमोक्षो भवतीत्यर्थः स्वर्गनरकमोक्षादिभिर्हि विचित्ररूपता चित्तस्यै
व भवति न तु स्वैकरूपचिन्मात्रस्य न मनस्येव धारणोत्पत्तिर्नैवात्मभावचितोदेती ति भावः तथा

चश्रुतिः एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमितीत्यादिः तदेतदुक्तं पं
चशिखाचार्यैः एवंस्तु मोक्षो ज्ञानेनेति अत्रादौ भाष्यकार आत्मभावभावनामेव सकारणां प्र
तिपादयति यस्येत्यादिना तत्रापीति पुरुष इति शेषः विशेषदर्शनबीजमिति आत्मभावजि
ज्ञासाद्वारेति शेषः इत्यनुमीयत इति विविदिषंतीति यज्ञेनेत्यादिश्रुतेः पापक्षयाच्छुद्धमतिर्वो
धेति ज्ञानमनमयमिति तिसृतेश्चेति शेषः तस्य यथोक्तकर्मवतः स्वाभाविकी ऐहिकसाधनानि
रपेक्षा तथा च यथोक्तं कर्म या आत्मभावभावनायाः कारणं तत्र च नैहिकत्वनियम इत्याशयात् ऐ
हिकसाधनशून्यस्य प्राक्तनतपोविधकर्माभावे च सा भावना नोदेति प्रस्तुतदेहाद्यात्मतापन्ने
वरुचिर्भवतीत्यत्र पूर्वाचार्यवाक्यं प्रमाणयति यस्याभावादिति यस्य कर्मणो भावादिदं वक्ष्यमा
णं फलमुक्तं पूर्वैवाचार्यैः तदेवाह स्वभावमिति स्वभावमात्मभावं यत्कारणं आसत्कर्म अस्यानंप
वेपक्षेति यदेहाद्यात्मतापन्नेवरुचिः श्रद्धातिशयो भवति अरुचिश्चातत्वनिर्णय इत्यर्थः आ
त्मभावनायाः कारणमुक्त्वा स्वरूपमाह तत्रात्मेति कोहमासं किं नरादिरूप आसं कथमासं स्वखे
तदुखेन वासं किंस्विदिदं इदं वर्तमानं मपि मम स्वरूपं किं देहो वा मन आदिर्वा कथंस्विदिदं केन
वा प्रकारेण पुण्यपापादिनातिष्ठतीत्यादिरर्थः केमविष्याम इत्यादेः कत्वर एवं बहुवचनं तथा च य

यजिज्ञासोत्थमयादिति वक्तपि विशेषदर्शनं पुरुषः संपादयति सैवात्मभावनेत्यर्थः आत्मभा
वनामशेषतो व्याख्याय सूत्रवाक्यार्थमाह सात्विति विशेषदर्शनात् कुतो निवृत्तिरिति प्रश्ने सो
त्तरमाह चित्तस्येति एष भावरूपो विचित्रः परिणामः आत्मनो न भवति किं तु चित्तस्यैवाविद्या
जन्यत्वात् अविद्यापाश्रचितधर्मत्वात् पुरुषस्त्वविद्याशून्यत्वाच्छुद्धः पापपुण्यविवर्जितः
तत आश्रचितधर्मैर्जन्ममरणसुखदुःखादिभिरपरामृष्टः कदाप्यसंबद्ध इति तत इति विशे
षदर्शनादस्याकुशलस्यात्मभावनानिवर्तत इत्यर्थः तन्निवृत्तेः स्वर्गनरकादिविषयरागद्वेषादिनि
वृत्तिः फलमिति तस्य विशेषदर्शिनो लक्षणं संप्रज्ञातयोगं वक्ष्यमाणमन्तेष्वकारणमुत्तमा
ह तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तं कैवल्ये प्राग्भारेण पतत् कैवल्यप्राग्भारं कैवल्याभिमु
खमिति यावत् व्याचष्टे तदानीमिति तदानीं विशेषदर्शनावस्थायां स्वर्गादिवैराग्यवशात् चि
त्तमन्यथा भवतीत्यनेनान्वयः विषयप्राग्भारं विषयाभिमुखं अज्ञाननिम्नं अज्ञानमार्गसंचारि
एवमुत्तरत्र नवानेन कोमलकं कर्कवत् उत्पन्नमात्रेण विशेषदर्शनेनैव कृतकृत्यता भवति प
र्वसंस्कारवशात् अंतरा अंतरा मोहात्मानां भवद्दुःखबीजवृत्तीनामनुवृत्तेरित्याह तच्छिद्रेषु प्रत्यया
न्तराणि संस्कारेभ्यः व्याचष्टे विवेकेति विवेकप्रत्ययनिम्नस्य तस्य विवरणं सत्त्वेत्यादि सत्त्वपुरुषा

ममतामात्रेणप्रवहणशीलस्येत्यर्थः तच्छिद्रेषुव्युत्थानेषुअविद्यारूपाणांप्रत्ययानामाकारअस्मी
त्याद्याअप्रदर्शिताः अस्मीति देवमनुष्यादिरूपोऽस्मीत्यर्थः केवलास्मितायाः संप्रज्ञातयोगेपि
सत्वात् क्षीयमाणेभ्योबीजेभ्यः क्षीयमाणबीजेभ्यः एतस्यविशेष्यंपूर्वसंस्कारेभ्यइति ननु
ज्ञानेजातेपिचेत् पूर्वसंस्कारवशाद्व्युत्थानदशायांकदाचिदविद्योदयः कथंतर्हिसंप्रज्ञात
प्रवाहेणापि अविद्यानिवृत्तिःस्यात्तत्राह हानमेषांक्लेशवदुक्तं एषांसंस्काराणांहानंदाहःस्व
कार्यासामर्थ्यंक्लेशानामिवोक्तंपूर्वाचार्यैरित्यर्थः ध्यानहेयास्तद्वृत्तयः तेप्रतिप्रसवहेयाःसू
क्ष्मा इतिसूत्राभ्यांयथास्थूलसूक्ष्मक्लेशानांतत्त्वज्ञानचित्तलयाभ्यांदाहनाशौप्रोक्तौतथा
तत्संस्काराणामपीतिफलितार्थः एतदेवव्याचष्टेयथेति यथासंप्रज्ञातयोगिनोव्युत्थान
दशायांपूर्वसंस्कारजाःक्लेशाअविद्यादिवृत्तयोदग्धबीजतस्याः सत्योनसंस्कारंजनयंति
तथापूर्वसंस्काराअपिसंप्रज्ञातपरंपराजनितेननिष्ठारूपेणज्ञानाग्निनादग्धबीजतस्याः
संतः प्रत्ययंनप्रसुवतइत्यर्थः पूर्वसंस्कारः प्राचीनःक्लेशसंस्कारः ज्ञानकालेज्ञानसंस्कारेण
प्रतिबंधात्संस्कारोनोत्पद्यनरूपाणयेनपूर्ववदंअनन्तदाननाशोपिक्लेशवदुपलक्षितइति
नन्वेकदाचेदहंममजन्ममरणदुःखादिकंनास्तीतितर्हिकदाचिदंतरांतरामोहेपितज्ज्ञानार्थेप्रवृत्ति

वृत्तिर्नोपपद्यतेमोहस्यापिचित्तधर्मतायाः पूर्वंनिश्चितत्वादितिचेन्न चित्तस्यमोहसत्वेपुनश्चित
स्यभवदुःखमित्यापुरुषस्यदुःखभोगःस्यादित्याशयेनैवज्ञानिभिरपिचित्तस्यासंततोमोहनिव
र्त्यैवयतनात् भोगश्चविभाजनस्यैवेत्यसकृदावेदितमिति ननुसंस्कारत्वाविशेषात्तत्त्वज्ञानसंस्का
रोऽपिकिंसंप्रज्ञातनिरुपायनश्यंतिनेत्याह ज्ञानसंस्कारास्त्विति अविरुद्धत्वादितिशेषः तर्हिक
थंतेषांनाशःस्यादितितत्राह इतितच्छिद्रेष्वितिइत्यधिकारसमाप्तौचित्तेनसहैवतेषांनाशात
त्राधनचिंतानास्तीत्यर्थः आत्मसमुद्रकृत्यंत्वसंप्रज्ञातेनापितन्नाशश्चिंतितइतिभावः उक्त
स्यसंस्कारहानस्यप्रकारमाहसूत्रद्वयेन प्रसंख्यानेप्यकुसीदस्यसर्वथाविवेकख्यातेर्धर्ममेघः
समाधिः प्रसंख्यानंविवेकसाक्षात्कारः तत्रापियोऽकुसीदः कुषीवलवत् सर्वभावाधिष्ठातृत्वा
दिरूपांसिद्धिंनयाचतेतस्ययोगविघ्नाभावेनसर्वथानिरंतरविवेकख्यातेरुदयाद्धर्ममेघना
मासंप्रज्ञातयोगस्यपराकाष्ठाभवतीत्यर्थः तदेतद्व्याचष्टे यदेतितत्रापितत्फलेपिसर्वथाश
ब्दार्थमाह संस्कारेति संस्काररूपस्यबीजस्यक्रमेणक्षयादाहाद्युपमानाद्वेतोः प्रत्ययांतराणि
अविद्यांतराणियदानजायंतेतदाधर्ममेघसमाधिरित्यर्थः क्लेशकर्मादीन्नोतिःशेषेणाम्रलयं
धर्मंमेहतिवर्षतीतिधर्ममेघः अस्यसमाधेर्धर्मद्वारकफलंदर्शयन्योगमोक्षमाह ततःक्लेशकर्मेति

वृत्तिःनिवृत्तिर्देहसमाप्तिः आचष्टे तद्भावादिति समूलकाषमिति मूलं क्लेशसंस्कारास्तैः सहक्ले
शाख्याभिनिवेशान्तिरिक्ताच्छिन्ना भवंति अत्र शावककर्माशयाश्च प्रारब्धातिरिक्ताः क्लेशाख्यमूलेन
सहहताः स्फुरितो न पुनरुत्पत्स्यन्त इत्यर्थः ननु दुःखांसंतनिवृत्तिरेव मोक्षो जीवन्नाश्चावस्थादुःखं न
हेवैसरणेरस्याप्रियाप्रिययोरपहतिरस्तीत्यभ्रतेः तत्कथं जीवन्मुक्तिरित्याशयेन पृच्छति कस्मा
दिति उत्तरं यस्मादिति तथा च दुःखनिदानानां तेषां छेदस्य गौणमुक्तित्वमिति भावः अत्र प्रमाण
मनुपलब्धिमाह नहीति तदुक्तं गौतमाचार्यैः वीतरागजन्मादर्शनादिति अयमपि मोक्षः पंचशि
खाचार्यैरुक्तो द्वितीयो रागसंक्षयादिति अत्र जीवन्मुक्तस्य सवासनक्लेशाभावं तदा हनिर्णयात्
आधुनिकवेदान्तिनामविद्यालेशस्वीकारोऽविद्यामूलकत्वेतिस्मर्तव्यं इदानीं मुक्तस्य जीव
न्मुक्तस्य परमं मुक्तिप्रकारमाह सूत्रद्वयेन तदा सर्वावरणमलापेतस्य ज्ञानस्यानंत्यात् ज्ञेय
मल्पं तदा तस्यां जीवन्मुक्तावस्थायां क्लेशकर्मणो ज्ञानावरकमलयोरपगमेन हेतुना ज्ञानस्य
सत्वप्रकाशस्यानंत्यादिविभुत्वात् ज्ञेयं प्रकाश्यमल्पं तदपेक्षयाभवतीत्यर्थः यद्यपि पंचविं
शतितत्वातिरिक्तमन्यदपि वस्तु तिष्ठेत् तदा तदपि प्रकृष्येत ज्ञेयस्यैवतत्त्वसत्तयास्य प्र
काश्यतेन तु सत्वस्यासत्तयेति भावः तदेतदाचष्टे सर्वैरिति आनंत्यं स्वभावतो व्यापकं ज्ञानस्य

२१

त्वमिति भूतसत्वव्यावर्तनायोक्तं प्रवर्तितमिति अस्य विवरणं सुघातितमिति शेषं भाष्यं सुग
मं अत्र तमोऽभिभवनानंतरमेव वस्तुस्फूर्तिवचनाद्वृत्तेस्तमोनाशकत्वं आधुनिकवेदान्तिनामप
सिद्धान्त इति स्मर्तव्यं एतादृशं सर्वज्ञत्वं लोकेऽतीवाश्चर्यमं धमणिवेधादि वदिति वौद्धोपहास
मखेन दर्शयति यत्रेदमिति यत्रस्तु ज्ञानामपि जीवानां योगवलादेतादृशत्वं स्याद्वेद्यं वौद्धैरिदं द
ष्टांतजातमसंभवदर्शनायोक्तमुपहसद्भिरित्यर्थः किं तत्तदाह अंधइत्यादि आविध्यत्सच्छिद्र
मकरोत् तं मणिमंगुलिहीनोऽवावयत् ग्रथितवान् तं मणिं ग्रीवा शून्यः प्रत्यमुंचत कंठा
भरणमकरोत् तं कंठाभरणं जिह्वाशून्यस्तुतवानित्यर्थः दृष्टान्तचतुष्टयस्यायमाशयः
अनाद्यविद्यामूढवित्तैः सांख्याद्यभिमतसूक्ष्मार्थानामवधारणरूपं वेधनमेवारोपणं
ततश्च तस्य सूक्ष्मार्थस्याविरलवृत्तिसन्तानसूत्रेण ग्रथनमप्यशंसतनोऽपि सर्वथाविवेक
ख्यातिरतीवाशक्या ततश्च नादृशचित्तस्य परिपूर्णज्ञानत्वेन स्तुतिरप्यशक्येति आप्तैस्त
स्तुतिस्मृतिप्रामाण्येनैत [illegible] मत्तरं दृष्टमिति भावः यथोक्तस्यानंत्यात् परवैराग्योदयेनासंप्रज्ञा
तपरंपराजन्यं प्रारब्धभोगसमाप्तिजन्यं वा ततीयं मुख्यमोक्षमाह ततः कृतार्थानां परिणाम
क्रमसमाप्तिर्गुणानां ततो धर्ममेघोदयात् क्लेशकर्मनिवृत्त्या ज्ञानस्यानंत्ये सति परवैराग्य

णामक्रमसमाप्तिर्गुणानां ततो धर्ममेघोदयात् पुरुषार्थसमाप्त्या कृतार्थान् पुरुषान् प्र॰
तिगुणानां सत्त्वादीनां परिणामक्रमः समाप्यते कृतार्थे पुरुषाणां भोगोपवर्गः परिणामः
पुनर्न भवतीत्यर्थः क्रमश्चाविरलाधारेषु तरस्सूत्रेण व्याख्यास्यते तत इति पदं व्याचष्टे
तस्य धर्ममेघस्योदयादिति कृतार्थानामिति पुरुषाणामिति शेषः तथा च कृतार्थं पुरु
षं प्रति को गुणानां परिणामक्रमः समाप्यत इत्यर्थः न तु गुणानां अखिलस्य परिणाम
क्रमस्य समाप्तिरत्रोक्ता कृतार्थं प्रति नष्टमप्यनष्टमित्युत्तरसूत्रादिति समाप्तौ हेतुमा
ह नहीति नहि सत्त्वादयो गुणाऽकृतभोगा यतः अतएव समाप्तक्रमाः न पुरुषं प्रति क्ष
णमप्यवस्थातुं समर्थाः स्थितिहेतुपुरुषार्थाभावादिति यदि च सूत्रभाष्ययोर्गुणशब्दे
नाचेतनबुध्यादपरापरपुरुषोपकरणान्युच्यंते तदा यथाश्रुतमेव व्याख्येयं अत्राचेतना
नां चेतनार्थतया चेतनाधीनसत्ता वेदान्तिभिरुच्यमाना सिद्धेति स्मर्तव्यं इयमपि तत्तो
पामुक्तिः पंचशिखाचार्यैरुक्ता कृत्स्नक्षयात्तीपस्कव्याख्यातं मोक्षलक्षणमिति अतएव त
त्त्वसमाससूत्रं त्रिविधो मोक्ष इति इदमत्रावधेयं पदेनाभ्यां सूत्राभ्यां ज्ञानस्यानंत्यात्सा
र्वज्ञ्यात् मोक्ष उच्यत इदं मुख्यकल्पाभिप्रायेणैव उक्तं वैराग्यादेव सर्वेन मोक्षसिद्धेः नतु

सार्वज्ञ्यादिकं विना मोक्षो न भवतीत्याशयेन यतः सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति सू
त्रे भाष्यकृता ईश्वरस्यानीश्वरप्राप्तविवेकज्ञानस्येतरस्य चेत्यनेनासर्वज्ञस्यापि अभिमा
ननिवृत्तिमात्रादेव मोक्ष उक्त इति तथा चोक्तं विवेकख्यातिरविप्लवा हानोपाय इति सति
मूले तद्विपाको जात्यायुर्भोगा इति च संसारबीजं हि अनात्मन्यात्मरूपाविद्या रागद्वेषधर्मा
धर्मतद्विपाकादिहेतुत्वात् सा चेद्विवेकख्यात्या नाशिता तर्हि तत एव संसारोच्छेदः सार्वज्ञ्या
द्यपेक्षा नास्तीति तथा च विष्णुपुराणे अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः अवि
द्यातरुसंभूतिबीजमेतद्द्विधा स्थितमिति ननु परिणामसमाप्तिरिति वक्तव्ये क्रमशब्दः
परिणामानां प्रतिक्षणमुत्पादविनाशकथनेन वैराग्योत्पादनाय प्रयुक्तः स चायमर्थः
कथं क्रमशब्दाल्लभ्यते क्रमशब्दस्य पौर्वापर्यमात्रवाचित्वादित्याशयेन क्रमशब्दार्थं पृच्छ
ति अथेति अयं एतत् सूत्रीयः अत्र च प्रस्तुतं सूत्रं क्षणप्रतियोगी परिणामापरान्तनिर्ग्रा
ह्यः क्रमः क्षणप्रतियोगि क्षणस्यावसरस्य विरोधि क्षणेनाव्यवहित इति यावत् एवंरू
पोऽत्र क्रमो विवक्षितो न तु पौर्वापर्यमात्रमिति विशेष्यदलार्थः परिणामश्च पूर्वधर्मापा
ये धर्मान्तरोत्पत्तिरित्यक्रमे घटे दृष्टे च क्रमे प्रमाणप्रदर्शनपरं परिणामापरान्तनिर्ग्राह्यइ

तिविशेषणं भाष्यकारस्तु क्षणप्रतियोगीत्यस्य पर्यवसितमर्थमाह क्षणानंतर्यात्मेति क्र
मइत्यनंतरेणान्वयः क्षणानंतर्यात्मा क्षणानंतर्यधर्मकः आनंतर्यं चाव्यवधानेन क्रमस्य
पूर्वापरीभावः तथा च क्षणाव्यवहिता परिणामधारा पूर्वसूत्रे परिणामक्रमशब्दार्थः अ
नवच्छिन्नधारायाः प्रमाणप्रदर्शकं सूत्रावयवं व्याचष्टे परिणामस्येति पूर्वोत्तरापेक्षया वस्त्रा
दिरूपस्य परिणामस्यापरांतेन चरमावस्थया अनवच्छिन्नपरिणामधारा अनुमीयत इत्य
र्थः अत्र युक्तिमाह नहीति अननुभूतो यः क्रमो यैरेवं भूताः क्षणा यस्याः सा
ऽननुभूतक्रमक्षणा पुराणता नवा च वस्त्रस्यांतकाले दृश्यमाना पुराणता नस्यान्ननुभू
तक्रमक्षणा संभवतीत्यर्थः अतः पुराणतायाः सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलादिरूपे
ःपरिणामक्षणेष्वविरलः क्रमोऽनुमीयत इति नन्वपरांतेनानित्येष्वेव क्रमः सिद्धो नतु प्रधा
नेपि तस्य चरमावस्थाया अभावादतो गुणानां परिणामक्रमे किं प्रमाणं येन तत्समाप्तिः
पूर्वसूत्रोक्ता घटेत तत्राह नित्येषु चेति नित्येषु त्वनो परांताभावेपि विकाराणामपरांतैरेवम
ति क्षणपरिणामो दृष्टोनुमित इत्यर्थः धर्मिविक्रियैवैषा धर्मद्वारेण प्रपंच्यत इति प्रागुक्तत्वा
दिति भावः ननु परिणामक्रमांगीकारे नित्यत्वहानिरित्याशंकायामाह द्वयी चेति तथा च परि

2
२९

णामित्वेन कूटस्थनित्यत्वं विरुध्यते तेन नित्यतासामान्यमित्याशयः नित्यस्य सामान्यलक्षणमाह यस्मिन्नि
ति तत्वं न विहन्यतिस्वरूपं नातो न भवति अत्र चातीतताशून्यत्वमात्रं नित्यस्य सामान्यलक्षणमिति
बोध्यं तच्चोभयसाधारणमित्याह उभयस्येति गुणपुरुषयोरित्यर्थः पूर्वसूत्रे परिणामशब्देन व्याव
र्त्यं स्वरूपास्तितां क्रमं दर्शयितुं क्रमसामान्यं विभजते तत्रेति बुध्यादिषु महदादिषु लब्धपर्यवसा
नो विनाशित्वादित्यर्थः गुणेष्विति अत्रापि परिणामापरांतनिर्ग्राह्य इत्यन्वेति परिणामस्य क्रमा
दित्याख्यायततोयं स्वरूपास्तितायाः क्रमसंकीर्णोदाहरणेनाह कूटस्थेति मुक्तानां चिता
विवेकेन कदाचित्परिणामाध्यासोपि स्यादित्याशयेन स्वरूपमात्रप्रतिष्ठेत्युक्तं तस्यैव स्वरूपा
ख्यानं मुक्तपुरुषेष्विति स्वरूपास्तिता वर्तते न तु क्षणमात्रं तत्र क्रमश्च पुरुषेष्वप्यस्ति इदानीमपि
त्यपक्षात्स्यास्यतीति व्यवहारात् अन्यथा सर्वकालसंबंधरूपनित्यतानुपपत्तेः अतस्तत्रा
प्यलब्धपर्यवसान इति क्रम इति शेषः नन्वेवमात्मनोपि क्रमास्तिताक्रमस्वीकारे षड्भावविकारश्रु
त्यवसिद्धान्तविरोध इत्याशंकां परिहरति शब्दपृष्ठेनेति स च क्रमोऽस्त्याख्या क्रियामाश्रित्यैव ण
व्यपदेन शब्दानुसारिणा व्यवहारेण कल्पितो भवति न तज्जन्मोत्तरकालीनमस्तितापरिणाममा
दायेत्यर्थः तथा चास्तिताख्यक्रियैव षड्भावविकारांतर्गता पुरुषे निषिद्धेत्याशयः सा च क्रियापि रूपिण

स्तितावद्विहेतुत्ववपचयोपचयरूपेति विभागः गुणेष्वलब्धपर्यवसानः परिणाम इति कृत्वाक्षिपति
अथेति अस्य संसारस्य जन्मादिपरिणामजातस्य स्थित्यागत्या च गुणेषु वर्तमानस्य सृष्टिप्रलय
प्रवाहेणावस्थितस्य क्रमसमाप्तिरस्ति न वा आद्ये अलब्धपर्यवसानो नास्ति विरोधः अंत्ये परिणाम
क्रमसमाप्तिर्गुणानामिति पर्यवसन्न विरोधः तथा भूयश्चान्ते विश्वमायानिवृत्तिरिति श्रुतिवि
रोधश्चेति पर्यवसन्न कृतार्थं पुरुषं प्रत्येव परिणामक्रमसमाप्तिर्गुणानामथ कानन्त्यसामान्यतद्रूपा
शये न समाधत्ते अवचनीयमेतदिति प्रास्तुत एन हेमेतन्मन्दबुद्धवचनमित्यर्थः उक्तप्रश्नस्योत्तरान
र्हत्वं प्रतिपादयितुं आदावुत्तरार्हद्विविधप्रश्नं दर्शयति अस्ति प्रश्न इति सर्वो जातो मरिष्यतीति
एकान्तवचनीयः अविभज्यवचनीयः प्रश्नः अस्य च ओं भो इति प्रत्युत्तरं सत्यं भो इत्यर्थः ओं भो
इति पाठस्तु समीचीनः अविभज्यवचनीयं प्रश्नं प्रदर्श्य विभज्यवचनीयं प्रश्नान्तरं प्रदर्शयति
अथ सर्वो मृत्वा जनिष्यतीति विभागेन वचनं प्रत्युत्तरं दर्शयति प्रत्युदितेति विभज्यवचनीय
प्रश्नं लौकिकमपि दर्शयति तथा मनुष्येति उक्तप्रश्नस्तु प्रश्नान्तराक्रान्त एवावचनीय इ
त्याह अयं त्विति अयमित्युक्तं विशिष्याह संसार इति अवचनीयत्वमेवोपपादयति कुशल
स्येत्यादिना दोष इत्यंते न कुशलस्य कुशलेतरगुणानुगतस्य संसारक्रमस्य समाप्तिरस्ति नेतरस्मिन्निम

220
२२१

तो गुणस्तृष्टिप्रलयप्रवाहोच्छेदानुच्छेदाभ्यां तदवधारणे दोषः आद्ये वाद्यो न्त्येकस्यापि मुक्तिर्नास्ती
ति शिष्यमोहापत्तिरित्यर्थः अस्यापि प्रश्नस्य विकल्प्येतरं देयमित्याह तस्मादिति तस्मादुत्तरदा
नार्थमादौ विकल्पेन व्याख्येयोयं प्रश्न इत्यर्थः तथा च यदि गुणानां सर्वथा समुच्छेदः पृच्छ्यते तदानी
न्नास्त्येव वक्तव्यं अनादिर्भगवान् कालो नान्तोस्य द्विज विद्यते अव्युच्छिन्नास्तु तस्त्वेते सर्गस्थितं
तसंयमा इत्यादिवाक्यशतेभ्यः सृष्टिप्रवाहस्यानादित्ववदनन्तत्वस्यापि सिद्धेः शुष्कतर्कस्याप्र
योजकत्वात् अन्यथा संसारहेतुदृष्टस्य सर्वस्यैव सादित्वात्संसारस्यानादित्वमपि तर्कविरोधे
न न सिध्येत् भूयश्चान्ते विश्वमायानिवृत्तिश्चेति श्रुतिश्च मायाख्यप्रकृतेः प्रलये व्यापारो
परमात्मानिवृत्तिमेव वदति एतेन सर्वमुक्तिरप्रमाणिकेति सिद्धं यदि पुरुषस्य संसारोच्छेदः
पृच्छ्यते तदा कुशलस्यास्ति नेतरस्येति प्रश्नवाक्यं विकल्प्य प्रतिवचनं संभवतीति उत्तरसूत्रम
वतारयति गुणाधिकार इति गुणाधिकारः परिणामविशेषस्तत्क्रमपरिसमाप्तौ कैवल्यमिति
ततः कृतार्थानामित्यादिसूत्रेणानायर्थेतः प्रोक्तं तस्य कैवल्यस्य रूपमवधार्यत इत्यर्थः पुरु
षार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति कृतकर्तव्यतया पुरु
षार्थशून्यानां गुणानां पुरुषोपकरणानां लिंगशरीरात्मकानां प्रतिप्रसवः स्वकारणेऽस्तंतविल

यः सत्वबुद्धेः कैवल्यं रागतद्वैचप्रधानस्यापि तानि पुरुषं प्रति कैवल्यमुच्यते तेन पुरुषेण सह पुन
रसंयोगात् यात धर्माधर्म्ये भेदाच्चितिशक्तिः स्वरूपिणी स्वरूपप्रतिष्ठा बुद्धिसत्वोपाधिकरूपश
न्यतारूपा जपायापेस्फटिकस्य रूपप्रतिष्ठावत् सा पुरुषस्य कैवल्यमित्यर्थः परस्परवियोगो हि उ
पाध्युपाधिमतोरुभयोरेव कैवल्यतया व्याकृता भवति तेचोभे एव दुःखभोगनिवृत्या पुरुषा
र्थसाधने भवतः इति द्वयोरेव कैवल्यं लक्षितं तयोः प्राधान्यं कैवल्यं पुरुषस्योपचरितमित्युक्तं सांख्य
कारिकायां तस्मान्न बध्यते नापि मुच्यते नापि संसरति पुरुषः संसरति बध्यते मुच्यते च नानाश्र
या प्रकृतिरिति ननु स्वरूपप्रतिष्ठारूपं कैवल्यं दुःखभोगसंतननिवृत्तिरूपो वा पुरुषार्थः पुरुषस्य
तत्र निराकृतः मोक्षस्यानुमान्नतिष्ठत्वे पुरुषार्थत्वे मोक्षार्थप्रवृत्त्यनुपपत्तेः पुरुषाः र्थेति करणानां
प्रवृत्तिरिति इति शब्दः शास्त्रसमाप्तिसूचनार्थः भाष्ये कार्यकारणात्मना निनिकार्यकारणभावा
पन्नानां महदादिसूक्ष्मभूतपर्यन्तानां लिंगशरीरघटकानामित्यर्थः न तु कार्यमात्रस्य स्थूलशरीरं
तत्सत्वेपि कैवल्योद्यादिति ननु स्वस्य स्वप्रतिष्ठत्वानुपपत्त्या कथं स्वप्रतिष्ठत्वं तत्राह स्वरूपे
ति पुरुषस्य पुनर्बुद्धिसत्वासंबंधात् केवला चितिशक्तिरेव स्वरूपप्रतिष्ठेत्यर्थः तस्या इति स्वरू
पप्रतिष्ठायाः सदैवावस्थानं पुनरप्रसवः कैवल्यं द्वितीयमिति शेषः योगग्रंथसहस्राणां सर्वोप 229 २२०

B.9
26 -

यः सबुद्धेः कैवल्यं तत एव च प्रधानस्यापि तत्रानि पुरुषं प्रति कैवल्यमुच्यते तेन पुरुषेण सह पुन
रसंयोगात् यातधर्माधर्म्ये भेदात्ति चितिशक्तिः स्वरूपिणी स्वरूपप्रतिष्ठा बुद्धिसत्वोपाधिकरूपश
न्यताद्रूपाज्जपापायेस्फटिकस्य रूपप्रतिष्ठावत् सा पुरुषस्य कैवल्यमित्यर्थः परस्परवियोगो हि द्व
याध्युपाधिमतो रुभयोरेव कैवल्यताशाङ्किता भवति ते चोभे एव दुःखभोगनिवृत्त्याख्यपुरुषा
र्थसाधने भवत इति द्वयोरेव कैवल्यं लक्षितं तेन मोक्षाख्यं कैवल्यं पुरुषस्योपचरितमित्युक्तं सांख्य
कारिकायां तस्मान्न बध्यते नापि मुच्यते नापि संसरति पुरुषः संसरति बध्यते मुच्यते च नानाश्र
या प्रकृतिरिति न तु स्वरूपप्रतिष्ठारूपं कैवल्यं दुःखभोगात्यन्तनिवृत्तिरूपो वा पुरुषार्थः पुरुषस्य
तत्र निराकृतः मोक्षस्यान्यमात्रनिष्ठत्वे पुरुषार्थत्वे मोक्षार्थप्रवृत्त्यनुपपत्तेः पुरुषार्थे हि करणानां
प्रवृत्तिरिति इति शब्दः शास्त्रसमाप्तिसूचनार्थः भाष्ये कार्यकारणात्मनामिति कार्यकारणभावा
पन्नानां महदादि सूक्ष्मभूतपर्यन्तानां लिंगशरीरघटकानामित्यर्थः न तु कार्यमात्रस्य स्थूलशरीरं
तत्सत्वेपि कैवल्योदयादिति ननु स्वस्य स्वप्रतिष्ठत्वानुपपत्त्या कथं स्वप्रतिष्ठत्वं तत्राह स्वरूपे
ति पुरुषस्य पुनर्बुद्धिसत्वासंबन्धात् केवला चितिशक्तिरेव स्वरूपप्रतिष्ठेत्यर्थः तस्याः इति स्वरू
पप्रतिष्ठायाः सदैवावस्थानं न पुनः प्रभवः कैवल्यं द्वितीयमिति शेषः योगग्रंथसहस्राणां सर्वोप २२०

पनिषदां तथा सतां च यत्नतात्पर्यं सोऽर्थो व्यासेन भाषितः व्याख्यातो भूयया शक्त्या निर्मत्सर
धियामया रातेन प्रीयतामीशो यन्नात्मा सर्वदेहिनां इति श्रीविज्ञानभिक्षुविरचिते पातं
:भा·वार्तिके कैवल्यपादश्चतुर्थः समाप्तः